SRI AUROBINDO C. LIBRARY PONDICHERRY

MEGHADUTAM.

PANDIT NABIN CHANDRA VIDYARATNA,
Senior Prof. of Sanskrit Metropolitan Institution Calcutta.

NEW EDITION.

Published by S. C. Bhattacharjya &co.
Publishers & Booksellers
63, College street Calcutta.

Price—Cloth Rs. 2-4.
Paper Rs. 2.

INTRODUCTION.

I. *Kalidasa* :—

Kalidasa the brightest star in the firmament of Sanskrit poetry flourished during the first half of the sixth century of the Christian era. He was one of the so called nine jems of the prince विक्रमादित्य the great patron of Sanskrit learning according to the time-honored tradition.

धन्वन्तरिः क्षपणकामरसिंह शङ्कुर्
वेतालभट्ट घटकर्पर कालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायाम्
रत्नानि वै वररुचिर्नव विक्रमस्य ॥

The date of the reign of this monarch has been plausibly argued and fixed by our illustrious country-man Mr. R. C. Datta. In his Ancient India he goes on :—"Houen Tsang who came to India in the 7th century, places the reign of शिलादित्य about 580 A. D. and places विक्रमादित्य immediately before शिलादित्य। The historian कल्हण who lived in the 12th century places विक्रमादित्य thirty reigns after कनिष्क who reigned from A. D. 78, and six reigns before दुर्लभवर्द्धन who reigned from 598 A. D. This conclusively fixes the reign of विक्रमादित्य in the sixth century." For further informations on this point see the introduction of our edition of अभिज्ञान शकुन्तलम्।

II. *His works*—Kalidas has been admiringly styled as the "adopted child of the goddess of learning" by the Indians

and almost in every sense this is correct. He wrote the two महाकाव्य's the कुमारसम्भवम् and the रघुवंशम् and they are the best of their kinds. He wrote the मेघदूतम् and this is the master piece in the department of खण्डकाव्य। His dramas three in number (अभिज्ञानशकुन्तलम्, मालविकाग्निमित्र and विक्रमोर्व्वशी are compositions of very high order. For other works the the student is referred to the introduotion of our edition of शकुन्तला।

काव्य is defined as रसात्मकं वाक्यं (or a sentence having रस) again काव्य is devided in two branches दृश्य (dramatic)and श्रव्य (epic). श्रव्य is again subdivided into two divisions गद्यश्रव्य and पद्यश्रव्य, पद्यश्रव्य in its turn is subdivided into three classes महाकाव्य, खण्डकाव्य and कोषकाव्य।

III. The मेघदूतम्। Now it has been said that the मेघदूत is a खण्डकाव्य। A खण्डकाव्य is defined in the साहित्यदर्पण thus "खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि यत्" that is a खण्डकाव्य is partly similar to a portion of a महाकाव्य। The definition of a महाकाव्य runs thus in the said work on Rhetoric :—

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।
सद्वंशः क्षत्रियोवापि धीरोदात्तगुणान्वितः॥
एकवंशभवाभूपाः कुलजा बहवोपिवा।
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते॥

* * * *

आदौ नमस्क्रियाशीर्व्वा वस्तुनिर्द्देश एव वा॥

इत्यादि। साहित्यदर्पण।

As a खण्डकाव्य the मेघदूत possesses no such arrangement as the division of सर्ग but is divided in two parts पूर्व्व and उत्तर मेघदूत।

The रस of the काव्य is विप्रलम्भशृङ्गार which is defined thus "यत्र तु रतिः नाभीष्टमुपैति विप्रलम्भोऽसौ"; the नायक or hero is दिव्य or heavenly by being a देवयोनिः; he belongs to the धीरोदात्त class which is thus defined "अविकत्थनः क्षमावान् अतिगम्भीरो महासत्त्वः। स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः॥" He is also a अनुकूल नायक as "अनुकूल एक निरतः"। The रीति or style of मेघदूत is वैदर्भी; and the प्रसादगुण pervades through the whole of it; the वृत्ति of this खण्डकाव्य is generally कैशिकी॥

That कालिदास derived the main idea of the poem from the हनूमत्सन्देश of रामायण is more than a probable conjecture, as it will be evident from a reference to the 37th stanza of the उत्तरमेघ। This theory was also noticed first by the great commentator मल्लिनाथ। Like the सञ्जीवनी of मल्लिनाथ the मेघदूत has many other commentaries. Those worthy of recognition are the following:—सुबोधा by भरतमल्लिक, मालती by कल्याणमल्ल, सङ्गता by हरगोविन्द, मुक्तावली by रामनाथ, सौदामनी by मकरन्द, तात्पर्यदीपिका by सनातन, सुखबोधिका by महिमसिंहगणि, सुगमान्वयवृत्ति by सुमतिविजय, and the commentaries of वल्लभ, लक्ष्मीनिवास, सरस्वतीतीर्थ: and also the commentaries called मेघलता and सारोद्धारिणी। Of these the सञ्जीवनी of मल्लिनाथ is by far the best of all in point of scholarship and judgment. He precedes all the above commentators and is only preceded by दक्षिणावर्त्त and नाथ only.

The story of the poem. A यक्ष servant of कुवेर neglected his duties towards his master, on account of his excessive fondness for his beloved wife. Highly offended at this कुवेर exiled him in the रामगिरि mountain. Shorn of his supernatural powers through the curse

of his master the यक्ष passed eight months, unaccompanied by his wife, out of a twelvemonth, the period of his banishment, with great difficulty. But at the advent of the rains on the 1st day of आषाढ़ when the clouds are lowering and proceeding towards the north in the direction of Alaka, his favourite abode, he, though a hero of the धीरोदात्त class, loses all control over himself and like one affected with insanity, solicits humbly a cloud to convey his message to his beloved wife at home. Then the यक्ष informs the cloud of the route by which the cloud should proceed, and gives descriptions of almost all the noted mountains, rivers, cities, shrines &c. from the Vindhya ranges to the Himalayas, which should fall in his way. Then the यक्ष describes अलका and his own abode there and lastly the supposed condition of his beloved wife in the state of separation (विरहावस्था)। In these delineations our poet has given proof of so majestic richness of fancy and the very charming expressions of poetic imaginations that as the author of मेघदूत alone he deserves the highest place among the immortal bards of the world.

The fancied route of the cloud—Starting from the रामगिरि the cloud should cross over a plateau (मालक्षेत्र) (पूर्व्वमेघ १६) then it should arrive at the mountain of आम्रकूट *(Amarkantak)* (पूर्व्व १७), crossing आम्रकूट it should reach the river रेवा (नर्म्मदा) (पूर्व्व १८), then through various forests and fields it should get the region of दशार्ण (the modern district of *Chhetisgarrha*) (पूर्व्व २३) with its capital विदिशा (the modern Bhilsa) situated on the river वेत्रावती (the modern Betwa) (पूर्व्व २४), taking a short rest on the नीचैः hill (पूर्व्व

२५) it should reach the river वननदी (perhaps *Parbetty*) (पूर्व्व २६) then the river निर्विन्ध्या (पू. २८) and the stream सिन्धु (पू. २९) one after another, then entering the province of अवन्ती it should reach the chief city विशाला or उज्जयिनी (modern *Oujein*) on the river शिप्रा (पू. ३१) attending with devotion the evening worship of चण्डीश्वर (महाकाल) there (पू. ३३—३६) it should cross the river गम्भीरा (पू. ४०) and reach देवगिरि (*Dewaghur*) (पू. ४२)। visiting the temple of स्कन्द there it should cross the river चर्म्मण्वती (modern *Chumbal*) (पू. ४५) and enter into the province of दशपुर the capital of the famous रन्तिदेव (modern *Rantampore*) (पू. ४७) Thence it should arrive at कुरुक्षेत्र (modern *Thanes war*) in the province of ब्रह्मावर्त्त (पू. ४८). After that drinking the water of the river सरस्वती it should reach कनखल (modern *Hardwar*) (पू. ५०) and then aseending the *Himalayas* it should circumambulate the चरणन्यास or foot print of शिव (पू. ५५) After that passing through the क्रौञ्चरन्ध्र (पू. ५७) it should reach the mount कैलास (पू. ५८). There visiting the मानस lake it should finally arrive at अलका the capital of कुवेर and its place of destination in which lies the abode of the separated यक्ष ।

Taking the मेघदूत as the prototype a host of writers has essayed to compose poems of the like nature which fall far short of the pattern. Amongst them the following खण्डकाव्य's are generally noticed—कोकिलदूत, हंसदूत, पदाङ्कदूत उद्धवसन्देश and चातकाष्टक। In none of these however, the chaste style, the fertility of imagination, the harmonious flow of the happiest expression, the perfectly natural tenderness and

delicacy of feeling, the admirable versatility and the profundity of learning of *Kalidasa* are to be met with.

APPENDIX.

The following stanzas which occur in the पूर्व्वमेघ are considered spurious and not commented upon by Mallinath, are added here:—

After the 17th stanza—

अध्वक्लान्तं प्रतिमुखगतं सानुमानाम्रकूट-
स्तुङ्गेन त्वां जलद शिरसा वक्ष्यति श्लाघमानः ।
आसारेण त्वमपि शमयेस्तस्य नैदाघमग्निं
सद्भावार्द्रः फलति नचिरेणोपकारो महत्सु ॥

After the 21st stanza—]

अम्भोबिन्दुग्रहणरभसांश्चातकान् वीक्षमाणाः
श्रेणीभूताः परिगणनया निर्दिशन्तो बलाकाः ।
त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः
सोत्कम्पानि प्रियसहचरीसम्भ्रमालिङ्गितानि ॥

After the 30th stanza—

हारांस्तारांस्तरलगुटिकान् कोटिशः शङ्खशुक्तीः
शष्पश्यामान्मरकतमणीनुन्मयूखप्ररोहान् ।
दृष्ट्वा यस्यां विपणिरचितान् विद्रुमाणाञ्च भङ्गान्
संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः ॥

प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे
हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः ।
अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भमुत्पाट्य दर्पा-
दित्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञः ॥

पत्रश्यामा दिनकरहयस्पर्द्धिनो यत्र वाहाः
शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तः प्रभेदात् ।
योधाग्रण्यः प्रतिदशमुखं संयुगे तस्थिवांसः
प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः ॥

मेघदूतम् ।

—:•:—

पूर्व्वमेघः ।

कश्चित् कान्ताविरहगुरुणा स्वाधिकारात् प्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्त्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्य्याश्रमेषु ॥१॥

Prose order—स्वाधिकारात् प्रमत्तः कान्ताविरहगुरुणा वर्षभोग्येण भर्त्तुः शापेन अस्तंगमितमहिमा कश्चित् यक्षः जनकतनयास्नानपुण्योदकेषु स्निग्धच्छायातरुषु रामगिर्य्याश्रमेषु वसतिं चक्रे । १ ।

Paraphrase—स्त्रैणत्वात् प्रायशः स्वनियोगं शून्यं कुर्व्वन् यतस्त्वं स्त्रीभोगपरः तत्कार्य्यं व्याहंसि अतः स्त्रीवियुक्तः विध्वस्तदैवशक्तिश्च वर्षमेकं तिष्ठ इत्येवं दुस्तरेण प्रभुशापेन नष्टसामर्थ्यः कश्चित् यक्षः सीतावगाहपवित्रसलिलेषु सान्द्रनेत्रवृक्षेषु चित्रकूटाश्रमेषु अवस्थितिं कृतवान् । १ ।

Change of voice—* प्रमत्तेन * अस्तंगमितमहिम्ना केनचित् यक्षेण वसतिः चक्रे । १ ।

Sanjivani—"आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम्" इति शास्त्रात् काव्यादौ वस्तुनिर्देशात् कथां प्रस्तौति कश्चिदिति । स्वाधिकारात् स्वनियोगात् प्रमत्तोऽनवहितः । "प्रमादोऽनवधानता" इत्यमरः । "जुगुप्साविरामप्रमादार्थाना-

मुपसंख्यानम्" इत्यपादानत्वात्पञ्चमी। अत एव अपराधात् हेतोः। कान्ताविरहेण गुरुणा दुर्भरेण दुस्तरेणेत्यर्थः। "गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे" इति विश्वः। वर्षं संवत्सरं भोग्येन। "कालाध्वनोरत्यन्तसंयोगे" इति द्वितीया। "अत्यन्तसंयोगे च" इति समासः। "कुमति च" इति णत्वम्। भर्तुः स्वामिनः शापेन। अस्तंगमितो महिमा सामर्थ्यं यस्य सः अस्तंगमितमहिमा। अस्तमिति मकारान्तमव्ययम्। तस्य "द्वितीया" इति योगविभागात् समासः। कश्चित् अनिर्दिष्टनामा यक्षो देवयोनिविशेषः। "विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नराः। पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः" इत्यमरः। जनकतनयायाः सीतायाः स्नानैः अवगाहनैः पुण्यानि पवित्राणि उदकानि येषु तेषु। पावनेषु इत्यर्थः। छायाप्रधानाः तरवः छायातरवः। शाकपार्थिवादित्वात् समासः। स्निग्धाः सान्द्राः छायातरवो नमेरुवृक्षा येषु तेषु। वसतियोग्येषु इत्यर्थः। "स्निग्धन्तु मसृणे सान्द्रे" इति। "छायावृक्षो नमेरुः स्यात्" इति च शब्दार्णवे। रामगिरेः चित्रकूटस्य आश्रमेषु वसतिम्। "वहिवस्यर्त्तिभ्यश्च" इत्यौणादिकोऽतिप्रत्ययः। चक्रे कृतवान्। अत्र रसो विप्रलम्भाख्यः शृङ्गारः। तत्रापि उन्मादावस्था। अत एव एकत्रानवस्थानं सूचितम् आश्रमेष्विति बहुवचनेन। सीतां प्रति रामस्य हनूमत्सन्देशं मनसि निधाय मेघसन्देशं कविः कृतवान् इत्याहुः। अत्र काव्ये सर्वत्र मन्दाक्रान्ता-

वृत्तम् । तदुक्तं "मन्दाक्रान्ता जलधिषडगैम्भौ नतौ तादृगुरू चेत्" इति । १ ।

মেঘদূত।

পূর্ব্বভাগ।

কোন এক যক্ষের স্বীয় কর্ত্তব্যে অনবধানতাপ্রযুক্ত তাঁহার প্রভু কুবের তাহাকে মাহাত্মাবিহীন হইয়া এক বৎসরের জন্য নির্ব্বাসনের আদেশ দিয়াছিলেন; স্ত্রৈণ যক্ষ স্বীয় দয়িতার বিচ্ছেদনিবন্ধন নিতান্ত দুঃসহ সেই শাপে দৈবশক্তিবিহীন হইয়া জনকনন্দিনীর ত্রিসন্ধ্যাস্নান-হেতু পুণ্যতোয় ও ছায়াপ্রধান তরুরাজি সুশোভিত রামগিরির আশ্রম-পরম্পরায় অবস্থিতি করিতেছিলেন। ১।

A certain *Yaksha*, (who was) neglectful of his duty and was, in consequence, spoiled of his glories by his lord's curse which was to be endured for a whole year —a curse intolerable by (reason of his) separation from his beloved, took his abode on the *Ramagiri* (Rama-teka) amongst hermitages with dense unbrageous Nameru trees and streams and founts sanctified with the ablutions of Janaka's daughter.—1.

Notes.

1. A *Kavya*, according to the author of the *Kavyadarsa*, should open either with a blessing on the audience or readers (as in अभिज्ञानशकुन्तल; विक्रमोर्व्वशीय &c.), or with the introduction of the subject matter (as in कुमारसम्भव, मेघदूत) or with a salutation to a deity (as in रघुवंश &c.)

2. "खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च" इति दर्पणनिर्द्देशात् मेघदूतं खण्डकाव्यम् । बाहुल्यं भूमिकायां द्रष्टव्यम् ।

3. स्वाधिकारात् प्रमत्तः—स्वस्य निजस्य (of his own) अधिकारः (अधिक्रियते अस्मिन् इति अधि + कृ + अधिकरणे घञ्) नियोगः (duty) तस्मात्; स्वकर्त्तव्यात् इत्यर्थः। प्रमत्तः (प्र + मद् + क्तः) अनवधानः; प्रभुनियोगात् अनवधानः सन्; neglectful of his duty. "स्वमज्ञातिधनाख्यायाम्" इति स्वशब्दस्यात्र सर्व्वनामता। "ध्रुवमपायेऽपादानम्" इत्यत्र "जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्" इति प्रमादार्थात् अपादाने पञ्चमी।

4. कान्ताविरहगुरुणा—कान्तायाः (कम् + क्तः + टाप्।) प्रियतमायाः विरहः विच्छेदः तेन गुरुः (गृ + कुः) सुदुःसहः तेन; प्रियतमायाः विच्छेदेन नितरां दुःसहेन इत्यर्थः। स्त्रैणस्यास्य यक्षस्य प्रियायाः विरहः नितरां दुःसह आसीत् इत्यर्थः। Great, intolerable, severe, on account of the separation from his darling.

5. वर्षभोग्येण—वर्षं वर्षं व्याप्य भोग्यः (भुज् + ण्यत्) स्वीकर्त्तव्यः तेन। "अत्यन्तसंयोगे च" इति द्वितीया तत्पुरुषः। संवत्सरस्वीकर्त्तव्येन; to be endured for one year. Words denoting duration of time and space take द्वितीया विभक्ति। द्वितीयातत्पुरुष समास takes place with words denoting duration of time and space. (कुमति च (VIII. 4. 13.) *i. e.*, कवर्गवति उत्तरपदे नस्य णत्वं स्यात्)।

6. भर्त्तुः शापेन—भर्त्तुः प्रभोः यक्षराजस्य कुवेरस्य शापेन आक्रोशेन। (शाप आक्रोशादव्ययोः इति मेदिनी।) अनुक्ते कर्त्तरि तृतीया। By the curse of his lord. He was the warder of the gate of Kuvera's garden (चैत्ररथ.) But neglectful of his duty, he passed his time in the society of his wife. The result was that Airavata, Indra's elephant, entered the garden, trampled down the flower-beds and devasted it. The lord of the Yakshas, when he came to know of it, was highly enraged and ordered his exile for one year to the Ramagiri, away

from the lovely embrace of his sweet heart. The above is the version of the commentators भरत, सनातन, रामनाथ, हरगोविन्द and कल्यानमल्ल. But according to Vallava and other Jaina commentators, "he had to fetch every morning fresh flowers from the lake Manasa for his lord who used to worship Siva with them. One day it so happened, that, unwilling to leave the lovely embrace of his sweet heart, he fetched the lotus-buds at night. But when his lord was engaged in worshipping Siva, the next morning, he was bitten by a bee hidden underneath the folds of one of the buds. Highly incensed at this, Kuvera ordered him one year's exile." But none of them cites any authority in support of his version.

7. अस्तंगमितमहिमा—अस्तम् गमितः इति अस्तंगमितः (अस्तम् is an indeclinable ending in म्. द्वितीयातत्पुरुषसमास takes place with the indeclinable अस्तम्)। महिमा—(महत्+भावे इमनिच्) माहात्म्यं, (glory.) अस्तंगमितः महिमा यस्य सः (बहुव्रीहिः समासः)।

Whose natural glories were caused to go to their setting. English poetry, too, is equally familiar with this figure. Cf. Shakespear's Henry VIII. Woolsey says there

"Nay then farewell!
I 've touched the highest point of all my greatness,
And from that full meridian of my glory,
I haste now to my setting.'

The Yakshas are demigods and as such they have many supernatural powers. But the curse of his lord deprived the Yaksha of all his natural glories. The construction of

the phrase may be made thus:—महिमा अस्तं गतः (मुद्रा); भर्त्तुः शापः महिमानं अस्तं गमितवान् (छायन्ता)। भर्त्तुः शापेन महिमा अस्तंगतः (कर्म्मणि)। Hence the compounded form भर्त्तुः शापेन अस्तंगमितमहिमा (सापेक्षत्वेऽपि गमकत्वात् समासः।)

8. कश्चित्—अनिर्दिष्टनामा। A certain.

9. यक्षः—is a demi-god of which there exists a class (गण); they have few peculiar attributes and are regarded as the companions or attendants of Kuvera. They are in their turn loved by the अप्सरस्. (the celestial nymphs).

10. जनकतनयास्नानपुण्योदकेषु—जनकस्य जनककुलोत्पन्नस्य सीरध्वजस्य तनया नन्दिनी सीता तस्याः स्नानं जनस्थानवासकाले त्रिसन्ध्याभिषेकः तेन पुण्यं (पू+डुन्यः) पवित्रं उदकं (सलिलं) येषु तेषु; सीताभिषेकपूततोयेषु। अत्र जनकतनयानामोल्लेखात् उदात्तालङ्कारः। Where waters of the streams and fountains had been rendered sacred by Sita's ablutions.

11. स्निग्धच्छायातरुषु—छायाप्रधानाः तरवः इति छायातरवः नमेरुवृक्षाः। ("शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्य उपसंख्यानम्" इति शाकपार्थिवादित्वात् मध्यपदलोपी कर्म्मधारयः समासः।) स्निग्धाः सान्द्राः छायातरवः येषु तेषु; सान्द्रच्छायादायिनमेरुवृक्षेषु। Having thick umbrageous Nameru trees. The two adjectival phrases (जनकतनया &c and स्निग्धच्छाया &c.)describe the beauty of the place, the former indicating the sanctity of it, and the later its natural magnificence.

12. रामगिर्य्याश्रमेषु—रामस्य प्रोषितस्य रामचन्द्रस्य अर्थात् प्रोषितेन रामेण अधिष्ठितस्य गिरेः पर्व्वतस्य आश्रमेषु। रामाधिष्ठितस्य गिरेः आश्रमेषु। According to Mallinatha Ramagiri refers to Mount *Chitrakuta* which is situated in Bundelkhanda. Prof. Wilson's notes on it are: "It may be applied to any of the hills in which

Rama resided during his exile. His first and most celebrated residence was the mount Chitrakuta in Bundelcuand, now known by the name of *Comptah,* and still a place of sanctity and pilgrimage. We find that tradition has assigned to another mountain, a part of the Kimoor range, the honour of affording him and his companions Sita and Lakshmana, a temperary asylum upon his progress to the south and it is consequently held in veneration by the neighbouring villagers. The situation of the scene of the present poem is determined to be the vicinity of Nagpur. The modern name of the mountain Ramagiree is *Ramatec* (marked in the map as *Ramatege.*) It is situated but a short distance to the north of Nagpur and is covered with buildings consecrated to Rama and his associates which receive the periodical visits of numerous devout pilgrims." The sentiment of love (शृङ्गाररस) has two main divisions viz सम्भोग (enjoyment) and विप्रलम्भ (separation). The poet describes here the latter. By separation the Yaksha has lost his natural firmness of mind and as such cannot remain in one place, hence आश्रम has been used in the plural number to denote the successive changes of his abodes. Cf. भट्टि. "आसिष्ट नैकत्र शुचा व्यरंसीत्, क्रतात्क्रतेभ्यः पतिपालभाग्भ्यः" III. 21.

13. वसतिं—[वस्+औणादिकः अतिः । क्तप्रत्यये तु उषितः इति रूपम् । The roots वह् (प्रापणे), वस् (निवासे)and ऋ (गतौ) take अतिः as वहतिः (पवनः) ; वसतिः (वासः) and अरतिः (क्रोधः)] वासं "वसतिः स्यात् स्त्रियां वासे यामिन्याञ्च निकेतने" इति मेदिनी ।

चक्रे— कृतवान् । वासं कृतवान् । यद्यपि "स्वरितञितः कर्त्रभिप्राये

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः ।
आषाढ़स्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीड़ापरिणतगजप्रेक्षणीयं ददर्श ॥ २ ।

क्रियाफले" इति सूत्रात् उभयपदिनां धातूनां कर्तृगामिनि क्रियाफले आत्मनेपदं कार्य्यम्, तथापि नेदं कवीनां सर्व्वत्र समादृतं । तथाच कादम्बर्य्यां "राजा स्वसूनोश्चन्द्रापीड़ इति नाम चकार। शुकनाशोऽपि आत्मजस्य विप्रजनोचितं वैशम्पायन इति नाम चक्रे। Bombay series P 74.

14. Mallinatha says that Kalidasa has taken the idea of this poem *i. e.*, making a cloud his messenger for conveying the news to his wife from the Hanumat Sandesa to Sita in the Ramayana. (For discussion see our Introduction.)

15. चक्रे—करोति, कुरुते ; चकार, चक्रे, अकार्षीत्, अकृत। गमितः—गमयति, गमयामास, अजीगमत् । वसति:—वसति, उवास, वत्स्यति, अवात्सीत् ।

16. Metrical analysis—अत्र सर्व्वत्र मन्दाक्रान्तावृत्तम्। तल्लक्षणं यथा—

"मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम् ।"

	मः	भः	नः	तः
Sch.	— — —	— ⏑ ⏑	⏑ ⏑ ⏑	— — ⏑
	त स्मि न्ना	द्रौ क ति	चि द ब	ला वि प्र

तः	गः गः
— — ⏑	— —
यु क्तः स	का मी

अम्बुधि = 4, रस = 6, and नग = 7 ; = 17 syllables.)

Prose order—तस्मिन् अद्रौ अबलाविप्रयुक्तः ,कनकवलयभ्रंशरिक्तप्रकोष्ठः कामी सः कतिचित् मासान् नीत्वा आषाढ़स्य प्रथमदिवसे आश्लिष्टसानुं वप्रक्रीड़ापरिणतगजप्रेक्षणीयं मेघं ददर्श। २।

Paraphrase—तस्मिन् चित्रकूटे कान्तावियोगविधुरः विरह

दुःखात् कृशतया गलितस्वर्णवलयः अतएव शून्यप्रकोष्ठः कामुकः स यक्षः अष्टौ मासान् यापयित्वा आषाढस्य प्रथमदिने आक्रान्ततटम् उत्खातकेलिप्रवृत्त गजमिव लक्ष्यमाणं कञ्चित् जलदं दृष्टवान् २।

Change of voice—* अबलाविप्रयुक्तेन कनकवलयभ्रंशरिक्तप्रकोष्ठेन कामिना तेन * आश्लिष्टसानुः वप्रक्रीड़ापरिणतगजप्रेक्षणीयः मेघः ददृशे। २।

Sanjivani—तस्मिन्निति। तस्मिन् अद्रौ चित्रकूटाद्रौ। अबलाविप्रयुक्तः कान्ताविरही। कनकस्य वलयः कटकम्। "कटकं वलयोऽस्त्रियाम इत्यमरः। तस्य भ्रंशेन पातेन रिक्तः शून्यः प्रकोष्ठः कूर्परात् अधःप्रदेशो यस्य स तथोक्तः।"कक्षान्तरे प्रकोष्ठः स्यात् प्रकोष्ठः कूर्परादधः"इति शाश्वतः। विरह-दुःखात् कृश इत्यर्थः। कामी कामुकः स यक्षः। कतिचित् मासान् अष्टौ मासान् इत्यर्थः।"शेषान् मासान् गमय चतुरः" इति वक्ष्यमाणत्वात् (II. 47.)। नीत्वा यापयित्वा। आषाढ़ानक्षत्रेण युक्ता पौर्णमासी आषाढ़ी। "नक्षत्रेण युक्तः कालः"इत्यण्। "टिड्ढाणञ्"इत्यादिना ङीप्। सा आषाढ़ी अस्मिन् पौर्णमासीति आषाढ़ो मासः। "सास्मिन् पौर्णमासीति संज्ञायाम्" इत्यण्। तस्य प्रथमदिवसे आश्लिष्टसानुम् आक्रान्ततटम्। वप्रक्रीडाः उत्खातकेलयः। "उत्खातकेलिः शृङ्गाद्यैर्वप्रक्रीड़ा निगद्यते" इति शब्दार्णवे। तासु परिणतः तिर्य्यग्दन्तप्रहारः। "तिर्य्यग्दन्त-प्रहारस्तु गजः परिणतो मतः" इति हलायुधः। स चासौ गजश्च स इव प्रेक्षणीयो दर्शनीयः तं मेघं ददर्श। गजप्रेक्षणीयमित्यत्र इवलोपात् लुप्तोपमा। केचित्

"आषाढ़स्य प्रथमदिवसे"इत्यत्र"प्रत्यासन्ने नभसि"इति वक्ष्यमाणनभोमासप्रत्यासत्त्यर्थं"प्रशमदिवसे"इति पाठं कल्पयन्ति तदसङ्गतम्। प्रथमातिरेके कारणाभावात्। नभोमासस्य प्रत्यासत्त्यर्थमित्युक्तमिति चेत् न। प्रत्यासत्तिमात्रस्य मासप्रत्यासत्त्यैव प्रथमदिवसस्याप्युपपत्तेः। अत्यन्तप्रत्यासत्तेरुपयोगाभावेन अविवक्षितत्वात्। विवक्षितत्वे वा स्वपक्षेऽपि प्रशमदिवसान्तिमक्षणे मेघदर्शनकल्पनायां प्रमाणाभावेन तदसम्भवात्। प्रत्युत अस्मत्पक्षे एव कुशलसन्देशस्यभाव्यनर्थप्रतीकारार्थस्य पुरत एव अनुमानमुक्तं भवतीति उपयोगसिद्धिः। ननु उन्मत्तस्य नायं विवेक इति चेत् न। उन्मत्तस्य न अनर्थस्य प्रतीकारार्थं प्रवृत्तिरपीति सन्देश एव मा भूत्। तथाच काव्यारम्भ एव अप्रसिद्धः स्यात्इत्यहो मूलोच्छेदी पाण्डित्यप्रकर्षः। कथं तर्हि"शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ" इत्यादिना भगवत्प्रबोधावधिकस्य शापस्य मासचतुष्टयावशिष्टस्योक्तिः। दशदिवसाधिक्यादिति चेत् स्वपक्षेऽपि कथं सा विंशतिदिवसैर्न्यूनत्वादिति सन्तोष्टव्यम्। तस्मात् ईषद्वैषम्यमविवक्षितमिति सुष्ठूक्तं "प्रथमदिवसे" इति ॥ २।

প্রিয়াবিরহবিধুর, করস্থিত সুবর্ণবলয়ের স্খলনহেতু অলঙ্কারপরিশূন্য মণিবন্ধ সমন্বিত কামপরতন্ত্র যক্ষ সেই রামগিরিতে কতিপয় মাস (অষ্ট মাস) অতিবাহিত করিয়া, আষাঢ় মাসের প্রথম দিবসে উৎখাতকেলিপরায়ণ তির্য্যগ্দন্তপ্রহারী গজের ন্যায় রমণীয়দর্শন নব মেঘরাজি গিরিসানুদেশ আলিঙ্গন করিয়া আছে দেখিতে পাইলেন। ২।

Separated from his (beloved) spouse, the voluptuous (love-lorn) *Yaksha*, with his wrist bare on account of the slipping of the gold bracelet, having passed some months on that mountain, saw, on the first day of Ashadha, a cloud clinging round the summit (of the mountain) and looking as fine as an elephant stooping down in his sports of butting with his tusks at a bank.—2.

Notes.

1. तस्मिन्नद्रौ—(तस्मिन् + अद्रौ। "ङमोह्रस्वादचि ङमुण्नित्यम्" *i. e.,* ह्रस्वात् परो यो ङम् (ङम्प्रत्याहारः—*i. e.,* ङ्, ण्, न्) तदन्तं यत्पदं तस्मात् परस्य अचः नित्यम् ङमुट् (*i. e.,* ङ्, ण्, and न्) स्यात्)। तस्मिन् रामगिरौ। "सप्तम्यधिकरणे च" इति औपश्लेषिकाधिकरणे सप्तमी। In that hill.

2. अबलाविप्रयुक्तः—अविद्यमानं बलं यस्याः सा अबला ("नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः" इति बहुव्रीहिः) नारी। तया विप्रयुक्तः (वि + प्र + युज् + कर्म्मणि क्तः) कृतविच्छेदः इति अबलाविप्रयुक्तः ("कर्त्तृकरणे कृता बहुलम्" इत्यत्र "कृद्ग्रहणे गतिकारकपूर्व्वस्यापि ग्रहणम्"इति तृतीयातत्पुरुषः।) प्रियाविरहितः, कान्ताविरही। Separated from his wife.

3. कनकवलयभ्रंशरिक्तप्रकोष्ठः—कनकस्य वलयः इति कनकवलयः (षष्ठीसमासः) सौवर्णं कटकं। तस्य भ्रंशः पातः (षष्ठीसमासः) विरहसन्तापात् क्षीणकलेवरस्य तस्य हस्तात् वलयः स्खलित इत्यर्थः। तथाच अभिज्ञानशकुन्तले—"इदमशिशिरैरन्तस्तापाद्विवर्णमणीकृतं,निशि निशि भुजन्यस्तापाङ्गप्रसारिभिरश्रुभिः। अनभिलुलितज्याघाताङ्कं मुहुर्मणिबन्धनात् कनकवलयं स्रस्तं स्रस्तं मया प्रति-सार्य्यते॥" Act III. 12. कनकवलयभ्रंशेन रिक्तः (रिच् + कर्म्मणि क्तः) शून्यः इति कनकवलयभ्रंशरिक्तः (तृतीया तत्)। एवंविधः प्रकोष्ठः

मणिबन्धः यस्य सः (बहुव्रीहिः)। Whose wrist was bare on account of the dropping of the gold bracelet. Separation from his dearest wife told heavily upon him, so much so, that he became pale and emaciated and the gold bracelet which sat well in his wrist dropped down."कामित्वात् अलङ्करणधारित्वं । उक्तञ्च—' नाविदग्धः प्रियं ब्रूयान्नाकामी मण्डनप्रियः। निस्पृहो नाधिकारी स्यात् स्फुटवक्ता न वञ्चकः॥" इति अध्यापकनान्दर्जिकारोद्धृतसारोद्धारिण्याम्।

4. कामी—(कम्+णिङ्+णिनि) कामुकः, अतिशयस्मरवेगयुक्तः। the voluptuous man. Cf. the English term "'Lady' s man"

5. स refers to the यक्ष aforesaid.

6. कतिचित् मासान्—किम्+डतिः—कति ; ततः "डति च" इति डत्यन्तानां संख्यानां षट्संज्ञत्वात् "षड्भ्योलुक्" इति शसो लुक्। कति+चित्—कतिचित्। कतिचित् मासान्—कांश्चित् मासान्। अत्र अष्टौ मासान् इत्यर्थः "शेषान् मासान् गमय चतुरः" इति वक्ष्यमाणत्वात् (II .47.) नीत्वा इत्यस्य कर्मणि द्वितीया। It appears that he was banished in the month of *Kartica* and that the term of his banishment would end on the 11th day of the Moon in the month of Kartika, i. e. on the day that Vishnu would rise from his sleep on the back of *Ananta*.

7. आषाढस्य—आषाढा नक्षत्रेण युक्ता पौर्णमासी इति आषाढी (आषाढा + "नक्षत्रेण युक्तः कालः इति अण्—आषाढ ; ततः "टिड्ढाणञ्द्वयसज्दघ्नञ् मात्रच् तयप् ठक् ठञ् कञ् क्वरपः" इति ङीप् इति आषाढी) आषाढी पौर्णमासी अस्मिन् इति आषाढः (आषाढी + "सा अस्मिन् पौर्णमासीति संज्ञायां" इति अण्) आषाढा is one of the 27 nakshatras (constellations.) The full moon day with the constellation Ashadha (आषाढा) is called आषाढी। The month in which

the full moon day with the constellation *Ashadha* (*i. e*, आषाढ़ी) takes place is called आषाढ़: *i. e.*, आषाढ़मास: । आषाढ़स्य — आषाढ़मासस्य । प्रथमदिवसे—आद्ये दिने । अर्थात् तपात्यये ; वर्षारम्भे । प्रथम:—प्रथ् + अमच् । It is a pronoun and in जस् admits of two forms in the masculine gender :—प्रथमे, प्रथमा: ।

8. आश्लिष्टसानु—(आ + श्लिष् + कर्म्मणि क्त:—आश्लिष्ट:) आश्लिष्ट: आलिङ्गित: सानु: , तटदेश: येन तम् ; आक्रान्ततट ; touching or descending upon the summit. It is a natural phenomenon in the rainy season that clouds sit upon the tops of mountains.

9. वप्रक्रीड़ापरिणतगजप्रेक्षणीयं—उप्यते अत्र इति वप्र: (वप् + अधिकरणे रण्) । वप्रे: क्रीड़ा दन्तविषाणादिभि: क्रीड़नं वप्रक्रीड़ा उत्खातकेलि: । Elephants, buffaloes, and oxen often strike the bank or earthen mound, the first with their tusks and the last two with their horns. This play is called वप्रक्रीड़ा or उत्खातकेलि । Clouds on the summits of mountains often assume such fantastic forms. The *PuranSarvaswa* . describes the clouds as "महिषाश्च वराहाश्च मत्तमातङ्गरूपिण: ।" Again in 1. 56. "शोभां शुभ्रत्रिनयनवृषोतखातपङ्कोपमेयां ।" Professor Wilson quotes from chapman's Bussy D' Ambois where they are said to assume,—

> "In our faulty apprehensions,
> The forms of Dragons lions, elephants etc."

And Shakespeare, although he omits the elephant, gives them with his usual overflow of imagery, a great variety of shapes :—

> "Sometimes we see a cloud that's dragonish,

A vapour sometime like a bear or lion,
A towered citadel, a pendant rock,
A forked mountain, or blue promontory,
With trees upon 't that nod unto the world,
And mock our eyes with air."

Anthony and Cleopatra.

Hence originates the simile. परिणतः—(परि+नम् + क्तः) तिर्य्यग्दन्तप्रहारः, तिर्य्यग्दन्तप्रहारी इत्यर्थः *i. e.*, an elephant who is striking with his tusks. प्रेक्षणीयं—दर्शनीयं ; रमणीयं । वप्रक्रीड़ासु परिणतः (सप्तमी तत्) । सः गजः (कर्म्मधारयः) । तद्वत् प्रेक्षणीयं ("उपमानानि सामान्यवचनैः" इति उपमानसमासः ।) Looking as fine as an elephant stooping down in his sports of striking with his tusks a bank. अत्र सानुप्रदेशस्य वप्रसाम्यं मेघस्य च गजसाम्यम् अत एव उपमाप्रतिपादकशब्दाभावात् लुप्तोपमा ।

10. केचित् "आषाढ़स्य प्रथमदिवसे" &c.—Some commentators (with Vallabha and others propose an emendation प्रशमदिवसे for प्रथमदिवसे, for suiting the proximity of श्रावण in verse "प्रत्यासन्ने नभसि (I. 4) ; the last day of Ashadha, in their opinion, being obviously nearer to Sraban than the first, they prefer the former reading to the latter. Mallinatha does not accept this emendation on the basis of its being unnecessary and unreasonable. The प्रत्यासत्ति (proximity),he says,mentioned in stanza 4 is only a simple proximity and it comes out in the reading as it is, for who can deny the general proximity of Ashadha and Srabana ? and if this much is established, then as a matter of course, the proximity of the first day of Ashadha and the month of Srabana can not be denied, for what is affirmed of the whole is also affirmed of a part of

it. Close proximity (अत्यन्तप्रत्यासत्ति) being perfectly useless, is not meant here ; and even granting that it requires *close* proximity, the want of it cannot be removed by the amended reading as well, i. e. प्रथमदिवस does not give the close proximity required. In order to make it conformable to your meaning,says Mallinath, you will have to stretch out its meaning to प्रथमदिवसान्तिमक्षण which you cannot do unless you have some special warrant for such an arbitray stress. And even granting that you have such an warrant,your position remains just the same, while you incur the danger of running into an absurdity, as you are expecting the appearance of a cloud in the sky at the last second of the last day of the month of Ashada, which no sane man would do, since there is no certainty that a cloud would appear *exactly at the time.* Having thus shown the futility of the amended reading, M. goes on to establish his reading thus :—The Yaksha, who was very fond of his wife, saw a cloud clung to the top of the hill on the break of the rainy season (which commences from Ashada) and thinking that his dear wife would not be able bear his separation in heavy rains in श्रावण and that she would certainly succumb to death, in case no word of hope or assurance were sent to her without delay, he fixed upon the first cloud that met his eye and bade him waft his message to his darling at home, little reckoning that the *inanimate cloud* was no fit object of being employed on such a mission. This being the plain and simple meaning प्रथम दिवस suits it better than the suggested emendation.

But his opponents here invade him again. They say that the anticipation of the death of his wife and the consequent measures he had recourse to for the prevention of the catastrophe betimes imply an exercise of calm judgment and cool reasoning for the part of the Yaksha who has been represented as *intoxicated* with love and as such absolutely without any reasoning faculty. "Mallinath's argument here assumes a new garb. He flatters their argument by acquiescence and trys to sink them yet deeper in absurdity." He says that from the opposition raised by his opponents, it would follow that the *Yaksha*, maddened by love, was not in a condition, whether early or late, of even thinking out some measure and adopting it, in anticipation of the impending peril and as such not in a condition to send the cloud as a messenger to his beloved. This is no doubt a learned argument, but it explodes the very foundation upon which the fabric of the poem rests and renders the *poet a fool* and as such deserves condemnation and not approbation.

Being thus defeated, they charge the reading with the fault of inconsistency. In उत्तरमेघ (verse 47) the Yaksha happens to say that the period of his curse is to terminate on the 11th day of Kartika when *Vishnu* is to wake from his sleep on the back of Ananta and calculates that there are only four months to complete the period. Now by counting the time from the 1st of Ashadha to the 11th day of Kartika, it comes out to be four months and 10 days and not four,

exact Calender months. Thus प्रथम is not tenable. Mallinatha admits the *inconsistency*, but retorts that the same inconsistency, instead of being lessened or removed by the amended reading, is aggravated by 20 days having fallen short to make the time. Mallinatha says "मासान् चतुरः" should not be understood in such a strict sense as to preclude the inclusion of 10 days in addition. Hence प्रथम is established.

आषाढ़स्य प्रथमे दिवसे = "शेते विष्णुः सदाषाढ़े भाद्रे च परिवर्त्तते। कार्त्तिके परिबुध्येत शुक्लपक्षे हरेर्दिने।।" इति रघुनन्दनधृते मात्स्ये। तथाच "मैत्राद्यपादे स्वपितीह विष्णुः प्रबुध्येत मासचतुष्टयेन।" इति। अनेन आषाढ़स्य शुक्लैकादश्यां हरेः शयनं कार्त्तिकस्य शुक्लैकादश्याञ्च तस्य उत्थानं ज्ञायते। मासचतुष्टयमेव चान्द्रमभिप्रेतम्। अतएव आषाढ़स्य प्रथमे दिवसे = चान्द्राषाढ़स्य प्रथमदिवसे अर्थात् प्रतिपदि। कार्त्तिकस्य उत्थानैकादशी दिने यक्षः स्वावासात् निर्व्वासितः हरिबोधनदिने पूर्णे च चान्द्रे संवत्सरे पुनस्तस्य शापान्तो भविष्यति। तस्य स्थित्वा कथमपि...दध्यौ—अनेन मेघालोकनेन चिन्तया कतिचित् दिनातिवाहनं सूच्यते। प्रत्यासन्ने नभसि = श्रावणे समीपम् आगते सति अर्थात् आषाढ़स्य शुक्लैकादश्यां हरिशयनदिने समायाते, तद्दिनस्य हरिशयनेन हरिबोधनदिनस्यापि स्मारितत्वात्। अतएव भरागतदुःखासहत्वं तेन प्रियायाः तस्य कुशलसन्देशप्राप्त्यभावात् निश्चितं मरणम् इति ज्ञानञ्च। अतएव सन्देशहरणार्थम् उदग्गामिमेघप्रार्थयितृत्वं इति व्याख्यानं समीचीनं मन्यामहे। अनेन पूर्व्वोक्त तदशदिवसाधिक्यं विंशतिदिनन्यूनत्वञ्च परिहृतं भवति, हरिशयनादारभ्य हरिबोधनस्य मासचतुष्टयात्मककालपरिमितत्वात् इत्यलं विस्तरेण।

11. Conjugations :—

नी—नयति, नयते ; निनाय, निन्ये ; नेष्यति, नेष्यते ; अनैषीत्, अनेष्ट।

दृश्—पश्यति, ददर्श, द्रक्ष्यति, अद्राक्षीत्, अदर्शत्।

युज्—युज्यते, युनक्ति, युङ्क्ते ; हि—युङ्ग्धि, स्व—युङ्क्ष्व ; युञ्ज्यात्,

तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो-
रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ ३ ।

युञ्जीत ; अयुनक्, अयुङ्क्त ; युयोज, युयुजे ; योक्ष्यति, ते ; लुङ्— अयुजत्, अयौक्षीत्, अयुक्त ।

श्लिष्—(आलिङ्गने) श्लिष्यति, शिश्लेष, श्लेक्ष्यति, अश्लिषत्। दादि तु— श्लिषति, लुङ्—अश्लिषत्। तथाच कविरहस्ये—

"यः श्लिष्यति प्रियां प्रेम्णा श्लेषति द्विषतां पुरम्।
दुःश्लेषाण्यपि कार्य्याणि धिया श्लेषयति क्षणात् ॥" ६१ ।

Prose order—राजराजस्यानुचरः अन्तर्बाष्पः कौतुकाधानहेतोः तस्य पुरः कथमपि स्थित्वा चिरं दध्यौ। मेघालोके सुखिनोऽपि चेतः अन्यथावृत्ति भवति, कण्ठाश्लेषप्रणयिनि जने दूरसंस्थे (सति) किं पुनः (वक्तव्यम्)। ३।

Paraphrase—स कुबेरानुचरः रत्यभिलाषोत्पादकारणस्य तस्य मेघस्य अग्रतः गरीयसा कष्टेन तिष्ठन् धीरोदात्त इत्यन्तःस्तम्भिताश्रुः चिरं चिन्तयामास। का कथा कान्तावियोगविधुरस्य कान्तासङ्गतोऽपि मेघदर्शने व्याकुलचित्तवृत्तिः जायते।

Change of voice—० अनुचरेण अन्तर्बाष्पेण ० दध्ये। * चेतसा अन्यथावृत्तिना भूयते, * किं पुनः (भूयात्)। ३।

Sanjivani—तस्येति। राजानो यक्षाः। "राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः" इति विश्वः। राज्ञां राजा राजराजः कुबेरः। "राजराजो धनाधिपः" इत्यमरः। "राजाहःसखिभ्यष्टच्" इति टच्प्रत्ययः। तस्य अनुचरो यक्षः। अन्तर्बाष्पो धीरोदात्तत्वात् अन्तःस्तम्भिताश्रुः सन्। कौतुकाधानहेतोः अभिलाषोत्पादकारणस्य। "कौतुकञ्चा-

भिलाषे स्यादुत्सवे नर्म्महर्षयोः"इति विश्वः । तस्य मेघस्य पुरः अग्रे कथमपि गरीयसा प्रयत्नेन इत्यर्थः । "स्थानहेतु-विवक्षायामव्यादि कथमव्ययम् । कथमादि तथाप्यन्तं यत्नगौरवबाढयोः" इत्युज्ज्वलः । स्थित्वा चिरं दध्यौ चिन्तयामास । "ध्यै चिन्तायाम्"इतिधातोर्लिट् । मनो-विकारोपशमनपर्य्यन्तमिति शेषः । विकारहेतुमाह मेघा-लोके इति । मेघालोके मेघदर्शने सति सुखिनोऽपि प्रियादि-जनसङ्गतस्यापि चेतः चित्तम् अन्यथाभूता वृत्तिः व्यापारो-यस्य तत् अन्यथावृत्ति भवति । विकृतिमापद्यते इत्यर्थः । कण्ठाश्लेषप्रणयिनि कण्ठालिङ्गनार्थिनि जने दूरे संस्था स्थितिर्यस्य तस्मिन् दूरसंस्थे सति किं पुनः । विरहिणः किमुत वक्तव्यमित्यर्थः । विरहिणां मेघसन्दर्शनम् उद्दीपकं भवतीति भावः । अर्थान्तरन्यासोऽलङ्कारः । तदुक्तं दण्डिना "ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन । तत्साधन-समर्थस्य न्यासो योऽन्यस्य वस्तुनः"इति ।३।

যক্ষরাজ কুবেরের অনুচর (প্রিয়াবিচ্ছেদশোকজনিত) বাষ্প অন্তঃস্তম্ভিত করিয়া অভিলাষের উৎপাদক স্বরূপ সেই পয়োধরের পুরোভাগে মহাকষ্টে অবস্থান করতঃ অনন্যচিত্তে সুদীর্ঘকাল চিন্তা নিমগ্ন হইয়া রহিলেন। কেন না, যখন মেঘ দর্শনে (প্রিয়া হইতে অবিচ্ছিন্ন) সুখিজনেরও চিত্ত বিকৃতি প্রাপ্ত হইয়া থাকে, তখন কণ্ঠা-শ্লেষ প্রার্থী প্রণয়াস্পদ প্রিয়জন দূরদেশস্থ হইলে যে মনের কীদৃশী অবস্থা ঘটিয়া থাকে, তৎসম্বন্ধে পুনরায় বক্তব্য আর কি থাকিতে পারে। ৩।

The attendant of the king of Yakshas, checking his gushing tears, placed himself in front of the cloud with great difficulty and (fixing his eager view on the mass), for a long time, remained absorbed in meditation: for, at the sight of a cloud, the heart even of a person who is blessed with every enjoyment is agitated; what then of him when the person solicitous to have the embrace of the neck is situated at a distance (is a far off,—3.

Notes.

1. राजराजस्य—राजानः—(राज्+कनिन्) यक्षाः। तेषां राजा इति राजराजः कुबेरः तस्य। यक्षाः अलकानिवासिनः कुबेरानुचराः देवयोनय इति शेषः।

2. अनुचरः—चरति इति चरः। "पचादिषु चरट्" इति पाठात् अच्। अनुगतः चरः इति अनुचरः। सुप्सुपेति समासः। पचादिषु टितोऽस्य पाठात् अतएव टित्वं। अतएव टित्वात् स्त्रियाम् अनुचरी। भव्यः। Attendent; follower.

3. अन्तर्वाष्पः—अन्तः अन्तर्गतः वाष्पः यस्य सः (ब. व्री.) अन्तःस्तम्भिताश्रुः। He who has checked his tears within himself; checking his gushing tears within himself. He was a hero of the धीरोदात्त type Def.

> "अविकत्थनः क्षमावान् अतिगम्भीरो महासत्त्वः।
> स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः॥"

अतएव धैर्य्यात् स्तम्भिताश्रुः।

4. कौतुकाधानहेतोः—कौतुकस्य अभिलाषस्य आधानं (आ + धा + भावे ल्युट्) उत्पादनं (षष्ठी तत्) तस्य हेतुः कर्त्ता (षष्ठी तत्) तस्य; अभिलाषोत्पादकस्य; of that which is the cause of creating desire *i. e.*, of the cloud which gives rise to desire. The other

reading adopted by भरत, सनातन, रामनाथ, हरगोविन्द and कल्याणमल्ल is "केतकाधानहेतोः" which means—"केतकगर्भारोपण-कारणस्य ; केतकपुष्पगन्धो हि विरहिणाम् अत्यन्त दुःसह इति प्रियाप्राणधारणा-विच्छेदहेतुः ।" इति रामनाथः । We side with Prof. Nundergikar of Bombay in rejecting this reading on the ground that our poet wants here "to describe the effect produced by the appearance of the cloud upon the mind of the Yaksha which is evident from the last two charanas", and not the effect produced upon the mind by the ketaka flower which blossoms in the rainy season and excites longing.

5. तस्य—मेघस्य । "पुरः—"पूर्व्व + "पूर्व्वपराधरावराणाम्" इति असिः) अग्रतः । तस्य इत्यत्र "षष्ठ्यतसर्थप्रत्ययेन" इति अस्तात्पुरोयोगे षष्ठी ।

6. कथमपि—महता कष्टेन ; with great difficulty. Mallinatha quotes उज्ज्वलदत्त to point out the difference between the significance of अपि कथं and कथमपि, the former indicating 'query,' 'question' and the latter 'with great effort,' 'some how,' 'with great difficulty.'

7. चिरं दध्यौ—दीर्घं कालं व्याप्य चिन्तयामास । (ध्यै + लिट् ण) ; meditated long.

8. मेघालोके—मेघस्य (मिह् + घञ्) पयोधरस्य आलोके दर्शने जाते सति ; at the sight of the cloud. भावे सप्तमी ।

9. सुखिनः &c.—even of one who is enjoying the sweet company of his dear ones. Professor Wilson states "the commencement of the rainy season being peculiarly delighful in Hindoostan from the contrast it affords to the sultry

weather immediately preceding it and the refreshing sensations it excites, becomes, to the lover and the poet, the source of love and tenderness." Cf. Vikramorvasiyam : IV. "एवेन पुनर्निर्वृतानाम् अप्युत्कण्ठाकारिणा मेघोदयेनानर्थाधीनो भविष्यति।"

19. अन्यथावृत्तिः—अन्यथा भूता वृत्तिः व्यापारः यस्य तत् अन्यथावृत्ति ; विकृतिमत् ; agitated ; disturbed.

11. कण्ठाश्लेषप्रणयिनि—कण्ठस्य आश्लेषः (षष्ठी तत्) कण्ठाश्लेषं तस्य प्रणयी (प्रणयः प्रार्थना अस्य अस्ति इति प्रणयी। प्रणय+इन्।) तस्य प्रणयी प्रार्थी तस्मिन् ; कण्ठालिङ्गनार्थिनि ; to one solicitous to have the embrace of the neck. जने—भावे सप्तमी।

12. दूरसंस्थे—दूरे संस्था स्थितिः यस्य तस्मिन् (ब. व्री.) ; situated at a distance.

13. किं पुनः—किमुत वक्तव्यम्। The sight of the cloud is hardly tolerable to lovers separated from the embrace of their beloved spouse. For the effect of the rain-cloud, the peacock &c. on the mind of a separated lover Cf.

"एतद्गिरेर्माल्यवतः पुरस्तात् आविर्भवत्यम्बरलेखि शृङ्गम्।
नवं पयो यत्र घनैर्मया च त्वद्विप्रयोगाश्रु समं विसृष्टम्॥ २६।
पूर्वानुभूतं स्मरता च यत्र कम्पोत्तरं भीरु तवोपगूढम्।
गुहाविसारिण्यतिवाहितानि मया कथंचित् घनगर्जितानि॥ २८।
आसारसिक्तक्षितिवाष्पयोगात् मामक्षिणोत् यत्र विभिन्नकोशैः।
विडम्ब्यमाना नवकन्दलैस्ते विवाहधूमारुणलोचनश्रीः॥" २९।

Raghu XIII.

14. अत्र सामान्येन विशेषसमर्थनात् अर्थान्तरन्यासः। तदुक्तं काव्यप्रकाशे

"सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।
यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा॥"

प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम् ।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥ ४ ॥

(*i. e.,*) When a general or particular is strengthened by its opposite, either under a resemblance or its opposite, that is termed अर्थान्तरन्यास (or *corroboration.) When a general is corroborated by a particular, or a particular by a general, either under a resemblance or a contrast, it is* called अर्थान्तर-न्यास ।

15. Conjugations :—

स्था—तिष्ठति, तस्थौ, तिष्ठेत्, अस्थात् ।

ध्यै—ध्यायति, दध्यौ, ध्यास्यति, अध्यासीत् ।

Prose order—सः नभसि प्रत्यासन्ने दयिताजीवितालम्बनार्थी जीमूतेन स्वकुशलमयीं प्रवृत्तिं हारयिष्यन् प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार । ४ ।

Paraphrase—स यक्षः श्रावणे मासि आषाढस्य अनन्तरं सन्निकर्षं प्राप्ते सति वर्षाकालस्य उद्दीपकत्वात् उत्पन्नानर्थप्रतिविधानात् अनर्थोत्पत्ति-वारणं श्रेय इति प्रागेव कान्तायाः प्राणधारणोपायं विधित्सुः सन् जलधरेण स्वक्षेमप्रधानां वार्त्तां प्रापयिष्यन् अभिनवाभिः गिरिमल्लिकाभिः रचितार्घाय तस्मै मेघाय प्रीतः सन् प्रीतिवचनप्रयोगपूर्व्वं शुभागमनं प्रोवाच । ४ ।

Change of voice—० तेन ० दयिताजीवितालम्बनार्थिना ० हारयि-ष्यता ० प्रीतेन व्याजह्रे । ४ ।

Sanjivani—अथ समाहितान्तःकरणः सन् किं कृत-वान् इत्याह प्रत्यासन्ने इति । स यक्षो यश्चिरं दध्यौ स

इत्यर्थः। नभसि श्रावणे। "नभाः श्रावणिकश्च सः" इत्यमरः। प्रत्यासन्ने आषाढ़स्य अनन्तरं सन्निकृष्टे प्राप्ते सति इत्यर्थः। दयिताजीविताखम्बनार्थी सन्। वर्षाकालस्य विरहदुःखजनकत्वात् "उत्पन्नानर्थप्रतीकारात् अनर्थोत्पत्तिप्रतिबन्ध एव वरम्" इति न्यायेन प्रागेव प्रियाप्राणधारणोपायं चिकीर्षुरित्यर्थः। जीवनस्य उदकस्य मूतः पटबन्धो जीमूतः पृषोदरादित्वात् साधुः। "मूतः स्यात् पटबन्धेऽपि" इति रुद्रः। तेन जीमूतेन जलधरेण प्रयोज्येन। स्वकुशलमयीं स्वक्षेमप्रधानां प्रवृत्तिं वार्त्ताम्। "वार्त्ता प्रवृत्तिर्वृत्तान्तः" इत्यमरः। हारयिष्यन् प्रापयिष्यन्। "लृट् शेषे च" इति चकारात् क्रियार्थक्रियोपपदात् लृट् प्रत्ययः। जीवनार्थं कर्म जीवनप्रदेनैव कर्त्तव्यम् इति भावः। "हृक्रोरन्यतरस्याम्" इति कर्म्मसंज्ञाया विकल्पात् पक्षे कर्त्तरि तृतीया। प्रत्यग्रैः अभिनवैः कुटजकुसुमैः गिरिमल्लिकाभिः। "कुटजो गिरिमल्लिका" इति हलायुधः। कल्पितार्घाय कल्पितः अनुष्ठितः अर्घः पूजाविधिर्यस्य तस्मै।" मूल्ये पूजाविधावर्घः" इत्यमरः। तस्मै जीमूताय। "क्रियाग्रहणमपि कर्त्तव्यम्" इति सम्प्रदानत्वाच्चतुर्थी। प्रीतिप्रमुखाणि प्रीतिपूर्वकाणि वचनानि यस्मिन् कर्म्मणि तत् प्रीतिप्रमुखवचनं यथा तथा। शोभनम् आगतं स्वागतं स्वागतवचनं प्रीतः सन् व्याजहार। कुशलागमनं पप्रच्छ इत्यर्थः। नाथेन तु अत्र "प्रत्यासन्ने मनसि" इति साधीयान्

पाठः कल्पितः। प्रत्यासन्ने प्रकृतिमापन्ने सति इत्यर्थः। यस्तु तेनैव पूर्व्वापरविरोधः प्रदर्शितः सः अस्माभिः "आषाढ़स्य प्रथमदिवसे" इत्येतत्पाठविप्लवसमाधानेनैव परिहृतः। ४।

শ্রাবণ মাস সমীপবর্ত্তী হইল দেখিয়া (প্রিয়াবিরহবিধুর) যক্ষ প্রিয়তমার জীবন রক্ষার নিমিত্ত পয়োধরকর্ত্তৃক স্বকীয় কুশলবার্ত্তা (প্রণয়িনীর সমীপে) প্রেরণে উদ্যত হইয়া প্রীতিপূর্ণ হৃদয়ে নব বিকসিত গিরিমল্লিকায় অর্ঘ্য বিরচনপূর্ব্বক প্রীতিগর্ভ বচনে তাঁহার (ঐ মেঘের) কুশলবার্ত্তা জিজ্ঞাসা করিলেন ৪।

As the month of Sravana was approaching close nigh, he was desirous of sustaining the life his dear wife and therefore intending to send her the tidings of his well-being by means of the cloud, (highly) delighted, he gave him a hearty welcome in words full of affection, with an offering of fresh *Mallka* flowers.—4.

Notes.

1. स:—the love-lorn Yaksha.

2. नभसि—श्रावणे। "यस्य च भावेन भावलक्षणम्" इति भावे सप्तमी।

3. प्रत्यासन्ने—(प्रति + आ + सद + क्तः—सप्तमी) सन्निकृष्टे; near at hand. आषाढे मेघमालोक्य कथमपि स्थितः इत्युक्तं प्राक्, परं श्रावणे अविरलजलदासारे मेघमन्द्रार्द्रनिर्घोषे प्रिया मे निश्चितमेव महार्त्ता विना कथाशेषा भविष्यतीति परिकल्प्य प्रियाजीवितार्थं नितान्तोत्सुकः यक्षः मेघमेव स्वदूतं कर्त्तुमुद्यत आसीत् इत्यर्थः।

4. The *Saroddharini* quotes a सुभाषित, explaining the cause as to why separated lovers become so very anxious for the life of their wives.

"शिखिनि कूजति गर्ज्जति तोयदे स्फुरति जातिलताकुसुमाकरे।
पथिक! पान्थ न जीवति ते प्रिया नभसि मासि न यासि गृहं यदि॥"

5. दयिताजीवितालम्बनार्थी—दयितायाः प्रियायाः जीवितं प्राणाः (जीव् + भावे क्तः) तस्य आलम्बनं धारणम् इति दयिताजीवितालम्बनं प्रियतमाप्राणधारणं। तदेव अर्थः दयिताजीवितालम्बनार्थः। (रूपक-कर्म्मधारयः।) सः अर्थोऽस्यास्तीति इति दयिताजीवितालम्बनार्थी। "अर्था-चासन्निहिते" इत्यत्र "तदन्ताच्च" इति असन्निहितार्थे इन्। यद्वा दयिता-जीवितालम्बनम्, अर्थयते इति दयिताजीवितालम्बन + अर्थ + णिनि।); anxious to sustain the life of his dear spouse. Bharata, Sanatana and Ramanatha read दयिताजीवितालम्बनार्था and according to them it is an adjunct to प्रवृत्ति. Haragovinda and Kalyanamalla read दयिताजीवितालम्बनार्थं which is an adverbial phrase and is certainly the happiest.

6. जीमूतेन—जीवनस्य उदकस्य मूतः पटबन्धः इति जीमूतः। "पृषो-दरादीनि यथोपदिष्टम्"। VI. 3. 109. (*i. e.*, पृषोदरप्रकाराणि शिष्टैः यथोच्चारितानि तथैव साधूनि स्युः) इति पृषोदरादित्वात् साधुः। The words पृषोदर, जीमूत, बलाहक *&c.* are anomalously formed and have been illustrated by the philologists as results of *phonetic decay*. जीमूतेन—मेघेन। "इत्थम्भूतलक्षणे" इति समन्तभद्रधातोः प्रयोज्यकर्तृत्वात् पाक्षिकी तृतीया। पक्षे द्वितीया। The original (शुद्ध) form was जीमूतः प्रवृत्तिं हरिष्यन् whence the causative form (णिजन्ता) is स (प्रयोजककर्त्ता) जीमूतेन जीमूतं वा (प्रयोज्येन) प्रवृत्तिं हारयिष्यन्।

7. स्वकुशलमयीं—स्वस्य निजस्य कुशलं क्षेमं तन्मयीं, स्वक्षेमप्रधानां; containing his well-being. (स्वकुशल + मयट् + ङीप्)। प्रवृत्तिं—वार्त्तां, सन्देशं; tidings. For similar use Cf. उत्तरचरिते—"काचित् अस्ति प्रवृत्तिः"।

8. हारयिष्यन्—'हृ+णिच्+'लृट् शेषे च' इति चकारात् क्रियार्थोपपदात् लृट (i. e., स्यट) हारयितुम् इच्छन्; प्रापयिष्यन्; desirous of sending.

9. प्रत्यग्रैः—अभिनवैः; fresh.

कुटजकुसुमैः—Mallinatha quotes Halayudha to show that कुटज here refers to a particular class of flower called गिरिमल्लिका which (most probably) blossomed at that season. The सारोद्धारिणी makes it more clear "आर्द्रत्वात् मनोहरैः। आर्त्तवैर्हि कुसुमैः देवातिथिपूजनं कर्त्तव्यम्॥" करणे तृतीया।

10. कल्पितार्घाय—कल्पितः विरचितः अर्घ्यः पूजाविधिः सत्कारणोपहारः यस्य तस्मै; to whom an offering or present was made. The अर्घं consisted of the following things:—

"आपः क्षीरं कुशाग्राणि दधि सर्पिश्च तण्डुलाः।
यवाः सिद्धार्थकं चैव अष्टाङ्गार्घ्यं प्रकीर्त्तितम्॥"

तथाच देवीपुराणे

"रक्तबिल्वाक्षतैः पुष्पैर्दधिदूर्व्वाकुशैस्तिलैः।
सामान्यः सर्व्वदेवानाम् अर्घोऽयं परिकल्पितः॥"

Water is not mentioned here, being considered as the vehicle of the whole. The same author adds that, should any of these be not procurable, then "अभावे दधिदूर्व्वादेः मानसं वा प्रकल्पयेत्." Besides the अर्घ common to all the Gods, there are peculiar ones for separate deities, thus we find a few new born buds are sufficient for the cloud.

तस्मै—जीमूताय; "क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्" इत्यत्र "व्यददाने चतुर्थी स्यात् दर्शने कथनेऽपि च। चादाय करणे योगे सप्तमी केचिदिष्यते" इति हरिवचनात् कथनार्थविपूर्व्वहृयोगात् चतुर्थी।

धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥ ५ ॥

11. प्रीतिप्रमुखवचनं प्रगतं मुखम् इति प्रमुखं ("प्रादयो गताद्यर्थे प्रथमया" इति वार्त्तिकवचनात् प्रादिसमासः) प्रीतिः प्रमुखे प्रारम्भे येषां तानि । ("गड्वादेः परा सप्तमी" इति व्याधिकरणपदबहुव्रीहिः सप्तम्यन्तस्य परनिपातश्च ।) प्रीतिप्रमुखानि प्रीतिपूर्व्वकाणि वचनानि यत्र तत् (वचो); प्रेमगर्भवचनयुक्तं ; words in which love was the foremost.

12. स्वागतं—स्वागतवचनं ; welcome.

13. प्रीतः—(प्री + क्तः) सानन्दचित्तः ; delighted.

14. व्याजहार;—(वि + आ + हृ + लिट् अ) पप्रच्छ ।

"उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारपरिहारविहारवत् ॥"

15. Natha reads मनसि for नभसि । The refutation of his reading has been noticed in our notes on sloka 2.

16. Conjugations :—

सद्—सीदति, ससाद, असदत्, सत्स्यति ।
दय्—दयते, दयाञ्चक्रे, दयिष्यते, अदयिष्ट ।
हृ—हरति, जहार, हरते ; हरिष्यति, ते, अहार्षीत्, अहृत ; जह्रे
(णिच्)—हारयति, हारयाञ्चकार, अजीहरत् ।
कृप्—कल्पते, चकॢपे, कल्पिष्यते, अकॢपत्, अकल्पिष्ट, अकॢप्त ।

"अर्थिनामीप्सितप्राप्तौ कल्पते कल्पवृक्षवत् ।
न कल्पयति मिथ्यार्थान् गिरः कल्पयति द्विषाम् ॥" 83. कविरहस्ये ।

प्री—प्रयति, ते, प्रीयते, प्रीणाति, प्रीणीते, पिप्राय, पिप्रिये, प्रेष्यति, ते ; अप्रैषीत्, अप्रेष्ट ।

Prose order—धूमज्योतिःसलिलमरुतां सन्निपातो मेघः क्व, पटुकरणैः

प्राणिभिः प्रापणीयाः सन्देशार्थाः क्व इत्यौत्सुक्यात् अपरिगणयन् गुह्यकः सः ययाचे। कामार्त्ता हि चेतनाचेतनेषु प्रकृतिकृपणाः । ५ ।

Paraphrase—धूमादीनां संघातरूपः अचेतनः सन्देशवहनानर्हः जलधरः क्व समर्थेन्द्रियैश्चेतनैः वहनीयः सन्देशार्थश्च क्व इति स्वकार्य्यसाधनपरः अविचारयन् तं जलधरं याचितवान् तथाहि मदनान्धचित्ताः स्वतएव चेतनाचेतनविवेकशून्या भवन्ति अतोऽस्य चेतनप्रार्थना युज्यतएव । ५ ।

Change of voice * सन्निपातेन मेघेन क्व भूयते, * प्रापणीयैः सन्देशार्थैः क्व भूयते * अपरिगणयता गुह्यकेन स ययाचे। कामार्त्तैः हि * प्रकृतिकृपणैः भूयते । ५ ।

Sanjivani—ननु चेतनसाध्यमर्थं कथमचेतनेन कारयितुं प्रवृत्त इत्यपेक्षायां कविः समाधत्ते धूमेति । धूमश्च ज्योतिश्च सलिलञ्च मरुत् वायुश्च तेषां सन्निपातः सङ्घातो मेघः क्व अचेतनत्वात् सन्देशानर्ह इत्यर्थः । पटुकरणैः समर्थेन्द्रियैः । "करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि" इत्यमरः । प्राणिभिः चेतनैः । "प्राणी तु चेतनो जन्मी" इत्यमरः । प्रापणीयाः प्रापयितव्याः । सन्दिश्यन्ते इति सन्देशाः ते एव अर्थाः क्व । इत्येवम् औत्सुक्यात् इष्टार्थोद्युक्तत्वात् "इष्टार्थोद्युक्त उत्सुकः" इत्यमरः अपरिगणयन् अविचारयन् गुह्यको यक्षः तं मेघं ययाचे याचितवान् "याचृ याच्ञायाम्" । तथाहि कामार्त्ताः मदनातुराः चेतनाश्च अचेतनाश्च तेषु विषये प्रकृतिकृपणाः स्वभावदीनाः । कामान्धानां युक्तायुक्तविवेकशून्यत्वात् अचेतनयाच्ञा न विरुध्यते इत्यर्थः । अत्र मेघसन्देशयोर्विरूपयोर्घटनात् विषमालङ्कारः । तदुक्तं "विरुद्ध-

कार्य्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत्। विरूपघटना चासौ विषमालङ्कृतस्त्रिधा" इति। सा च अर्थान्तरन्यासानुप्राणिता तत्समर्थकत्वेनैव चतुर्थपादे तस्योपन्यासात्। ५।

ধূম, জ্যোতিঃ, সলিল ও বায়ুর সংঘাতস্বরূপ মেঘই বা কোথায়? হস্তপদাদিইন্দ্রিয়সমন্বিত প্রাণীদিগের বহনীয় সন্দেশ বচনই বা কোথায়? (বস্তুতঃ এতদুভয়ের একত্র সমাবেশ নিতান্ত অসম্ভব) কিন্তু যক্ষ উৎকণ্ঠাবশতঃ ইহা বিচার না করিয়াই (স্বীয় দৌত্য কার্য্য সম্পাদনের নিমিত্ত) সেই মেঘের নিকট প্রার্থনা করিলেন। কেননা, কামপীড়িত ব্যক্তিগণ চেতন ও অচেতনের বিবেকে অক্ষম হইয়া নির্ব্বিচারে উভয়ের নিকট স্বীয় কাতরতা প্রদর্শন করিয়া থাকেন।৫।

Where (indeed) is the cloud, (which is but an assemblage of smoke, fire, wind and water! where again are matters of message, fit to be conveyed by persons possessed of strong limbs! The Guhyaka in his excessive affliction, not considering this, addressed his suit to it: Verily those who are overcome by violent passion are naturally deficient in descriminating animated from inanimate beings.—5.

Notes.

1. Prof. Wilson remarks: "The author has here, with great ingenuity, apologized for the whole plan of his poem, and attributed the apparent absurdity of talking rationally to a cloud, to the state of the Yaksha's mind." This is an oft-quoted stanza and has been imitated by almost all the later writers who wrote खण्डकाव्य after the Meghaduta. Cf.

कोकिलदूत।

"तस्मिन्नेकं मधुरविरुतं कोकिलं वीक्ष्य हृष्टे
दूत्यर्थं सा दयितविरहोत्कण्ठितात्मा ययाचे।
तच्चाश्चर्यं न खलु यदि सा याचते न विहङ्गम्
गाढोत्कण्ठा भवति हि सदा वञ्चिता बोधदृष्ट्या ॥"

Again Cf. पदाङ्कदूत।

"तस्मिन् नव्यजलधरध्वानमाकर्ण्य भूयः,
कन्दर्पेण व्यथितहृदयोन्मत्ततुल्या ययाचे
प्रज्ञाहीनं वचनरहितं निश्चलं श्रीविहीनं
दौत्यं कर्तुं सुरहरपदौ लक्षणं पद्मलाक्षी ॥" ३।

2. धूमज्योतिःसलिलमरुतां—धूमश्च ज्योतिश्च सलिलञ्च मरुच्च ते धूमज्योतिःसलिलमरुतः (द्वन्द्वसमासः) तेषां सन्निपातः सङ्घातः (सम् + नि + पत् + घञ्); an assemblage of smoke, flame, water and the wind. Here ज्योतिः represents the fire of lighting *i. e.*, electricity and सलिल—vapour. This is a noble instance of the fact that our poet was not a stranger to the study of the natural phenomena of the time.

3. क्व—क्व—इतिशब्दौ महदन्तरं सूचयतः। अतएव क्वद्वयेन विषमसमावेशात् विषमालङ्कारः। तल्लक्षणम्—"क्वचिद्यदतिवैधर्म्यात् न श्लेषो घटनामियात्। कर्तुः क्रियाफलावाप्तिर्नैवानर्थश्च यद्भवेत् ॥

गुणक्रियाभ्यां कार्य्यस्य कारणस्य गुणक्रिये। क्रमेण च विरुद्धे यत् स एष विषमो मतः ॥"

"(*i. e.* (1) when, in one place, connection is not found to be possible, owing to extreme incongruity; (2) when the endeavour of an agent becomes not only fruitless, but, on the contrary, brings an evil result to him; and (3) and (4) when the qualities and actions of a cause are respectively

opposed to the *qualities* and actions of an effect; that is deemed the unequal (विषम ." Our poet is very fond of indulging in this figure. Cf. क सूर्यप्रभवो वंश: क चाल्पविषया मति: Raghu I. 2. तप: क वत्से क च तावकं वपु: Kumara V. 4. क्व त हरिणकानां जीवितं चातिलोलं क्व च निशितनिपाता वज्रसाराः शरास्ते Sakuntala I. 10. etc.

4. पटुकरणै:—पटूनि समर्थानि करणानि इन्द्रियाणि येषां तै: (ब. व्रौ.) समर्थेन्द्रियै: ; by those possessed of strong organs of sense *i. e.*, by those possessed of strong limbs. The word करण means (1) instrument (2 field 3) limbs, body (4 organ of sense,

5. प्राणिभि:—(प्राण + अस्त्यर्थे इन्) चेतनै: । 'क्तस्यानां कर्त्तरि वा' इति कर्त्तरि तृतीया, पक्षे षष्ठी वा ।

6. सन्देशार्था:—सन्दिश्यन्ते एते इति सन्देशा: (सम् + दिश् + अच्) वाचिकानि । सन्देशा एव अर्था: इति सन्देशार्था: (रूपक कर्मधारय:) ; matters of message.

7. औत्सुक्यात्—उत्कण्ठावशात् ; out of excessive eagerness हेतौ पञ्चमी ।

8. अपरिगणयन्—सम्यक् न विवेचयन् ; not weighing the matter properly.

9. ययाचे—प्रार्थयामास । Cf. "न तस्या दोषोऽयं यदिह विहगं प्रार्थितवती ।" हंसदूते .

10. कामार्त्ता:—कामेन ऋता: इति कामार्त्ता: "ऋते च तृतीया समासे" इति तृतीयासमासे ऋकारेण वृद्धि: । यद्वा कामेन आर्त्ता: मदनपीड़िता ; overcome by passion.

11. प्रकृतिकृपणा:—"प्रकृत्या स्वभावेन कृपणा: विकला: चेतनाचेतनस्वभावपरिज्ञानविकला: भवन्ति इत्यर्थ:" इति सुमतौ । 'प्रणयकृपणा:' इति पाठान्तरं न विचारसहम् इति परिहृतमस्माभि: । Persons overcome

जातं वंशे भुवनविदिते पुष्करावर्त्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद्दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥६॥

by excessive passion lose their power of descrimination and become blind as it were. Cf. what is quoted in the सारोद्धारिणी

"नैव पश्यति जात्यन्धः कामान्धो नैव पश्यति ।
न पश्यति मदोन्मत्त स्वार्थी दोषो न पश्यति ॥"
"दश धर्मं न जानन्ति धृतराष्ट्रनिबोधनात् ।
मत्तः प्रमत्त उन्मत्तो जाति क्रुद्धो बुभुक्षितः ।
त्वरमाणश्च भीरुश्च लुब्धः कामी च याचकः ॥"

Cf. Shakespeare "Love is blind and lovers cannot see, The pretty follies themselves commit;" M. V. Act. II.Sc. VI.

12. चेतनाचेतनेषु—चेतनाश्च अचेतनाश्च ते चेतनाचेतनाः । "विप्रतिषिद्धचानधिकरणवाचि" इत्यत्र "तेन द्रव्यवाचिनां इतरेतरयोग एव" इति दीक्षितवचनात् द्रव्यवाचित्वात् इतरेतरयोगद्वन्द्वः । वैषयिकाधिकरणे सप्तमी ।

13. अत्र विषमालङ्कारः चतुर्थपादस्यार्थान्तरन्यासेन अनुप्राणितः बोध्यः ।

14. Conjugations :—

पत्—पतति, पपात, पतिष्यति, अपप्तत् ।

आप्—आप्नोति, आप, आप्स्यति, आपत् ।

गमि—गमयति, गमयामास, गमयाञ्चकार, गमयाम्बभूव, गमयिष्यति, अजीगमत् ।

याच्—याचते, ययाचे, याचिष्यते, अयाचिष्ट ।

Prose order—(हे मेघ !) त्वां भुवनविदिते पुष्करावर्त्तकानां वंशे

जातं कामरूपं मघोनः प्रकृतिपुरुषं जानामि, तेन विधिवशात् दूरबन्धुः अहं त्वयि अर्थित्वं गतोऽस्मि। अधिगुणे (पुंसि) याञ्चा मोघा वरम्, अधमे (सा) लब्धकामापि न (वरम्)। ६।

Paraphrase—हे मेघ! भवन्तं जगतां विदिते पुष्करावर्त्तकाख्यानां श्रेष्ठमेघानां गोत्रे प्रसूतं दुर्गादिसञ्चरणक्षमं इन्द्रस्य प्रधानपुरुषं जानामि; अतः महाकुलप्रसूतत्वात् प्रार्थनावैकल्येऽपि न चेतितरीति जानन् वियुक्तभार्य्योऽहं त्वां उचित कार्य्ये नियोक्तुं प्रार्थये। तथाहि, अधिकगुणे याच्ञा विफलापि ईषत्प्रिया अधमे सफलापि सा ईषत् प्रियापि न भवति। ६।

Change of voice—त्वं * जातः कामरूपः * प्रकृतिपुरुषः ज्ञायसे (मया), * दूरबन्धुना मया * गतं। * याञ्चया मोघया वरेण (भूयते), * लब्धकामयापि न (वरेण भूयते)। ६।

Sanjivani—सम्प्रति याच्ञाप्रकारमाह जातमिति। हे मेघ। त्वां भुवनेषु विदिते भुवनविदिते। "निष्ठा" इति भूतार्थे क्तः। "मतिबुद्धि—" इत्यादिना वर्त्तमानार्थत्वेऽपि "क्तस्य च वर्त्तमाने" इति भुवनशब्दस्य षष्ठ्यन्तनानियमात् समासो न स्यात्। "तेन च पूजायाम्" इति निषेधात्। पुष्कराश्च आवर्त्तकाश्च केचित् मेघानां श्रेष्ठाः तेषां वंशे जातं। महाकुलप्रसूतमित्यर्थः। कामरूपम् इच्छाधीनविग्रहं। दुर्गादिसञ्चारक्षममित्यर्थः। मघोनः इन्द्रस्य प्रकृतिपुरुषं प्रधानपुरुषं जानामि। तेन त्वत्प्रभुत्वाभिजात्यादिगुणयोगित्वेन हेतुना विधिवशात् दैवायत्तत्वात्। "विधिर्विधाने दैवे च" इत्यमरः। वशमायत्ते "वशमिच्छाप्रभुत्वयोः" इति विश्वः। दूरे बन्धुर्यस्य स दूरबन्धुः वियुक्तभार्य्योऽहं त्वयि अर्थित्वं गतः। ननु

याचकस्य याच्ञायां याच्यगुणोत्कर्षः कुत्र उपयुज्यते इत्याशंक्य दैवात् याच्ञाभङ्गेऽपि लाघवदोषाभाव एव उपयोग इत्याह याच्ञेति। तथाहि अधिगुणे अधिकगुणे पुंसि विषये याच्ञा मोघा निष्फलापि वरम् ईषत्प्रियम्। दातुर्गुणाढ्यत्वात् प्रियत्वं याच्ञावैफल्यात् ईषत् प्रियत्वमिति भावः। अधमे निर्गुणे याच्ञा लब्धकामापि सफलापि न वरम् ईषत्प्रियापि न भवतीत्यर्थः। "दैवात् वृते वरः श्रेष्ठे त्रिषु क्लीवे मनाक्प्रिये" इत्यमरः। अर्थान्तरन्यासानुप्राणितः प्रेयोऽलङ्कारः। तदुक्तं दण्डिना "प्रेयः प्रियतराख्यानम्" इति। एतत् आद्ये पादत्रये चतुर्थपादस्थेन अर्थान्तरन्यासेन उपजीवितमिति सुव्यक्तमेतत्। ६।

হে পয়োধর! আমি বিদিত আছি তুমি পুষ্কর, আবর্ত্তক প্রভৃতি মেঘরাজগণের বিশ্ববিশ্রুত মহাবংশে উৎপন্ন, স্বেচ্ছারূপী ও দেবেন্দ্রের প্রধান অনুচর; তজ্জন্যই আমি দৈববশাৎ প্রিয়াবিরহী হইয়া তোমার নিকট প্রার্থিভাবে উপাগত হইয়াছি: কেন না, সমধিক গুণবান্ পুরুষের সমীপে প্রার্থনা বিফল হওয়াও শ্রেয়ঃ, কিন্তু হীন জনের সমীপে প্রার্থনা সিদ্ধ হওয়াও শ্রেয়ঃ নয়। ৬।

(Hail, cloud !) I know thou hast sprung from the world renowned (glorious) line of *Pushkara* and *Avartaka*, art capable of wearing shapes at will and art the best officer of Indra. Hence, separated from my dearest relative (my sweet heart) by the omnipotence of fate, I place myself a suppliant to you:—

"For, better far solicitation fail,
With high desert, than with the base prevail."—6.

Notes.

1. भुवनविदिते—भुवनेषु त्रिभुवने विदिते विश्रुते यद्वा भुवनैः सर्वैः भुवनस्थजनैः विदिते सर्व्वजनविश्रुते ; renowned in all the worlds. विदितः—विद्+कर्म्मणि वर्त्तते क्तः। The law "मतिबुद्धिपूजार्थेभ्यश्च" does not apply here; for then by the aphorism "क्तस्य च वर्त्तमाने" the word भुवन would assume षष्ठी विभक्ति and by the aphorism "क्तेन च पूजायाम्" (*i. e.*, मतिबुद्धीत्यत्रेण विहितः यः क्तः तदन्तेन षष्ठी न समस्यते ; as राज्ञां मतः or पूजितः, but not राजमतः or राजपूजितः) there was no possibility of any compounded form such as we find in the text. Hence Mallinatha derives विदित with क्त to denote the past time, when no such obligation is necessary. As to the use of the क्त in the sense of the past with roots denoting मति, बुद्धि and पूजा we may cite the typical example, "पूजितः यः सुरासुरैः" quoted in the तत्त्वबोधिनी। "क्तेन च पूजायां" II. 2. 12. मतिबुद्धीत्यत्रेण विहितो यः क्त स्तदन्तेन षष्ठी न समस्यते। राज्ञां मतो बुद्धः पूजितो वा। राजपूजित इत्यादौ भूते क्तान्तेन सह तृतीया समासः।" इति दीक्षितः। "अन्ये तु कारकषष्ठ्या एव समासनिषेधोऽयं, शेषषष्ठ्या तु समासः स्यात् एव इत्याहुः। एतेन "कलहं सरामसहित' कृतवान्" इति भट्टिप्रयोगो व्याख्यातः। (रामसहितः सः कलहं कृतवान् इत्यन्वयः)" इति तत्त्वबोधिनीकारः।

2. पुष्करावर्त्तकानां—पुष्कराश्च आवर्त्तकाश्च ते पुष्करावर्त्तकाः "अल्पाच्तरम्" इति द्वन्द्वे पुष्करशब्दस्य पूर्व्वनिपातः। तेषां। शेषे षष्ठी। Mallinatha says पुष्कर and आवर्त्तक are certain principal races of clouds. Hence in his opinion, they are two distinct

classes. But the पुराणसर्व्वस्व quoted by Professor Wilson as also by Prof. Nundargicar says that पुष्करावर्त्तक is one name. Cf.

"पुष्करा नाम ते मेघा वृहन्तस्तोयमत्सराः ।
पुष्करावर्त्तकास्तेन कारणेनेह विश्रुताः ॥
नानारूपधरास्ते तु महाघोरस्वनास्तथा ।
कल्पान्ते वृष्टिकर्त्तारः सम्वर्त्ताग्नेर्नियामकाः ॥"

इति पुराणसर्व्वस्वे ब्रह्माण्डपुराणे च ।

"Clouds agreeably to the *Brahmanda Purana* are divided into three classes according to their origin from *fire*, *breath of Brahman*, or the wings of the mountains which were cut by Indra. The latter are also called पुष्करावर्त्तक, being specially the receptacles of water. The सारोद्धारिणी derives it thus : " पुष्करं पानीयं आवर्त्तयन्ति इति पुष्करावर्त्तकाः । They have been referred to in Venisanhara. Cf. "दग्धुं विश्वं दहनकिरणैर्नोदिता द्वादशार्का वाता वाता दिशि दिशि न वा सप्तधा सप्तभिन्नाः । छन्नं मेघैर्नगगनतलं पुष्करावर्त्तकाद्यैः पापं पापाः कथयत कथं शौर्य्यराशेः पितुर्मे ॥" इति अश्वत्थाम्नः उक्तिः । Act III. This adjunct speaks of the high lineage of the cloud.

3. कामरूपं—काम्यते इति कामं काम्यं (कम् + कर्म्मणि घञ्) "विधन्यत्रोपयुज्यते" इति नपुंसकत्वम् । कामं रूपं यस्य तं (ब. व्री.); इच्छाधीनविग्रहं । यद्वा कामं यथेच्छम् इत्यव्ययं रूपं विग्रहः यस्य तं ; इच्छानुरूपविग्रहधारिणम् ; अनेन मेघस्य दुर्गादिसञ्चारक्षमत्वं सूचितम् । wearer of shapes at will. Thus, Socrates, in the Clouds,

"Why then,
Clouds can assume what shapes they will, believe me."

Cumberland's translation quoted by Professor Wilson.

4. मघोनः—मह्यते पूज्यते असौ इति मह् + "श्वन्नुक्षन्पूषन्"—इत्यादिना

वनिन् । इति रायमुकुटः । मघवतः, देवेन्द्रस्य । प्रकृतिपुरुषं—प्रधान जनं ; chief officer.

5. तेन—महावंशजातत्वात्, दुर्गादिसञ्चरणक्षमत्वात्,प्रभुत्वादित्वाच्च । जातौ एकवचनं । हेतौ तृतीया ।

6. विधिवशात्—विधेः दैवस्य वशः आयत्तः तस्मात् ; दैवायत्तात्; as fate would have it.

7. दूरबन्धुः—दूरे दूरदेशे बन्धुः प्रियतमा सखी यस्य सः यद्वा दूरदेशे स्थितः बन्धुर्यस्य इति ; separated from my dearlest love.

8. अर्थित्वं—अर्थः प्रयोजनीयं वस्तु असन्निहितः अस्य इति अर्थी (अर्थ + "अर्थाच्चासन्निहिते" इनि इन्) तस्य भावः अर्थित्वं प्रार्थिभावं ।

9. अधिगुणे—अधिकः गुणः यस्य सः अधिगुणः । "अव्ययानां च बहुव्रीहिर्वक्तव्य."—इति बहुव्रीहिसमासः । तस्मिन् । अधिकगुणवति जने । विषयाधिकरणे सप्तमी । "विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ" इति वामनसूत्रात् विशेष्यार्थे विशेषणमात्रप्रयोगः ।

10. मोघा—निष्फला ; fruitless.

वरम्—मनाक् प्रिया। "देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीवे मनाक् प्रियं" इति वरशब्दस्य नित्य नपुंसकता अतएव अनङ्गलिङ्गत्वात् "याच्ञा"इत्युद्देश्ये न तल्लिङ्गस्थातन्त्रम् ।

11. लब्धकामा—लब्धः प्राप्तः कामः अर्थः यया सा । सफलकामा crowned with success.

12. याच्ञा मोघा—लब्धकामाः—"This is a sentiment of rather an original strain and indicates considerable elevation of mind : Something of the same kind occurs in Massinger's play of the *Bondman*, where Pisandar says,—

"I'd rather fall under so just a judge,
Than be acquitted by a judge corrupt,

सन्तप्तानां त्वमसि शरणं तत् पयोद प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥ ७ ॥

And partial in his censure."

Professor Wilson.

Cf. "इत्याश्वासादभिमतविधौ कामये त्वां नियोक्तुं,
न्यस्तः साधीयसि सफलतामर्थभारो हि धत्ते॥" उद्धवसन्देश 14.

तथाच

"अतीव दुःखार्त्ता शरणमबला त्वां गतवती
न भिक्षा सत्पक्षे व्रजति हि कदाचित् विफलताम्॥"हंसदूत 19.

13. अत्र "प्रेयः प्रियतराख्यानम्" इति काव्यादर्शनियमात् प्रेयोऽलङ्कारः इति मल्लिनाथः। परं सम्मठकविराजादीनां नव्यालङ्कारिकाणां मते प्रेयः इति कोऽपि स्वतन्त्रोऽलङ्कारः नास्ति। "उदात्तं वस्तुनः सम्पत्" इति लक्षणात् मेघस्य सम्पद्वर्णनेन उदात्तालङ्कारः इति नव्यानां सम्मतं। स च उदात्तालङ्कारः अर्थान्तरन्यासेन अनुप्राणितः।

14. Conjugations:—

जन्—जायते, जज्ञे, अजनि, अजनिष्ट, जनिष्यते।

विद्—वेत्ति, वेद, विवेद, विदाञ्चकार, वेत्तु, विदांकरोतु, विद्यात्, अवेत्, वेदिष्यति, अवेदीत्।

ज्ञा—जानाति, जानीते, जज्ञौ, जज्ञे, अज्ञासीत्, ज्ञास्यति, ते, जानीयात्, जानीत।

गम्—गच्छति, जगाम, अगमत्, गमिष्यति।

लभ्—लभते, लेभे, लप्स्यते, अलब्ध, लभेत।

Prose order—हे पयोद! त्वं सन्तप्तानां शरणम् असि, तत् धनपति-

क्रोधविश्लेषितस्य मे सन्देशं प्रियायाः हर। बाह्योद्यानस्थितहरशिरश्चन्द्रिका-धौतहर्म्या अलका नाम यक्षेश्वराणां वसतिः ते गन्तव्या। ७।

Paraphrase—हे मेघ! भवान् आतपश्रान्तानां पयोदानेन विरह-संज्वरितानां प्रोषितानां स्वगृहप्रेरणेन रक्षकोऽसि अतः कुवेरकोपात् प्रियया वियोजितस्य मम वार्त्तां प्रियां प्रति नयतु वार्त्ताहरणेन आवयोः सन्तापं नुदतु च। यस्यां हर्म्याणि बाह्योद्याने स्थितस्य हरस्य शिरश्चन्द्रिकया निर्म्मलानि भवन्ति सा अलका नाम कुवेरनगरी भवता इतो यातव्या ततः इतरव्यावर्त्तकैर्वक्ष्यमाणैश्चिह्नैः मद्भवनम् आसादय। ७।

Change of voice—* त्वया * शरणेन भूयते, * सन्देशः * क्रियतां। बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्यां अलकां * वसतिं त्वं गमिष्यसि (गच्छेः वा)। ७।

Sanjivani.—सन्तप्तानामिति। हे पयोद! त्वं सन्तप्तानाम् आतपेन वा प्रवासविरहेण वा संज्वरितानाम्। "सन्तापः संज्वरः समौ" इत्यमरः। शरणं पयोदानेन आतपखिन्नानां प्रोषितानां स्वस्थानप्रेरणया च रक्षकोऽसि। "शरणं गृहरक्षित्रोः" इत्यमरः। तत् तस्मात् कारणात् धनपतेः कुवेरस्य क्रोधेन विश्लेषितस्य प्रियया वियोजितस्य मे मम सन्देशं वार्त्तां प्रियायाः हर प्रियां प्रति नय इत्यर्थः। सम्बन्धसामान्ये षष्ठी। सन्देशहरणेन आवयोः सन्तापं नुद इत्यर्थः। कुत्र स्थाने सा स्थिता तत्स्थानस्य वा किं व्यावर्त्तकं तत्राह गन्तव्येति। वहिर्भवं वाह्यम्। "वहिर्देवपञ्चजनेभ्यश्च" ञ्यः। वाह्ये उद्याने स्थितस्य हरस्य शिरसि या चन्द्रिका तया

धौतानि निर्म्मलानि हर्म्याणि धनिकभवनानि यस्यां सा तथोक्ता। "हर्म्यादि धनिनां वासः" इत्यमरः। अनेन व्यावर्त्तकमुक्तम्। अलका नाम अलका इति प्रसिद्धा यक्षेश्वराणां वसतिः स्थानं ते तव गन्तव्या। त्वया गन्तव्या इत्यर्थः। "कृत्यानां कर्त्तरि वा"इति षष्ठी। ७।

হে পয়োধর, তুমি সন্তপ্ত জনের আশ্রয় স্বরূপ, অতএব ধনপতির ক্রোধ হেতু প্রিয়াবিরহিত আমার কুশল সংবাদ দয়াপূর্ব্বক প্রিয়তমার সমীপে লইয়া যাও। সম্প্রতি তোমার অলকানাম্নী যক্ষেশ্বরের নগরীতে গমন করিতে হইবে, তথায় বাহ্য পুষ্পোদ্যানাধিষ্ঠিত হরের চূড়ামণিস্থিত জ্যোৎস্নায় সৌধশ্রেণী নিয়ত উজ্জ্বল ও নির্ম্মল হইয়া রহিয়াছে দেখিবে। ৭।

Thou art, O cloud, the protector of the afflicted; convey therefore, I beseech you, to my beloved, a message from me who has been separated from her by the anger of the God of wealth. Thou shalt have to go to the abode of the lord of the Yakshas, Alaka by name, whose mansions are bathed in the moon-beams on the head of Siva who (constantly) resides in the outer garden (attracted by its beauty).—7.

Notes.

1. पयोद—पयः सलिलं वृष्टिं ददाति इति पयोदः (पयस् + दा + "आतोऽनुपसर्गे कः" इति कः)। "उपपदमतिङ्" (*i. e.*, उपपदं सुबन्तं समर्थेन नित्यं समस्यते। अतिङन्तश्चायं समासः) इति उपपदसमासः। मेघः। तत्सम्बुद्धौ; हे पयोधर।

2. सन्तप्तानां—(सम् + तप् + क्तः) तापक्लिन्नानां। The affliction

arises from two things viz (1 from the sultry heat of Summer and 2, from the intolerable separation from the dearest creature. The first is removed by the fall of rains and the second is removed by the return to and re-union with the dearest creature on the commencement of the rainy season.

3. शरणं—आश्रयः; रक्षिता। अजहल्लिङ्गत्वात् उद्देश्येन त्वमिति पदेन सह लिङ्गानैक्यम्। शरण may also mean गृह; C. F. "अग्निशरणमार्गं आदिश" in Sak. Act V.

4. तत्—अतएव; तस्मात् कारणात्। पञ्चम्यन्तमव्ययम्। हेतौ पञ्चमी।

5. धनपतिक्रोधविश्लेषितस्य—धनानां पतिः धनपतिः कुवेरः। यक्षेश्वरस्य धनाधिपत्यं ब्रह्मणा कृतम्। धनपतेः ("पतिःसमास एव" इति समासे पतिशब्दस्य मुनिवत् रूपम्) क्रोधः आक्रोशः तेन विश्लेषितः प्रियया विरहितः तस्य; of me who has been separated from my beloved spouse by the anger of my lord, the god of wealth. मे—मम। "सन्देशं" इत्यनेन सम्बन्धः। यद्वा "कर्तृकर्मणोः कृति" इति कर्त्तरि षष्ठी।

6. प्रियायाः—प्रियां प्रति। प्रियायाः समीपम् इत्यर्थः। "कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव" इति दीक्षितवचनात् सम्बन्धसामान्ये षष्ठी।

7. हर—हृ + "विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्" ततः "लोट् च" इति प्रार्थनायां लोटि हि। हरणार्थं त्वां प्रार्थये इत्यर्थः।

8. बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या—बहिः भवं बाह्यं (बहिस् + "देवपञ्चजनेभ्यश्च" इति ञ्यः। बाह्यम् उद्यानं (कर्मधारयः) तत्र स्थितः (७मी तत्) हरः (कर्मधारयः) तस्य शिरः (६ तत्) तस्मिन् चन्द्रिका अष्टमीचन्द्रपादः (७ तत्) तया धौतानि (३ तत्) निर्मलानि हर्म्याणि प्रासादाः यस्यां सा (बहुव्रीहिः); यत्र अलकायां प्रासादाः वैभ्राजाख्ये

त्वामारूढ़ं पवनपदवीमुद्‌गृहीतालकान्ताः
प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः ।
कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥८॥

बाह्योद्याने विहितस्थितेः हरस्य ललाटस्थितैः चन्द्रपादैः प्रतिरजनिन्यां निर्म्मलत्वं गच्छन्ति ; whose mansions are every night bathed in the moon-beams emitted from the head of Hara who comes with his consort Parbati to the *Vaibhraja*, its outer garden. The name of the outer garden is वैभ्राज। Cf. "वैभ्राजाख्यं विबुधवनितावारमुख्यासहाया बद्धालापा बहिरुपवनं कामिनो निर्व्विशन्ति" इति उत्तरमेघे। तथा च "नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्याः प्रदोषाः" तत्रैव। अनेन अलकायाः माहात्म्यवर्णनात् उदात्तालङ्कारः।

9. अलका—"अलति अलका। अलभूषणे क्षिपकादित्वात् इत्वाभावः" इति स्वामी। "अलयति भूषयति इति अलका" इति रायमुकुटः। It is the capital of Kuvera, situated on the *Kailasa*, a snowy peak of the Himalaya.

10. यक्षेश्वराणाम्—"पूज्यत्वे बहुवचनम्"।

11. Conjugations :—

तप् (तापे)—तपति, तताप, तप्स्यति, अताप्सीत्।

Prose order—पवनपदवीम् आरूढ़ं त्वां पथिकवनिताः प्रत्ययात् आश्वसत्यः उद्‌गृहीतालकान्ताः प्रेक्षिष्यन्ते। त्वयि सन्नद्धे सति विरहविधुरां जायां कः उपेक्षेत, अन्योऽपि यो जनः अहमिव पराधीनवृत्तिः न स्यात्। ८।

Paraphrase—प्रोषितभर्त्तृकाः त्वामाकाशमारूढ़ं विलोक्य अये जलदकालः समायातः भर्त्तारश्च न त्वरितम् गृहमागमिष्यन्ति इति विश्वासात् दृष्टिप्रसारणार्थम् उन्नमस्य धृतालकाः सत्यः भविष्यन्ति। त्वयि समराय बद्धपरिकरे

भृतधनुषि सुन्नमादे सति कः विरहविधुरया पत्न्या न संगच्छेत यः अहमिव शापनिघ्नः स्वच्छन्दगतिरहितः तस्मादृते न कोपि तथाकर्तुं शक्ष्यति । ८ ।

Change of voice—पवनपदवीम् आरूढः त्वं पथिकवनिताभिः • आश्वसतीभिः उद्गृहीतालकान्ताभिः (सतीभिः) प्रेक्षिष्यसे । * विरह-विधुरा जाया केन उपेक्ष्येत, अन्येनापि येन जनेन मयेव पराधीनवृत्तिना न भूयेत । ८ ।

Sanjivani—मदर्थं प्रस्थितस्य ते पथिकाङ्गनाजना-श्वासनम् आनुषङ्गिकं फलम् इत्याह त्वाम् इति। पवनपदवीम् आकाशम् आरूढं त्वां। पन्थानं गच्छन्ति ते पथिकाः। "पथः ष्कन्" इति ष्कन्प्रत्ययः। तेषां वनिताः प्रोषितभर्तृकाः। प्रत्ययात् प्रियागमनविश्वासात्। "प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु" इत्यमरः। आश्वसत्यो विश्वसिताः। श्वसिधातोः शत्रन्तात् "उगितश्च" इति ङीप्। तथा उद्गृहीतालकान्ताः दृष्टिप्रसारार्थम् उन्नमय्य धृतालकाग्राः सत्यः प्रेक्षिष्यन्ते अत्युत्कण्ठतया द्रक्ष्यन्ति इत्यर्थः। मदागमनेन पथिकाः कथम् आगमिष्यन्ति इत्यत्राह—तथाहि। त्वयि सन्नद्धे व्यापृते सति विरहेण विधुरां विवशां जायां कः उपेक्षेत न कोऽपि इत्यर्थः। अन्योऽपि मद्व्यतिरिक्तोऽपि यो जनः अहम् इव पराधीनवृत्तिः परायत्तजीवको न स्यात्। स्वतन्त्रस्तु न कोऽपि उपेक्षेत इति भावः। अत्र अर्थान्तरन्यासोऽलङ्कारः।। ८।

তুমি পবনপথে (অর্থাৎ গগনে) সমারূঢ় হইলে প্রোষিতভর্তৃকা

সুন্দরীগণ প্রিয়সমাগমাশায় সমাশ্বাসিত হইয়া অলকাবলী সমুত্তোলিত করিতে করিতে তোমাকে সাগ্রহে দর্শন করিবে। কেননা, তুমি আকাশমার্গ আবৃত করিলে, আমার ন্যায় পরাধীনবৃত্তি নয় এতাদৃশ কোন ব্যক্তি স্বীয় প্রিয়তমাকে উপেক্ষা করিয়া বিদেশে কাল যাপন করিতে পারে? ৮।

The wives of travellers, consoling themselves out of confidence (of their husband's return) will, with the ends of their curls lifted up (for enabling them to see you better), hail thee, mounted on the region of the wind: For, when thou art stirring in the sky, what other man, whose actions, like those of mine, are not dependant upon the will of another, can disregard his wife and leave her alone deeply afflicted by separation (from him)?—8.

Notes.

1. पवनपदवीं—पवनस्य वायोः पदवी पन्थाः तां; पवनमार्गं आकाशमित्यर्थः। "अकर्म्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्म्मसंज्ञकः इति वाच्यम्" इति आरोहतेः कर्म्मत्वात् "अकथितञ्च" इति कर्म्मणि द्वितीया।

आरूढं—(आ+रुह+कर्त्तरि क्तः) अधिरूढं; mounted: mounted on the airial path *i. e.*, on the path of the wind *i. e.*, in the sky.

2. पथिकवनिताः—पन्थानं गच्छन्ति इति पथिकाः (पथिन्+ष्कन्)। परं "पन्थानं नित्यं गच्छन्ति" इति पान्थाः (पथिन् + "पन्थो ण नित्यम्" इति नित्यगमने णः)। Hence an occasional traveller is called a पथिक and a regular traveller or a wanderer is called पान्थ. But this subtle difference is not always observed in usage and has been remarked by Patanjali in his Mahabhashya.

The feminine form of पांथक is पथिकी and that of पान्थ is पान्था । पथिकानां अनियतपरिभ्रमणानां वनिताः प्रियाः, अर्थात् प्रोषितभर्तृकाः, wives of persons who have become travellers for some occasion.

3. प्रत्ययात्—आगमनप्रत्ययात् । "हेतौ च" इति हेतौ पञ्चमी । मेघोदयमालोक्य कान्तो मे दूरं न स्थास्यतीति विश्वासात् इत्यर्थः ।

4. आश्वसत्यः—(आ + श्वस् + शतृ + स्त्रियाम् ईप् अदादित्वात् नुमभावः) आश्वासनं लभमानाः; consoling themselves

5. उद्गृहीतालकान्ताः—अलकानां चूर्णकुन्तलानां ("क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनं । हास्यं परगृहे यानं त्यजेत् प्रोषितभर्तृका ॥" इति हारीतवचनात् संस्काराभावात् आलुलितकेशपाशानां) अन्ताः अग्रभागाः (६ तत्)। उद्गृहीताः दृष्टिप्रसारार्थं उन्नमय्य धृताः अलकान्ताः याभिः ताः (बहुव्रीहिसमासः); by whom, the ends of their curling hair would be lifted up in order that they might get a better view of thee. The hair being left uncombed and hence dishevelled on their face, they will have to lift them up to see thee.

6. प्रेक्षिष्यन्ते—उदितः घनः कदा नु मे नाथ एष्यति इति अत्युत्कण्ठया द्रक्ष्यन्ति ।

7. सन्नद्धे— सम् + नह् + क्तः) व्यापृते; "प्रकटितसुरचापतडिल्लताभिर्व्यक्तितादिकासमयीके" इति सारोद्धारिणी । त्वयि—भावे ७मी ।

8. विरहविधुरां—विच्छेदकातरां । जायां—प्रियतमां ।

9. पराधीनवृत्तिः—परस्मिन् अधि इति पराधीना । "सप्तमी शौण्डैः" इत्यत्र "अधिशब्दोऽत्र पठ्यते" इति दीक्षितवचनात् सप्तमीसमासः । ततः "अषडक्षाशितङ्ग्वलंकर्मालम्पुरुषाध्युत्तरपदात् इति खः" । पराधीना वृत्तिः यस्य सः पराधीनवृत्तिः; परायत्तजीवनकः; one dependant upon the will of another.

मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां
वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।
गर्भाधानक्षणपरिचयान्नूनमावद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥९॥

10. अत्र अर्थान्तरन्यासालङ्कारः ।

11. Conjugations :—

रुद्—रोदिति, रुरोद, रोत्स्यति, अरुदत् ।

ग्रह्—गृह्णाति, जग्राह, ग्रहीष्यति, अग्रहीत् ।

ईक्ष्—ईक्षते, ईक्षाम्बभूव, ईक्षाञ्चक्रे, ईक्षामास ; ईक्षिष्यते, ऐक्षिष्ट ।

श्वस्—श्वसिति, श्वसन्ति, श्वस्यात्, अश्वसत्, अश्वसीत्, शश्वास, श्वसिष्यति, अश्वसीत् ।

नह्—नह्यति, ते, ननाह, नेहे, अनात्सीत्, अनद्ध, नत्स्यति, ते ।

वृत्—वर्त्तते, ववृते, वर्त्तिष्यते ; वर्त्स्यति, अवर्त्तिष्ट, अवृतत् ।

Prose order—अनुकूलः पवनः त्वां मन्दं मन्दं यथा नुदति, अयं च सगन्धः ते वामः चातकः मधुरं नदति, गर्भाधानक्षणपरिचयात् खे आवद्धमालाः बलाकाः नयनसुभगं भवन्तं नूनं सेविष्यन्ते । ९ ।

Paraphrase—अनुकूलो वायुस्त्वां शनैः शनैः चालयति, सगर्व्वश्चातकः वामभागस्थः कलकण्ठं व्याहरति, बकावलिः बद्धपंक्तिः आकाशेन सञ्चरमाणं नेत्रप्रीतिकरं त्वाम् अचिरात् गर्भाधानोत्सवः समायात इति प्रमोदनिर्भरा सेविष्यते । ९ ।

Change of voice—अनुकूलेन पवनेन त्वं * नुद्यसे, अनेन सुगन्धेन ते वामेन चातकेन * नद्यते, * आवद्धमालाभिः बलाकाभिः नयनसुभगः भवान् नूनं सेविष्यते । ९ ।

Sanjivani—निमित्तान्यपि ते शुभानि दृश्यन्ते इत्याह

मन्दं मन्दम् इति। अनुकूलः पवनो वायुः त्वां मन्दं मन्दम् अतिमन्दम् इत्यर्थः। अत्र कथञ्चित् वीप्सायामेव द्विरुक्तिर्निर्वाह्या। "प्रकारे गुणवचनस्य" इत्येतदाश्रयणे तु कर्मधारयवद्भावे सुब्लुकि मन्दमन्दम्" इति स्यात्। तदेवाह वामनः "मन्दं मन्दमित्यत्राप्रकारार्थे द्विर्भावः" इति। यथा सदृशं भाविफलानुरूपम् इत्यर्थः। "यथा सादृश्ययोग्यत्ववीप्सास्वार्थानतिक्रमे" इति यादवः। नुदति प्रेरयति। अयं सगन्धः सगर्व्वः सम्बन्धी इति केचित्। "गन्धो गन्धक आमोदे लेशे सम्बन्धगर्व्वयोः" इति विश्वः। ते तव वामो वामभागस्थः। "वामस्तु वक्रे रम्ये स्यात् सव्ये वामगतेऽपि च" इति शब्दार्णवे। चातकः पक्षिविशेषश्च मधुरं श्राव्यं नदति व्याहरति इदं निमित्तद्वयं वर्त्तते। वर्त्तिष्यते च अपरं निमित्तम् इत्याह गर्भेति। गर्भः कुक्षिस्थो जन्तुः। "गर्भोऽपवारके ह्यग्नौ सुते पनसकण्टके। कुक्षौ कुक्षिस्थजन्तौ च" इति यादवः। तस्य आधानम् उत्पादनं तदेव क्षणः उत्सवः सुखहेतुत्वात् इति भावः। "निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः" इत्यमरः। तस्मिन् परिचयात् अभ्यासात् हेतोः खे व्योम्नि आबद्धमालाः गर्भाधानसुखार्थं त्वत्समीपे बद्धपंक्तयः इत्यर्थः। उक्तञ्च वर्णोदये "गर्भं वलाका दधतेऽभ्रयोगान्नाके निबद्धावलयः समन्तात्" इति। वलाकाः वकाङ्गनाः। नयनसुभगं दृष्टिप्रियं

भवन्तं नूनं सत्यं सेविष्यन्ते। अनुकूलमारुतचातकशब्दितबलाकादर्शनानां शुभसूचकत्वं शकुनशास्त्रे दृष्टं तत् विस्तरभयात् न अलेखि। ९।

অনুকূলবাহী সমীরণ মৃদুমন্দ সঞ্চালনে তোমাকে ভাবিফলানুরূপ পরিচালিত করিতেছে; চাতক তোমার বামভাগে অবস্থিত হইয়া সগর্ব্বে কলকণ্ঠে মধুর কূজন করিতেছে; গর্ভধারণরূপ মহোৎসব পরিচয়হেতু আকাশে বদ্ধপংক্তি হইয়া বকাঙ্গনাগণ নিঃসন্দেহ নয়নরঞ্জন তোমার শুশ্রূষা করিবে। ৯।

An agreeable breeze is impelling thee very gently in a suitable manner; and this *Chataka*, in great pride, is warbling melodiously, stationed in thy left; the female cranes, too, from their experience in the pleasure of conception, will, most assuredly, form themselves into rows in the sky, and wait upon thee, (who art so) charming to the eye.—9.

Notes.

1. Nothing can be more beautifully harmonious than the language of this stanza. Here "the sound is an echo to the sense". The "मन्दं मन्दं &c.—" here proceeds as equably and as smoothly as the gentle breeze which it describes. We do not agree with Mallinatha in the interpretation of this stanza. Mallinatha takes यथा in the sense of सदृश *i. e.*, भाविफलानुरूप which makes अनुकूल unnecessary; in his interpretation नूनं, too, loses all it propriety; and taking the three sentences as the three causes after him we find a break in the sequence of tenses, as सेविष्यन्ते is not in the same tense with नदति and नुदति; besides another च is necessary in the

third sentence to connect it with the preceding ones or the two च's in the first two sentences should be dropped and a च only is to be placed in the third sentence. The real interpretation should be:—"अत्र आद्यं द्वयं निमित्तं तृतीयं तत्कार्य्यं, यतश्चानुकूलः पवनो मन्दं मन्दं वहन् त्वां नुदति यतश्च चातको वामभागस्थः मधुरं नदति, अतः निश्चितमेव बलाकाः बद्धपङ्क्तयः नयनसुभगं त्वां सेविष्यन्ते इति मन्ये। त्वं चेत् मन्निकेतनं गमिष्यसि तदा न केवलं ममोपकार स्तवापि बलाकानायिकोपभोगः सम्पत्स्यते इत्यर्थः। मेघप्रेरणार्थोऽयं श्लोकः। कल्यानमल्लप्रभृतीनामपि एष एव पक्षः सम्मतः।

2. अनुकूलः—कूलं तीरदेशम् अनुगतः इति अनुकूलः कूलानुसारी; ("अत्यादयः क्रान्ताद्यर्थे द्वितीयया इति प्रादिसमासः"।) पृष्ठानुगामी। "पृष्ठानुगामी मृदुगति श्चानुकूलोऽभिधीयते" इति सारोद्धारिणी; (hence) शुभदायी। अनुकूलपवनेन मनोरथसिद्धिः सूच्यते। तद्यथा—"शुभगन्धे च मन्दे च सानुकूले च मारुते। प्रस्थिते सर्व्वकार्य्याणां सर्व्वसिद्धिर्भवेत् ॥" इति बालकाव्ये।

3. मन्दं मन्दं—अतिमन्दम्। The double forms with case endings in each offer great difficulty here. Mallinath says, they are to be justified some how with the aid of the sutra "नित्यवीप्सयोः" VIII. 1. 4 *i. e.*, आभीक्ष्ण्ये वीप्सायाञ्च द्योत्ये पदस्य द्विर्वचनं स्यात्। We cannot cite here the sutra "प्रकारे गुणवचनस्य"—VIII. 1. 12. *i. e*, सादृश्ये द्योत्ये गुणवचनस्य द्वे स्तः for that would yield the form मन्दमन्दं by the canon "तच्च कर्म्मधारयवत्," whereby the fomer member would assume the masculine form (तेन पूर्व्वपदस्य पुंवद्भावः). He cites here the opinion of Vamanacharyya who in his Sutravritti notes:—

"मन्दंमन्दम् इत्यप्रकारार्थत्वे V. 2. 87. and explains "अत्र मन्दं मन्दम् इत्यप्रकारार्थत्वे भवति। प्रकारार्थत्वे तु "प्रकारे गुणवचनस्य" इति द्विर्वचने कृते कर्म्मधारयवद्भावे मन्दमन्दम् इति प्रयोगः। मन्दं मन्दम् इत्यत्र तु "नित्यवीप्सयोः" इति द्विर्वचनम्। अनेकभागात्मकस्य नुदे यदा सर्व्वे भागा मन्दत्वेन व्याप्तुमिष्टा भवन्ति तदा वीप्सेति।" अत्राह तत्त्वबोधिनीकारः "अथ कथं 'खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपयुज्य' इति मेघदूते। (I. 13) पदार्थभेदस्याभावेन वीप्सार्थस्यासम्भवात् इति चेत्। अत्राहुः, एकस्यापि खेदावस्थासु क्षयावस्थासु च भेदं परिकल्प्य वीप्सा बोध्या इति। अथ कथं 'मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां' इति। वीप्सार्थस्यासम्भवात् अनेनैव द्विर्वचने कृते "मन्दमन्दस्मितः प्रययौ खम्" इति वत् सुब्लुक् स्यात् इति चेत्। सत्यम्, स्वतो मन्दगामिनं त्वां पवनो मन्दं नुदति इति कथञ्चित् व्याख्येयम्। सिद्धस्य गते श्चिन्तनीयत्वात्" इति।

4. यथा—Mallinatha explains यथा by सदृशं *i. e.*, भाविफलानुरूपं which makes अनुकूलः superfluous; we therefore take यथा in its usual sense of यादृशं।

5. नुदति—(नुद्+लट् ति) प्रेरयति; impels; conducts.

6. अयं—सन्निकृष्टः; समीपवर्त्ती।

7. सगन्धः—गन्धेन गर्व्वेण सह वर्त्तमानः ("तेन सहेति तुल्ययोगे" इति बहुव्रीहिः, ततः "वोपसर्ज्जनस्य" इति विकल्पात् सहस्य सः, पक्षे सहगन्धः); सगर्व्वः। यद्वा समानः गन्धः सम्बन्धः यस्य सः इति सगन्धः ("समानस्य च्छन्दस्यमूर्धप्रभृत्युदर्केषु" इत्यत्र "समानस्य इति योगो विभज्यते। तेन सपक्षः साधर्म्यं सजातीयमित्यादि सिद्धम्" इति काशिका। यद्वा "सहशब्दः सदृशवचनोऽप्यस्ति" इति दीक्षितवचनात् सदृशः गन्धेन इति अस्वपदविग्रहबहुव्रीहिना साध्यः।) सम्बन्धी; the chataka holds a

degree of kin-ship with the cloud. Cf. ऋतुसंहार—

"तृषाकुलै श्चातकपक्षिणां कुलैः प्रयाचितास्तोयभरावलम्बिनः।
प्रयान्ति मन्दं नववारिधारिणो बलाहकाः श्रोत्रमनोहरस्वनाः ॥"

Our poet, too, has used the word सगन्धः in the second sense in his Sakuntala. Cf. Act V. "तदा त्वम् इत्थं प्रहसितोऽसि। सर्व्वः सगन्धेषु विश्वसिति। द्वावप्यारण्यकौ इति।" Kallyanamalla reads "चातकस्तोयगृध्नुः" which we leave off as unpoetical. Bharata reads "चातकस्ते सगर्व्वः" which yields the same thing as that of Mallinath.

8. वामः—वामभागस्थः। अत्र भरत आह—"वर्हिणश्चातकाश्चाषा वै च पुंसञ्ज्ञिताः खगाः। मृगा वा वामगा दृष्टाः सैन्यसम्पत्फलप्रदाः॥" तथाच सारोद्धारिणी—"कामं वामसमायुक्ता भोज्ये भोगप्रदायिनः। दृष्टास्तुष्टिं प्रयच्छन्ति प्रयातुर्मृगपक्षिणः॥"

9. गर्भाधानक्षणपरिचयात्—गर्भस्य कुक्षिस्थजन्तोः आधानम् उत्पादनं (षष्ठी तत्) तदेव क्षणः उत्सवः (रूपककर्म्मधारयः) तस्मिन् परिचयः अभ्यासः तस्मात् (७मी तत्); from their experience of the pleasure of conception. The rainy season is the time of their gestation which explains well their attachment to the cloud. Mallinatha quotes कर्णोदय which says that the cranes (valaka) in a body conceive in the sky by their contact with the rain-clouds. (nimbus) The सारोद्धारिणी says "गर्भाधानक्षणपरिचयात् गर्भग्रहणावसरात् तदीयगर्ज्जितश्रवणेन तासां गर्भः समुत्पद्यते। गर्भाधानं हि महिलानां महानुत्सवः। यत् समागमे महोत्सवो भवति को नाम तस्य सेवां न कुर्य्यात् इति।" The commentators भरत, सनातन, रामनाथ and हरगोविन्द read गर्भाधानक्षमपरिचय and भरत explains it thus:—गर्भस्य आधाने आरोपणे क्षमः समर्थः परिचयः सम्बन्धो यस्य तादृशम्"। It is not a happy reading.

10. आबद्धमालाः—आबद्धा (आ + बन्ध् + कर्म्मणि क्तः + टाप्) कृता माला याभिः ताः ; बद्धमालाः ; having been formed into rows. "पयोदकाले स्वभावादेव बलाकाः श्रेणीभूता भवन्ति" इति सारोद्धारिणी ।

11. नयनसुभगं—शोभनः भगः भाग्यं यस्य सः सुभगः (अव्ययानां च बहुव्रीहि र्वक्तव्यः—इति बहुव्रीहिः ; यद्वा सुगतः भगः यस्य स इति प्रादिभ्यो धातुजस्य"—इति बहुव्रीहिसमासे गतपदस्य लोपः) रमणीयः । "स खलु सुभगः यं अङ्गनाः कामयन्ते" इति रतिरहस्ये । नयनयोः सुभगः इति ६ तत् । दृष्टिरम्यः ; रम्यदर्शनः । तं ।

12. भवन्तं—(भा + डवतु = भवत्) ; त्वां । It is a pronoun (सर्व्वनाम) and its feminine form is भवती । But भवत् (भू + शतृ) becomes भवन् in masculine and भवन्ती in the feminine.

13. बलाकाः—"बलाका is said in Mr. Colebrooke's Amara-kosha, to mean a small crane; the word is always feminine, and perhaps therefore means the female bird only; indeed, some of the commentators on this poem call it the female of the बक (बकाङ्गना) । The rainy season is that of their gestation. The perodical journeys and orderly flight of these birds have long furnished classical poetry with enbellishments; they are frequently alluded to by Homer. Cf. Illiad.

"Not less their number than the embodied cranes,
Or milk-white swans in Asia's watery plains,
That o'er the windings of Cayster's springs,
Stretch their long necks and clap their rustling wings."

Pope. Quoted by Prof Wilson. in his edition.

14. "यथा बलाकाः नवयौवनाः स्त्रियः आनन्ददायकं पुरुषं से

ताञ्चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम्।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि ॥१०॥

एकान्ते सेवन्ते। बलेन यौवनमदेन भङ्क्त्वा कुटिलं गच्छन्ति याः ताः। कथंभूताः—आबद्धमालाः परिहितपुष्पस्रजः" इति सारोद्धारिणीप्रमुखाः।

15. Conjugations :—

नुद—नुदति, ते, नुनोद, नुनुदे, नोत्स्यति, ते : अनौत्सीत्, अनुत्त।
नद—नदति, ननाद, नदिष्यति, अनादीत्, अनदीत्।
बन्ध्—बध्नाति, बबन्ध, बध्नीयात्, भन्त्स्यति, अभान्त्सीत्। लोटि हि बधान।
सेव्—सेवते, सिषेवे, सेवेत, असेविष्ट।

Prose order—हे मेघ! दिवसगणनातत्पराम् अव्यापन्नाम् एकपत्नीं भ्रातृजायां तां अविहतगतिः (त्वं) अवश्यं द्रक्ष्यसि। आशाबन्धः प्रणयि कुसुमसदृशं विप्रयोगे सद्यःपाति हृदयं प्रायशः रुणद्धि। १०।

Paraphrase—हे जलद! अवशिष्टदिनानां संख्याने आसक्ताम् अतएव इयत्सु दिवसेषु अतीतेषु नाथो मे ऽवश्यं प्रत्यागमिष्यति इत्याशया प्राणान् धारयन्तीम् पतिव्रतां हे भ्रातः भ्रातृजायात्वात् निःशङ्कं मातृवत् दर्शनीयां तां मत्प्रेयसीम् अविच्छिन्नगतिः (अनिषिद्धगमनत्वात् सफलप्रयासः)सन् अवश्यम् आलोकयिष्यसि आशाबन्धं (कर्तृ) प्रेममयं पुष्पवत् कोमलं अतएव विरहे सद्यः पतनशीलं नारीजीवितं प्रायेण पतनात् वारयति यथा वृन्तं पवनाघाते सद्यःपाति पुष्पं पतनात् वारयति तथा आशा विरहे सद्यः पतनशीलं युवतिजीवितं मरणात् निवर्त्तयति। १०।

Change of voice—दिवसगणनातत्परा अव्यापन्ना एकपत्नी भ्रातृजाया सा अविहतगतिना (त्वया) * द्रक्ष्यते। आशाबन्धेन * रुध्यते। १०।

Sanjivani—नच तस्या नाशात् व्रतस्खलनाद्वा निरर्थकस्त्वत्प्रयास इत्याह ताञ्च इति। हे मेघ दिवसानाम् अवशिष्टदिनानां गणनायां संख्याने तत्पराम् आसक्ताम्। "तत्परे प्रसितासक्तौ" इत्यमरः। अत एव अव्यापन्नाम् अमृतां। शापावसाने मदागमनप्रत्याशया जीवन्तीम् इत्यर्थः। एकः पतिर्यस्याः सा एकपत्नी तां पतिव्रताम् इत्यर्थः। "नित्यं सपत्न्यादिषु" इति ङीप्। नकारश्च। भ्रातुः मे जायां भ्रातृजायां। मातृवत् निःशङ्कं दर्शनीयाम् इत्याशयः। तां मत्प्रियाम् अविहतगतिः अविच्छिन्नगतिः सन् अवश्यं द्रक्ष्यसि च आलोकयिष्यसे च। तथाहि आशा अतितृष्णा। "आशा दिगतितृष्णयोः" इति यादवः। बध्यतेऽनेन इति बन्धः बन्धनं। वृन्तम् इति यावत्। आशा एव बन्धः आशाबन्धः। कर्त्ता। प्रणयि प्रेमयुक्तम् अत एव कुसुमसदृशं सुकुमारम् इत्यर्थः। अत एव विप्रयोगे विरहे सद्यःपाति सद्योभ्रंशनशीलम् अङ्गनानां हृदयं जीवितम्। "हृदयं जीविते चित्ते" इति शब्दार्णवे। प्रायशः प्रायेण रुणद्धि प्रतिबध्नाति। अर्थान्तरन्यासः। १०।

হে পয়োধর! তুমি অপ্রতিহতগতি হইয়া (মদন্তঃপুরে প্রবেশপূর্ব্বক) পতিব্রতা শাপাবসানদিনগণনাতৎপরা অতএব জীবিতা তোমার ভ্রাতৃপত্নীকে অবশ্য দেখিবে। কেননা আশাপাশ প্রণয়বান্ কুসুমসুকুমার বিরহে সদ্যঃ পতনোন্মুখ হৃদয়কে প্রতিরোধ করিয়া থাকে। ১০।

And, thou, with unimpeded movement, shalt, most assuredly, behold thy brother's (*i. e.,* mine) devoted consort

(*i. e.*, true to her vow), engaged in counting the days (of the remaining year) and therefore still alive; for, hope's (invigorating) tie, generally, keeps up in tact the loveing hearts of women, (other wise) fragile as a flower in separation.—10.

Notes.

1. Prof. Wilson reads sloka 10 just after sloka 7. He says that he has taken this liberty with the order of the text (as given by Mallinath) and brought the description of the Yaksha's wife a little in advance, in order to preserve the description which follows of the cloud's progress more connected. Professor Nundoorgikar of Bombay, prefers reading तांचावश्यम् &c. 10) after त्वामारूढम् &c. 8, under the circumstances that 'the mention in the eighth verse of the incidental service to be rendered by the cloud on his way to Alaka must be immediately followed by that of the main end for which the journey is to be undertaken.' 'Besides,' he says, 'the particles च and अवश्यं are rendered by मल्लिनाथ's order superfluous and unmeaning and the verse 9) mentions omens auspicious for the journey, which appears disconnected when it precedes तांचावश्यं &c. (10)." Lastly he is sided in his arrangement by the commentator पार्श्वाभ्युदय। Pandit Iswar Chandra Vidyasagara, in his learned edition of the text prefers reading sloka 11 before sloka 10. His argument runs thus :—"सप्तमे श्लोके सन्देशहरणार्थम् अलकागमनं याचित्वा अष्टमे विरहिणीसमाश्वासनरूपमानुषङ्गिकं फलं नवमे बहुनायिकासम्भोगसुखसमवायः एकादशे च सहायसम्पत्तिः सन्दर्शिता। * * * * एवं श्लोकनयेन

प्रबोध्य ननु नाहं गन्तुमनुत्सुकः किन्तु यदि त्वत्प्रिया मृता पातिव्रत्यस्खलिता वा स्यात् तर्हि निरर्थको मम गमनप्रयास इत्याशङ्कां परिहरन् मेघं प्रोत्साहयति तांचावश्यमित्यादिना दशमेन श्लोकेन। अतो दशमस्य श्लोकस्य एकादशस्थाने एकादशस्य च दशमस्थाने सन्निवेशो युज्यते &c." Regarding the chapter (पूर्व्वमेघ) as an entire whole, the change suggested by Professor Wilson stands unchallanged. It brings out the ideas most clearly. But Pandit Vidyasagara's arrangement cannot be set aside, as it gives the idea systematically so far as the first eleven slokas are concerned. The objections raised by Professor Nundurgikar falls through if we read the text after Professor Wilson. Professor Wilson first wants to state the errand on which the cloud is to proceed (*i. e.*, slokas 7 and 10) and then the different alurements that are to tempt the cloud to proceed on his mission (*i. e.*, slokas 8, 9, 11 etc.) In his opinion, the mission remains incomplete if slokas 7 and 10 are not read together and indeed it is so.

2. च—in our opinion it joins this sloka with sloka 7. Pundit Vidyasagara, who adopting मल्लिनाथ's interpretation न च तस्य नाशात् व्रतस्खलनात् वा निरर्थकप्रयास इत्यादि etc. on this stanza says that it should be read after the 11th stanza, or there cannot be any unity of thought, makes it join with sloka 11.

3. दिवसगणनातत्परां—दिवसानां शापान्तावशिष्टदिनानां गणना संख्यानं (६ तत्) तस्यां तत्परा व्यापृता (७मी तत्) तां; deeply engaged in counting the remaing days of the year when the curse would terminate. तत् गणनं परं प्रधानं यस्याः सा इति तत्परा (ब. व्री.) आसक्ता; deeply engaged. Cf. Ovid. "Or count

the tim like those who faithful love" Wilson's translation.

4. अव्यापन्नां—(वि + आ + पद् + क्तः + टाप् = व्यापन्ना मृता ; न व्यापन्ना इति अव्यापन्ना अमृता, जीविता) alive, *i. e.*, alive under the hope that she would again be united to me at the end of the curse. Students are, we believe, all of them familiar with the stories of Kadamvari and Mahasweta who sustained their lives inspired by the hope of reunion with their dead husbands at the expiration of the curse,

5. एकपत्नीं—एकः पति र्यस्याः सा एकपत्नी (व. ब्री.) तां ; the words सपत्नी &c. are formed at all times with ङीप् and a न is added to the penultimate (उपधा)। पतिप्राणां, पतिव्रतां ; Lit. a woman who has but one husband, hence a woman who is devoted to her husband lawfully wedded.

6. भ्रातृजायां—'भ्रातृजाया हि मातुः तुल्या भवति तथा च लक्ष्मणेनापि उक्तं रामायणे— "नाभिजानामि केयूरे नाभिजानामि कुण्डले। नूपुरे त्वभिजानामि नित्यं पादाभिवन्दनात् ॥" इति सारोद्धारिण्याम्। The Yaksha calls the cloud his younger brother and as such invests him with the power of entering into his inner apartment and talk confidentially to his wife, who would be to him his sister-in-law and therefore worthy of respect like his mother. Cf. Manu :—"मातृष्वसा मातुलानी श्वश्रूरथ पितृष्वसा। संपूज्या गुरुपत्नीवत् समास्ता गुरुभार्य्यया ॥ भ्रातुर्भार्य्योपसंग्राह्या सवर्णाहन्यहन्यपि"। II. 131—132.

7. अविहतगतिः—अविहता अविच्छिन्ना (नञ् + वि + हन् + क्त + टाप्) गतिः गमनं (गम् + भावे क्तिः) यस्य सः ; स्वच्छन्दगतिः ; अवारितगतिः सन् इत्यर्थः। अवश्यं—निःसन्देहं ; most assuredly.

8. आशाबन्धः—बध्यते अनेन इति बन्धः (बन्ध् + करणे घञ्) शृङ्खलं। आशा एव बन्धः इति आशाबन्धः (रूपककर्म्मधारयः रोधनधर्म्मस्य उपमाने

कर्त्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्ज्जितं मानसोत्काः ।
आ कैलासाद्बिसकिसलयच्छेदपाथेयवन्तः
सम्पत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥११

वन्धे मुख्यतया वर्त्तनात्) आशापाशः ; the tie of of hope. Cf. आशातन्तुर्न च कथयतात्यन्तमुच्छेदनीयः । प्राणत्राणं कथमपि करोत्यायताक्ष्याः स एकः ॥ मालती A. 9. Aso. "आशापाशैः सखि नवनवैः कुर्व्वती प्राणवन्धम्" उद्धवसन्देशे 83.

9. प्रणयि—प्रणयः प्रेमा अस्ति अस्मिन् इति प्रणयि (प्रणय + इन्) प्रेमयुक्तं, प्रेमप्रवणं ; affectionate, loving.

10. अङ्गनानां—Cf. उत्तरचरित Act IV. "पुरन्ध्रीणां हृदयं कुसुमसुकुमारं हि भवति" । प्रशस्तानि अङ्गानि सन्ति आसाम् इति अङ्ग + मत्वर्थे न प्रत्ययः ।

11. रुणद्धि—(रुध् + लट् ति) प्रतिबध्नाति ; keeps up in tact. Cf. विक्रमोर्व्वशीय—विदूषकः । "भो न दृश्यते एव उर्व्वशी । किन्तु तादृशमनुरागं प्रेक्ष्य शक्यम् आशावन्धेन आत्मानं धारयितुं । Act III. तथाच "गुर्व्वपि विरहदुःखम् आशाबन्धः साहयति ।" Sak. IV. 15.

12. अत्र सामान्येन विशेषसमर्थनात् अर्थान्तरन्यासोऽलङ्कारः ।

13. Conjugations :—

आप्—आप्नोति, आप, आप्स्यति, आपत् ।

हन्—हन्ति, घ्नन्ति ; जघान, हनिष्यति, अवधीत् ; कर्म्मणि अवधि, अघानि ।

दृश्—पश्यति, ददर्श, द्रक्ष्यति, अद्राक्षीत्, अदर्शत् ।

रुध्—रुणद्धि, रुन्ध, रुरोध, रुरुधे, रोत्स्यति, ते ; रुध्यात्, रुन्धीत ; अरुधत्, अरौत्सीत् ; अरुद्ध ।

Prose order—यत् च महीम् उच्छिलीन्ध्राम् अवन्ध्यां कर्त्तुं प्रभवति

तत् श्रवणसुभगं ते गर्ज्जितं श्रुत्वा मानसोत्काः बिसकिसलयच्छेदपाथेयवन्तः राजहंसाः नभसि भवतः आ कैलासात् सहायाः सम्पत्स्यन्ते। ११।

Paraphrase—यत् ते गर्ज्जितं (कर्तृ) क्षितिम् उद्गतकन्दलिकां अतएव सफलां विधातुं शक्नोति श्रोत्रसुखं तव तत् गर्जितं आकर्ण्य मानसे गन्तुमुत्सुकाः राजहंसाः बिसकिसलयैः पाथेयवन्तः आकाशे आकैलासं ते सहचरा भविष्यन्ति।

Change of voice—येन च * प्रभूयते * मानसोत्कैः * बिसकिसलयच्छेदपाथेयवद्भिः राजहंसैः * सहायैः सम्पत्स्यते। ११।

Sanjivani—सम्प्रति सहायसम्पत्तिश्चास्ति इत्याह कर्त्तुम् इति। यत् गर्ज्जितं। कर्तृ। महीम् उच्छिलीन्ध्राम् उद्भूतकन्दलिकाम्। "कन्दल्याञ्च शिलीन्ध्रं स्यात्" इति शब्दार्णवे। अत एव अवन्ध्यां सफलां कर्त्तुं प्रभवति शक्नोति। शिलीन्ध्राणां भाविशस्यसम्पत्तिसूचकत्वात् इति भावः। तदुक्तं निमित्तनिदाने "कालाभ्रयोगादुदिताः शिलीन्ध्राः सम्पन्नशस्यां कथयन्ति धात्रीम्" इति। तत् श्रवणसुभगं श्रोत्रसुखं। लोकस्य इति शेषः। ते तव गर्ज्जितं श्रुत्वा मानसोत्काः मानसे सरसि उत्काः उन्मनसः। उत्सुकाः इति यावत्। "उत्क उन्मनाः" इति निपातात् साधु। कालान्तरे मानसस्य हिमदुष्टत्वात् हिमस्य च हंसानां रोगहेतुत्वात् अन्यत्र गता हंसाः पुनर्वर्षासु मानसम् एव गच्छन्ति इति प्रसिद्धिः। बिसकिसलयानां मृणालाग्राणां छेदैः शकलैः पाथेयवन्तः। पथि साधु पाथेयं पथि

भोज्यम् । "पथ्यतिथिवसतिस्वपतेः ढञ्" । तद्वन्तः । मृणालाग्रखण्डसम्बलवन्तः इत्यर्थः । राजहंसाः हंसविशेषाः । "राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः" इत्यमरः । नभसि व्योम्नि भवतः तव । आ कैलासात् कैलासपर्य्यन्तं । पदद्वयञ्चैतत् । सहायाः सयात्राः । "सहायस्तु सयात्रः स्यात्" इति शब्दार्णवे । सम्पत्स्यन्ते भविष्यन्ति ॥ ११ ।

অপিচ,তোমার যে মন্দ্রধ্বনি পৃথ্বীকে শিলীন্ধ্রপূর্ণ (ভূমিস্ফোট) করণে ও বন্ধ্যত্বদোষদূরীকরণে সক্ষম, সেই শ্রুতিমধুর ধ্বনি শ্রবণ করিয়া মানসসরোবরের নিমিত্ত উৎকণ্ঠিত মরালগণ মৃণালকন্দ পাথেয়গ্রহণপূর্ব্বক আকাশমার্গে কৈলাসগিরিপর্য্যন্ত তোমার সহগামী হইবে। ১১।

And, hearing the *clap of thy thunder*, whioh is melodious to the ear and is capable of covering the earth with *mush-rooms* and as such making her fertile, the rajahansas (swans) longing to go to the laka Manasa, will be thy companions in the sky as far as the *Kailasa*, having laid in their provisions for the road, from the new shoots of the filaments of the stalk of the lotus.—11.

Notes.

1. उच्छिलीन्ध्रां—उद्भूताः शिलीन्ध्राः यस्यां तां ("प्रादिभ्यो धातुजस्य—" इति बहुव्रीहिसमासे धातुजस्य लोपः पाक्षिकः, पक्षे उद्भूतशिलीन्ध्राम्) "कवके उच्चजातौ च शिलीन्ध्रं कथ्यते बुधैः" इति अनेकार्थकोशः । शिलीन्ध्र is *mush-room* and is both *feminine* and *neuter*. Mallinatha quotes Nimittanidana to show that the

mush-rooms grow up by the sound of cloud and denote the future richness of the harvest. Kalyanamalla, Bharata, Ramanatha and Haragovinda read "उच्छिलीन्ध्रातपत्रां" and Kallyanamalla explains it thus:—"उद्गतानि शिलिन्ध्राणि भूमिस्फोटा: एव आतपत्राणि यस्यां ताम्" ।

2. कर्त्तुं—पर्य्याप्तिवचनेष्वलमर्थेषु" इति अलमर्थवाचकप्रभवतेर्योगात् तुमुन् ।

3. श्रवणसुभगं—श्रवणयो: कर्णयो: सुभगं मनोरमम् ; श्रुतिमनोरमं ; melodious to the ear (of all men). Cf. "बलाहका: श्रोत्रमनोहरस्वना:" ऋतुसंहार: II. 3.

4. मानसोत्का:—उत्का: उत्कण्ठिता:। "उत्क उन्मना:"—उद्गतमनस्कत्वमिरुच्यते स्वार्थे कन् (उत्+कन्)। मानसे मानससरोवरे उत्का: (७मी समास: यद्वा तृतीया समास:) ; longing for the lake Manasa.

5. विसकिसलयच्छेदपाथेयवन्त:—पथि साधु पाथेयं पथिभोज्यं (पथिन् + "पथ्यतिथिवसतिस्वपतेर्ढञ्" इति ढञ्)। पाथेयं एषाम् अस्ति इति पाथेयवन्त: (पाथेय+ "तदस्यास्त्यस्मिन्निति मतुप्" इति मतुप ; अवर्णान्तत्वात् यवादिवर्ज्जितत्वाच्च मतोर्मस्य वभाव:।) विसानां मृणालानां किसलया: पल्लवा: तेषां छेदा: शकला: तै: पाथेयवन्त: ; provided with provisions in their way by the bits of lotus shoots and stalks.

6. राजहंसा:—हंसविशेषा:। संज्ञात्वात् अविग्रहो नित्यसमास:। हंसानां राजान: इति विग्रहे तु राजहंसा: हंसराजा: इति पदद्वयं स्यात्, अत्र हंसश्रेणा एव बोध्यन्ते नतु "लोहितै: चञ्चुचरणै: सिता:" हंसविशेषा: इति विदुषां मतम्। "जलधरसमये मानसं यान्ति हंसा:" इति कविसमयप्रसिद्धि:। तथाच सारोद्धारिण्यां "ते हि नवमेघोदयभीरुत्वात् कलुषितसलिलाशया: अत: सुखवशेन अलकाया: मानसं प्रति यान्ति"। Cf. विक्रमोर्वशीये—"पश्चात् सर: प्रतिगमिष्यसि मानसं त्वं पाथेयमुत्सृज बिसं ग्रहणाय भूय:" IV. 15. तथाच "क्षिप्रमाना दिशो दृष्टा मानसात्सुक चेत यां कूजितं राजहंसानां नेदं नूपुरशिञ्जितम् ॥" IV. 14.

आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु ।
काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो वाष्पमुष्णम् ॥ १२।

"हंसपंक्तिरपि नाथ संप्रति प्रस्थिता वियति मानसं प्रति" Ghatakarpara, 9.

7. आ कैलासात्—"आङ् मर्य्यादाभिविध्योः" इत्यत्र समासस्य वैभाषिकत्वात् अत्र न समासः। "पञ्चम्यपाङ्परिभिः" इति आङ्योगे पञ्चमी। समासाभावे तु—"आकैलासम्" इत्येवं स्यात्। Up to mount Kailasa.

8. सहायाः—सह अयन्ति गच्छन्ति ये ते सहायाः सहयात्रिकाः (सह + अय् + अच्) ; अनुचराः।

9. Conjugations :—

श्रु—शृणोति, शुश्राव, श्रोष्यति, अश्रौषीत्।

गर्ज्—गर्जति, जगर्ज, गर्जिष्यति, अगर्जीत्।

पद्—पद्यते, पेदे, पत्स्यते, अपादि ।

Prose order—प्रियसखं तुङ्गं पुंसां वन्द्यैः रघुपतिपदैः मेखलासु अङ्कितम् अमुं शैलम् आलिङ्ग्य आपृच्छस्व, काले काले भवतः संयोगम् एत्य चिरविरहजं उष्णं वाष्पं मुञ्चतो यस्य (शैलस्य) स्नेहव्यक्तिः भवति। १२।

Paraphrase—उन्नतं सुरासुरनरैः आराधनीयैः रामपादन्यासैः चिह्नितं प्रियं सखायम् इत्थं बन्धुरिति महानिति पवित्र इति च सम्भावनार्हं पुरोवर्त्तिनं चित्रकूटाद्रिम् आश्लिष्य साधो यामि इति आमन्त्रणेन सभाजय। यस्य त्वत्सङ्गमकाले त्वत्सम्पर्कं प्राप्य चिरविरहजं वाष्पं त्यजतः प्रेमाविर्भावो जायते। १२।

Change of voice—प्रियसखः तुङ्गः ० अङ्कितः। असौ शैलः ० आपृच्छ्यताम् ० स्नेहव्यक्त्या भूयते। १२।

Sanjivani—आपृच्छस्वेति। प्रियं सखायं प्रियसखम्। "राजाहःसखिभ्यष्टच्" इति टच् समासान्तः। तुङ्गम् उन्नतं पुंसां वन्द्यैः नराराधनीयैः रघुपतिपदैः रामपादन्यासैः मेखलासु कटकेषु। "अथ मेखला। श्रोणिस्थानेऽद्रिकटके काञ्चिबन्धेभबन्धने" इति यादवः। अङ्कितं चिह्नितम्। इत्थं सखित्वात् महत्त्वात् पवित्रत्वाच्च सम्भावनार्हम्। अमुं शैलं चित्रकूटाद्रिम् आलिङ्ग्य आपृच्छस्व साधो यामि इति आमन्त्रणेन सभाजय। "आमन्त्रणसभाजने। आप्रच्छनम्"इत्यमरः। "आङि नुप्रच्छ्योरुपसंख्यानम्"इत्यात्मनेपदम्। सखित्वं निर्वाहयति काले इति। काले काले प्रतिप्रावृट्कालं। सुहृत्समागमनकालस्य कालशब्देन उच्यते। वीप्सायां द्विरुक्तिः। भवतः संयोगं सम्पर्कम् एत्य चिरविरहजम् उष्णं वाष्पम् उष्माणं नेत्रजलञ्च। "वाष्पा नेत्रजलोष्मणोः" इति विश्वः। मुञ्चतो यस्य शैलस्य स्नेहव्यक्तिः प्रेमाविर्भावो भवति। स्निग्धानां हि चिरविरहसङ्गतानां वाष्पपातो भवति इति भावः।१२।

সজ্জন পূজনীয় রঘুকুলতিলক রামচন্দ্রের চরণ চিহ্নে মেখলাদেশে অঙ্কিত এই ভবদীয় প্রিয়তম বন্ধু সমুন্নত রামগিরির নিকট সম্ভাষণ পূর্ব্বক বিদায় গ্রহণ কর; প্রতি বর্ষা ঋতুতে এই গিরি তোমার সমাগম সুখ প্রাপ্ত হইয়া চিরবিরহজনিত উষ্ণবাষ্প পরিত্যাগপূর্ব্বক (তোমার প্রতি ইঁহার) প্রেমের পরাকাষ্ঠা প্রদর্শন করিয়া থাকে। ১২।

Embrace and bid adieu to thy dear friend, this lofty

mountain, marked, on his slopes, with the foot-prints of the lord of the Raghus (*i. e.*, Rama Chandra) worthy of men's adoration; who, after being united with thee in every mon-soon, manifests his affection for thee by dropping a hot tear (in the form of rain-drops) from long separation.—12.

Notes.

1. प्रियसखं—प्रियः (प्री + "इगुपधज्ञाप्रीकिरः कः" इति कः) स्नेहास्पदं सखा (सह खिद्यते इति सह् + खिद + डिः ; यद्वा समानः ख्यायते जनैरिति रायभरतौ ।) इति प्रियसखः मित्रम् । "राजाहःसखिभ्यष्टच्" इति समासान्तष्टच् । तं ; dear friend. Hills and mountains have natural attraction for clouds and it most probably alludes to this natural phenomenon.

2. पुंसां वन्द्यैः &c.—पुंसां—"कृत्यानां कर्त्तरि वा" इति पाक्षिकी कर्त्तरि षष्ठी, पक्षे पुंभिः । वन्द्यैः—(वन्द् + कर्म्मणि ण्यत्) पूजनीयैः ; adorable.

3. मेखलासु—कटकेषु ; on the slopes. अवच्छेदे सप्तमी ।

4. प्रियसख denotes सखित्व (friend-ship), तुङ्ग denotes महत्त्व (noble-ness of his soul) and वन्द्यैः रघुपतिपदैः मेखलासु अङ्कितं denotes पवित्रत्व (sanctity of the mountain) and hence he is worthy of a warm greeting.

5. अमुं शैलं—रामगिरिं । आलिङ्ग्य—परिष्वज्य ; having embraced.

6. आपृच्छस्व—आमन्त्रयस्व ; साधो यामीति आमन्त्रणेन सम्भावय ; bid adieu to. "आङि नुप्रच्छ्योरुपसंख्यानम्" (*i. e.*, the roots नु and प्रच्छ preceded by आ become आत्मनेपद) इति आत्मनेपदम् ।

7. काले काले—प्रतिकालं । "नित्यवीप्सयोः" इति वीप्सार्थे द्विरुक्तिः ।

मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं
सन्देशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम् ।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः स्रोतसाञ्चोपयुज्य ॥१३

प्रतिप्रावट्कालम् इत्यर्थः ; in every monsoon. The implied meaning is सुहृत्सङ्गमकाल (*i. e.*, the time of union with a friend).

8. भवतः &c.—"पर्व्वता हि जलदसङ्ग्या स्निग्धा भवन्ति वाष्पञ्च मुञ्चन्ति" इति वल्लभः ।

9. मुञ्चतः &c.—"अन्योऽपि यः किल चिरविरहदुःखितः भवति स तत्संयोगे सति उष्णं वाष्पं मुञ्चति" इति सारोद्धारिण्याम् ।

10. वाष्पं—means (1) उष्माणं (2) नेत्रजलं ।

11. स्नेहव्यक्तिः—स्नेहस्य प्रेम्णः व्यक्तिः (वि + अञ्ज् + क्तिः) प्रकटनं ; manifestation of love.

12. Conjugations:—

प्रच्छ्—पृच्छति, पप्रच्छ, प्रक्ष्यति, अप्राक्षीत् ।

आ + लिङ्ग्—आलिङ्गति, आलिङ्गयति, आलिलिङ्ग, आलिङ्गयामास ।

वन्द्—वन्दते, ववन्दे, वन्दिष्यते, अवन्दिष्ट ।

मुच्—मुञ्चति, ते, मुमोच, मुमुचे, मोक्ष्यति, ते ; अमुचत्, अमुक्त ।

Prose order—हे जलद ! तावत् कथयतः (मत्तः) त्वत्प्रयाणानुरूपं मार्गं शृणु, तदनु श्रोत्रपेयं मे सन्देशं श्रोष्यसि, यत्र (मार्गे) खिन्नः खिन्नः शिखरिषु पदं न्यस्य क्षीणः क्षीणः स्रोतसां परिलघु पयः उपयुज्य च गन्तासि । १३ ।

Paraphrase—हे जलद ! प्रथमं तावत् तव गमनानुकूलम् अध्वानं कथयामि समाहितचित्तः आकर्णय, ततः श्रवणाञ्जलिपुटपेयं मम प्रियां प्रति

वाचिकम् आकर्णयिष्यसि यत्र मार्गे श्रान्तः क्षीणबलः सन् क्वचित् पर्व्वते पुनर्बललाभाय विश्रम्य लब्धबलः, वर्षणेन नितरां कृशाङ्गः सन् उपलास्फालनशोधित हितकरंपथ्यं पानीयं निपीय परिपुष्टकलेवरश्च गमिष्यसि । १३ ।

Change of voice — * त्वत्प्रयाणानुरूपः मार्गः श्रूयतां, * श्रोत्रपेयः सन्देशः श्रोष्यते, * खिन्नेन खिन्नेन * क्षीणेन क्षीणेन * गन्तव्य । १३ ।

Sanjivani—सम्प्रति तस्य मार्गं कथयति—मार्गम् इति। हे जलद तावत् इदानीं कथयतो मत्तः इति शेषः त्वत्-प्रयाणस्य अनुरूपम् अनुकूलं मार्गम् अध्वानम् । "मार्गो मृगपदे मासि सौम्यर्क्षेऽन्वेषणेऽध्वनि:" इति यादवः । शृणु । तदनु मार्गश्रवणानन्तरं श्रोत्राभ्यां पेयं पानार्हम् । अति-तृष्णया श्रोतव्यम् इत्यर्थः । पेयग्रहणात् सन्देशस्य अमृत-साम्यं गम्यते । मे सन्देशं वाचिकम् । "सन्देशवाक् वाचिकं स्यात्" इत्यमरः । श्रोष्यसि । यत्र मार्गे खिन्नः खिन्नः अभीक्ष्णं क्षीणबलः सन् । "नित्यवीप्सयोः" इति नित्यार्थे द्विर्भावः । शिखरिषु पर्व्वतेषु पदं न्यस्य निक्षिप्य । पुन-र्बललाभार्थं क्वचित् विश्रम्य इत्यर्थः । क्षीणः क्षीणः अभीक्ष्णं कृशाङ्गः सन् । अत्रापि क्तान्तत्वात् पूर्व्ववत् द्विरुक्तिः । स्रोतसां परिलघु गुरुत्वदोषरहितम् उपलास्फालनखेदित-त्वात् पथ्यम् इत्यर्थः । तथा च वाग्भटः "उपलास्फालन-क्षेपविच्छेदैः खेदितोदकाः । हिमवन्मलयोद्भूताः पथ्या नद्यो भवन्त्यमूः॥" इति । पयः पानीयम् उपयुज्य शरीरपोषणार्थम् अभ्यवहृत्य च गन्तासि गमिष्यसि । गमेर्लुट् । १३ ।

হে পয়োধর! প্রথমতঃ তোমার গমনোপযোগী মার্গ নির্দ্দেশ করিয়া বলিতেছি শ্রবণ কর, তৎপরে শ্রোত্রপেয় পীযূষধারার ন্যায় মধুর আমার সংবাদ শুনিবে; সেই পথে তুমি গমনবশতঃ ক্ষীণবল হইলে গিরিমালায় অবস্থান করতঃ পুনরায় নববলসঞ্চয়পূর্ব্বক, ও নিতান্ত ক্ষীণ দেহ হইলে স্রোতস্বিনীর গুরুত্বদোষশূন্য সলিল পান করিয়া স্বীয় গন্তব্যপথে অগ্রসর হইবে।১৩।

Hear me, my dear cloud, describe to the first the path suited to thy journey and then thou wilt hear my message fit to be drunk in by both the ears. In that path, thou shalt (be able to)refresh thyself by landing on the mountains when completely exhausted and shalt regain thy body by drinking light waters of the rills when exceedingly wasted away.—13.

Notes.

1. "We now begin the geographical part of thee poem, which, as far as it can be made out through the difference of ancient and modern appelations, seems to be very accurately conceived; the two extreme points of the cloud's progress are the vicinity of Nagpur, as mentioned in the note on verse I and the mountain Kailasa or rather the Himalyaya range, During this course the poet notices some of the most celebrated places, with the greater number of which we are still acquainted. In the first place we have here his direction due north from the mountain of *Ramagiri*." Prof. Wilson.

2. अयनम्:—(अय + अट + युच्) अयनः मार्गः पन्थाः । "निर्दे-

षणमात्रप्रयोगो विशेष्यप्रतिपत्तौ" इति विशेषणमात्रप्रयोगः। अथयन्तं सामाश्रित्य इति "ल्यब्लोपे कर्म्मण्यधिकरणे च" इति पञ्चमी।

3. त्वत्प्रयाणानुरूपं—रूपम् अनुगतः इति अनुरूपः ("अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इति वार्त्तिकवचनात् द्वितीयासमासः)। तव प्रयाणं (प्र + या + भावे ल्युट्) तस्य अनुरूपः योग्यः तं; fit for thy journey.

4. श्रोत्रपेयं—श्रोत्राभ्यां कर्णाभ्यां (श्रु + करणे ष्ट्रन्) पेयं (पा + यत्, आकारस्य एत्वम्) पानार्हं; अतितृष्णया श्रोतव्यं। The word पेय here makes the message equal to heavenly nectar. Our poet is very fond of indulging in the use of the root पा (to drink) in this sense. Cf, रघु. "वनिता उपोषिताभ्यामिव लोचनाभ्यां तं (दिलीपं) पपौ। II. Ibid—"ताः राघवं दृष्टिभिरापिबन्त्यः &c. VII. "तमेक-दृश्यं नयनैः पिबन्त्यः नार्य्यो न जग्मुर्विषयान्तराणि" Kumera VII. Prof. Wilson writes—"To drink with the ear is a figurative expression common in English and classical writers." Cf. Shakespeare—

"My ear hath not yet drunk a hundred words,
Of that tongue's utterance, yet I know the sound."

Romeo and Juliet.

and Horace in the 13th ode of the 2nd Book—

"But thronging crowds will press to hear,
And drink the strain with eager ear,"

Prof. Wilson's translation.

5. खिन्नः खिन्नः—(खिद् + क्तः) आभीक्ष्ण्यं द्योतयतः। "नित्यवीप्सयोः" इति आभीक्ष्ण्ये द्विरुक्तिः। क्षीणः क्षीणः (क्षि + क्तः) आभीक्ष्ण्ये द्विर्भावः। The first denotes the exhaustion of his strength and the second indicates the wasting of his body.

6. शिखरिषु—"शिखरिषु अभिप्रायाणां बहुवचनं। शिखरिषि

अद्रेः शृङ्गं हरति पवनः किंस्विदित्युन्मुखीभि-
र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।
स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ॥ १४ ॥

शिखरिषु पादौ आरोप्य विश्रम्य इत्यर्थः इति सारोद्धारिण्यां । खिन्नः खिन्नः—"अन्योऽपि पथिकः खिन्नः सन् वृक्षेषु पदावस्थानं विधत्ते । शिखरिषु पर्व्वतेषु वृक्षेषु वा" इति सारोद्धारिण्याम् ।

7. परिलघु—परितः लघु । सुप्सुपेतिसमासः । "अन्योऽपि यो क्षीणो भवति तस्य परिलघु पयः पातुं सुचितम्" इति सारोद्धारिण्याम् ।

8. गन्तासि—(गम्—लुट् तासि) गमिष्यसि ।

Conjugations :—

कथ—कथयति, कथयामास, कथयिष्यति, अचकथत् ।

खिद—खिन्दति, खिद्यते, खिन्ते ; चिखेद, चिखिदे ; खेत्स्यति, °ते, अखेत्सीत्, अखित्त ।

अस् (क्षेपणे) अस्यति, आस, असिष्यति, आस्थत् ।

क्षि—क्षिणोति, क्षियति, चिक्षाय, क्षेष्यति, क्षीयात्, अक्षैषीत् ; क्षि—(दैन्ये) क्षीणः, क्षितः ।

भुज् (भोजने)—भुङ्क्ते, बुभुजे, भोक्ष्यते, भुञ्जीत, अभुक्त ।

Prose order—पवनः अद्रेः शृङ्गं हरति किंस्वित् इति उन्मुखीभिः मुग्धाभिः सिद्धाङ्गनाभिः चकितचकितं दृष्टोत्साहः सन् सरसनिचुलात् अस्मात् स्थानात् पथि दिङ्नागानां स्थूलहस्तावलेपान् परिहरन् उदङ्मुखः सन् खम् उत्पत । १४ ।

Paraphrase—वायुः चित्रकूटाद्रेः शृङ्गम् अपहृत्य आयाति किम् इति शङ्कया उन्नतग्रीवाभिः मूढाभिः सिद्धस्त्रीभिः भीतभीताभिः स्त्रीभिः दृष्टोद्योगः

सन् सरसनिचुलाख्यवेतसात् अस्मात् स्थानात् पथि दिग्गजानां स्थूलकरक्षेपान् परिहरन् उत्तरमुखः सन् आकाशम् उद्गच्छ । १४ ।

Change of voice—पवनेन * शृङ्गं ह्रियते * दृष्टोत्साहेन सता * परिहरता उदङ्मुखेन * सता खम् उत्पत्यताम् । १४ ।

Sanjivani—अद्रेरिति । पवनो वायुः अद्रेः चित्रकूटस्य शृङ्गं हरति किंस्वित् । किंस्विच्छब्दो वितर्कार्थे चादिषु पठितः । इति शङ्कया उन्मुखीभिः उन्नतमुखीभिः । "स्वाङ्गाच्चोपसर्ज्जनादसंयोगोपधात्" इति ङीष् । मुग्धाभिः मूढाभिः । "मुग्धः सुन्दरमूढयोः" इत्यमरः । सिद्धानां देवयोनिविशेषाणाम् अङ्गनाभिः चकितचकितं चकितप्रकारं यथा तथा । "प्रकारे गुणवचनस्य" इति द्विर्भावः । दृष्टोत्साहः दृष्टोद्योगः सन् । सरसाः आर्द्राः निचुलाः स्थलवेतसाः यस्मिन् तस्मात् । "वानीरे कविभेदे स्यान्निचुलः स्थलवेतसे" इति शब्दार्णवे । अस्मात् स्थानात् आश्रमात् पथि नभोमार्गे दिङ्नागानां दिग्गजानां स्थूलाः ये हस्ताः कराः तेषाम् अवलेपान् आक्षेपान् परिहरन् । "हस्तो नक्षत्रभेदे स्यात् करेभकरयोरपि" इति विश्वः । उदङ्मुखः सन् । अलकायाः उदीच्यत्वात् इत्याशयः । खम् आकाशम् उत्पत उद्गच्छ । अत्र इदमपि अर्थान्तरं ध्वनयति—रसिको निचुलो नाम महाकविः कालिदासस्य सहाध्यायः परापादितानां कालिदासप्रबन्धदूषणानां परिहर्त्ता यस्मिन् स्थाने तस्मात् स्थानात् उदङ्मुखो निर्दोषत्वात् उन्नतमुखः

सन् पथि सारस्वतमार्गे दिङ्नागानां । पूजायां बहुवचनम्। दिङ्नागाचार्य्यस्य कालिदासप्रतिपक्षस्य हस्तावलेपान् हस्तविन्यासपूर्व्वकाणि दूषणानि परिहरन्। "अवलेपस्तु गर्व्वे स्यात् लेपने दूषणेऽपि च" इति विश्वः। अद्रेः अद्रिकल्पस्य दिङ्नागाचार्य्यस्य शृङ्गं प्राधान्यम्। "शृङ्गं प्राधान्यसान्वोश्च" इत्यमरः। हरतीति हेतुना सिद्धैः सारस्वतसिद्धैः महाकविभिः अङ्गनाभिश्च दृष्टोत्साहः सन् खम् उत्पत उच्चैर्भव इति स्वप्रबन्धम् आत्मानं वा प्रति कवेरुक्तिरिति। "संसर्गतो दोषगुणा भवन्तीत्येतन्मृषा येन जलाशयेऽपि। स्थित्वानुकूलं निचुलश्चलन्तमात्मानमारक्षति सिन्धुवेगात्"॥इत्येतत्श्लोकनिर्माणात् तस्य कवेर्निचुलसंज्ञेत्याहुः। १४।

হে পয়োধর! তুমি সরসস্থলবেতস পরিপূরিত এই স্থান হইতে দিঙ্‌নাগদিগের কঠোর শুণ্ডবিক্ষেপ পরিহারপূর্ব্বক শূন্যে উত্থান কর। তখন "বায়ুদেব কি গিরির শৃঙ্গদেশ উন্মূলন পূর্ব্বক হরণ করিয়া লইয়া যাইতেছেন" এইরূপ সিদ্ধাঙ্গনাগণ সচকিত নয়নে ঊর্দ্ধমুখী হইয়া তোমার গমনের অধ্যবসায় দেখিতে থাকিবে। ১৪।

From this place abounding in wet canes, rise up in the sky, with thy face in the north, avoiding, in thy way, the blows from the massy trunks of the elephants of the quarters, and the fond wives of the Siddhas, with faces raised up, will mark thy progress with astonishment —

In doubt, if by the gale abruptly torn,
The mountain-peak along the air is borne :—14.

Notes.

1. अद्रेः—रामगिरेः । किंस्वित्—वितर्कसूचकम् अव्ययम् । इति—इत्याशङ्कया ।

2. उन्मुखीभिः—उन्नतानि मुखानि यासां ताः उन्मुख्यः । "प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः"—इति बहुव्रीहिसमासे धातुजस्य पाक्षिको लोपः, पक्षे उन्नतमुख्यः । "स्वाङ्गाच्चोपसर्ज्जनात् असंयोगोपधात्"—(i. e., असंयोगोपधम् उपसर्ज्जनं यत्स्वाङ्गं तदन्तात् अदन्तात् प्रातिपदिकात् वा ङीष्) इति पाक्षिको ङीष् । पक्षे टाप्—अतएव उन्मुखी उन्मुखा च इति पदद्वयम् । Hence we have four forms in all viz. (1) उन्नतमुखा (2) उन्मुखा, (3) उन्नतमुखी and (4) उन्मुखी ।

3. मुग्धाभिः—(मुह् + क्तः = मुग्ध ; मूढ़) मूढ़ाभिः, सरलाभिः ; simple, fond. यद्वा "मुग्धा षोड़शवार्षिकी" इत्युक्तत्वात् षोड़शवर्षीयाभिः सुन्दरीभिः ।

4. सिद्धाङ्गनाभिः—सिद्धानां देवयोनिविशेषाणाम् अङ्गनाभिः नारीभिः । "दृष्टोत्साहः" इत्यत्र दृष्टेन सह अन्वयात् अनुक्ते कर्त्तरि तृतीया । दृष्टोत्साह इत्यत्र सापेक्षत्वेऽपि गमकत्वात् समासः । "सिध्यन्ति इति सिद्धाः । प्राप्ताष्टगुणैश्वर्य्यविश्वावसुप्रभृतयश्च" इति स्वामी । "सिधु हिंसासंराध्योः । गत्यर्थकर्म्मकेत्यादिना कर्त्तरि क्तः । सिद्धोऽणिमादियुक्तोपेतौ विश्वावसुप्रभृतिः" इति रायमुकुटः । They live in the upper regions of the air and are characterised by eight supernatural faculties viz:—"अणिमा लघिमा व्याप्तिः प्राकाम्यं महिमा तथा । ईशित्वं च वशित्वञ्च तथा कामावसायिता ॥" For further information see our notes on Kumera Sambhava I. 5. (Revised Edition)

5. दृष्टोत्साहः—दृष्टः आलोकितः उत्साहः यस्य सः (ब. व्री.) The commentators Bharata, Sanatana, Ramanatha, Hara-

govinda &c. read दृष्टोच्छ्राय: and Bharata explains:—"दृष्ट: उच्छ्राय: उन्नति: यस्य तादृश:"। It is a happy reading.

6. सरसनिचुलात्—रसेन सह वर्त्तमाना: इति सरसा: ("तेन सहेति तुल्ययोगे" इत्यत्र "वोपसर्ज्जनस्य" इति वहुव्रीहौ सहस्य स: वैकल्पिक:।) सरसा: आर्द्रा: निचुला: स्थलवेतसा: यत्र तस्मात् (व. व्री.); from this place abounding in wet canes. Prof. Nundargicar says that सारोद्धारिणी quotes here "नदीतीरे गवां गोष्ठे चीरवृक्षे जलाशये। आरामेष्वथ कूपादौ इष्टं बन्धुं विसर्जयेत्॥" and remarks that the cloud should bid adiew to his friend, the mountain at this सरस (*i. e.*, सजल) place. Cf. Sakuntala IV. "शार्ङ्गरव:। भगवन्, उदकान्तं स्निग्धोजनोऽनुगन्तव्य इति श्रूयते। तदिदं सरस्तीरं। अत्र सन्दिश्य प्रतिगन्तुमर्हसि। काश्यप:। तेन हीमां चीरवृक्षच्छायाम् आश्रयाम:॥"

7. दिङ्नागानां—Each of the four quarters and the four intermidiate points of the compass, have a regent or presiding deity; each of these deities also has his male and female elephants, viz:—"इन्द्रोवह्नि: पितृपतिर्नैऋतोवरुणोमरुत्। कुवेर ईश: पतय: पूर्व्वादीनां दिशां क्रमात्॥ ऐरावत: पुण्डरीको वामन: कुमुदोऽञ्जन:। पुष्पदन्त: सार्व्वभौम: सुप्रतीकश्चदिग्गजा:॥ करिण्योऽभ्रमुकपिला पिङ्गलानुपमा: क्रमात्। ताम्रकर्णी शुभ्रदन्ती चाङ्गना चाञ्जनावती॥" इत्यमर:।

8. स्थूलहस्तावलेपान्—स्थूला: (स्थूल् + अच्) हस्ता: शुण्डा: तेषां अवलेपा: आक्षेपा: तान् (कर्म्मधारय: and षष्ठी तत्); the blows from the massy trunks.

8. उदङ्मुख:—facing the north as Alaka was due north from the Ramagiri.

10. चकितचकितं—"प्रकारे गुणवचनस्य" (*i. e.*, सादृश्ये [वीप्से

रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ता-
द्वल्मीकाग्रात्प्रभवति धनुःखण्डमाखण्डलस्य ।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
बर्हेणेव स्फुरितरुचिना गोपवेशस्य विष्णोः ॥१५॥

युगवचनस्य इ सः) इति साहश्ये हिरुक्तिः । ततः "कर्म्मधारयवदुत्तरेषु" इति कर्म्मधारयवत्, तेन पूर्व्वभागस्य पुंवद्भावः । अतएव चकितचकितं— चकितसदृशं—ईषत् चकितं ।

11. Mallinatha points out an implied meaning of this verse, which has its origin in a tradition current in his time that Kalidasa, Nichula, and Dinnaga were contemporary poets. His explanation may be summed up thus:—"The poet here addresses his poem or himself and says—Rise, O muse (or my heart), from this abode of my friend Nichula who has repudiated all objections put against thee, and fill up the sky with thy glory. Your vigour will be marked with admiration by the celebrated poets (सिद्ध) and the fair damsels (अङ्गना) of the city who will raise their faces up and gaze upon thee in grave doubt whether the glory of the great दिङ्नागाचार्य्य is being obscured. Proceed and ward off the loud attacks of दिङ्नागाचार्य्य, my adversary, on the road of Saraswata." Vide our introduction.

Prose order—रत्नच्छायाव्यतिकर इव प्रेक्ष्यम् आखण्डलस्य एतत् धनुःखण्डं पुरस्तात् वल्मीकाग्रात् प्रभवति, येन ते श्यामं वपुः स्फुरितरुचिना बर्हेण गोपवेशस्य विष्णोः श्यामं वपुरिव अतितरां कान्तिम् आपत्स्यते । १५ ।

Paraphrase—पद्मरागादिमणिप्रभाणां मिश्रणमिव दर्शनीयं शक्रस्य एतत् धनुःखण्डम् अग्रे वाल्मीकविवरात् आविर्भवति ; येन ते कृष्णकान्ति शरीरं उज्ज्वलकान्तिना पिच्छेन गोपालस्य कृष्णस्य कृष्णं शरीरमिव अतिशयितां शोभां लप्स्यते । १५ ।

Change of voice—व्यतिकरेण * प्रेक्ष्येण * अनेन धनुःखण्डेन * प्रभूयते, * श्यामेन वपुषा * अतितरां कान्तिः आपत्स्यते । १५ ।

Sanjivani—रत्नेति । रत्नच्छायानां पद्मरागादिमणिप्रभाणां व्यतिकरो मिश्रणम् इव प्रेक्ष्यं दर्शनीयम् आखण्डलस्य इन्द्रस्य एतत् धनुःखण्डम् । एतदिति हस्तेन निर्द्देशः । पुरस्तात् अग्रे वल्मीकाग्रात् वामलूरविवरात् । "वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकम्" इत्यमरः । प्रभवति आविर्भवति । येन धनुःखण्डेन ते तव श्यामं वपुः स्फुरितरुचिना उज्ज्वलकान्तिना वर्हेण पिच्छेन । "पिच्छवर्हे नपुंसके" इत्यमरः । गोपवेशस्य विष्णोः गोपालस्य कृष्णस्य श्यामं वपुरिव अतितरां कान्तिं शोभाम् आपत्स्यते प्राप्स्यति । १५ ।

হে পয়োদ ! ঐ দেখ নানা রত্নপ্রভা মিশ্রণের ন্যায় রমণীয় দর্শন ইন্দ্রধনুঃ পুরোভাগে বল্মীকাগ্রদেশ হইতে আবির্ভূত হইতেছে ; উহা দ্বারা ত্বদীয় শ্যাম কলেবর উজ্জ্বলকান্তি শিখিবর্হবিভূষিত গোপবেশী হরির কলেবরের দিব্য শোভা প্রাপ্ত হইবে । ১৫ ।

There, from the mouth of an ant-hill, rises, in thy front, a piece of rain-bow looking as fine as the commingling of the rays of the various gems, whereby thy dark blue body will acquire a great splendour like that of Vishnu in

the guise of the cowherd (adorned) with the peacock's plumes of glittering radiance (on his crown).—15.

Notes.

1. रत्नच्छायाव्यतिकर इव—रत्नस्य नानाविधस्य मणेः छायाः प्रभाः तासां व्यतिकरः मिश्रणम् तद्वत्। नानाविधानां मणिप्रभाणां समावेश इव इत्यर्थः; "जात्याख्यायाम् एकस्मिन् बहुवचनम् अन्यतरस्याम्" इति जातौ मणिशब्दस्य पाक्षिकम् एकवचनम्। अतएव बाहुल्याभावात् छायापदस्य न क्लीवत्वम्; like a harmonious blending of the lustres of the different kinds of gems. अत्र "छायाबाहुल्ये" इति सूत्रात् "रत्नच्छायव्यतिकर इव" इति पार्श्वाभ्युदयधृतः पाठोऽपि समीचीनः।

2. आखण्डलस्य धनुःखण्डम्—इन्द्रधनुः; rain-bow. एतत्—he points out with his finger.

3. पुरस्तात्—"अग्रे" इति मल्लिनाथः। "पूर्व्वस्यां दिशि" इति सारोद्धारिण्याम्।

4. वल्मीकाग्रात्—"वामलूरविवरात्" इति मल्लिनाथः। But it is not clear how the rain-bow rises from an ant-hill. Mallinatha is silent here. Sanatana says—"वल्मीकाग्रात् रामगिरिशृङ्गात्। 'वामलूरे गिरेः शृङ्गे वल्मीकपदमिष्यते' इति शब्दमहार्णवः"। Ramanatha says—"वल्मीकाग्रात् सूर्य्यात्। मेघप्रतिफलिता हि सूर्य्यरश्मयः धनुराकारेण दृश्यन्ते। 'वल्मीकः सातपो मेघो वल्मीकः सूर्य्य इत्यपि' इति कोषान्तरम्"। And Bharata accepts the two quoted above together with the one suggested by Mallinatha and tries to find out a rational explanation for each:—"वल्मीकाग्रात् इति वल्मीकं वामलूरः वासुकिफणमणिगणद्युतिः वल्मीकरन्ध्रात् निःसृत्य नभसि मेघे शक्रधनुराकारमापद्यते इत्यागमः। मतान्तरे वल्मीकाग्रात् सूर्य्यात्। सूर्य्यकरा हि वाताक्षिप्ता घनरूपा इन्द्रधनुरुच्यते। तथाच ज्योतिषे—"सूर्य्यस्य

विविधा वर्णाः पवनेन विघट्टिताः। विहायसि धनुःसंस्था दृश्यन्ते जलदागमे॥" इति। वल्मीकाग्रात् रामगिरिशृङ्गात्। "वामलूरे गिरिशृङ्गे वल्मीकपदमिष्यते" इति शब्दमहार्णवः। "वल्मीकः सातपः मेघः" इति कश्चित्। "वल्मीकः सूर्य्यः" इति कश्चित्"। वराहमिहिर in his वृहत्संहिता cites two theories on the origin of the rain-bow. They are (1) "सूर्य्यस्य विविधवर्णाः पवनेन विघट्टिताः कराः साभ्रे। वियति धनुःसंस्थाना ये दृश्यन्ते तदिन्द्रधनुः" (2) "केचित् अनन्तकुलोरगनिःश्वासोद्भूतमाहुराचार्य्याः तद्यायिनां नृपाणां अभिमुखगजयावहं भवति"। And सारोद्धारिणी says —(3) "इन्द्रचापं किल वल्मीकान्तर्व्यवस्थितमहानागशिरोमणिकिरणसमूहात् समुत्पद्यते। वासुकिफणामणिगणद्युतिः वल्मीकरन्ध्रात् निःसृत्य नभसि मेघे शक्रधनुराकारमापद्यते इत्यागमः"। Mallinatha must have the second or the third theory in his mind. वल्मीकाग्रात्— "भुवः प्रभवः" इति अपादाने ५मी।

5. येन—आखण्डलधनुःखण्डेन इत्यर्थः। करणे ३या।

6. स्फुरितरुचिना—स्फुरिता उज्ज्वला रुचिः दीप्तिः कान्तिः यस्य तेन; उज्ज्वलकान्तिना।

7. गोपवेशस्य विष्णोः—गोपस्य वेशः इति गोपवेशः। गोपवेशः इव वेशः यस्य तस्य ("सप्तम्युपमानेत्यादिना—" उत्तरपदलोपो वहुव्रीहिः)। गोपालवेशस्य कृष्णस्य। The poet here refers to the in-carnation of Vishnu in the Dwapara Yuga, when he was brought up in the house of Nanda Gopa of Brindavana as a cowherd. He is represented in the Purana as using peacock's plumes in his crest Cf. गीतगोविन्द—"चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशं। प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदिरसुवेशम्।" 3. Vallabha, however, goes so far as to say that "गोपाला हि प्रायशः मयूरपिच्छैः आभरणानि कुर्व्वन्ति इत्यागमः।"

त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।
सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं
किञ्चित्पश्चाद्व्रज लघुगतिर्भूय एवोत्तरेण ॥१६॥

8. श्यामं वपुः—the body of Krishna is represented to be of a dark blue colour.

9. कान्तिम् आपत्स्यते—शोभाम् अधिगमिष्यति । The plumage of the pea-cock has often been compared to the rain-bow by the English poets. Cf. Milton—

"Whose gay train,
Adorns him coloured, with the florid hue,
Of Rain-bows and starry eyes."

Paradise Lost Book VII. 446.

10. Conjugations :—

आ+पद्—आपद्यते, आपेदे, आपत्स्यते, आपादि, आपद्येत ।

Prose order—कृषिफलं त्वयि आयत्तम् इति प्रीतिस्निग्धैः भ्रूविलासानभिज्ञैः जनपदवधूलोचनैः पीयमानः मालं क्षेत्रं सद्यः सीरोत्कषणसुरभि आरुह्य किञ्चित् पश्चात् व्रज, लघुगतिः भूयः उत्तरेण एव व्रज । १६ ।

Paraphrase—कृषिकार्य्यस्य फलं शस्यरूपं त्वयि अधीनम् इति हेतोः अकृत्रिमप्रेमार्द्रैः पामरत्वात् भ्रूविकारानभिज्ञैः पल्लीयोषितां लोचनैः सस्पृहं वीक्ष्यमाणः सन् मालाख्यं शैलप्रायम् उन्नतं स्थलं तत्क्षणं हलकर्षणेन प्राप्तसौरभम् आरुह्य तत्राभिवृष्य किञ्चित् पश्चात् गच्छ, निर्वृष्टत्वात् क्षिप्रगमनः सन् पुनरपि उत्तरस्यां दिशि गच्छ । १६ ।

Change of voice—कृषिफलेन त्वयि आयत्तेन (भूयते) इति * पीयमानेन * व्रज्यताम् । लघुगतिना * व्रज्यताम् । १६ ।

Sañjivani—त्वयीति। कृषेः हलकर्मणः फलं शस्यं त्वयि। "अधिकरणविवक्षायां सप्तमी"। आयत्तम् अधीनम्। "अधीनो निघ्न आयत्तः" इत्यमरः। इति हेतोः प्रीत्या स्निग्धैः। अकृत्रिमप्रेमार्द्रैः इत्यर्थः। भ्रूविलासानां भ्रूविकाराणाम् अनभिज्ञैः। पामरत्वात् इति शेषः। जनपदवधूनां पल्लीयोषितां लोचनैः पीयमानः सादरं वीक्ष्यमाणः सन्। मालं मालाख्यं क्षेत्रं शैलप्रायम् उन्नतं स्थलम्। "मालमुन्नतभूतलम्" इति उत्पलः। सद्यः तत्कालमेव सीरैः हलैः उत्कृषणेन कर्षणेन सुरभि घ्राणतर्पणं यथा तथा। आरुह्य तत्र अभिवृष्य इत्यर्थः। "सुरभिर्घ्राणतर्पणः" इत्यमरः। किञ्चित् पश्चात् लघुगतिः तत्र निर्वृष्टत्वात् क्षिप्रगमनः सन्। "लघु क्षिप्रमरं द्रुतम्" इत्यमरः। भूयः पुनरपि उत्तरेणैव व्रज गच्छ। "प्रकृत्यादिभ्य उपसंख्यानम्" इति तृतीया। यथा कश्चित् बहुवल्लभः पतिः कुत्रचित् क्षेत्रे कलत्रे गूढं विहृत्य। "क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोः" इति विश्वः। दाक्षिण्यभङ्गभयात् नीचमार्गेण निर्गत्य पुनः सर्वाध्यक्ष इव सञ्चरति तद्वत् इति ध्वनिः। १६।

হে পয়োধর ! কৃষিকার্য্যের ফল শস্যাদি তোমার অধীন, এই হেতু ভ্রূবিলাসে অনভিজ্ঞা জনপদনিবাসিনী কামিনীগণ অকৃত্রিম প্রেমপরিপূরিতনয়নে সাগ্রহে তোমাকে দর্শন করিতে থাকিবে। তুমিও তখন সদ্য হলকর্ষণজনিত সুগন্ধে আমোদিত সমুন্নত মালক্ষেত্রে সলিল

বর্ষণ পূর্ব্বক কিঞ্চিৎ পশ্চিমে গমন করিয়া পরে (সলিল ক্ষয় ও দেহ লাঘব বশতঃ) শীঘ্রগামী হইয়া পুনরায় উত্তরে প্রস্থান করিবে। ১৬।

Being drunk in by the eyes of the rural wives, moist with affection and unused to amorous sportings of the eye-brows, as success in agriculture depends upon thee, mount on the rising plateau called Mala, (so as to make it) fragrant by reason of its recent upturning of the plough; and having turned a little westward turn again in the north and proceed at a quick pace.—16.

Notes.

1. कृषिफलं—कृषेः फलं (षष्ठी तत्); the fruit of husbandry; success in agriculture.

2. त्वयि—अधिकरणविवक्षायां सप्तमी।

3. प्रीतिस्निग्धैः—प्रीत्या स्निग्धैः; moist with affection. Rain is the cause of success in agriculture which is the principal sustinence of the rural population. Hence the rural wives are said to look upon the advent of the clouds with great affection.

4. भ्रूविलासानभिज्ञैः—"ग्राम्यत्वात् भ्रूविभ्रमाचतुरैः नतु प्रीतेरभावात्।" Not used to amorous sportings of the eye-brows like city wives.

5. जनपदवधूलोचनैः पीयमानः—जना पद्यन्ते अत्र इति जनपदाः देशाः तत्र वध्वः तासां लोचनैः नेत्रैः पीयमानः सादरं वीक्ष्यमानः; drunk in with the eyes of the rural wives. For similar use of the root पा Cf. "अस्य युवानं। दृश्या पपुस्ताः सुदृशः समस्ताः। Naishadha VIII. 1, "चक्रे प्रभातादिमैचायां स्मरः पीतनलश्रियाम्" नैषधे. XVIII.

18. तनैकद्रष्टुं नयनैः पिबन्त्यः नार्य्यो न जग्मुः विषयान्तराणि" Kumara VII. 64. etc.

6. मालं—"मालास्यं शैलप्रायं उन्नतं स्थलम्" इति मल्लिनाथः। "मालं—क्षेत्रसमूहं। मालाख्यं देशं वा। वनभूमिं वा" इति सारोद्धारिणी "मालं देशे वनेऽप्युक्तं मालं ग्रामान्तराटवी। मालं मालवदेशे च वसते भूमिवर्धका।" इति सुमतिविजयः। Prof. Wilson takes माल to be the name of a town called Malda, a little to the north of Rattampur, the chief town of the northern half of the province of chatisagada. "The easterly progress of the cloud and the subsequent direction by which he is to reach the mountain आम्रकूट, prove that the place here mentioned must be somewhere in the immediate vicinity of Rattampur, the chief town of the northern half of cheteesgada."Prof. wilson.

7. सद्यः सीरोत्कषणसुरभि—अत्र मल्लिनाथकृता व्याख्या न समीचीना। "सद्यः सीरोत्कषणसुरभीत्यस्य क्रियाविशेषणत्वं न सङ्गच्छते, क्रियाविशेषणत्वाङ्गीकारे सद्यःसीरोत्कषणेन सौरभं सम्पाद्य इत्यर्थः प्रतिपद्यते तथात्वे च उत्कषणक्रियाकर्तृत्वं मेघे कल्पनीयम्, मेघस्य तु तत्कर्तृत्वं न सम्भवति। भरतसनातनरामनाथहरगोविन्दमते तु सद्यःसीरोत्कषणसुरभीति मालस्य विशेषणं; कल्याणमल्लमते तु सद्यःसीरोत्कषणसुरभिक्षेत्रं इत्येकं पदम्, तच्च मालस्य विशेषणम्।" इति विद्यासागरपादाः। "हलोत्कृष्टा हि भूः जलदजलव्यतिकरात् सुरभि भवति" इति वल्लभः।

8. किञ्चित् पश्चात्—"किञ्चित् मनाक् पश्चात् पश्चिमभागाश्रितं मालं आरुह्य" इति सारोद्धारिणी।

9. लघुगतिः—लघुः लघ्वी वा गतिः यस्य सः।

10. Conjugations :—

पा—पिबति, पपौ, पिबेत्, पास्यति, अपात्।

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः॥१७॥

रुह्—रोहति, रुरोह, रोक्ष्यति, अरुहत्।

व्रज्—व्रजति, वव्राज, व्रजिष्यति, अव्राजीत्।

Prose order—आम्रकूटः सानुमान् आसारप्रशमितवनोपप्लवं अध्वश्रमपरिगतं त्वां साधु मूर्ध्ना वक्ष्यति। क्षुद्रोऽपि संश्रयाय मित्रे प्राप्ते (सति) प्रथमसुकृतापेक्षया विमुखो न भवति, किं पुनः यः तथोच्चैः भवति। १७।

Paraphrase—आम्रकूटो नाम पर्व्वतः जलधारापातेन निर्व्वापितदवाग्निं अध्वगमनपरिखिन्नं भवन्तं शिरसा यत्नतो धारयिष्यति। तथाहि कृपणोऽपि आश्रयग्रहणाय आगते बन्धौ तत्कृतमुपकारं स्मरन् तद्दाने विमुखो न भवति, य आम्रकूट इव उच्चैः-शिराः स किमुत दावाग्निनिर्व्वापकं त्वां प्राप्य नितरां हृष्टः त्वां परिचारिष्यति। १७।

Change of voice—आम्रकूटेन सानुमता * भवः * परिगतः त्वं * वक्ष्यसे, क्षुद्रेणापि * विमुखेन न भूयते * येन * भूयते। १७।

Sanjivani.—त्वामिति। आम्राः चूताः कूटेषु शिखरेषु यस्य सः आम्रकूटो नाम सानुमान् पर्व्वतः। "आम्रश्चूतो रसालोऽसौ" इति। "कूटोऽस्त्री शिखरं शृङ्गम्" इति च अमरः। आसारो धारावृष्टिः। "धारासम्पात आसारः" इत्यमरः। तेन प्रशमितो वनोपप्लवो दावाग्निर्येन तं। कृतोपकारम् इत्यर्थः। अध्वश्रमेण परिगतं व्याप्तं त्वां

साधु सम्यक् मूर्ध्ना वक्ष्यति वोढ़ा। वहे लृंट्। तथाहि क्षुद्रः क्षपणोऽपि। "क्षुद्रो दरिद्रे क्षपणे नृशंसे" इति यादवः। संश्रयाय संश्रयणाय मित्रे सुहृदि। "अथ मित्रं सखा सुहृत्" इत्यमरः। प्राप्ते आगते सति प्रथमसुकृतापेक्षया पूर्व्वोपकारपर्य्यालोचनया विमुखो न भवति। यः तथा तेन प्रकारेण उच्चैः उन्नतः सः आम्रकूटः किं पुनः विमुखो न भवतीति किमु वक्तव्यम् इत्यर्थः। एतेन प्रथमावसथे सौख्यलाभात् ते कार्य्यसिद्धिरस्तीति सूचितम्। तदुक्तं निमित्तनिदाने—'प्रथमावसथे यस्य सौख्यं तस्याखिलेऽध्वनि। शिवं भवति यात्रायामन्यथा त्वशुभं ध्रुवम्' ॥इति ।१७।

হে জলধর, অবিরলবারিধারা বর্ষণে দবাগ্নি প্রভৃতি কাননের যাবতীয় উপপ্লব বিনাশকারী (অতএব মিত্র) পথশ্রমে ক্লান্ত তোমাকে আম্রকূট গিরি পরম সমাদরে স্বীয় শৃঙ্গোপরি ধারণ করিবে ; কেন না, হিতাকাঙ্ক্ষী সুহৃৎ আশ্রয়ের নিমিত্ত উপাগত হইলে নীচজনও প্রথম সুকৃতাপেক্ষায় বিমুখতা প্রদর্শন করে না, তবে উন্নত ব্যক্তির কথা আর অধিক কি বলিব। ১৭।

The mountain Amrakuta will bear, on its summit, thee, who art overcome by the fatigue of the journey and who who hast with showers, quenched the forest conflagration; for, even a vile man, out of regard for former favours, does not turn away his face to a friend when he comes to him for support, what then to be said of one so exalted.—17.

Notes.

1. आम्रकूटः—"The course pointed out to the cloud and an allusion which follows to the vicinity of the *Nermada* river furnish us with reasons for supposing that the mountain here mentioned, is that more commonly called *omercuntuc*. The term आम्रकूट means the *Mango-peak* and refers to the abundance of mango trees in the incumbent and surrounding forests." Prof. Wilson.

2. आसारप्रशमितवनोपप्लवं—आसारेण धारासम्पातेन प्रशमितः दूरीकृतः (३या तत्) वनस्य उपप्लवः दावाग्निः येन तम् (६ तत्, व. व्री.); by whom, the forest conflagration has been allayed with showers.

3. अध्वश्रमपरिगतं—अध्वनः पथः श्रमः (६ तत्) तेन परिगतं व्याप्तं; पथिगमनश्रान्तिक्लान्तं; overcome by the fatigue of the journey.

4. संश्रयाय—संश्रयणाय, आश्रयाय; संश्रयं गन्तुम् इत्यर्थः। "क्रियार्थोपपदस्य च कर्म्मणि स्थानिनः" इति चतुर्थी; for an asylum.

5. प्रथमसुकृतापेक्षया—प्रथमं यत् सुकृतं तस्य अपेक्षया पर्य्यालोचनया। हेतौ तृतीया। Out of regard for the former favours shown.

6. विमुखः—विवृतं मुखं यस्य सः। "प्रादिभ्यो धातुजस्य—" इति बहुव्रीहिसमासे धातुजस्य लोपः। Not even a low man, when laid hold of for support by a friend, will turn away his face with forgetfulness of former kindness, how therefore should the exalted act thus.

7. उच्चैः—विभक्तिप्रतिरूपकम् अव्ययं। उन्नतः; exalted.

8. Conjugations:—

श्रम्,—श्राम्यति, शश्राम, श्रमिष्यति, अश्रमत्।

वह्,—वहति, ते, उवाह, ऊहे, वक्ष्यति, ते, अवाक्षीत्, अवोढ़।

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे ।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥ १८ ॥

Prose order—(हे मेघ !) परिणतफलद्योतिभिः काननाम्रैः छन्नोपान्तः अचलः स्निग्धवेणीसवर्णे त्वयि आरूढे सति मध्ये श्यामः शेष-विस्तार-पाण्डुः भुवः स्तन इव अमरमिथुनप्रेक्षणीयाम् अवस्थां नूनं यास्यति । १८ ।

Paraphrase—हे जलद ! परिपक्वैः वनचूतफलैः आवृतपार्श्वभागः आम्रकूटाद्रिः कृष्णवर्णे त्वयि शृङ्गम् आरूढे सति मध्ये श्यामः तस्मादन्यत्र परितः पाण्डुः पृथिव्याः एकः स्तन इव खेचराणाम् अमरद्वन्द्वानां दर्शनीयामवस्थां नूनं प्राप्स्यति । १८ ।

Change of voice—* छन्नोपान्तेन अचलेन * मध्ये श्यामेन शेष-विस्तारपाण्डुना * स्तनेनेव अमरमिथुनप्रेक्षणीया अवस्था यास्यते ।

Sanjivani—छन्नेति । हे मेघ । परिणतैः परिपक्वैः फलैः द्योतन्ते इति तथोक्तैः । आषाढे वनचूताः फलन्ति पच्यन्ते च मेघवातेन इत्याशयः । काननाम्रैः वनचूतैः छन्नोपान्तः आवृतपार्श्वः अचलः आम्रकूटाद्रिः स्निग्ध-वेणीसवर्णे मसृणकेशबन्धच्छाये । श्यामवर्णे इत्यर्थः । "वेणी तु केशबन्धे जलस्रुतौ" इति यादवः । त्वयि शिखरं शृङ्गम् आरूढे सति । "यस्य च भावेन भावलक्षणम्" इति सप्तमी । मध्ये श्यामः शेषे मध्यात् अन्यत्र विस्तारे परितः पाण्डुः हरिणः । "हरिणः पाण्डुरः पाण्डुः"

इत्यमरः। भुवः स्तनः इव। अमरमिथुनानां खेचराणाम् इति भावः। प्रेक्षणीयां दर्शनीयाम् अवस्थां नूनं यास्यति। मिथुनग्रहणं कामिनामेव स्तनत्वेन उत्प्रेक्षा सम्भवति इति कृतम्। यथा परिश्रान्तः कश्चित् कामी कामिनीनां कुचकलशे विश्रान्तः सन् स्वपिति तद्वत् भवानपि भुवो नायिकायाः स्तने इति ध्वनिः। १८।

হে পয়োধর, পরিপক্ক কাননাম্র দ্বারা উপান্তদেশে পরিবৃত আম্রকূট অদ্রির সানুদেশে তৈলস্নিগ্ধবেণীর সদৃশবর্ণ তুমি আরূঢ় হইলে, গিরিবর মধ্যে শ্যাম ও অন্যত্র সর্ব্বত্র পাণ্ডুবর্ণ বসুমতীর পয়োধরের ন্যায় অমরদম্পতীর নয়নরঞ্জন অবস্থা নিশ্চয়ই প্রাপ্ত হইবে। ১৮।

When thou, resembling the glossy jet-black braided hair, hast mounted on his top, the mountain, with his slopes covered with wild mango trees resplendant with ripe mangoes, wilt, like the rising breast of the earth dark in the centre and yellow on the rest of her surface, most assuredly, attain to a condition worthy of being gazed at by pairs of celestial beings.—18.

Notes.

1. छन्नोपान्तः—उपगतः अन्तम् इति उपान्तः "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इति द्वितीया समासः। छन्नः उपान्तः यस्य सः; आवृतप्रान्तभागः; whose slopes have been covered.

2. स्निग्धवेणीसवर्णे—स्निग्धा तैलाक्ता कान्तिमती वा वेणी केशबन्धः (कर्म्मधारयसमासः) तस्याः सवर्णे तुल्यवर्णे; (षष्ठी तत्)। समानः वर्णः यस्य सः सवर्णः। "ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु" इति समानस्य सादेशः। Sanskrit poets always compare the braided hair of young women with the clouds.

स्थित्वा तस्मिन् वनचरवधूभुक्तकुञ्जे मुहूर्त्तं
तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः।
रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य॥ १९।

3. अमरमिथुनप्रेक्षणीयां—worthy of being gazed at by pairs of celestial creatures. अमर has been taken here to denote some being in the sky and capable of seeing from there the sight. (अमरमिथुनानां खेचराणाम्; भूचराणाम् इत्यर्थकृते स्रोकार्थः अकाण्डे उपहतः स्यात्।). For the propriety of मिथुन read what is given by Mallinatha.

4. For the implied meaning read Mallinatha's remark.

5. Conjugations :—

छद—छादयति, ते, छदति, ते, छदयति, छादयामास, चच्छाद, अचिच्छदत्; छन्नः, छादितः।

Prose order—हे मेघ! वनचरवधूभुक्तकुञ्जे तस्मिन् (आम्रकूटे) मुहूर्त्तं स्थित्वा तोयोत्सर्गद्रुततरगतिः तस्मात् परं वर्त्म तीर्णः उपलविषमे विन्ध्यपादे विशीर्णां रेवां गजस्याङ्गे भक्तिच्छेदैः विरचितां भूतिम् इव द्रक्ष्यसि। १९।

Paraphrase—हे मेघ! यत्र कुञ्जेषु वनचरवनिताभिः रतोत्सवः अनुभूयते, नयनविनोदनस्थाने अत्र अल्पकालं विश्रम्य जलवर्षणेन लघुत्वात् क्षिप्रगमनः सन् तत्परं पन्थानमतिक्रान्तः पाषाणैः विषमे विन्ध्यस्य अद्रेः प्रत्यन्तपर्व्वते समन्ततो विसृमरां नर्मदां गजस्य अङ्गे भक्तीनां छेदैः विरचितां शृङ्गारहारावलिमिव विलोकयिष्यसि। १९।

Change of voice—* तोयोत्सर्गद्रुततरगतिना तस्मात् * तीर्णेन * विशीर्णा रेवा * विरचिता भूतिरिव द्रक्ष्यते। १९।

Sanjivani—स्थित्वेति। हे मेघ। वने चरन्ति इति वनचराः। "तत्पुरुषे कृति वहुलम्" इति वहुलग्रहणात् अलुक् न भवति। तेषां बधूभिः भुक्ताः कुञ्जाः लतागृहाः यत्र तस्मिन्। "निकुञ्जकुञ्जौ वा क्लीवे लतादिपिहितोदरे" इत्यमरः। तत्र ते नयनविनोदोऽस्ति इत्यर्थः। तस्मिन् आम्रकूटे मुहूर्त्तम् अल्पकालं न तु चिरं स्वकार्य्यविरोधात् इति भावः। "मुहूर्त्तमल्पकाले स्याद्घटिकाद्वितयेऽपि च" इति शब्दार्णवे। स्थित्वा विश्रम्य। तोयोत्सर्गेण। "त्वामासार"—इत्युक्तवर्षणेन द्रुततरगतिः लाघवात् हेतोः अतिक्षिप्रगमनः सन्। तस्मात् आम्रकूटात् परम् अनन्तरं तत्परं वर्त्म मार्गं तीर्णः अतिक्रान्तः। उपलैः पाषाणैः विषमे विन्ध्यस्य अद्रेः पादे प्रत्यन्तपर्व्वते। "पादाः प्रत्यन्तपर्व्वताः" इत्यमरः। विशीर्णां समन्ततः विसृमराम्। एतेन कस्याश्चित् कामुक्याः प्रियतमचरणपातोऽपि ध्वन्यते। रेवां नर्म्मदाम्। "रेवा तु नर्म्मदा सोमोद्भवा मेखलकन्यका" इत्यमरः। गजस्य अङ्गे शरीरे भक्तयो रचनाः। रेखाः इति यावत्। "भक्तिर्निषेवणे भागे रचनायाम्" इति शब्दार्णवे। तासां छेदैः भङ्गिभिः भाभिः विरचितां भूतिं शृङ्गारमिव भसितमिव वा। "भूतिर्मातङ्गशृङ्गारे जातौ भस्मनि सम्पदि" इति विश्वः। द्रक्ष्यसि। अयमपि महांस्ते नयनकौतुकलाभ इति भावः। १९।

হে পয়োধর, তুমি বনচরবধূদিগের বিহারকুঞ্জে পরিশোভিত সেই

আম্রকূটে কিয়ৎকাল অবস্থানপূর্ব্বক, সলিলধারা বর্ষণে লঘুকলেবরতা-প্রযুক্ত অধিকতর দ্রুতগতি হইয়া, তাহার পরে কিয়ৎ মার্গ অতিক্রম করিয়া দেখিতে পাইবে স্বচ্ছতোয়া স্রোতস্বিনী নর্ম্মদা বিন্ধ্যাচলের উন্নতানত প্রস্তরস্তূপে ক্ষীণাঙ্গী হইয়া মদমত্ত মাতঙ্গ দেহে বিরচিত রচনার ন্যায় শোভাধারণ করিয়া রহিয়াছে । ১৯ ।

Having rested for a short time, on that mountain, rich with bowers enjoyed by the wives of the foresters, thou wilt cross over to the next road with thy pace accelerated by reason of the discharge of thy water and see the river Narmada spreading out at the foot of the Vindya ranges, uneven by rocks, like decoration on the body of an elephant made by scattered marks of painted streaks.—19.

Notes.

1. वनचरवधूभुक्तकुञ्जे—वने चरन्ति ये ते वनचराः (वन + चर् + चरेष्टः इति टः) "उपपदमतिङ्" इति उपपदसमासः । "तत्पुरुषे कृति बहुलम्" इति बहुलग्रहणात् वनेचराः, वनचराः इति पदद्वयं । स्त्रियां—वनचरी, वनेचरी । वनचराणां वध्वः (षष्ठी तत्) ताभिः भुक्ताः (तृतीया तत्) कुञ्जाः लतागृहाः यस्मिन् तस्मिन् (ब. व्री.); यस्मिन् लतागृहाः वनचरवधूभिः सेविताः इत्यर्थः । तस्मिन्—refers to the hill आम्रकूट ।

2. मुहूर्त्तं—"कालाध्वनोरत्यन्तसंयोगे" इति अत्यन्तसंयोगे द्वितीया ।

3. तोयोत्सर्गद्रुततरगतिः—तोयस्य सलिलस्य वृष्टिरूपेण इत्यर्थः उत्सर्गः दानं । (६ तत्) । यद्यपि उत्सर्गशब्दः अश्लीलताव्यञ्जकः तथापि— "ग्राम्यं घृणावदश्लीलामङ्गलार्थं यदीरितम् । तत्सम्वीतेषु गुप्तेषु लक्षितेषु न दुष्यति" इति काव्यदर्शवचनात् दानार्थे प्रयुक्तः उत्सर्गशब्दः न दोषावहः । इयम् अनयोः अतिशयेन द्रुता इति द्रुततरा (द्रुत + तरप्) । तोयोत्सर्गेण द्रुततरा (३या तत्) गतिः यस्य सः (ब. व्री.) । "जलदा हि

तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।
अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्व्वो भवति हि लघुः पूर्णता गौरवाय॥२०।

सलिलदानेन शीघ्रं गच्छन्ति" इति वल्लभः। He whose motion is accelerated by reason of the discharge of water.

4. तस्मात् परं—तस्मात् आम्रकूटात् अनन्तरं ।

5. विन्ध्यपादे—at the foot of the Vindya ranges.

6. विशीर्णां—(वि + शॄ + क्त) समन्ततः विस्तृतां ; spreading out.

7. रेवां—*i. e.*, the river Narmada which rises from the mount Amracuta (*i. e.*, the omercuntuc) one of the ranges of the Vindya mountain.

8. भक्तिच्छेदैः—भक्तयः रेखाः तासां छेदाः भङ्गयः तैः ; by the lines or streaks.

9. Conjugations :—

तॄ—तरति, ततार, तरीष्यति, तरिष्यति, अतारीत ।

शॄ—शृणाति, शशार, शरिष्यति, शरीष्यति, अशारीत् ।

Prose order—हे मेघ ! वान्तवृष्टिः तिक्तैः वनगजमदैः वासितं जम्बूकुञ्जैः प्रतिहतरयं तस्याः तोयम् आदाय गच्छेः, अन्तःसारं त्वां अनिलः तुलयितुं न शक्ष्यति, रिक्तः सर्व्वः लघुर्भवति, पूर्णता गौरवाय भवति । २० ।

Paraphrase—हे मेघ ! उद्गीर्णवर्षः सन् सुगन्धिभिः वन्यगजदानैः सुरभितं जम्बूकुञ्जैः प्रतिबद्धवेगं सुपेयं तस्या रेवायाः जलं गृहीत्वा व्रज । हे

मेघ ! अन्तःसारवन्तं भवन्तमाकाशवायुः चालयितुं शक्तो न भविष्यति । तथाहि अन्तःसारशून्यः सर्व्वो लघुर्भवति सारवत्ता गौरवाय कल्पते । २० ।

Change of voice—वान्तवृष्टिना (त्वया) • गम्यताम् ; अन्तःसारः अनिलेन • न शक्यते, रिक्तेन सर्व्वेणापि लघुना भूयते, पूर्णतया • भूयते । २० ।

Sanjivani—तस्या इति । हे मेघ वान्तवृष्टिः उद्गीर्णवर्षः सन् । कृतवमनस्य व्यज्यते । तिक्तैः सुगन्धिभिः तिक्तरसवद्भिश्च । "तिक्तो रसे सुगन्धौ च" इति विश्वः । वनगजमदैः वासितं सुरभितं भावितञ्च । "हिमवद्विन्ध्यमलया गजानां प्रभवाः" इति विन्ध्यस्य गजप्रभवत्वात् इति भावः । जम्बूकुञ्जैः प्रतिहतरयं प्रतिबद्धवेगं सुखपेयम् इत्यर्थः । एतेन लघुत्वं कषायभावना च व्यज्यते । तस्याः रेवायाः तोयम् आदाय गच्छेः व्रज । हे घन मेघ । अन्तः सारो बलं यस्य तं त्वाम् अनिलः आकाशवायुः । शरीरस्थस्य गम्यते । तुलयितुं न शक्यति शक्तो न भविष्यति । तथाहि रिक्तः अन्तःसारशून्यःसर्व्वोऽपि लघुःभवति । प्रकम्प्यो भवतीत्यर्थः । पूर्णता सारवत्ता गौरवाय अप्रकम्प्यत्वाय भवति इत्यर्थः । अयमत्र ध्वनिः । आदौ वमनशोधितस्य पुंसः पश्चात् श्लेष्मशोषणाय लघुतिक्तकषायाम्बुपानात् लब्धबलस्य वातप्रकोपो न स्यादिति । यथाह वाहटः—"कषायाश्चाहिमस्तस्य विशुद्धौ श्लेष्मणो हिताः । किन्तु तिक्ताः कषाया वा ये निसर्गात्कफापहाः । कृतशुद्धेः क्रमात्-

पीतपेयादेः पथ्यभोजिनः। वातादिभिर्न बाधा स्याद् इन्द्रियैरिव योगिनः” इति। २०।

হে পয়োধর, তুমি সলিল বর্ষণ করিয়া, আরণ্য মাতঙ্গের তিক্ত-মদে সুরভীকৃত ও জম্বূকুঞ্জে নিয়ত প্রতিহত বেগ সেই রেবার সলিল কিঞ্চিৎ গ্রহণ করিয়া পুনরায় গমন করিবে; তাহা হইলে অন্তঃসার বিশিষ্ট অনিল তোমাকে বিচলিত করিতে সমর্থ হইবে না, কেননা, যখন কেহ রিক্ত হয় তখন সে সকলের নিকটই লঘু হইয়া থাকে, কিন্তু পূর্ণ বা সারবান্ ব্যক্তি সর্ব্বত্রই গৌরবভাগী হইয়া থাকে। ২০।

Discharged of rain, thou shouldst proceed after having sucked the waters of the Reva, fragranted with the temporal fluid (ichor) of wild elephants and her current obstructed by the clusters of Jambu plants; and then the wind will not be able to shake thee thus full of substance, for every thing, when empty, becomes light, while fulness contributes to its solidity.—20.

Notes.

1. वान्तवृष्टिः—वान्ता (वम् + क्तः) उद्गीर्णा वृष्टिः येन सः; दत्तवर्षः (1) and कृतवमनः (2) *i. e.*, (1) discharged of thy rain. (2) Vomitted.

2. तिक्तैः—(1) सुगन्धिभिः; fragrant. (2) तिक्तरसयुक्तैः; bitter astringent.

3. वनगजमदैः—by the temporal fluid of wild elephants.

4. वासितं—(1) सुरभितं; scented; (2) भावितं; infused.

5. जम्बूकुञ्जैः—by the clusters of Jambu plants. प्रतिहतरयं—प्रतिहतः प्रतिबद्धः रयः वेगो यस्य तत्; whose current has been re-

tarded by the clusters of Jambutrees. It indicates that the water will be drunk with ease and comfort. The implied idea indicated by it is the lightness and infusion of astringent matter.

6. अन्तःसारम्—अन्तः सारः यस्य तं ; full of substance.

7. अनिलः—(1) आकाशवायुः ; (2) शरीरस्थः वायुश्च ।

8. तुलयितुं—(तुला शब्दात्+"तत्करोति तदाचष्टे" इति णिच् अतएव तुल् नामधातुः + "शकधृष—"इत्यादिना तुमुन्) कम्पयितुं ; to shake.

9. रिक्तः (रिच्+क्तः)—अन्तःसारशून्यः ; empty, without massive matter. लघुः—प्रकम्प्यः ; light.

10. पूर्णता—सारवत्ता ; fulness. गौरवाय—अप्रकम्प्यत्वाय कल्पते इति शेषः । "क्लृपि सम्पद्यमाने च इति चतुर्थी" ; not for shaking.

11. The implied meaning is :—To a person, first purified by vomitting and then made strong from the drying up of the excess of phlegm by the use of a mixture composed of light, bitter, and astringent liquid, the excess of the humour of wind does not come back.

12. रिक्तः सर्वो &c.—"सर्व्वोऽपि यः कोऽपि रिक्तः क्षीणविभवः स लघुः अनादरणीयः पूर्णता गौरवाय समृद्धिरादरार्थं सर्व्वस्य भवतीति । उक्तञ्च "गुणयुक्तोऽप्यधो याति कूपरिक्तो घटो यथा । गुणहीनोऽपि संपूर्णो जनैः शिरसि धार्य्यते ॥" इति सारोद्धारिणी ।

13. Cnjugation :—

वास्—(गुणान्तराधानम्) वासयति, वासयामास, वासयाञ्चकार, वासयाम्बभूव, अवीवसत् ।

वम्—वमति, ववाम, वमिष्यति, अवमीत्, वमित्वा, वान्त्वा ; वान्तं, वमितं ।

वृष—वर्षति, ववर्ष, वर्षिष्यति, अवर्षीत् ।

तुल्—(उन्माने) तोलयति, तोलयामास, अतूतुलत् । तुलयति, तुलया

नीपं दृष्ट्वा हरितकपिशं केशरैरर्द्धरूढै-
राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् ।
जग्ध्वारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ॥२१

इत्यादि "अतुलोपमाभ्याम् इति निपातनात् अङन्तस्य तुलाशब्दस्य सिद्धौ, तत्-करोति तदाचष्ट" इति णिच् ।

रिच्—(विरेचनम्) रिणक्ति, रिङ्क्ते ; रिच्यात्, रिचीत ; अरिणक्, अरिङ्क्त ; रेक्ष्यति, ते ; अरिचत्, अरैक्षीत्, अरिक्त । (वियोजने)—रेचयति, रेचति । रिक्तः ।

Prose order—सारङ्गाः अर्द्धरूढैः केसरैः हरितकपिशं नीपं दृष्ट्वा, अनुकच्छम् आविर्भूतप्रथममुकुलाः कन्दलीः जग्ध्वा, अरण्येषु अधिकसुरभिं उर्व्याः गन्धम् आघ्राय, जललवमुचः ते मार्गं सूचयिष्यन्ति । २१ ।

Paraphrase—मतङ्गजाः (कुरङ्गा वा) एकदेशोद्गतैः किञ्जल्कैः पालाश-वर्णम् श्याववर्णञ्च स्थलकदम्बकुसुमं संप्रेक्ष्य तथा कच्छेषु प्रथमोत्पन्नाः भूमिकदलीः भर्क्षयित्वा वनेषु सन्तप्तायाः भूमेः जलवर्षणेन प्रापितपर्णं गन्धम् आघ्राय जलं वर्षतस्ते पन्थानम् अनुमापयिष्यन्ति । २१ ।

Change of voice—मार्गः सूचयिष्यते । २१ ।

Sanjivani—नीपमिति । सारङ्गाः मतङ्गजाः कुरङ्गाः वा । "सारङ्गश्चातके भृङ्गे कुरङ्गे च मतङ्गजे" इति विश्वः । अर्द्धरूढैः एकदेशोद्गतैः केशरैः किञ्जल्कैः हरितं पालाशवर्णम् । "पालाशो हरितो हरित्" इत्यमरः । कपिशं श्याववर्णम् । "श्यावः स्यात्कपिशो धूम्र-धूमलौ कृष्णलोहिते" इत्यमरः । हरितं च तत् कपिशं च हरितकपिशम् । "वर्णो वर्णेन"

इति समासः । नीपं स्थलकदम्बकुसुमम् । "अथ स्थलकदम्बके । नीपः स्यात् पुलके" इति शब्दार्णवे । दृष्ट्वा संप्रेक्ष्य । विदित्वा इति यावत् । तथा कच्छेषु अनूपेषु अनुकच्छम् । "अव्ययं विभक्ति"—इत्यादिना विभक्त्यर्थेऽव्ययीभावः । "जलप्रायमनूपं स्यात् पुंसि कच्छस्तथाविधः" इत्यमरः । आविर्भूताः प्रथमाः प्रथमोत्पन्नाः मुकुलाः यासां ताः कन्दलीः भूमिकदलीः । "द्रोणपर्णी स्निग्धकन्दा कन्दली भूकदल्यपि" इति शब्दार्णवे । जग्ध्वा भक्षयित्वा । "अदो जग्धिः" इति जग्धादेशः । अरण्येषु अधिकसुरभिम् अतिघ्राणतर्पणाम् । "दग्धारण्येषु" इति पाठे दग्धमित्यधिकविशेषणम् । अर्थवशात् कन्दलीश्च दृष्ट्वेव इति अन्वयो द्रष्टव्यः । उर्व्याः भूमेः गन्धम् आघ्राय जललवमुचो मेघस्य ते तव मार्गं सूचयिष्यन्ति अनुमापयिष्यन्ति यत्र यत्र वृष्टिकार्य्यं नीपकुसुमादिकं दृश्यते तत्र तत्र त्वया वृष्टम् इत्यनुमीयते इत्यर्थः । २१ ।

হে পয়োধর, সারঙ্গকুল অর্দ্ধোদ্গত কিঞ্জল্কে হরিত ও পীতবর্ণ স্থলকদম্ব দর্শন করিয়া, জলপ্রায় দেশ সমূহে ভূমিকদলীর প্রথমোৎপন্ন মুকুল ভোজন করিয়া ও বনে বনে সাতিশয় সুগন্ধ বসুমতীর গন্ধ আঘ্রাণ করিয়া মৃদুমন্দ বর্ষী তোমার পথ প্রদর্শন করিবে। ২১।

Having seen the *Kadamba* flower, green and brown with its filaments developed in parts, having eaten on every marshy bank the plantain plants whose first buds have appeared and having smelt the sweet odour of the earth,

elephants (or the antelopes) will show thy path whilst thou wilt sprinkle drops of water upon them.—21.

Notes.

1. सारङ्गाः—Mallinatha takes it in the sense of elephants or antelopes. But सारोद्धारिणी says "भूचारिणां वारणहरिणानां गगनचारिणो मेघस्य मार्गोपदेशकथनम् अयुक्तम्" and hence he takes it in the sense of चातकः.

2. अर्द्धरूढैः—अर्द्धेण अंशेन रूढैः (रुह्+क्त) उद्गतैः ; अंशतः उद्गतैः ; developed in parts. केशरैः—इतो २या ।

3. हरितकपिशं—अंशतः हरितं अंशतः कपिशं इति नीललोहितवत् विशेषणसमासः। Green and yellow.

4. नीपं—नीपस्य कुसुमं इति नीपं (नीप + "फलेलुक्" इत्यत्र "पुष्पमूलेषु बहुलम्" इति विकारावयवप्रत्ययस्य अणो लुक्)। The Kadambas blossom and the कन्दलीs bud forth on the advent of the rainy season. Cf. "आषाढसिक्तक्षितिवाष्पयोगात् मामक्षिणोयत्र विभिन्नकोशैः। विडम्ब्यमाना नवकन्दलैस्ते विवाहधूमारुणलोचनश्रीः" ॥ Raghu XIII. 29. and "आरक्तराजिभिरियं कुसुमैर्नवकन्दलीसलिलगर्भैः। कोपादन्तर्वाष्पे स्मरयति मां लोचने तस्याः ॥ Vikrama IV. 5.

5. अनुकच्छम्—कच्छेषु इति अनुकच्छम्। "अव्ययं विभक्ति—" इत्यादिना विभक्त्यर्थे अव्ययीभावः। In marshy banks. "अव्ययीभावाद् अतोऽम् त्वपञ्चम्याः" इति पञ्चमीव्रते सर्व्वासु विभक्तिषु सुपः अम्। परं "तृतीयासप्तम्योर्बहुलम्" इति सूत्रात् तृतीयायां सप्तम्याश्च वैकल्पिकः अमादेशः।

6. कन्दलीः—भूमिकदलीः ; the plantains.

7. जग्ध्वारण्येषु अधिकसुरभिं &c.—पार्श्वाभ्युदय, सारोद्धारिणी, वल्लभ, भरत, सनातन, हरगोविन्द and रामनाथ read "दग्धारण्येष्वधिक-

सुरभि" and it is the happiest. Mallinath's interpretation is not tenable under the following circumstances: (1) for the sake of idiom, there must be either an additional च or one of the च's must be dropped as there are three gerunds to be connected here; (2) the word अधिक in अधिकसुरभि' loses its propriety; (3) the gerund जग्ध्वा being put in the second half of the verse and governing कन्दली: in the first half, gives rise to an error of composition called दूरान्वय। All these objections are removed by our reading "दग्धारण्येषु" in the place of Mallinatha's text. Then only two gerunds remain in the verse and they are joined by that च which comes after आघ्राय, the first च connecting नीपं with कन्दली: both of which are governed by दृष्ट्वा. Besides, it is a well-known fact that the forest grounds become highly fragrant when rain falls on them after forest-conflagration. जग्ध्वा—(अद् + क्त्वाच्) "अदो जग्धिर्ल्यप्ति किति" i. e. अदो जग्धि: स्यात् ल्यपि तादौ किति च। इकार उच्चारणार्थ: ; यथा, जग्ध्वा, जग्ध:।

8. गन्धमाघ्राय चोर्व्याः—&c. Cf. रघु: III. 3. "करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलं।"

9. जललवमुच:—जलानां लवं वारिविन्दुं मुञ्चति इति जललवमुक् (जललव + मुच् = क्विप्) तस्य ; of thee, who wilt be sprinkling drops of water in the form of rain. "नवजलमुच:" इति पाठान्तरं साधीय:। "नवजलसम्पर्कस्यैव नीपेषु कुसुमविकाशस्य कन्दलीषु मुकुलोद्गमस्य दग्धारण्येषु च सौरभसंचारस्य हेतुत्वात्" इति विद्यासागरपादा:।

10. Conjugations:—

अम्भोविन्दुग्रहणचतुरांश्चातकान् वीक्षमाणाः
श्रेणीभूताः परिगणनया निर्द्दिशन्तो बलाकाः।
त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः
सोत्कम्पानि प्रियसहचरीसम्भ्रमालिङ्गितानि॥२१क

अद्—अत्ति, अद्यात्, (लङ्), आदत्; जघास, आद; अत्स्यति; अघसत्। जग्ध्वा, जग्धः, घासः।

घ्रा—जिघ्रति, जघ्रौ, घ्रास्यति, अघ्रात्, अघ्रासीत्।

सूच्—सूचयति, सूचयामास, सूचयाञ्चकार, सूचयाम्बभूव, असूसुचत्।

Prose order—अम्भोविन्दुग्रहणचतुरान् चातकान् वीक्षमाणाः श्रेणीभूताः बलाकाः परिगणनया निर्द्दिशन्तः सिद्धाः स्तनितसमये सोत्कम्पानि प्रियसहचरीसम्भ्रमालिङ्गितानि आसाद्य त्वां मानयिष्यन्ति। २१ (क)।

Paraphrase—अन्तराले एव जलविन्दूनां स्वीकारे निपुणान् चातकान् कौतुकात् उत्पश्यन्तः बद्धपंक्तीः बकपंक्तीः एका द्वे तिस्रः इति संख्यया हस्तेन दर्शयन्तः सिद्धाः त्वद्गर्ज्जितकाले उत्कण्ठापूर्व्वकाणि सोत्कम्पानि प्रियतमानां सम्भ्रमेण आलिङ्गितानि अनुभूय ईदृक्सुखलाभस्य त्वन्मूलत्वात् त्वां बहुमंस्यन्ते। २१। क।

Sanjivani—प्रक्षिप्तमपि व्याख्यायते अम्भ इति। अम्भोविन्दूनाम् वर्षोदविन्दूनां ग्रहणे। "सर्व्वसहापतितमम्बु न चातकस्य हितम्" इति शास्त्रात् भूपृष्ठोदकस्य तेषां रोगहेतुत्वात् अन्तराले एव स्वीकारे। चतुरान् चातकान् वीक्षमाणाः कौतुकादुत्पश्यन्तः श्रेणीभूताः बद्धपंक्तीः। अभूततद्भावे च्विः। बलाकाः बक-

पंक्तीः। परिगणनया एका द्वे तिस्र इति संख्यानेन निर्द्दिशन्तः हस्तेन दर्शयन्तः सिद्धाः स्तनितसमये त्वद्गर्ज्जितकाले सोत्कम्पानि उत्कम्पपूर्व्वकानि प्रिय-सहचरीणां सम्भ्रमेण आलिङ्गितानि आसाद्य। स्वयं ग्रहणाश्लेषसुखमनुभूय इत्यर्थः। त्वां मानयिष्यन्ति। त्वन्निमित्तत्वात् सुखलाभस्येति भावः। २१ क।

(হে পয়োধর তুমি গমন কালে পথিমধ্যে দেখিতে পাইবে) সিদ্ধ পুরুষেরা বারিবিন্দু গ্রহণে চতুর চাতককুলকে সোৎসুক নেত্রে দেখিতে দেখিতে, শ্রেণীবদ্ধ বলাকা সমূহ নির্দ্দেশ পূর্ব্বক একটি একটি করিয়া তাহাদিগের গণনায় প্রবৃত্ত হইয়াছেন। তুমি তৎকালে গর্জ্জন করিলে তাঁহারা প্রণয়িণীর সসম্ভ্রম ও সোৎকম্প আলিঙ্গন লাভ করিয়া সানন্দে তোমাকে প্রদর্শন এবং তুমিই এই সুখের নিদান মনে করিয়া তোমার নিকট কৃতজ্ঞতা স্বীকার করিবে। ২১ ক।

The siddhas, gazing on the chatakas expert in catching drops of rain-water (before they fall to the ground) and pointing out the female cranes formed in rows by counting them one by one, will esteem thee highly after receiving at the time of thy thundering, tremulous and hurried embraces of their dear wives.—21 a.

1. Mallinatha regards this verse as an interpollation and, really it is so, as it does not embody any new idea. The ideas put forth in this verse have already been noticed in the previous ones (vide 9, 14 &c.) It has also been omitted by पार्श्वाभ्युदय and वल्लभ।

2. चातकाः—"The chataka, it is universally believed, does not use water on the ground. It always secures waters

उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्व्वते पर्व्वते ते।
शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत्॥२२

falling from the clouds in the course of descending to the earth. It has a long crest on its head, of the shape of a bow with an arrow stretched on it, which is supposed to prevent it from bending its head by coming opposite to the beak and thereby to prevent it from drinking water lying on the ground. This crest, village mythology says, it obtained as a punishment for having in a former life crually prevented her daughter-in-law from drinking water because of some trivial mistake."

3. श्रेणीभूताः—Lit. एकेन शिल्पेन पण्येन वा ये जीवन्ति तेषां समूहः इति श्रेणिः। Here एकजातीयसमूहः। अश्रेणयः श्रेणयः सम्पादिताः इति श्रेणीभूताः। "श्रेण्यादिषु च्व्यर्थवचनं कर्त्तव्यं" इति वार्त्तिकात् "कुगति-प्रादयः" इति नित्यसमासः। (श्रेणि+भू अभूततद्भावे च्विः+क्तः—"च्वौ च" इति दीर्घः)।

4 मानयिष्यन्ति—(मन् + णिच् + लृट् अन्ति) सत्-कारिष्यन्ति। बहुमंस्यन्ते।

5. सम्भ्रमालिङ्गितानि—Cf. "सपदि वारिधरारवभीरवः। प्रणयिनः परिरब्धुम् अथाङ्गना। ववलिरे वलिरेचितमध्यमाः॥ Sisupala VI, 38.

6. सोत्कम्पानि—"अन्यमनस्कानां सिद्धानां त्वदीयगर्ज्जितमाकर्ण्य, सञ्जातसम्भ्रमाणां वल्लभवनितानां चाटुशतदुर्लभान्यपि स्वयं ग्रहाश्लेषसुभगानि गाढोपगूढ़ानि अकस्मात् अयत्नसाध्यानि भविष्यन्तीति" इति चारित्रवर्द्धिनी।

Proseorder—हे सखे! मत्प्रियार्थं द्रुतं यियासोरपि ते ककुभ-

सुरभौ पर्व्वते पर्व्वते कालचेपम् उत्पश्यामि। सजलनयनैः शुक्लापाङ्गैः केकाः स्वागतीकृत्य प्रत्युद्यातः भवान् कथमपि आशु गन्तुं व्यवस्येत्। २२।

Paraphrase—हे सखे मत्प्रियसाधनाय त्वरमाणस्यापि ते कुटज-कुसुमैः सुरभिते पर्व्वते पर्व्वते कालविलम्बम् उत्प्रेचे ; सानन्दवाष्पैः मयूरैः केकाः स्वागतवचनीकृत्य प्रत्युद्गतः सन् त्वं यथा कथञ्चित् द्रुतं गन्तुं व्यवस्येः।२२।

Change of voice—कालचेपः उद्दृश्यते ; * * प्रत्युद्यातेन भवता—व्यवसीयेत। २२।

Sanjivani—उत्पश्यामीति। हे सखे मेघ। मत्-प्रियार्थं यथा तथा द्रुतं चिप्रम्। "लघु चिप्रमरं द्रुतम्" इत्यमरः। यियासोः यातुमिच्छोरपि। यातेः सन्नन्तादुप्रत्ययः। ते तव ककुभैः कुटजकुसुमैः सुरभौ सुगन्धिनि। "ककुभः कुटजेऽर्ज्जुने" इति शब्दार्णवे। पर्व्वते पर्व्वते प्रतिपर्व्वतम्। वीप्सायां द्विरुक्तिः। कालचेपं कालविलम्बम्। "चेपो विलम्बे निन्दायाम्" इति विश्वः। उत्पश्यामि उत्प्रेचे। विलम्बहेतुं दर्शयन् आशुगमनं प्रार्थयते—शुक्लेति। सजलानि सानन्द-वाष्पाणि नयनानि येषां तैः शुक्लापाङ्गैः मयूरैः। "मयूरो बर्हिणो बर्ही शुक्लापाङ्गः शिखावलः" इति यादवः। केकाः स्ववाणीः। "केका वाणी मयूरस्य" इत्य-मरः। स्वागतीकृत्य स्वागतवचनीकृत्य प्रत्युद्यातः प्रत्युद्गतः। मयूरवाणीकृतातिथ्यः इत्यर्थः। भवान् कथमपि यथाकथञ्चित् आशु गन्तुं व्यवस्येत् उद्युञ्जीत। प्रार्थने लिङ्। "प्रेषे

प्रथमः" इति प्रथमपुरुषः । शेषस्याय भवच्छब्दौ युष्मदस्मच्छब्दव्यतिरेकात् । "स्वागतीकृत्य केकाः" इत्यत्र केकासु आरोप्यमाणस्य स्वागतवचनस्य प्रकृतप्रत्युद्गमनोपयोगात् परिणामालङ्कारः । तदुक्तम् अलङ्कारसर्व्वस्वे "आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः" इति । २२ ।

হে সখে যদিও আমার হিতসাধনের নিমিত্ত তোমার শীঘ্রগমনে বাসনা জন্মিয়াছে, তথাপি স্পষ্টই অনুমিত হইতেছে যে বিকসিত কুটজকুসুমের সুগন্ধে আমোদিত পর্ব্বতে পর্ব্বতে তোমার অনেক বিলম্ব হইবে; কিন্তু আমার অনুরোধ সেই সকল পর্ব্বতবাসী শিখিকুল কেকারবে স্বাগত প্রশ্ন করিয়া প্রেমাশ্রুপূর্ণ শুভ্র নেত্রে প্রত্যুদ্গমন পূর্ব্বক অতি কষ্টে অনিচ্ছা সহকারে তোমায় বিদায় প্রদান করিলে তুমি ক্ষিপ্র গতিতে প্রস্থান করিবে। ২২।

I fore see, O friend, thy long delay on every mountain impregnated with the sweet ordour of Kutaja flowers, though thou art desirous of proceeding speedily for my good.But I pray thee,to try some how to move on rapidly after receiving the greetings of the peacocks with their eyes full of joyful tears and their cries converted into words of welcome.—22.

Notes.

1. We give here the poetical rendering of Prof. Wilson which is equally poetic :—

"Ah ! Much I dread thy long protracted way,
Where charms so numerous spring to tempt delay ;
Will not the frequent hill retard thy flight,
Nor flowery plain persuade prolonged delight ?

Or can the peacock's anointed hail,
The bird with lucid eyes, to lure thee fail?

2. मत्प्रियार्थं—(1) मम प्रियाय हिताय इदम् इति। "अर्थेन नित्यसमासः विशेष्यलिङ्गता चेति वक्तव्यम्" इति। (2) मम प्रियायै प्रियतमायै इदं; मम प्रियायै सन्देशकथनार्थं।

3. यियासोः—(या + सन् + उः) यातुमिच्छोः; desirous of going.

4. ककुभसुरभौ—ककुभैः कुटजकुसुमैः सुरभिः तस्मिन्; fragranted with the Kutaja flowers.

5. पर्व्वते पर्व्वते—प्रतिपर्व्वतं। "नित्यवीप्सयोः" इति वीप्सायां द्विरुक्तिः।

6. शुक्लापाङ्गैः—शुक्लौ अपाङ्गौ नेत्रप्रान्तौ येषां तैः; शुक्लनेत्रप्रान्तैः मयूरैः। स्वरूपविशेषणात् मयूर एव सूच्यते। योगरूढ़ः शब्दः। The wild peacocks are exceedingly abundant in many parts of Hindustan, and are specially found in marshy places. They are in a great measure acquatic and the setting in of the rains is the season in which they pair. The peacock is therefore always introduced in the description of cloudy or rainy weather together with the cranes and the chatakas. Cf. नवाम्बुमत्ताः शिखिनो नदन्ति मेघागमे कुन्दसमानदन्ति" घटकर्पूरः। "शिखिकुलकलकेका एव रम्या वनान्ताः। सुखिनम् असुखिनं वा सर्व्वमुत्कण्ठयन्ति॥" भर्तृहरिः।

7. सजलनयनैः—"सजलनयनत्वमत्र चिरेण मित्रालोकनात्" इति वल्लभः।

8. स्वागतीकृत्य—अस्वागतं स्वागतं कृत्वा इति स्वागतीकृत्य। अभूततद्भावे च्विः। "कुगतिप्रादयः" इति नित्यसमासः। Lit. converting

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-
र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः ।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः
सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः॥२३

into an welcome what is really not so; hence making into words of welcome.

9. व्यवस्येत्—(वि + अव + सो + लिङ् यात्) उद्युञ्जीत ; विधि-निमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्" इति प्रार्थनायां लिङ् ।

10. प्रत्युद्यातः—(प्रति + उत् + या + कर्म्मणि क्तः) प्रत्युद्गतः । Lit. आसनात् उत्थाय कानिचित् पदानि गत्वा अभ्यागतम् प्रति स्वागतव्याहृतिः प्रत्युद्गमनमभिधीयते ।

11. अत्र मयूराणां केकासु आरोप्यमाणस्य स्वागतवचनस्य वास्तविक-प्रत्युद्गमनोपयोगात् परिणामालङ्कारः । तल्लक्षणं यथा—"विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि । परिणामो भवेत्तुल्यातुल्याधिकरणो द्विधा ॥" (*i. e.*, आरोप्यमाणस्य आरोपविषयात्मतया परिणमनात् परिणामः) ।

12. Conjugations :—

या—याति, ययौ, अयासीत्, यास्यति ।

सो—स्यति, ससौ, सास्यति, असात्, असासीत् । कर्म्मणि सीयते, असायि ।

Prose order—हे मेघ ! त्वय्यासन्ने दशार्णाः सूचिभिन्नैः केतकैः पाण्डुच्छायोपवनवृतयः गृहबलिभुजां नीडारम्भैः आकुलग्रामचैत्याः परिणतफल-श्यामजम्बुवनान्ताः कतिपयदिवसस्थायिहंसाश्च संपत्स्यन्ते ।२३।

Paraphrase—हे सखे त्वयि सन्निकृष्टे सति दशार्णा नाम जनपदाः विकसिताग्रैः केतकीपुष्पैः शुभ्रप्रान्तवृतयः तथा गृहबलिभुजां काकादिपक्ष-

पचिणां निर्म्मितैः कुलायैः संकीर्णग्रामचैत्याः परिपक्वैः फलैः श्यामजम्बूवनान्ताः कतिपयदिनस्थायिहंसाश्च भविष्यन्ति । २३ ।

Change of voice—दशार्णैः * * वृतिभिः ** ग्रामचैत्यैः * *वनान्तैः स्थायिहंसैः संपत्स्यते । २३ ।

Sanjivani—पाण्डुच्छायेति । हे मेघ त्वयि आसन्ने सन्निकृष्टे सति दशार्णाः नाम जनपदाः सूचिभिन्नैः सूचिषु मुकुलाग्रेषु भिन्नैः विकसितैः । "केतकीमुकुलाग्रेषु सूचिः स्यात्" इति शब्दार्णवे । केतकैः केतकीकुसुमैः पाण्डुच्छायाः हरितवर्णाः उपवनानां वृतयः कण्टकशाखावरणाः येषु ते तथोक्ताः । "प्राकारो वरणः सालः प्राचीरं प्रान्ततो वृतिः" इत्यमरः । तथा गृहबलिभुजां काकादिग्रामपक्षिणां नीड़ारम्भैः कुलायनिर्म्माणैः । "कुलायो नीड़मस्त्रियाम्" इत्यमरः । चित्यायाः इमानि चैत्यानि रथ्यावृक्षाः । "चैत्यमायतने बुद्धवन्द्ये चोद्देशपादपे" इति विश्वः । आकुलानि सङ्कीर्णानि ग्रामेषु चैत्यानि येषु ते तथोक्ताः । तथा परिणतैः पक्वैः फलैः श्यामानि यानि जम्बूवनानि तैः अन्ताः रम्याः । "स्वतावसिते रम्ये समाप्तावन्त इष्यते" इति शब्दार्णवे । तथा कतिपयेषु एव दिनेषु स्थायिनो हंसाः येषु ते तथोक्ताः एवंविधाः सम्पत्स्यन्ते भविष्यन्ति । "पोटायुवतिस्तोककतिपय"—इत्यादिना कतिपयशब्दस्योत्तरपदत्वेऽपि न तच्छब्दस्योत्तरत्वमस्ति अस्य शास्त्रस्य प्रायिकत्वात् । २३ ।

হে পয়োধর ! তুমি দশার্ণনামক জনপদের সম্মুখবর্ত্তী হইলে তত্রত্য উপবনসমূহ বিকসিতাগ্র কেতকী পুষ্পে পাণ্ডুবর্ণ ও গ্রাম্যচৈত্যতরুনিকর বায়সাদি গ্রাম্য বিহগগণের নির্ম্মিত কুলায় নিচয়ে আকুল হইয়া উঠিবে ; পরিণত ফলনিকরে শ্যামবর্ণ জম্বূকানন দ্বারা ঐ প্রদেশ সাতিশয় প্রিয় দর্শন হইবে ; মরালগণও তথায় কিয়দ্দিন অবস্থান করিবে।২৩।

When thou wilt be close nigh, the country of the Dasarnas, whose garden hedges will be rich with white colour by the Ketakas open at the apex, whose sacred trees on the road sides of villages will form the busy scene of the nest-making of domestic birds, and where the Jambu forests will be more dark by their ripe fruits, will become lovely by the aforesaid reasons and by the halting of the flamingoes there for some days.—23.

Notes.

1. दशार्णाः—"प्रवत्सतरकम्बलवसनार्णदशानाम् ऋणे" इति वार्त्तिके "दशार्णः देशः। नदी च दशार्णा। ऋणशब्दो दुर्गभूमौ जले च" इति दीक्षितः। दश ऋणानि दुर्गभूमयः येषां ते दशार्णाः क्षत्रियविशेषाः। तेषां देशः दशार्णाः। "जनपदे लुप्" इति अणो लुप्। अतः "लुपि युक्तवद्व्यक्तिवचने" इति लुपि सति प्रकृतिवत् लिङ्गवचने स्तः। It now remains to find out which country it refers. Prof. Wilson, says 'no traces of this name can be found in modern maps: it is enumerated in Major Wilford's lists from Purans, Asiatic researches, vol 8, amongst the countries situated behind the Vindya mountains and corresponds according to him with the Dasarene of Ptolemy. It may possibly correspond at least in part with the modern district of cheteesgerh."

2. सूचिभिन्नैः—सूचिषु मुकुलाग्रेषु भिन्नैः विकसितैः ; open at the

apex. भिन्न is used in the same sense in Kumera Cf. सूर्यांशुभिर्भिन्नमिवारविन्दम् । Canto I.

3. पाण्डुच्छायोपवनवृतयः—पाण्डुः पाण्डुी वा छाया कान्तिः यासां ताः पाण्डुच्छायाः (ब. व्रो.) हरितवर्णाः ; उपवनानां वृतयः इति उपवनवृतयः (६ तत्) । पाण्डुच्छायाः उपवनवृतयः येषु ते—पाण्डुच्छायोपवनवृतयः ; where the fences of the gardens are white-coloured.

4. केतकैः—केतकानां पुष्पैः—(केतक + "पुष्पमूलेषु बहुलम्" इति विकारावयवप्रत्ययस्य लुप्), करणे तृतीया ।

2. गृहबलिभुजां—गृहस्य बलिः तं भुञ्जते इति गृहबलिभुजः (गृहबलि + भुज् + क्विप्) तेषां ; गृहस्थदत्तं बलिं भुक्त्वा ये पक्षिणः काकचटकादयः जीवन्ति ते गृहबलिभुजः ; those birds that live on foods supplied by house-holders. Amongest the five diurnal duties laid down for each house-holder, the duty of giving food to the Banaspaties for the food of the birds that live there is one.

6. ग्रामचैत्याः—चित्यायाः इमानि चैत्यानि रथ्यावृक्षाः । ग्रामाणां चैत्यानि ; the trees on road sides of villages. "पूज्यपादपाः पिप्पल्यादयो देवतायतनानि वा । "चैत्यं वृक्षाश्रितेऽप्युक्तं देवतायतने तथा । ग्रामेषु हि प्रतिगृहं प्राङ्गणे पिप्पलप्रभृतयः पूजार्थं लोकैरारोप्यन्ते" इति सारोद्धारिणीप्रसूताः as quoted by Prof, Nundurgikar, "चैत्यं वृक्षालयः । यदि वा महाभोगप्रख्यातनभोवनस्पतिश्चैत्यः" इति वल्लभः । आकुलानि ग्रामचैत्यानि येषु ते (व व्रो) ।

7. परिणतफलश्यामजम्बूवनान्ताः—"परिणतैः पक्वैः फलैः जम्बूभिः (कर्मधारयः) श्यामानि श्यामवर्णानि (३या तत्) वनानि (कर्म) तैः अन्ताः रम्याः (३या तत्)" इति मल्लिनाथः । "इयं व्याख्या न समीचीना, शब्दार्णवानुसारेण अन्तशब्दस्य रम्यार्थवाचकत्वेऽपि तस्य तदर्थे प्रयोगस्य प्रायेणा-

दर्शनात्. The real meaning is—परिणतानि पक्वानि फलानि येषु ते परिणतफलाः(ब.व्री.)अतएव श्यामाः जम्बुवनान्ताः जम्बूवनभूमयः येषु ते तादृशाः । कवेः ग्रन्थेषु वनान्तशब्दस्य वनभूम्यर्थे प्रयोगो न विरलः । यथा "विदधति भयमुच्चैर्वीक्षमाणा वनान्ताः" ।ऋतु।१।२२।तथाच"भ्रमति पवनधूतः सर्व्वतोऽग्निर्वनान्ते ।" १।२६। तथाच "नवसलिलनिषेकात् शान्ततापो वनान्तः"२।२४। तथाच रघौ—"वशिष्ठधेनोरनुयायिनं तम् आवर्त्तमानं वनिता वनान्तात्" II. 19. "सम्बन्धमाभाषणपूर्व्वमाहुः वृत्तः स नौ सङ्गतयोर्वनान्ते" II. 58. "फलपरिणतिश्यामजम्बूवनान्ताः" इति पाठान्तरं भरतसनातनरामनाथहरगोविन्दधृतं। तत्र "फलानां परिणत्या पाकेन श्यामाः कृष्णाः जम्बूवनान्ताः जम्बूवनानि यत्र ते तथा" इति रामनाथकृता व्याख्या। Cf. "फलभरपरिणामश्यामजम्बूनिकुञ्जस्खलिततनुतरङ्गामुत्तरेण स्रवन्तीं" Mal IX.

8. कतिपयदिनस्थायिहंसाः—"ते हि तूर्णं प्रतिष्ठासवोऽपि सुखवासलालसाः त्रिचतुरान् वासरान् विलम्बमाना मानसं प्रति प्रयान्ति, यावदम्भोधरः प्रसृतनीरन्ध्रजलधाराधोरणीभिः अभिनवजलानि आनयति तावत्तत्र हंसावस्थानं युज्यते" इति सारोद्धारिण्याम्। कतिपयानि दिनानि इति कतिपयदिनानि। परं "पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्त्तैर्जातिः (i. e., पोटाप्रभृतिभिः सह जातिः समस्यते, पोटाप्रभृतीनाञ्च परनिपातः। पोटा—स्त्रीपुंसलक्षणा। गृष्टिः—सकृत्प्रसूताः। धेनुः—नवप्रसूतिका। वशा—वन्ध्या। वेहत्—गर्भघातिनी। बष्कयणी—तरुणवत्सा) इति सूत्रात् कतिपयपदस्य परनिपात एव कर्त्तव्यः। अत्राह मल्लिनाथः "कतिपयशब्दस्य उत्तरपदत्वेऽपि न तच्छन्दस्तोभरतमपि अस्य शास्त्रस्य प्रायिकत्वात्" (i. e., he says that the poet here does not take it to be compulsory in all cases and uses it as the first member); for similar use Cf. "कतिपयकुसुमोद्गमः कदम्बः" Utteracharita III. 20. कतिपयदिनानि स्थायिनः ("अत्यन्तसंयोगे

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा ।
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मात्
सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्म्मि ।२४।

च" इति २या समासः) कतिपयदिनस्थायिनः। कतिपयदिनस्थायिनः हंसाः येषु ते (ब. व्री.)

9. सम्पत्स्यन्ते—(सम्+पद्+लृट्, स्यन्ते) भविष्यन्ति। "सम्पत्स्यमानो भविष्यन्ति" इति सारोद्धारिणी।

10. Conjugations :—

पद्यते—पेदे, अपादि, पत्स्यते।

Prose order—दिक्षु प्रथितविदिशालक्षणां तेषां राजधानीं गत्वा सद्यः कामुकत्वस्य अविकलं फलं लब्धा; यस्मात् स्वादु चलोर्म्मि वेत्रवत्याः पयः सभ्रूभङ्गं मुखमिव तीरोपान्तस्तनितसुभगं पास्यसि। २४।

Paraphrase—विदिशानाम्नीं सर्व्वासु दिक्षु ख्यातां तेषां दशार्णानां प्रधाननगरीम् आसाद्य सद्यः दर्शनसमये एव त्वया विलासितायाः समग्रं प्रयोजनं लप्स्यते। यतः मधुरं तरङ्गितं वेत्रवत्या नाम तरङ्गिण्याः सलिलं दशनपीड़या सभ्रूकुटिभङ्गं अधरमिव तटप्रान्ते गर्ज्जितेन मनोज्ञं यथास्यात् तथा त्वं पास्यसि। कामिनाम् अधरास्वादः सुरतादपि अतिरिच्यते इत्यतो परोपकारव्रतं न केवलं परहिताय अपितु स्वहितायापि। २४।

Change of voice—* * * फलं लप्स्यते * * पायिष्यते। २४।

Sanjivani—तेषामिति। दिक्षु प्रथितं प्रसिद्धं विदिशा इति लक्षणं नामधेयं यस्याः ताम्। "लक्षणं नाम्नि चिह्ने च" इति विश्वः। तेषां दशार्णानां

सम्बन्धिनीं। धीयन्तेऽस्याम् इति धानी। "करणाधिकरणयोश्च" इति ल्युट्। राज्ञां धानी राजधानी। "कृद्योगा च षष्ठी समस्यते" इति वक्तव्यात् समासः। तां प्रधाननगरीम्। "प्रधाननगरी राज्ञां राजधानीति कथ्यते" इति शब्दार्णवे। गत्वा प्राप्य सद्यः कामुकत्वस्य विलासितायाः। "विलासी कामुकः कामी स्त्रीपरो रतिलम्पटः" इति शब्दार्णवे। अविकलं समग्रं फलं प्रयोजनं लब्धा लप्स्यते। त्वया इति शेषः। कर्म्मणि लुट्। कुतः। यस्मात् कारणात् स्वादु मधुरं। चलाः ऊर्म्मयो यस्य तत् चलोर्म्मि तरङ्गितं वेत्रवत्याः नाम नद्याः पयः सभ्रूभङ्गं भ्रूकुटियुक्तं। दशनपीड़या इति भावः। मुखम् इव अधरम् इव इत्यर्थः। तीरोपान्ते तटप्रान्ते यत् स्तनितं गर्ज्जितं तेन सुभगं यथा तथा। स्तनितशब्देन मणितमपि व्यपदिश्यते। "ऊर्द्ध्वमुच्चलितकण्ठनासिकं हुङ्कृतं स्तनित मल्पघोषवत्" इति लक्षणात्। पास्यसि। पिवतेर्लृट्। "कामिनामधरास्वादः सुरतादतिरिच्यते" इति भावः।२४।

হে জলধর! সর্ব্বত্র প্রসিদ্ধ ঐ দশার্ণ জনপদের রাজধানী বিদিশা-নাম্নী নগরীতে উপস্থিত হইয়া তুমি সদাই বিলাসিতার যাবতীয় ফল সম্ভোগ করিতে থাকিবে, কেননা তুমি তটপ্রান্তে উপস্থিত হইয়া মন্দ্র গর্জ্জনসহকারে ভ্রূভঙ্গযুক্ত মুখেরন্যায় রমণীয় বেত্রবতীর চঞ্চল তরঙ্গপূর্ণ সুস্বাদু সলিল পান করিবে।।২৪।

Having arrived at their metropolis, known to all the quarters as Vidisa, thou wilt forthwith attain the full enjoyment of a lover, for thou wilt drink of the sweet and tremulous waters of the Betravati, like a face with contracted eyebrows (on account of the passionate kisses), in a manner pleasant by thy thundering on the edge of her banks.—24.

Notes.

1. तेषां—दशार्णानां ।

2. प्रथितविदिशालक्षणां—विदिशा इति लक्षणं नामधेयं इति विदिशालक्षणं (कर्म्मधारयः) प्रथितं प्रसिद्धं विदिशालक्षणं यस्याः तां। Vidisa was the capital city of the Dasarnas. "It appears to be the modern Bhilsa in the province of Malwa. It is still a place of note and is well known in India for the superior quality of the tobacco raised in its vicinity" Prof. Wilson.

3. राजधानी—धीयन्ते अस्यां इति धानी (धा + करणाधिकरणयोश्च इति ल्युट् + स्त्रियां ङीप्)। राज्ञः धानी; metropolis; capital city.

4. अविकलं—विगता कला अंशः यस्मात् तत् विकलं ("प्रादिभ्यो धातुजस्य"—इत्यादिना बहुव्रीहिसमासे धातुजस्य लोपः। न विकलं अविकलं (नञ् तत्पुरुषः), समग्रं; entire.

5. लब्धा—(लभ् + कर्म्मणि लुट् ता) लप्स्यते; प्राप्स्यते।

6. वेत्रवत्याः—"It is the mod. *Betwah*; it rises on the north side of the Vindya ranges and pursuing a north easterly course of 340 miles, traverses the province of *Malwa* and the southwest corner of *Allahabad* and falls into the *Jumna* below *Calpee*; in the early part of its course it passes through *Bhilsa* or *Vidisa*." Prof. Wilson.

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो-
स्त्वत्सम्पर्कात् पुलकितमिव प्रौढ़पुष्पैः कदम्बैः ।
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥२५॥

7. यस्मात्—यस्मात् कारणात् ।

8. सभ्रूभङ्गं—भ्रुवोः भङ्गः इति भ्रूभङ्गः । भ्रूभङ्गेण सह वर्त्तमानं (व. व्री.) भ्रुकुटियुक्तं दशनपीड़या इति भावः । कृतककोपात् सभ्रूभङ्गत्वम्, युवतीनां दशनपीड़ा न क्लेशाय । मुखमिव—अधरमिव ।

9. तीरोपान्तस्तनितसुभगं—तीरस्य उपान्तः प्रान्तभागः तत्र यत् स्तनितं गर्जितं तेन सुभगं यथा तथा । अत्र स्तनितशब्देन मणितमपि व्यपदिश्यते । "अन्तः मध्ये यत् स्तनितं रतिकूजितं तेन सुभगं मनोज्ञं" इति सारोद्धारिणी । "स्तनितेन पक्षिकूजितेन स्खलितेन वा सुभगं सुन्दरम्" इति वल्लभः । "नदीतीरोपान्तस्खलितं हि पानीयं सशब्दं भवति" इति सुमतिविजयः । Cf. How विदिशा has been described in Kadamvari: "तस्य च राज्ञः कलिकालभयपुञ्जीभूतकृतयुगानुकारिणी त्रिभुवनप्रसवभूमिरिव विस्तीर्णा मज्जन्मालवविलासिनीकुचतटास्फालनजर्जरितोर्म्मिमालया वेत्रवत्या परिगता विदिशाभिधाना नगरी राजधानी आसीत्" Part I.

10. "यथा कश्चित् कामी केषांचित् देशानां राजधानीं गत्वा सद्यो नृपवरैः रचितायाः कस्याश्चित् कामिन्याः रसनेन्द्रियप्रह्लादं भ्रूविलासभङ्गुरं मुखकमलस्य अविरतं चुम्बनं विधाय कामिभावस्य भुजगतायाः अविकलं पूर्णं फलं लभते तथा &c." इति सारोद्धारिणी ।

Prose order—हे मेघ ! तत्र विश्रामहेतोः प्रौढ़पुष्पैः कदम्बैः त्वत्सम्पर्कात् पुलकितमिव स्थितं नीचैराख्यं गिरिमधिवसेः ; यः पण्यस्त्रीरतिपरिमलोद्गारिभिः शिलावेश्मभिः नागराणां उद्दामानि यौवनानि प्रथयति । २५ ।

Paraphrase—हे सखे तत्र विदिशायां भवत्सम्पर्कात् प्रवृद्धैः कदम्बपुष्पैः सञ्जातपुलके इव नीचैराख्ये शैले अध्वखेदापनयनार्थं कंचित् कालं वस ; यः शैलः वेश्यानां रतिषु समुत्पन्नं गन्धम् आविर्भावयद्भिः कन्दरैः यूनां पौराणां उत्कटानि यौवनानि प्रकटयति ।२५।

Change of voice—* * पुलकित इव स्थितः नीचैराख्यः गिरिः अध्युष्येत। येन * * प्रथ्यन्ते। २५।

Sanjivani—नीचैरिति। हे मेघ। तत्र विदिशासमीपे। विश्रामः विश्रमः खेदापनयः। भावार्थे घञ्‌प्रत्ययः। स एव हेतुः तस्य विश्रामकारणात् विश्रामार्थम् इत्यर्थः। "षष्ठी हेतुप्रयोगे" इति षष्ठी। विश्रामेत्यत्र "नोदात्तोपदेशस्य मान्तस्यानाचमेः" इति पाणिनीये वृद्धिप्रतिषेधेऽपि "विश्रामो वा" इति चन्द्रव्याकरणे विकल्पेन वृद्धिविधानाद्रूपसिद्धिः। प्रौढ़पुष्पैः प्रबुद्धकुसुमैः कदम्बैः नीपवृक्षैः त्वत्सम्पर्कात् तव सङ्गात्। पुलकाः अस्य जाताः पुलकितमिव सञ्जातपुलकमिव स्थितम्। तारकादित्वादितच्‌प्रत्ययः। नीचैरिति आख्या यस्य तं नीचैराख्यं गिरिम् अधिवसेः। गिरौ वसेः इत्यर्थः। "उपान्वध्याङ्‌वसः" इति कर्म्मत्वम्। यो नीचैर्गिरिः। पण्याः क्रेयाः स्त्रियः पण्यस्त्रियः वेश्याः। "वारस्त्री गणिका वेश्या पण्यस्त्री रूपजीविनी" इति शब्दार्णवे। तासां रतिषु यः परिमलो गन्धविशेषः। "विमर्द्दोत्थे परिमलो गन्धे जनमनोहरे" इत्यमरः। तम् उद्गिरन्ति आविष्कुर्वन्ति इति तथोक्तानि तैः। शिलावेश्मभिः कन्दरैः

नागराणां पौराणाम् उद्दामानि उत्कटानि यौवनानि प्रथयति प्रकटयति। उत्कटयौवनाः कचित् अनुरक्ताः वाराङ्गनाः विस्रम्भविहाराकाङ्क्षिण्यो मात्रादिभयात् निशीथसमये कञ्चन विविक्तं देशम् आश्रित्य रमन्ते तच्चात्र बहुलमस्तीति प्रसिद्धिः। अत्र उद्गारशब्दो गौणार्थत्वात् न जुगुप्सावहः। प्रत्युत काव्यस्य अतिशोभाकर एव। तदुक्तं दण्डिना—"निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्ति-व्यपाश्रयम्। अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते" इति। २५।

হে পয়োদ! তুমি বিশ্রামার্থ সেই বিদিশানগরীর সমীপবর্ত্তী বামন গিরিতে অবস্থিতি করিও; সেই স্থানে অসংখ্য কদম্বকুসুম বিকসিত হওয়াতে বোধ হইবে যেন, তোমার সহিত সমাগম হওয়াতেই গিরিবরের আহ্লাদে রোমাঞ্চ সঞ্চার হইয়াছে। ঐ পর্ব্বতের কন্দর সমূহ বারবিলাসিনীগণের রতিপরিমলগন্ধ বিস্তারে পুরবাসী বিলাসিবর্গের উদ্দাম যৌবন প্রকাশিত করিয়া দিবে। ২৫।

There thou mayest, for repose, rest on a mount called Nichais, bristling, as it were, at thy contact, with Kadamva trees surcharged with full-blown flowers, which evinces the unbridled youth of the citizens by means of its stony houses emitting perfumes used in their sports with the harlots.—25.

Notes.

1. नीचैराख्यं गिरिं—नीचैरिति आख्या यस्य तं (ब. व्री.) the mount called Nichais. It must be some hillock near the

town of Bhilsa. "खर्व्वनामानं वामनगिरिं" इति सारोद्धारिणी। Vallava says "आख्यया नीचं स्वरूपतस्तु उच्चमिति भावः।"

2. अधिवसेः—(अधि + वस् + लिङ् यास्)। The root वस् preceded by उप, अनु, अधि, or आ becomes transitive and the locative becomes its कर्म्म। Hence गिरिं takes द्वितीया।

3. विश्रामहेतोः—(वि + श्रम् + घञ् = विश्रमः, "नोदात्तोपदेशस्य मान्तस्यानाचमेः" इति वृद्धिप्रतिषेधात्। विश्रम एव विश्रामः। स्वार्थे अण् प्रज्ञादित्वात्। यद्वा "विश्रामो वा" इति चन्द्रव्याकरणे विकल्पेन वृद्धि-विधानात् रूपसिद्धिः। वल्लभस्तु "विश्रामशब्दः कवीनां प्रमादजः" इति आह) विश्रामस्य हेतोः। विश्रामार्थम् इत्यर्थः। "षष्ठी हेतुप्रयोगे" इति विश्रामस्य इत्यत्र षष्ठी तेन सह एकविभक्तिनियमात् हेतो रित्यत्रापि षष्ठी।

4. प्रौढ़पुष्पैः—प्रौढ़ानि प्रबुद्धानि पुष्पाणि कुसुमानि येषां तैः (ब. व्री.) with full-blown flowers.

5. पुलकितं—(पुलक + तारकादित्वात् इतच्) पुलकयुक्तं; रोमाञ्चितं।

6. त्वत्सम्पर्कात् कदम्बैः—that hill which with full-blown and upright Kadamba flowers is like the body with its hair on end, on account of its contact with thee, its warm friend. The erection of the hairs of the body is here the effect of pleasure or delight.

7. पण्याः—पणितव्याः; पणेन मूल्येन क्रेयाः (पण् + "अवद्यपण्यवर्य्या गर्ह्यपणितव्यानिरोधेषु" इति पणितव्यार्थे यत्) पण्याः; मूल्यक्रेयाः; व्यवहर्त्तव्याः; पण्यस्त्रीणां —वारवणितानां। स्तुत्यर्थे तु पाण्याः—स्तुत्यर्हाः।

8. नागराणां—नगरे भवाः नागराः (नगर + अण्)। ये तु नगरे भवन्ति ते विलासिनीः इच्छन्ते। अतएव नागराः—विलासिनः, प्रेमिकाः, कामुकाः।

विश्रान्तः सन् व्रज वननदीतीरजातानि सिञ्च-
न्नुद्यानानां नवजलकणैर्यूथिकाजालकानि ।
गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां
छायादानात् क्षणपरिचितः पुष्पलावीमुखानाम् २६

9. उद्दामानि—उच्छिन्नानि दामानि येषु तानि ("प्रादिभ्यो-धातुजस्य—" इत्यादिना बहुव्रीहौ पाक्षिकः धातुजलोपः); उच्छृङ्खलानि; (hence) अत्युत्कटानि; unbridled; un-governed.

10. Here the word उद्गार has been used in its secondary sense (*i. e.*, आविष्करण) and not in its primary sense of vomitting. Hence it does not give rise to the fault of composition called अश्लीलता, on the other hand, it enhances the beauty of the style of composition. For, according to दण्डी the words निष्ठ्यूत (lit. spat), उद्गीर्ण (vomitted), वान्त (vomitted) &c. when they are used in a secondary sense are no longer faulty, but enhance the meaning of the sentence and hence like हेला &c. they are used to denote the excellence of the style.

11. Conjugations:—

वस्—वसति, वत्स्यति, उवास, अवात्सीत्: उषितः, उष्टिः ।

Prose order—(तत्र) विश्रान्तः सन् वननदीतीरजातानि उद्यानानां यूथिकाजालकानि नवजलकणैः सिञ्चन्, गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां पुष्पलावीमुखानां छायादानात् क्षणपरिचितः सन् व्रज । २६ ।

Paraphrase—तत्र लब्धविश्रामः सन् अरण्यवाहिनीनां स्रोतस्वतीनां तीरभूमौ स्वयं प्ररूढानि उद्यानानां यूथिकाकुसुमानि नवजललवैः आर्द्रीकुर्वन्

छायादानेन गण्डतलस्वेदजलापनयनाय म्लानकर्णोत्पलानां कासाञ्चित् मालाकरवनितानां मये क्षणादयं सुखलाभ इति सस्पृहं चणं नेत्रानन्दकरः सन् गच्छ ।

Change of voice—विश्रान्तेन सता * * सिञ्चता चणपरिचितेन सता * * गम्यताम् । २६ ।

Sanjivani—विश्रान्त इति । विश्रान्तः सन् तत्र नीचैर्गिरौ विनीताध्वश्रमः सन् । अथ विश्रान्तेरनन्तरं । वने अरण्ये याः नद्यः तासां तीरेषु जातानि स्वयंरूढानि अकृत्रिमाणि इत्यर्थः । "नदनदी" इति पाठे "पुमान् स्त्रिया" इत्येकशेषो दुर्वारः । तेषाम् उद्यानानाम् आरामाणां सम्बन्धीनि यूथिकाजालकानि मागधीकुसुममुकुलानि । "अथ मागधी गणिका यूथिका" इत्यमरः । "कोरकजालककलिकाकुड्मलमुकुलानि तुल्यानि" इति हलायुधः । नवजलकणैः सिञ्चन् आर्द्रीकुर्व्वन् । अत्र सिञ्चतेरार्द्रीकरणार्थत्वात् द्रवद्रव्यस्य करणत्वम् । यत्र तु चरणम् अर्थः तत्र द्रवद्रव्यस्य कर्म्मत्वम् । यथा "रेतः सिक्ता कुमारीषु । "सुखेनिषिञ्चन्तमिवामृतं त्वचि" इत्येवमादि । एवं किरतीत्यादीनामपि "रजः किरति मारुतः" "अवाकिरन् वयोवृद्धास्तं लाजैः पौरयोषितः" इत्यादिष्वर्थभेदाश्रयणेन रजोलाजादीनां कर्म्मत्वकरणत्वे गमयितव्ये । तथा गण्डयोः कपोलयोः स्वेदस्य अपनयनेन प्रमार्ज्जनेन या रुजा पीडा । भिदादित्वादङ् प्रत्ययः । तया क्लान्तानि म्लानानि कर्णोत्पलानि येषां तेषां तथोक्तानि पुष्पाणि लुनन्तीति पुष्पलाव्यः पुष्पाव-

चायिकाः स्त्रियः । "कर्म्मण्यण्" । "टिड्ढाणञ्—"इत्यादिना ङीप् । तासां मुखानि । छायायाः अनातपस्य दानात् । कान्तिदानञ्च ध्वन्यते ।"छाया सूर्य्यप्रिया कान्तिः प्रतिबिम्बमनातपः" इत्यमरः । कामुकदर्शनात् कामिनीनां मुखविकाशो भवति इति भावः । क्षणपरिचितः क्षणं संसृष्टः सन् । नतु चिरं । व्रज गच्छ । २६ ।

তুমি সেই নীচৈঃ গিরিতে বিশ্রামপূর্ব্বক, বন নদীতীরস্থ কাননসমূহে যূথিকাপুষ্পের যে সকল কুট্মল স্বয়ং সমুৎপন্ন হইয়াছে, সেই সকল কুট্মল অভিনব সলিলকণা বর্ষণে আর্দ্র করিতে করিতে ও যে সকল মালাকর বিলাসিনীগণ কুসুম চয়নে নিরত তাহাদিগের গণ্ডপ্রদেশজাত স্বেদবিন্দু অপনয়নকালে কর্ণোৎপল ক্লিষ্ট ও মলিন হইলে তুমি সেই কামিনীদের বদনদেশে ছায়া প্রদান পূর্ব্বক কিয়ৎকালের জন্য পরিচিত হইয়া (স্বীয় গন্তব্য পথে) অগ্রসর হইবে। ২৬।

Being refreshed there, proceed in thy journey, showering, as thou advancest, fresh drops of water, upon the buds of the Jasmine flowers growing indegenouson the banks of the forest rivers, and by casting shadow coming into temporary contact with the faces of the female gatherers of flowers whose ear-lotuses have faded (from the injury caused) by the constant wiping of the perspiration on their cheeks—26.

Notes.

1. वननदीतीरजातानि—"वने अरण्ये या नद्यः तासां तीरेषु जातानि तथ' रूढ़ानि" इति मल्लिनाथः; grown indegenous on the banks of forest-rivers. "अथवा आवनदेश्वे यूथिकाखण्डमण्डितोद्यानमालिततीरदेश्या वननदी नाम्नी वाराणसी" इति बाण्टोबारिणौ। सनातन and

रामनाथ read 'नगनदी' for वननदी and Prof. Wilson says that "it is probably one amongst a number of small streams falling from the Vindya range; indeed the whole province of Malwa abounds in water. I prefer नगनदी, from finding a river west of the Betwah, named the Parbatty and which rising in the Vindya chain runs north-west till it joins the Sipra and the two together fall into the chambal." Mallinatha notices a third reading "नदनदी" which is not tenable, as by the aphorism "पुमान्स्त्रिया" the word नदनदी becomes नदी only.

2. उद्यानानां—आरामाणां। सम्बन्धसामान्ये षष्ठी; pertaining to the garden. Hence large and odoriferous.

3. नवजलकणैः—नववारिविन्दुपातैः। Mallinatha remarks that the root सिच् meaning here "आर्द्रीकरण, to shower" governs the object with which it showers in the instrumental case, but when it means "क्षरण", to sprinkle it governs it in the accusative case. Hence जलं सिञ्चति—sprinkles water, but the thing on which water is sprinkled may not completely get wet by it. जलैः सिञ्चति—showers water upon it so that it is bathed in water. So also the root कॄ when it means वर्षण, governs the object by which it showers in the instrumental case; as अवाकिरन् वयोवृद्धाः लाजैः तं पौरयोषितः (Raghu IV.), but when it means "to scatter," it governs its object in the accusative case; as रजः किरति मारुतः।

4. गण्डस्वेदापनयनरुजा &c.—गण्डयोः कपलयोः स्वेदः आतपजः स्वेदः

वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मास्म भूरुज्जयिन्याः ।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि॥२७।

तस्य अपनयनं दूरीकरणं तेन रुजा (रुज् + भिदादित्वात् अङ्) पीड़ा तया क्लान्तानि (क्लम् + क्तः) म्लानानि कर्णयोः उत्पलानि येषां तेषां— in whose faces, the ear-lotuses have faded by injury caused by the constant wiping of the sweat from their cheeks

5. पुष्पलावीमुखानां—पुष्पाणि लुनन्ति इति पुष्पलाव्यः (पुष्प + लू "कर्म्मण्यण्" इति अण् । ततः णित्त्वात् स्त्रियां ङीप् ।) तासां मुखानि ; पुष्पचयनप्रवृत्तानाम् अङ्गनानां मुखानि इत्यर्थः । तेषां । Prof. Wilson says that the पुष्पलावी here refers to the मालाकराङ्गना whose principal function is to gather flowers and make wreaths with them for the rich.

6. छायादानात्—(1) छायायाः अनातपस्य दानं तस्मात् (2) छायायाः कान्त्याः दानात् ।

7. क्षणपरिचितः—"आतपप्रतिषेधात् क्षणप्रणयी" इति सारोद्धारिणी।

8. Conjugations :—

श्रम्—श्राम्यति, शश्राम, श्रमिष्यति, अश्रमत, श्रान्तः ।

सिच्—सिञ्चति, सिञ्चते, सिषेच, सिषिचे, सेक्ष्यति, सेक्ष्यते, असिचत्, असिचत, असिक्त ।

Prose order—उत्तराशां प्रस्थितस्य भवतः पन्थाः वक्रो यदपि तथापि उज्जयिन्याः सौधोत्सङ्गप्रणयविमुखो मास्म भूः, तत्र विद्युद्दामस्फुरितचकितैः पौराङ्गनानां लोलापाङ्गैः लोचनैः न रमसे यदि तर्हि त्वं वञ्चितोऽसि । २७ ।

Paraphrase—उदीचीं दिशं प्रस्थितस्य भवतः अर्वाग्भागः दूरी

यद्यपि तथापि तेषां प्रधाननगर्य्याः विशालापरपर्य्यायायाः उज्जयिन्याः सौधशिखरारोहणस्य पराङ्मुखो मास्म भूः । तत्र विद्युल्लतानां स्फुरितेभ्यो भीतैः चञ्चलकटाक्षैः पौराङ्गनानां नयनैः यदि न रमसे तर्हि त्वं विफलात्मलाभतया प्रतारितोऽसि । २७ ।

Change of voice—* * * पथा * वक्रेण * भूयते * विमुखेन * मास्म भावि । * * * रम्यते त्वया वञ्चितेन भूयते । २७ ।

Sanjivani—वक्र इति । उत्तराशाम् उदीचीं दिशं प्रति प्रस्थितस्य भवतः पन्थाः उज्जयिनीमार्गः वक्रो यदपि । दूरो यद्यपि इत्यर्थः । विन्ध्यात् उत्तरवाहिन्याः निर्विन्ध्यायाः प्राग्भागे कियत्यपि दूरे स्थिता उज्जयिनी । उत्तरपथस्तु निर्विन्ध्यायाः पश्चिमे इति वक्रत्वम् । तथापि उज्जयिन्याः विशालानगरस्य । "विशालोज्जयिनी समा" इति उत्पलः । सौधानाम् उत्सङ्गेषु उपरिभागेषु प्रणयः परिचयः । "प्रणयः स्यात् परिचये याञ्चायां सौहृदेऽपि च" इति यादवः । तस्य विमुखः पराङ्मुखो मास्म भूः । न भव इत्यथः । "स्मोत्तरे लङ् च" इति चकारादाशीरर्थे लुङ् । "न माङ्योगे" इत्यडागमप्रतिषेधः । तत्र उज्जयिन्यां विद्युद्दाम्नां विद्युल्लतानां स्फुरितेभ्यः स्फुरणेभ्यः चकितैः भीतैः लोलापाङ्गैः चञ्चलकटाक्षैः पौराङ्गनानां लोचनैः न रमसे यदि तर्हि त्वं वञ्चितः प्रतारितः असि । जन्मवैफल्यं भवेत् इत्यर्थः । २७ ।

হে প্রিয়তম! যদিও উত্তরগামী তোমার উজ্জয়িনী দিয়া

গমন করিতে হইলে পথ কিঞ্চিৎ বক্র হইবে তথাপি ঐ নগরীর সমুন্নত প্রাসাদপৃষ্ঠে একবার উপবিষ্ট হইতে বিমুখ হইও না। কেননা তত্রত্য পৌরাঙ্গনাদের বিদ্যুন্মালার স্ফুরণহেতু চকিত ও লোলকটাক্ষ নয়নের সহিত ক্রীড়া কৌতুকে বঞ্চিত হইলে তোমার জীবনধারণই বিফল। ২৭।

Though the road will be circuitous for thee who art leaving for the northern regions, still thou shouldst not be averse to forming an accquaintance with the terraces of the places of Oujein, for thou wilt be indeed defrauded of the object of thy eyes, if thou dost not enjoy (the glances of the eyes of the damsels of the city there,—eyes. with tremulous outer coners frightened by continuous flashes of thy lightning-streaks—27.

Notes.

1. उत्तराशां प्रस्थितस्य—of thee. who hast set forth on a journey to the north. "अकर्म्मकधातुभिर्योगे देशकालोभावोगन्तव्योऽध्वा च कर्म्मसंज्ञक इति वाच्यम्" इति देशवाचकस्य उत्तराशाशब्दस्य अकर्म्मक.) प्रस्थितेर्योगात् कर्म्मत्वम्, यद्वा प्रपूर्व्वस्थाधातोः गमनार्थत्वात् सकर्म्मकत्वम् तेन सकर्म्मकप्रयोगः इत्यन्ये।

2. वक्रः यद्यपि—though circuitous.

3. सौधोत्सङ्गप्रणयविमुखः—averse to forming acquaintance with the terraces of the palaces there. सौध—(सुधा + अण्) सुधाधवलितः प्रासादः।

4. उज्जयिन्याः—उज्जयिनी, variously called विशाला, अवन्तिका, and पुष्पकरण्डिनी, was the capital of the country called अवन्ति. That it was a place of great renown from the earlist time is not unknown to any of our readers. It was the capital of

Yasodharmadeva, the Vikramaditya, who was the celebrated patron of our poet.

5. माम्र भूः—(माम्र + भू + लुङ् स् ।) All roots take लुङ् to denote all the moods and tenses when governed by मा and when governed by माम्र they take both लुङ् and लङ् in the same sense. Here the लुङ् has been used in the sense of wish (आशिष्) ; without माम्र, the form would be "न भव or न भवेः" ("आशिषि लिङ्लोटौ" इति सूत्रात्) ।

6. विद्युद्दामस्फुरितचकितैः—विद्युतः (वि + द्युत् + क्विप्) दामानि इव इति विद्युद्दामानि (उपमितसमासः) तेषां स्फुरितानि (स्फुर् + भावे क्तः स्फुरणानि तेभ्यः चकितैः भीतैः (५मी तत्); frightened by continuous flashes of lightning-streaks.

7. लोलापाङ्गैः—लोलाः चचलाः अपाङ्गाः नेत्रप्रान्ताः येषु तैः ; where the outer corners of the eyes are tremulous. लोचनैः—करणे ३या । रमसे—enjoyest. पौराङ्गनानां—"पौर्य्यश्च ताः अङ्गनाश्च तासां विदग्धवनितानां" । इति सारोद्धारिणी ।

8. वञ्चितोऽसि—If you have not seen those damsels there, you might as well have been blind or not have existed at all. "सुभाषितेन गीतेन युवतीनाञ्च लीलया । यस्य न द्रवते चित्तं स वै मुक्तोऽथवा पशुः" इति सारोद्धारिणी । Cf. Sakuntala II. "माधव्य, अनवाप्तचक्षुःफलोऽसि येन त्वया दर्शनीयं वस्तु न दृष्टम् ।" Again Cf. Act VI.—"अनभिज्ञः खलु ईदृशस्य रूपस्य मादृशोऽयं जनः" ।

9. Conjugations :—

रम्—रमते, रेमे, रंस्यते, अरंस्त ।

स्फुर्—स्फुरति, स्फुलति, स्फरति, स्फलति ; पुस्फोर ; स्फुरिष्यति, अस्फुरीत् ।

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्त्तनाभेः।
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु।२८।

Prose order—हे सखे! पथि वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः स्खलितसुभगं संसर्पन्त्याः दर्शितावर्त्तनाभेः निर्व्विन्ध्यायाः सन्निपत्य रसाभ्यन्तरः भव; स्त्रीणां प्रियेषु विभ्रमः एव आद्यं प्रणयवचनं भवति। २८।

Paraphrase—हे सखे पथि तरङ्गसञ्चलनेन यस्याः हंसपंक्तिरूपः काञ्चीगुणः मधुरं शिञ्जति, या उपलस्खलनेन मदमन्थरं संसर्पति, या च प्रतिक्षणम् आवर्त्तरूपं नाभिं दर्शयति, तया निर्विन्ध्यया नाम नद्या संगम्य रसाभ्यन्तरो भव, शङ्कां मा कृथाः, यतः सा त्वय्यनुरागिणी; अनुरागिणी हि विभ्रमेणैव रागप्रकटनं करोति न तु कण्ठतः। २८।

Change of voice—* * रसाभ्यन्तरेण भूयताम्। * * विभ्रमेण * * आद्येन प्रणयवचनेन भूयते। २८।

Sanjivani—सम्प्रत्युज्जयिनीं गच्छतस्तस्य मध्येमार्गे निर्विन्ध्यासम्बन्धमाह वीचीति। हे सखे पथि उज्जयिनीपथे वीचिक्षोभेण तरङ्गचलनेन स्तनितानां मुखराणाम्। कर्त्तरि क्तः। विहगानां हंसानां श्रेणिः पंक्तिरेव काञ्चीगुणो यस्याः तस्याः स्खलितेन उपलस्खलनेन मदस्खलितेन च सुभगं यथा तथा संसर्पन्त्याः प्रवहन्त्याः गच्छन्त्याश्च तथा दर्शितः प्रकटितः आवर्त्तः अम्भसां भ्रम एव नाभिर्यया। "स्यादावर्त्तोऽम्भसां भ्रमः"

इत्यमरः। निष्क्रान्ता विन्ध्यात् निर्विन्ध्या नाम नदी। "निरादयः क्रान्ताद्यर्थे पञ्चम्या" इति समासः। "द्विगु-प्राप्तापन्नालम्"इत्यादिना परवल्लिङ्गताप्रतिषेधः। तस्याः नद्याः सन्निपत्य सङ्गत्य रसो जलम् अभ्यन्तरे यस्य सः।अन्यत्र रसेन शृङ्गारेण अभ्यन्तरः अन्तरङ्गो भव सर्व्वथा तस्याः रसम् अनुभव इत्यर्थः। "शृङ्गारादौ जले वीर्य्ये सुवर्णे विषशुक्रयोः। तिक्तादावमृते चैव निर्यासे पारदे ध्वनौ। आस्वादे च रसं प्राहुः" इति शब्दार्णवे। ननु तत्-प्रार्थनामन्तरेण कथं तत्रानुभवो युज्यते इत्यत आह स्त्रीणा-मिति। स्त्रीणां प्रियेषु विषये विभ्रमो विलास एव आद्यं प्रणयवचनं प्रार्थनावाक्यं हि। स्त्रीणामेष स्वभावो यत् विलासैरेव रागप्रकाशनं। नतु कण्ठत इति भावः। विभ्र-मस्यात्र नाभिसन्दर्शनादिः उक्तः एव। २८।

হে মেঘ, উজ্জয়িনীনগরীতে গমন কালে পথি মধ্যে নির্বিন্ধ্যা নাম্নী তরঙ্গিণীর সহিত সঙ্গত হইয়া উপভোগপূর্ব্বক শৃঙ্গার-রসে পরিপূর্ণ হইও। তরঙ্গক্ষোভে শব্দায়মান পক্ষিশ্রেণীরূপ কাঞ্চী-দামে বিভূষিতা, স্খলিতগামিনী ঐ তরঙ্গিণী তোমায় আবর্ত্তরূপ নাভি প্রদর্শন করাইবে। (বিনা প্রার্থনায় কি প্রকারে উপগত হইব, মনে মনে তোমার এবম্বিধ কোনও আশঙ্কা করিবার প্রয়োজন নাই)। কেননা, কামিনীরা প্রথমে নিজ মুখে কিছু প্রার্থনা প্রকাশ করে না, প্রণয়িব্যক্তির সমীপে বিলাস প্রদর্শনই তাহাদিগের প্রথম প্রণয়প্রকাশক বাক্যস্বরূপ হইয়া থাকে। ২৮।

Having met, in thy way, the river *Nirvindhya*, adorned

with her girdle string of the rows of birds noisy by reason of the tumult of the waves, gliding onward charmingly on account of her constant stumbling against rocks, enjoy her as she will show thee her navel-like eddies, for amorous gestures are women's first expressions of desire to their lovers.—28.

Notes.

1. निर्व्विन्ध्यायाः—"निर्गता विन्ध्यात् इति निर्विन्ध्या" "निरादयः क्रान्ताद्यर्थे पञ्चम्या" इति पञ्चमीसमासः। Hence lit. it means—"a stream rising from the Vindya ranges." It is probably the name of one of the lesser streams between the Parbatty and the Sipra. "The present stanza describing the female personification of the current is englished, rather with respect to the sense, than the words, the plainness of which might perhaps offend European fastidiousness. There is not, however, any one of Kalidasa's river-ladies who behaves so indecorously as several of Drayton's similar personifications and there is not one of them possessed of speech at all, to say nothing of such speech as is made use of by the Hayle, and other like "lusty nymphs" of that author's Polyolbion." Prof. Wilson.

2. "यथा कश्चित् कामी निर्व्विन्ध्यायाः सफलप्रार्थनायाः नायिकायाः रसाभ्यन्तरः सन्निपत्य शृङ्गाररहस्यमुपभुज्य मार्गं गच्छति। अन्यापि या किल कामिनी कस्मिन्नपि कामुके बद्धाभिलाषा भवति सा तद्दर्शनात् क्षोभजनित-काञ्चीगुणा स्यात् स्खलितचालनं च संसर्पति आवर्त्तोपलक्षितां नाभिं दर्शयति। उत्तमस्त्रीणां हि नाभिदर्शनं दक्षिणावर्त्तः प्रशस्यते। कामुकोऽपि तस्याः बद्धाभिलषितस्त्रीरसानुरागायाः रसोऽनुरागस्याभ्यन्तरः रहस्यं सन्निपतति

वेणीभूतप्रतनुसलिलासावतीतस्य सिन्धुः
पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः ।
सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥२९॥

संश्रयति सम्भोगसम्बन्धम् उपभुङ्क्ते इत्यर्थः ॥" इति सारोद्धारिण्याम् । "स्निग्धं दृष्टिपथं विभूषिततनुः कर्णस्य कण्डूयनं । नाभेर्दर्शनम् उत्पथस्य गमनम् बालस्य चालिङ्गनं । केशानाञ्च मुहुर्मुहुर्विवरणं वार्त्ता च सख्या सह । कुर्य्युः प्रीतिवशात् स्त्रियः समदना दृष्ट्वा नरं वाञ्छितम् ॥ दृष्ट्वा करोति हसितं मुखमन्नमय्य, प्रसंशकं क्षिपति केशविबन्धलुप्तान् । नारी स्तनौ च जघनञ्च नितम्बबिम्बं सन्दर्शयत्यभिमुखी चलचित्तवृत्ति ॥ स्त्री कान्तं वीक्ष्य नाभिं प्रकटयति मुहुर्विक्षिपन्ती कटाक्षान् । दोर्मूलं दर्शयन्ती रचयति कुसुमापीडमुत्क्षिप्तपाणिं, रोमाञ्चस्वेदजृम्भा श्रयति कुचतटस्रंशि वस्त्रं विधत्ते । सोत्कण्ठं व्यक्ति नीवीं शिथिलयति दशत्योष्ठमङ्गं भनक्ति ॥" इति महिमसिंहगणिः ।

Prose order—हे सुभग, वेणीभूतप्रतनुसलिला तटरुहतरुभ्रंशिभिः जीर्णपर्णैः पाण्डुच्छाया विरहावस्थया अतीतस्य ते सौभाग्यं व्यञ्जयन्ती असौ सिन्धुः येन विधिना कार्श्यं त्यजति स (विधिः) त्वयैवोपपाद्यः । २९ ।

Paraphrase—या नदी प्रतनुना प्रवाहेण एकवेणीधरा, या हि तटतरुगलितजीर्णपत्रैः पाण्डुद्युतिः, हे सुभग ! विरहावस्थया या च प्रोषितस्य ते सौभाग्यं व्यनक्ति सा येन कार्श्यं त्यजति तं सरससङ्गमं विधेहि ।

Change of voice—वेणीभूतप्रतनुसलिलया * * पाण्डुच्छायया * व्यञ्जयन्त्या अमूया सिन्धुना * * त्यज्यते ** तं विधिं त्वं उपपादयिष्यसि । २९ ।

Sanjivani निर्विन्ध्याया विरहावस्थां वर्णयन् तन्निराकरणं प्रार्थयते वेणीति । अवेणी वेणीभूतं वेणा-

कारं प्रतनु स्तोकञ्च सलिलं यस्याः सा तथोक्ता । अन्यत्र वेणी-भूतकेशपाशा इति च ध्वन्यते । रोहन्ति इति रुहाः । इगुपधज्ञाप्रीकिरः कः इति कप्रत्ययः । तटयोः रुहाः ये तरवः तेभ्यः भ्रश्यन्ति इति तथोक्तैः । जीर्णपर्णैः शुष्कपत्रैः पाण्डुच्छाया पाण्डुवर्णा । अत एव हे सुभग ! विरहावस्थया पूर्व्वोक्त-प्रकारया करणेन अतीतस्य एतावन्तं कालम् अतीत्य गतस्य । प्रोषितस्य इत्यर्थः । ते तव सौभाग्यं सुभगत्वम् । "हृद्भगसिन्ध्वन्ते पूर्व्वपदस्य च" इत्युभयपदवृद्धिः । व्यञ्जयन्ती प्रकाशयन्ती । स खलु सुभगो यम् अङ्गनाः कामयन्ते इति भावः । असौ पूर्व्वोक्ता सिन्धुः नदी निर्व्विन्ध्या । "स्त्री नद्यां ना नदे सिन्धुर्देशभेदेऽम्बुधौ गजे" इति वैज-यन्ती । येन विधिना व्यापारेण कार्श्यं त्यजति सः विधिः त्वया एव उपपाद्यः । कर्त्तव्यः इत्यर्थः । स च विधिः एकत्र वृष्टिः अन्यत्र सम्भोगः तदभावनिबन्धनत्वात् कार्श्यस्य इति भावः । इयं पञ्चमी मदनावस्था । तदुक्तं रतिरहस्ये—"नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः। निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः । उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्युः॥"इति । "ताम-तीतस्य" इति पाठमाश्रित्य सिन्धुर्नाम नद्यन्तरमिति व्याख्यातं । किन्तु सिन्धुर्नाम कश्चित् नदः काश्मीरदेशे अस्ति । नदी तु कुत्रापि नास्तीत्युपेक्ष्यमित्याचष्टे । २९ ।

হে সুভগ! যে নদীর নিদাঘকালীন বারিপ্রবাহ বিরহাবস্থাত

এক বেণী স্বরূপ হইয়াছে, যে নদী তটজাতপাদপসমূহ পরিভ্রষ্ট জীর্ণ পত্র দ্বারা পাণ্ডুতা ধারণ করিয়াছে, অপিচ তোমার প্রবাসে অবস্থিতি কালে যে নদী বিরহিণীর অবস্থাদ্বারা তোমারই সৌভাগ্য প্রকাশ করিয়াছে, এতাদৃষী ভবদনুরাগিণী নিক্ষন্ধ্যা তরঙ্গিণীর ক্ষীণতা যাহাতে বিদূরিত হয়, তদ্বিষয়ে যত্নবান হওয়া তোমার সর্ব্বথা কর্ত্তব্য। ২৯।

O thou amiable one, it is thyself that shouldst have recourse to such measures as would enable the river to caste off her ematiated body,—the river, scarce in water like a braid of hair, and pallid in complexion by reason of the faded leaves fallen from the trees growning on her banks and as such manifesting, by her condition of a deserted wife, good fortune of thee who hast been away from her for a long time—29.

Notes.

1. "The river having been dimished by the preceeding hot weather, the poet compares it to a long single braid of hair and conformably to the personification of it as a female, he supposes the braid to have been bound in consequence of the absence of the cloud, after the fashion in which the hair is worn by those women whose husbands are absent:" Prof. Wilson.

वेणीभूतप्रतनुसलिला—अवेणी वेणीभूतम् इति वेणीभूत' ("कृभ्वस्तियोगे सम्पद्यकर्त्तरि च्विः" इत्यव "अभूततद्भाव इति वक्तव्यम्" इति नियमात् च्विः। "कुगतिप्रादयः" इत्यव "ऊर्व्यादिच्विडाचश्च" इति नित्यसमासः)। वेण्याकारं अतएव प्रतनु स्तोकञ्च (विशेषणसमासः) इति वेणीभूतप्रतनु तत् सलिलं यस्याः सा (ब. व्री.)। यस्याः सलिलं विरहिण्या वेणीसदृशं स्वल्पम् इत्यर्थः। The implied meaning is - वेणीभूतकेशपाशा। "वेणीबन्धो हि विरहिणीधर्म्मः"।

3. तटरूढतरुभ्रंशिभिः—रोहन्ति इति रूढाः (रुह + "इगुपधज्ञाप्रीकिरः कः—*i. e*, roots having their penultimate vowels either of इ, उ, ऋ or ऌ and the roots ज्ञा, प्री and कॄ take क in the active voice.) तटयोः उभयोः तीरयोः रूढाः (जाता तत्) तटरूढाः तीरवर्त्तिनः । तटरूढाः तरवः (कर्मधारयसमासः) तेभ्यः भ्रश्यन्ति इति तटरूढतरुभ्रंशीनि (तटरूढ तरु+भ्रंश्+णिनिः) तैः ; falling from the trees grown on her both banks.

4. जीर्णपर्णैः—जीर्णानि (जॄ + क्तः) गलितानि पर्णानि (पिपर्त्ति पूरयति, पॄपालनपूरणयोः + तॄपॄवृषिभ्यो नः इति पर्णं)। पर्णानि तैः । करणे ३या । By withered leaves.

5. पाण्डुच्छाया—पाण्डुः पाण्डुरी वा छाया शोभा यस्याः सा (ब. व्री.) ; पाण्डुवर्णा ; pallid.

6. सुभग—सुगतः भगः भाग्यं यस्य सः सुभगः । ('प्रादिभ्यो धातुजस्य' इति बहुव्रीहिसमासे धातुजस्य लोपः) । सौभाग्यवान् । तत्सम्बुद्धौ । O thou amiable one.

7. विरहावस्थया—विरहस्य अवस्था एकवेणीधारणपाण्डुवर्णप्राप्तिप्रभृतिविरहावस्था तया । करणे ३या ; by her condition of one deserted by her lover.

8. अतीतस्य ते सौभाग्यं व्यञ्जयन्ती—"अतीतस्य एतावन्तं कालं अतीत्य गतस्य प्रोषितस्य इत्यर्थः ते तव सौभाग्यं (सुभग + "हृद्भगसिन्ध्वन्ते पूर्वपदस्य च" इति ष्यञ् उभयपदवृद्धिः ।) सुभगत्वं व्यञ्जयन्ती प्रकाशयन्ती । से खलु सुभगो यम् अङ्गनाः कामयन्ते इति भावः ।" इति मल्लिनाथः । Here we have to make a forced construction. The generally adopted reading is वेणीभूतप्रतनुसलिला तामतीतस्य सिन्धुः" and वल्लभदेव explains it thus:—"ताम् अतीतस्य तां निर्विन्ध्यामतिक्रान्तस्य ते तव सिन्धुः सिन्धुनाम्नी नदी विद्यते" । Mallinatha, too,

notices the reading, but rejects it on the consideration that there is no नदी of the name of सिन्धु: there. But Professor Nundargikar points out from the History of *Rajasthana* by Colonel Todd that there is a river named the little *Sindhu* which springing from Devas and passing along with many other minor streams by Oujein falls into the chambal, or it may be the *Kali Sindhu* which springs from Bangi and falls into the chambal. This discovery leads us at last to come to the real meaning of the sloka.

9. येन विधिना—येन व्यापारेण करणे ३या ; by which measure.

10. त्वयैव—एवशब्दोऽत्र अन्ययोगव्यवच्छेदार्थकः। अन्येन न करणीयः त्वया स्वयं करणीयः इत्यर्थः। "कृत्यानां कर्त्तरि वा" इति पाक्षिकी तृतीया।

11. सः—*i. e.*, विधिः। It refers to (1) कृशिकरणं (2) सम्भोगकरणं।

12. The psychology of love has thus been analysed by the ancient rhetoricians. They say that love springs from eye-sight. It is नयनप्रीतिः (pleasure to the eye). Then the heart draws towards the object of love (चित्तासङ्गः). Then ardent desire for union (सङ्कल्पः). Then sleeplessness (निद्राच्छेद). Then emaciation of the body (तनुता). Then total abstraction from all objects of enjoyments (विषयनिवृत्ति.) Then disappearance of natural bashfulness or modesty (त्रपानाशः). Then insanity (उन्मादः). Then fainting fits (मूर्च्छा) and lastly death (मृति). These are the ten different stages through which each lover has to pass in case of an unsuccess-

प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्
पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम्।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत् खण्डमेकम् ॥३०॥

ful adventure. Here the Sindhu is passing her fifth stage (i. e., the stage of the emaciation of her body.) Of course, nothing can be happier to a lover than the news of his lady love's suffering from the pangs of separation from him.

13. Conjugations:—

इण्—एति, इयाय, एष्यति, अगात्।

भ्रंश्—भ्रशते भ्रश्यति; बभ्रंशे, बभ्रंश; भ्रंशिष्यति, ते; अभ्रंशत, अभ्रंशिष्ट; अभ्रशत्।

गॄ—गीर्यति, गृणाति; जगार; गरिष्यति, गरीष्यति; अगारीत्, अगरत्।

अञ्ज्—अनक्ति; अञ्ज्यात्; आनञ्ज; अञ्जिष्यति; आञ्जीत्। णिच्—अञ्जयति, आञ्जिजत्।

त्यज्—त्यजति, तत्याज; त्यक्ष्यति; अत्याक्षीत्।

Prose order—उदयनकथाकोविदग्रामवृद्धान् अवन्तीन् प्राप्य पूर्वोद्दिष्टां सुचरितफले स्वल्पीभूते गां गतानां स्वर्गिणां शेषैः पुण्यैः हृतं कान्तिमत् दिवः एकं खण्डमिव स्थितां श्रीविशालां विशालां पुरीम् अनुसर ॥ ३० ॥

Paraphrase—यत्र ग्रामेषु वृद्धाः कथं वत्सराजः वासवदत्तां जहारेति वर्णयन्तः परितः स्थितं सोत्सुकं श्रोतृवर्गं परिवृद्धकौतुकं कुर्वन्ति तान् अवन्तीन् आसाद्य पूर्वोल्लिखितां सम्पत्तिमतीम् उज्जयिनीपर्यायां विशालाख्यां नगरीं याहि। या हि स्वर्गोपभोगजनके पुण्यफले अल्पावशिष्टे सति पुनरपि भूलोक-

गतानां स्वर्गवतां जनानां भुक्तशेषैः सुकृतैः आनीतं सारभूतं स्वर्गस्य एकं खण्डमिव स्थिता । ३० ।

Change of voice—पूर्वोद्दिष्टा ० स्थिता श्रीविशाला विशाला पुरी अनुसर्यताम् । ३० ।

Sanjivani- प्राप्येति । विदन्ति इति विदाः । इगुपधलक्षणः कः । ओकसो वेद्यस्थानस्य विदाः कोविदाः । ओकारलोपः पृषोदरादित्वात् साधुः । उदयनस्य वत्सराजस्य कथानां वासवदत्ताहरणाद्यद्भुतोपाख्यानानां कोविदाः तत्त्वज्ञाः ग्रामेषु ये वृद्धाः ते सन्ति येषु तान् अवन्तीन् तन्नामजनपदान् प्राप्य तत्र पूर्वोद्दिष्टां पूर्वोक्तां "सौधोत्सङ्गप्रणयविमुखो मास्म भूरुज्जयिन्याः" इत्युक्तां श्रीविशालां सम्पत्तिमहतीम् । "शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिव दृश्यते" इति शाश्वतः । विशालां पुरीम् उज्जयिनीम् अनुसर व्रज । कथमिव स्थितां । सुचरितफले पुण्यफले स्वर्गोपभोगलक्षणे स्वल्पीभूते । अत्यल्पावशिष्टे सति इत्यर्थः । गां भूमिं गतानाम् । "गौरिला कुम्भिनी क्षमा" इत्यमरः । पुनरपि भूलोकगतानाम् इत्यर्थः । स्वर्गिणां स्वर्गवतां जनानां शेषैः भुक्तशेषैः पुण्यैः सुकृतैः हृतम् आनीतम् । स्वर्गार्थानुष्ठितकर्मशेषाणां स्वर्गदानावश्यम्भावात् इति भावः । कान्तिरस्यास्तीति कान्तिमत् उज्ज्वलं । सारभूतम् इत्यर्थः । एकं मुख्यात् अन्यत् । "एके मुख्यान्यकेवलाः" इत्यमरः । दिवः

स्वर्गस्य खण्डमिव स्थिताम् इत्युत्प्रेक्षा । एतेन अतिक्रान्तसकलभूलोकनगरसौभाग्यसारत्वम् उज्जयिन्या व्यज्यते । ३० ।

যে স্থলের গ্রামবৃদ্ধ পুরুষেরা উদয়ন নরপতির বাসব দত্তা হরণাদি অত্যাশ্চর্য্য উপাখ্যান বর্ণনে অভিজ্ঞ, তুমি সেই অবন্তিদেশে উপস্থিত হইয়া পূর্ব্বোক্ত সৌভাগ্যসম্পত্তিসমন্বিতা উজ্জয়িনী-নগরীতে গমন করিবে; সর্ব্ববিধসমৃদ্ধিশালিনী সেই নগরী দর্শন করিলে বোধ হইবে যেন সুরলোকবাসী পুণ্যশীলগণের পুণ্যফল ক্ষীণপ্রায় হইলে যখন তাঁহারা পুনরায় অবনীধামে অবতীর্ণ হন, তৎকালে সেই সকল মহাত্মারাই অবশিষ্ট পুণ্যফলে সুরলোকের এক খণ্ড সমুজ্জ্বল সারাংশ ঐ স্থানে আনয়ন করিয়াছেন । ৩০ ।

Having reached the Abanti country, where old villagers are familiar with the legends of Udayana, proceed to the aforesaid magnificent city of Visala (Ujjaini), a brilliant fragment of Paradise, as it were, carried down by the remaining merits of those who had resided in Paradise and come down to earth again at the diminution of the fruits of their virtuous deeds—30.

Notes.

1. "Pradyota was a sovereign of Oujein, who had a daughter named *Vasavadatta* and whom he intended to bestow in marriage upon a king of the name of Sanjaya. In the mean time the princess sees the figure of Vatsaraja (i. e., उदयन) sovereign of *Kusadwipa* in a dream, and becomes enamoured of him; she contrives to inform him of her love and he carries her off from her father and his

rival." This story is given in full in कथासरित्सागर which is only an abridged versified Sanskrit rendering of the बृहत्कथा of गुणाढ्य.

2. उदयनकथाकोविदग्रामवृद्धान्—उदयनस्य । सहस्रानीकपुत्रस्य कुश-द्वीपाधिपस्य वत्सराजस्य कथाः वासवदत्ताहरणाद्यद्भुतोपाख्यानानि । (६ तत्)। विदन्ति जानन्ति इति विदाः (विद् + "इगुपधज्ञाप्रीकिरः कः" इति कः)। ओकसः (वेदस्थानस्य विदाः इति कोविदाः तत्त्वज्ञाः। (६ तत् "पृषोदरादीनि यथोपदिष्टम्" इति पृषोदरादित्वात् ओकारलोपः। The words जीमूत, बलाहक, कोविद &c. are instances of what is called in Philology phonetic decay. उदयनकथानां कोविदाः इति उदयनकथाकोविदाः (६ तत्। ग्रामेषु वृद्धाः इति ग्रामवृद्धाः ७मी तत्।) उदयनकथाकोविदाः ग्रामवृद्धाः येषु तान् (ब. व्रौ). Where there are old villagers who are familiar with the legends of *Udayana*. This adjective points out to us the historical importance of the place.

3. अवन्तीन्—अवन्तीनां निवासः जनपदः अवन्तयः तान्। "जनपदे लुप्"—(जनपदे वाच्ये चातुरर्थिकस्य प्रत्ययस्य लुप् स्यात्) इति अणः लुप्। "लुपि युक्तवद्व्यक्तिवचने"—(लुपि सति प्रकृतिवल्लिङ्गवचने स्तः) इति प्रकृतिवत्पुंस्त्वम्। "तदशिष्यं संज्ञाप्रमाणत्वात्"—(युक्तवत्वचनं न कर्तव्यं संज्ञानां प्रमाणत्वात्) इति जनपदस्य यथायथं बहुवचनान्तसंज्ञात्वात् नित्यबहुवचनत्वम्।

4. पूर्वोद्दिष्टां—पूर्वं प्राक् (सप्तविंशतितमे श्लोके "सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः." इत्यत्र) उद्दिष्टां कथितां : said before.

5. श्रीविशालां—श्रिया सम्पत्त्या सौभाग्येन च विशाला तां (३या तत्); magnificent on account of her wealth and grandeur.

6. विशालां—विशिष्टाः शालाः प्रकारभवनानि यस्यां सा विशाला

is one of the many names of Ujaini. Cf. "उज्जयिनी स्यात् विशालाऽवन्ती पुष्पकरण्डिनी" इति हेमचन्द्रः । That it is called here a fragment of Paradise carried down, is in strict keeping with the fame which it enjoys of being one of the seven most sacred places on the earth. "अयोध्या मथुरा माया काशी काञ्ची अवन्तिका । पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः ॥" तथा कथासरित्सागरे—"अस्तीहोज्जयिनी नाम नगरी भूषणं भुवः । हसन्तीव सुधाधौतैः प्रासादैरमरावतीम् । यस्यां वसति विश्वेशो महाकालवपुः स्वयम् । शिथिलीकृतकैलासनिवासव्यसनो हरः ॥" XI. 31—32.

7. अनुसर—अनुसर does not bear out the idea so well as उपसर (as adopted by पार्श्वाभ्युदय) ।

8. सुचरितफल--सुचरितस्य पुण्यस्य फले स्वर्गोपभोगलक्षणे इत्यर्थः ; the results of good acts. This refers to the doctrine of Karma (कर्म) of the Hindu philosophy. A man can go up to paradise after death by good actions done in his life. The degree and duration of the pleasures of this paradise are proportioned to the merits of those admitted to it. and they who have enjoyed this lofty region of स्वर्ग but whose virtue is exhausted, revisit the habitation of mortals.

9. स्वल्पीभूते - अत्यल्पावशिष्टे ; when diminished.

10. गां गतानां—पुनरपि भूलोकगतानां; come down again to the earth.

11. शेषैः पुण्यैः—by the remaining merits.

12. हृतं—आनीतं ; carried down.

13. एकं खण्डं—भुक्तात् अन्यत् खण्डं ; a portion other than what has been already enjoyed.

14. Indeed whenever the poet has an occasion to

दीर्घीकुर्व्वन् पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥३१।

describe the city of Oujein his heart seems to be leaping up with unbounded delight and he begins speaking of it in hyperbolic terms. Cf. Raghu VI. 34—35.

15. Conjugations :—

आप्—आप्नोति, आप, आप्स्यति आपत, आप्तः ।

दिश्—दिशति, दिदेश, देक्ष्यति, अदिक्षत् ; दिष्टः ।

सृ—सरति, ससार, सरिष्यति, असार्षीत्, असरत् ।

हृ—हरति, हरते, जहार, जह्रे, हरिष्यति, ते, अहार्षीत्, अहारि ।

Proseorder—यत्र प्रत्यूषेषु पटु मदकलं सारसानां कूजितं दीर्घीकुर्व्वन् स्फुटितकमलामोदमैत्रीकषायः अङ्गानुकूलः शिप्रावातः प्रार्थनाचाटुकारः प्रियतम इव स्त्रीणां सुरतग्लानिं हरति । ३१ ।

Paraphrase—यत्र अहर्मुखेषु हंसानां प्रस्फुटम् अव्यक्तमधुरं रुतं समन्ततः प्रसारयन् विकचपङ्कजसंसर्गसुरभिः सुखस्पर्शः शिप्रावायुः पुनःसुरतमहोत्सवाय प्रियवचनप्रयोक्ता वल्लभ इव युवतीनां सुरतखेदम् अपनयति । ३१ ।

Change of voice—• • • • दीर्घीकुर्व्वता • कषायेण • कूलेन शिप्रावातेन प्रार्थनाचाटुकारिणा प्रियतमेनेव • सुरतग्लानिः ह्रियते । ३१ ।

Sanjivani—दीर्घीकुर्व्वन्निति । यत्र विशालायां प्रत्यूषेषु अहर्मुखेषु । "प्रत्यूषोऽहर्मुखं कल्यम्" इत्यमरः । पटु प्रस्फुटं । मदकलं मदेन अव्यक्तमधुरम् । "ध्वनौ तु

मधुरास्फुटे कलः" इत्यमरः। सारसानां पक्षिविशेषाणाम्। "सारसो मैथुनी कामी गोनर्द्दः पुष्कराह्वयः" इति यादवः। यद्वा सारसानां हंसानाम्। "चक्राङ्गः सारसो हंसः" इति शब्दार्णवे। कूजितं रुतं दीर्घीकुर्व्वन्। सन्तानयन् इत्यर्थः। यावद्वातं शब्दानुवृत्तेः इति भावः। एतेन प्रियतमः स्वचाटुवाक्यानुसारि क्रीडापक्षिकूजितम् अविच्छिन्नीकुर्व्वन् इति च गम्यते। स्फुटितानां विकसितानां कमलानाम् आमोदेन परिमलेन सह या मैत्री संसर्गः तया कषायः सुरभिः। "रागद्रव्ये कषायोऽस्त्री निर्यासे सौरभे रसे" इति यादवः। अन्यत्र विमर्द्दगन्धी इत्यर्थः। "विमर्द्दोत्थे परिमलो गन्धे जनमनोहरे। आमोदः सोऽतिनिर्हारी" इत्यमरः। अङ्गानुकूलो मान्द्यात् गात्रसुखस्पर्शः। अन्यत्र गाढालिङ्गनदत्तगात्रसंवाहनः इत्यर्थः। भवभूतिना च उक्तम् "अशिथिलपरिरम्भैर्दत्तसंवाहनानि" इति। संवाह्यन्ते च सुरतश्रान्ताः प्रियैर्युवतयः। एतत् कविरेव वक्ष्यति "सम्भोगान्ते मम समुचिता हस्तसंवाहनानाम्" इति। (II.33.) शिप्रा नाम काचित् तत्रत्या नदी तस्याः वातः शिप्रावातः। शिप्राग्रहणं शैत्यद्योतनार्थं। प्रार्थना सुरतस्य याच्ञा तत्र चाटूनि करोतीति तथोक्तः। पुनः सुरतार्थं प्रियवचनप्रयोक्ता इत्यर्थः। कर्म्मण्यण्प्रत्ययः। प्रियतमः वल्लभः इव स्त्रीणां सुरतग्लानिं सम्भोगखेदं हरति नुदति। चाटूक्तिभिर्विस्मृतपूर्व्वरतिखेदाः स्त्रियः प्रियतम-

प्रार्थनां सफलयन्ति इति भावः। "प्रार्थनाचाटुकारः" इत्यत्र "खण्डितनायिकानुनीता" इति व्याख्याने सुरतग्लानिहरणं न सम्भवति। तस्याः पूर्वं सुरताभावात्, पश्चात्तनसुरतग्लानिहरणं तु नेदानीन्तनकोपोपशमनार्थचाटुवचनसाध्यमित्युपेक्षैवोचिता विवेकिनाम्। "ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता" इति दशरूपके। ३१।

এই নগরীতে প্রতিদিন প্রত্যূষে যে মন্দ মন্দ বায়ু প্রবাহিত হইয়া থাকে, উক্ত বিকসিত কমলপরিমল সংসর্গে বিলক্ষণ সুগন্ধি, গাত্র সুখস্পর্শ এবং শিপ্রা নদীর বারি সংস্পর্শে সুশীতল। ঐ বায়ু সারসগণের পরিস্ফুট মদকল কূজিত বিস্তারিত করিয়া পুনরায় সুরত-প্রার্থনায় মধুর সম্ভাষী ও শরীর সংবাহনে প্রবৃত্ত প্রেমাস্পদ নায়কের ন্যায় কামিনীকুলের সুরতগ্লানি অপনয়ন করিয়া থাকে। ৩১

Where, every morn, a gale proceeding [1] from the Sipra impregnated with sweet odour by contact with the fragrance of the opening lotuses and exhilarating to the body, wafts along with it in swelling harmony the sweet and clear songs of the impassioned *Surasas* and dissipates the langour of women (brought on) by sectual enjoyment like a lover flattering with sweet loving words when soliciting an enjoyment—31.

Notes.

1. The *Sipra* is the river upon the banks of which *Oujein* stands and which is called *Siparah* in the maps.

2. प्रत्यूषेषु—उषायामुषायामिति प्रत्यूषं तेषु। वीप्सायामव्ययीभावः। यद्यपि "अव्ययीभावादतोऽम् त्वपञ्चम्याः" इति सप्तम्यां अमागमः, तथापि "तृतीयासप्तम्योर्बहुलम्" इति सूत्रेण बहुलग्रहणात् सप्तम्याः बहुवचनं प्रत्यूषेषु,

जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै-
र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः।
हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथा
लक्ष्मीं पश्यन् ललितवनितापादरागाङ्कितेषु॥३२॥

अनुपम इति पदद्वयं स्यात्। बहुवचनग्रहणात् सर्व्वासु एव उषासु इति गम्यते।

3. आमोदः—आमोद्यते अनेन इति आमोदः परिमलः (आ + मुद् + करणे घञ्); fragrance.

4. The breeze should be described as मृदु, शीत and सुगन्धि. Here, अङ्गानुकूल describes its मृदुत्व शिप्रावात speaks of its शैत्य and स्फुटितकमलामोदमैत्रीकषायः describes its सौगन्ध्य।

5. The sloka being not in good taste we do not give its notes in full.

6. Between the 31st and the 32nd slokas, there are three other slokas interpoliated; they are given below:—

हारांस्तारांस्तरलगुटिकान् कोटिशः शङ्खशुक्तीः शष्पश्यामान् मरकतमणीनुन्मयूखप्ररोहान्। दृष्ट्वा यस्यां विपणिरचितान् विद्रुमाणां च भङ्गान् संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः॥ प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः। अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भमुत्पाट्य दर्पादित्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञः॥ पत्रश्यामा दिनकरहयस्पर्द्धिनो यत्र वाहाः शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तः प्रभेदात्। योधाग्रण्यः प्रतिदशमुखं संयुगे तस्थिवांसः प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः॥

Prose order—जालोद्गीर्णैः केशसंस्कारधूपैः उपचितवपुः बन्धुप्रीत्या

भवनशिखिभिः दत्तनृत्योपहारः कुसुमसुरभिषु ललितवनितापादरागाङ्कितेषु हर्म्येषु अस्याः लक्ष्मीं पश्यन् अध्वखेदं नयेथाः । ३२ ।

Paraphrase—यत्र गवाक्षमार्गनिर्गतैः कामिनीकेशवासनार्थैः गन्धद्रव्यधूपैः पुन परिपुष्टकलेवरः इन्तात्मा न स बन्धुश्चिरात् समागत इति प्रीतिप्रफुल्लैः गृहमयूरैः दत्तेन नृत्योपहारेण सादरं सम्भावितश्च सन् कुसुमैः सुगन्धिषु सुन्दरीणां स्त्रीणां चरणलाक्षारसचिह्नितेषु अस्या नगर्याः हर्म्येषु वसन् शोभाञ्च पश्यन् अध्वगमनक्लान्तिं अपनय ३२ ।

Change of voice—उपचितवपुषा दत्तनृत्योपहारेण लक्ष्मीं पश्यता अध्वखेदो नीयेत । ३२ ।

Sanjivani—जालोद्गीर्णैरिति । जालोद्गीर्णैः गवाक्षमार्गनिर्गतैः । "जालं गवाक्ष आनाये जालके कपटे गणे" इति यादवः । केशसंस्कारधूपैः वनिताकेशवासनार्थैः गन्धद्रव्यधूपैः इत्यर्थः । अत्र संस्कारधूपयोः तादर्थ्येऽपि यूपदार्वादिवत् प्रकृतिविकारत्वाभावात् अश्वघासादिवत् षष्ठीसमासो न चतुर्थीसमासः । उपचितवपुः परिपुष्टशरीरः बन्धौ बन्धुरिति वा प्रीत्या भवनशिखिभिः गृहमयूरैः दत्तः नृत्यम् एव उपहारः उपायनं यस्मै स तथोक्तः । "उपायनमुपग्राह्यमुपहारस्तथोपदा" इत्यमरः । कुसुमैः सुरभिषु सुगन्धिषु ललितवनिताः सुन्दरस्त्रियः । "ललितं त्रिषु सुन्दरम्" इति शब्दार्णवे । तासां पादरागेण लाक्षारसेन अङ्कितेषु चिह्नितेषु हर्म्येषु धनिकभवनेषु अस्याः उज्जयिन्याः लक्ष्मीं पश्यन् अध्वना अध्वगमनेन खेदं क्लेशं नयेथा अपनय । ३२ ।

হে জলধর ! তুমি পরম রূপবতী যুবতীকুলের পদতলস্থ অলক্ত-

রাগে রঞ্জিত, কুসুম গন্ধে আমোদিত প্রাসাদ সমূহে উপবেশন পূর্ব্বক বিশালা নগরীর সৌভাগ্য লক্ষ্মী সন্দর্শন করিতে করিতে পথশ্রম অপনয়ন করিবে। তৎকালে গবাক্ষ পথ বিনিঃসৃত কেশ সৌগন্ধাকারী ধূপে ত্বদীয় কলেবর পরিপুষ্ট হইবে। গৃহরক্ষিত শিখিকুল ও বন্ধু প্রণয়ের বশীভূত হইয়া তোমাকে নৃত্যরূপ উপহার প্রদান করিবে সন্দেহ নাই। ৩২।

With thy body fattened by the incense burning for perfuming the hair and escaping through the lattices, and with the presents (in the form) of dances given to thee by the peacocks of the palaces through fraternal affection, thou shouldst dispel the fatigue of thy journey, seeing the splendour of the city in the palaces fragranted with flowers and marked with the foot-prints of the lovely ladies—32.

Notes.

1. जालोद्गीर्णैः—जालैः गवाक्षजालैः, यद्वा गवाक्षैः उद्गीर्णैः (उत् + गृ + क्तः) निर्गतैः ; escaping by means of the window-nets or the lattices. उद्गीर्ण—lit. means वान्त, वमित, vomitted ; but here used in its secondary sense—निर्गत. Hence there is no fault of composition called अश्लीलता ।

2. केशसंस्कारधूपैः—केशानां संस्कारः (६ तत्)। केशसंस्कारार्थाः धूपाः तैः मध्यपदलोपी कर्म्मधारयः यद्वा केशसंस्कारस्य धूपाः (अश्वघासादिवत् ६ तत्) ; by the incense burning for giving fragrance to the hair. अनुक्ते करणे तृया । As to the custom. Cf. Kumara VII. 18 "धूपोष्मणा त्याजितमार्द्रभावं केशान्तमन्तःकुसुमं तदीयम् ।"

3. बन्धुप्रीत्या—बन्धौ प्रीतिः यद्वा बन्धुः इति प्रीतिः तया ; out of fraternal affection. The sight of the cloud fills the heart of the peacocks with delight as they pair then.

भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य ।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः ॥ ३३ ।

4. दत्तनृत्योपहारः—नृत्यमेव उपहारः (रूपककर्म्मधारयः) । दत्तः नृत्योपहारः यस्य सः (ब. व्री.) He to whom an offering of dances is given as present *i. e.,* greeted by the peacocks with their joyful dances.

5. ललितवनितापादरागाङ्कितेषु—ललिताः वनिताः (कर्म्मधारयः-समासः) । पादेषु रागाः (रज्यन्ते एभिः इति रागाः रञ्ज+करणे घञ्) पादरागाः अलक्तकरसाः । ललितवनितानां पादरागैः (६ तत्) अङ्कितेषु (३या तत्) ; marked with the red dye on the soles of the feet of lovely ladies. Staining the soles of the feet with a red colour from the मेन्दी or अलक्तक is a favourite practice of the Hindu toilet.

6. Conjugations :—

नी—नयति, ते ; निनाय, निन्ये ; अनैषीत्, अनेष्ट। कर्म्मणि नीयते, अनायि ।

गॄ—गृणाति, गिरति, गिलति ; जगार, गरीष्यति ; अगारीत् । कर्म्मणि—गीर्यते ।

चि—चयति, चिनोति, चिनुते, चिनुते ; चिनुयात् ; चिकाय, चिचाय, चिक्ये, चिच्ये ; चेष्यति, ते ; अचैषीत् ; अचेष्ट ।

Prose order—भर्तुः कण्ठच्छविः इति गणैः सादरं वीक्ष्यमाणः

कुवलयरजोगन्धिभिः तोयक्रीडानिरतयुवतिस्नानतिक्तैः गन्धवत्याः मरुद्भिः धूतोद्यानं पुण्यं त्रिभुवनगुरोः चण्डीश्वरस्य धाम यायाः । ३३ ।

Paraphrase—तत्र प्रभोः नीलकण्ठस्य कण्ठद्युतिरिति प्रमथगणैः सगौरवं सस्पृहं निरीक्ष्यमाणः कमलामोदवद्भिः जलकेलिनिरतानां स्त्रीणां अङ्गस्खलितैः चन्दनादिभिरङ्गरागैः सुगन्धिभिः गन्धवत्या नद्या स्तरङ्गवातैः कम्पितारामं पवित्रं त्रिभुवनस्य गुरोः चण्डीश्वरस्य मन्दिरं गच्छेः । ३३ ।

Change of voice—वीक्ष्यमाणेन यायेत । ३३ ।

Sanjivani - भर्त्तुरिति । भर्त्तुः स्वामिनः नीलकण्ठस्य भगवतः कण्ठस्येव छविर्यस्य असौ कण्ठच्छविः इति हेतोः गणैः प्रमथैः । "गणास्तु गणनाथायां स्यात् गणेशे प्रमथे चये" इति शब्दार्णवे । सादरं यथा तथा वीक्ष्यमाणः सन् । प्रियवस्तुसादृश्यात् अतिप्रियत्वं भवेत् इति भावः । त्रयाणां भुवनानां समाहारः त्रिभुवनम् । "तद्धितार्थ"—इत्यादिना समासः । तस्य गुरोः त्रैलोक्यनाथस्य चण्डीश्वरस्य कात्यायनीवल्लभस्य पुण्यं पावनं धाम महाकालाख्यं स्थानं यायाः गच्छ । विध्यर्थे लिङ् । श्रेयस्करत्वात् सर्व्वथा गन्तव्यम् इति भावः । उक्तञ्च स्कान्दे—"आकाशे तारकं लिङ्गं पाताले हाटकेश्वरम् । मर्त्त्यलोके महाकालं दृष्ट्वा काममवाप्नुयात्" इति । न केवलं मुक्तिस्थानमिदं किन्तु विलासस्थानमपीत्याह—धूतेति । कुवलयरजोगन्धिभिः उत्पलपरागगन्धवद्भिः तोयक्रीडासु निरतानाम् आसक्तानां युवतीनां स्नानं स्नानीयं चन्दनादि । करणे ल्युट् । "स्नानीयेऽभिषवे स्नानम्"

इति यादवः। तेन तिक्तैः सुरभिभिः। "कटुतिक्त-कषायास्तु सौरभ्येऽपि प्रकीर्त्तिताः" इति हलायुधः। सौगन्ध्यातिशयार्थं विशेषणद्वयम्। गन्धवत्याः नाम नद्याः तत्रत्यायाः मरुद्भिः मारुतैः धूतोद्यानं कम्पितोपवनम् इति धाम्नो विशेषणम्। ३३।

হে বারিধর! তৎপরে তুমি ত্রিভুবনগুরু চণ্ডীশ্বর মহাদেবের মহাকাল নামক পবিত্র ধামে প্রয়াণ করিবে। তথায় দেব দেব নীল-কণ্ঠের কণ্ঠ সদৃশ বর্ণ বলিয়া প্রমথেরা পরমাদরে তোমার প্রতি নেত্রপাত করিবে। ঐ স্থানের কাননপংক্তি যুবতীদিগের উষীর চন্দন তৈলাদি স্নানীয়গন্ধদ্রব্য দ্বারা সুরভীকৃত, পদ্ম পুষ্পের পরাগসংস্পর্শে আমোদিত ও গন্ধবতী নদীর সুশীতল বায়ু দ্বারা নিরন্তর কম্পিত হইয়া থাকে। ৩৩।

Being viewed with awe and respect by the Ganas, (the attendants of Siva) as being possessed of a complexion like that on the throat of their master, thou shouldst visit the holy shrine of the husband of Chandi, lord of the three worlds—the shrine, which is rich with its adjoining garden, ever and anon, shaken by a breeze proceeding from the Gandhavati, bearing with it the fragrance of the lotus-pollens and exhaling the fragrant materials used in baths by young ladies engaged in sporting in the water—33.

Notes:

1. भर्त्तुः कण्ठच्छविः—कण्ठस्य छविः इति कण्ठच्छविः (६ तत्)। कण्ठच्छविरिव छविः यस्य सः ('सप्तम्युपमानेत्यादिना—' उत्तरपदलोपी बहुव्रीहिः)। भर्त्तुः—स्वामिनः नीलकण्ठस्य। The dark blue of the cloud is compared to the colour of the neck of Siva which

became of this hue, upon his swallowing the poison produced at the churning of the ocean. Allusion—"As the Gods and the demons continued to churn the ocean more than enough, the deadly poison issued from its bed, burning like a raging fire, whose dreadful fumes in a moment spread throughout the world, confounding the three regions of the universe with its mortal stench; until Siva, at the word of *Brahma*, swallowed the fatal drug to save mankind, which remained in the throat of that sovereign Deva of magic form; from that time he hath been called *Nilkantha*, because his throat was stained blue." Prof. Wilkin.

2. त्रिभुवनगुरोः चण्डीश्वरस्य धाम—त्रयाणां भुवनानां स्वर्गमर्त्त-पातालानां समाहारः इति त्रिभुवनं। "तद्धितार्थोत्तरपदसमाहारे च" इति समासे "संख्यापूर्व्वो द्विगुः" इति द्विगुः। "द्विगुरेकवचनम्" इति समाहार-द्विगौ एकवचनम्। "स नपुंसकम्" इति नपुंसकत्वम्। पात्रादित्वात् "द्विगोः" इति न ङीप्। त्रिभुवनस्य गुरुः शिवशक्तिसम्भवत्वात् त्रिजगतः। (६ तत्) तस्य। चण्ड्याः कात्यायन्याः ईश्वरः नाथः तस्य। अनेन तत्र चण्डीसान्निध्यमपि सूच्यते। The reading चण्डेश्वरस्य means चण्डः यः ईश्वरः तस्य *i. e.*, of the terrible lord. धाम—(धा + मनिन्) स्थानं महाकालाख्यं स्थानं। At *Mahakala* in Oujein there is a celebrated and much resorted temple of Siva.

3. यायाः—(या + लिङ् यास्) गच्छ। विध्यर्थे लिङ्; thou shouldst visit. The merit of visiting the temple of Siva at *Mahakala* has been pointed out by Mallinatha by quoting a text from the *Skand-purana* which says that one attains the realisation of his heart's desire by visiting the emblem of Siva

called तारक in आकाश, हाटकेश्वर in पाताल and महाकाल in मर्त्त्य (*i. e.*, earth).

4. The first two feet (चरणs) speak of the sanctity of the place while the last two feet (चरणs) describe the enjoyments lying in store there.

5. कुवलयरजोगन्धिभिः—कुवलयानां पद्मानां रजांसि परागाः (६ तत) तेषां गन्धः आघ्राणः इति कुवलयरजोगन्धः (६ तत्)। स एषाम् अस्ति इति कुवलयरजोगन्धिनः (कुवलयरजगन्धः + इन्) तैः ; impregnated with the smell of the lotus-pollen.

6. तोयक्रीड़ानिरतयुवतिस्नानतिक्तैः—तोयेषु सलिलेषु क्रीड़ाः सन्तरणादिविविधाः क्रीड़ाः (७मी तत्) तासु निरताः (नि + रम् + क्तः) सच्छन्दव्यापृताः युवतयः सुदत्यः (युवन् has three forms in the feminine gender viz युवति, युवती and यूनी) (कर्मधारयः) तासां स्नानानि (स्नायते एतैः इति (स्ना + करणे ल्युट्) स्नानीयानि चन्दनादीनि (६ तत्) तैः तिक्ताः सुरभयः (३या तत तैः—made fragrant by the perfumed powders used in bathing by the young ladies who are merrily engaged in sports in the waters of the stream.

7. गन्धवत्याः—"गन्धवत्याः नाम नद्याः" *i. e.*, some small brook in the vicinity of the temple of *Mahakala*. But no other mention of it is to be found in any other texts. In Raghu, the poet describing उज्जयिनी says "असौ महाकालनिकेतनस्य वसन्नदूरे किल चन्द्रमौलेः। तमिस्रपक्षेऽपि सह प्रियाभि र्ज्योत्स्नावतो निर्विशति प्रदोषान्॥ अनेन यूना सह पार्थिवेन रम्भोरु कच्चिन्मनसो रुचिस्ते। शिप्रातरङ्गानिलकम्पितासु विहर्तुम् उद्यानपरम्परासु॥ VI. 34—35. तथाच पञ्चतन्त्रे—'एवं च क्रमेणावन्तिविषयं प्रापुः। तत्र च शिप्राजले स्नात्वा श्रीमहाकालदेवं च प्रणम्य यावदग्रतो गच्छति &c." V. In these descrip

अप्यन्यस्मिन् जलधर महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदत्येति भानुः।

tions also no mention is made of the गन्धवती। The word गन्धवती is a significant term, meaning "fragranted or impregnated with sweet scent. May it not then mean a certain portion of the *Sipra* designated so for its constant exudation of sweet scents caused by the reasons mentioned in the text?

8. मरुद्भिः धूतोद्यानं—मरुद्भिः—अनुक्ते कर्त्तरि तृया। धूतोद्यानम् इत्यत्र सापेक्षत्वेऽपि गमकत्वात् समासः। धूतं (धू+कर्मणि क्तः) कम्पितं उद्यानं यत्र तत्; where the adjoining garden is daily shaken by breezes &c.

9. The commentators भरत, सनातन, रामनाथ, हरगोविन्द and कल्याणमल्ल construe the 32nd and 33rd slokas together by reading अध्वखिन्नान्तरात्मा for अध्वखेदं नयेथाः and त्यक्त्वा खेदं for सम्यक् पश्यन्; and according to the Saroddharini, who also construes the two together, the अलङ्कार in both is उदात्त। तथाचोक्तं—"आशयस्य विभूतेर्वा यन्महत्त्वमनुत्तमम्। उदात्तं नाम तं प्राहुरलङ्कारं मनीषिणः॥"

10. Conjugations:—

या—याति, ययौ, यास्यति, अयासीत्।

धू—धवति, धवते, धूनोति, धुनुते; धुनाति, धुनीते; दुधाव, दुधुवे; धोष्यति, ते, धविष्यति, ते; अधावीत्, अधोष्ट, अधविष्ट। धूतः, धूनः।

"धूनोति चम्पकवनानि धुनोत्यशोकं। चूतं धुनाति धुवति स्फुटितातिमुक्तं। वायुर्विधूनयति केशरपुष्परेणून्। यत्कानने धवति चन्दनमञ्जरीञ्च॥" इति कविरहस्ये : ८।

कुर्व्वन् सन्ध्याबलिपटहतां शूलिनः श्लाघनीया-
मामन्द्राणां फलमविकलं लप्स्यसे गर्ज्जितानाम् ३४

Prose order—हे जलधर ! महाकालं अन्यस्मिन्नपि काले आसाद्य यावत् भानुः नयनविषयं न अत्येति तावत् ते स्थातव्यं। श्लाघनीयां शूलिनः सन्ध्याबलिपटहतां कुर्व्वन् आमन्द्राणां गर्ज्जितानां अविकलं फलं लप्स्यसे। ३४।

Paraphrase—हे जलधर ! यदि त्वं सन्ध्यातिरिक्ते काले चण्डीश्वरस्य मन्दिरम् आसादयसि तर्हि यावता कालेन न सन्ध्यासमयः समायाति तावत् तत्र तदागमनं प्रतीक्षमाणेन त्वया स्थातव्यम् ; ततः सूर्य्ये अस्तं गते: शिवस्य सन्ध्यापूजायाः पटहकार्य्यं कुर्व्वन् आमन्द्रगर्जितस्य समग्र फलं लब्ध्वा कृतार्थो भविष्यसि। ३४।

Change of voice—* * * भानुना नयनविषयः न अतीयते * त्वं * तिष्ठेः। * कुर्व्वता * लप्स्यते (त्वया)। ३४।

Sanjivani- अपीति। हे जलधर महाकालं नाम पूर्व्वोक्तं चण्डीश्वरस्थानम् अन्यस्मिन् सन्ध्यातिरिक्तेऽपि काले आसाद्य प्राप्य ते तव स्थातव्यं। त्वया स्थातव्यम् इत्यर्थः। "कृत्यानां कर्त्तरि वा" इति षष्ठी। यावत् यावता कालेन भानुः सूर्य्यः नयनविषयं दृष्टिपथम् अत्येति अतिक्रामति। आ अस्तमयात् स्थातव्यम् इत्यर्थः। यावत् इत्येतत् अवध्यर्थे। "यावत् तावच्च साकल्येऽवधौ मानेऽवधारणे" इत्यमरः। किमर्थम् अत आह—कुर्व्वन्निति। श्लाघनीयां प्रशस्यां शूलिनः शिवस्य सन्ध्यायां बलिः पूजा तत्र पटहतां कुर्व्वन् सम्पादयन् आमन्द्राणाम् ईषद्गम्भीराणां

गर्ज्जितानाम् अविकलम् अखण्डं फलं लप्स्यसे प्राप्स्यसि। लभेः कर्त्तरि लृट्। महाकालनाथबलिपटहत्वेन विनियोगात् ते गर्ज्जितसाफल्यं स्यात् इत्यर्थः। ३४।

হে জলধর! তুমি সন্ধ্যার পূর্ব্বে অন্য কোনও সময়ে সেই স্থানে উপস্থিত হইলে ও যাবৎ দিনমণি অস্তাচলচূড়াবলম্বী না হন, তাবৎ সেই স্থানে অবস্থিতি করিও; কেন না সায়ংকালে তুমি দেবাদিদেব পিনাকপাণির শ্লাঘ্যতম সন্ধ্যার্চ্চনার পটহের কার্য্য সম্পাদন করিয়া গভীর গর্জ্জনের সম্পূর্ণ ফললাভ করিবে সন্দেহ নাই। ৩৪।

Having reached Mahakala, (the abode of Siva), dear cloud, though at a time other than the evening, thou shouldst halt there till the sun passes beyond the range of vision; for having served there the noble function of the drum of the trident-bearing Siva at the evening service thou wilt reap the full recompense of thy deep and solemn thundering—34.

Notes.

1. जलधर—धरति इति धरः (धृ + पचादित्वात् अच्)। जलस्य धरः इति जलधरः (६ तत्)। तत् सम्बुद्धौ। हे पयोद; O cloud.

2. अन्यस्मिन् अपि काले—सन्ध्यातिरिक्तेऽपि काले। अधिकरणे सप्तमी। Though at another time *i. e.*, though at a time other than the twilight.

3. महाकाल—It is the name of the temple of Siva in Oujein. The emblem of the God also is called by the same name. आसाद्य—(आ + सद + णिच् + ल्यप्) प्राप्य।

4. ते—तव। "क्तस्य च वर्त्तमाने" इति पाणिनी षष्ठी, पक्षे तृतीया। स्थातव्यं—महाकालायतने स्थातव्यम्।

5. नयनविषयं यावत् अत्येति भानुः—यावता कालेन भगवान् भास्करः दृष्टिपथं अतिक्रामति। विसिनोति विषयिणं अनुबध्नाति स्वेन रूपेण निरूपणीयं करोति इति विषयः (वि+सि + अच्। "इह सत्वमपि" इति दीक्षितवचनात् निपातनात् षत्वम्)। नयनयोः विषयः (६ तत्) तं दृष्टिपथं ; till the sun passes beyond the range of sight. The commentators भरत, सनातन, रामनाथ, हरगोविन्द and others read अभ्येति for अत्येति। Bharata, Sanatana, Ramanatha and Haragovinda explain it thus :—भानुः सूर्यः यावत् नयनविषयं चक्षुर्गोचरं अभ्येति प्राप्नोति यावन्न अस्तं गच्छतीत्यर्थः।" But कल्याणमल्ल explains it differently thus :—यावत् भानुर्नयनविषयम् अभ्येति सूर्योदयं यावत् इत्यर्थः। महाकालतीर्थम् आसाद्य त्वया तत्र अहोरात्रं स्थातव्यम् इति भावः। अत्येति—(अति + इ + लट् ति)—अतिक्रामति।

6. सन्ध्याबलिपटहतां—सन्ध्यायां बलिः (७मी तत्) तत्र पटहता पटहकार्यं (पटह + तल्) ढक्काकार्यं मन्द्रमधुरः निर्घोषः इत्यर्थः तां (७मी तत्)। "देवानां बलिकाले ढक्कापटहादिवाद्यैः भाव्यम्" इति वल्लभः। Serving the function of the drum in the evening ritual there. No Hindu student, we believe, requires to get an explanation of the word सन्ध्याबलि। श्लाघनीयां—श्लाघ्यां, प्रशंसनीयां, noble.

7. अविकलं—विगता कला अंशः यस्मात् तत् विकलं असम्पूर्णं (ब. व्री.)। न विकलं अविकलं (नञ्समासः) अखण्डं ; सम्पूर्णं ; entire, full.

8. Conjugations :—

सद्—सीदति, ससाद, सत्स्यति, असदत्। णिच्—सादयति, सादयामास, असीषदत्।

इ—एति, ऐत्, इयाय, एष्यति, अगात्। यत्।

कृ—करोति, कुरुते ; चकार, चक्रे ; करिष्यति, ते ; अकार्षीत्, अकृत।

पादन्यासैः क्वणितरशनास्तत्र लीलावधूतैः
रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः ।
वेश्यास्त्वत्तो नखपदसुखान् प्राप्य वर्षाग्रविन्दू-
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् ॥

श्लाघ्—श्लाघते, शश्लाघे, श्लाघिष्यते, अश्लाघिष्ट ।

लभ्—लभते, लेभे, लप्स्यते ; अलब्ध ; कर्म्मणि—लभ्यते, अलम्भि, अलाभि ।

गर्ज्ज—गर्ज्जति, जगर्ज्ज, गर्जिष्यति, अगर्ज्जीत् ।

Prose order—तत्र पादन्यासैः क्वणितरशनाः लीलावधूतैः रत्नच्छायाखचितवलिभिः चामरैः क्लान्तहस्ताः वेश्याः त्वत्तः नखपदसुखान् वर्षाग्रविन्दून् प्राप्य त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् आमोक्ष्यन्ते । ३५ ।

Paraphrase—तत्र सन्ध्याबलिसमये मधुरं निक्षिप्तैः पादैः मुखररसनाः लीलया चालितैः रत्नखचितदण्डैः चामरैः परिदूनहस्ताः पशुपतिसेवार्थागताः गणिकाः नखक्षतेषु सुखकरान् त्वत्तो वृष्टिजलविन्दून् प्राप्य अये को नः एवं सुखयति इति त्वयि भ्रमरकृष्णकटाक्षान् निक्षिप्य कृतप्रत्युपकारा भविष्यन्ति । ३५ ।

Change of voice—* * * क्वणितरसनाभिः * क्लान्तहस्ताभिः * वेश्याभिः मधुकरश्रेणिदीर्घाः कटाक्षाः आमोक्ष्यन्ते । ३५ ।

Sanjivani—पादन्यासैरिति । तत्र सन्ध्याकाले पादन्यासैः चरणनिक्षेपैः नृत्याङ्गैः क्वणिताः शब्दायमानाः रशनाः यासां ताः तथोक्ताः । क्वणतेरकर्म्मकत्वात् "गत्यर्थाकर्म्मक—"इत्यादिना कर्त्तरि क्तः । लीलया विलासेन अवधूतैः कम्पितैः रत्नानां कङ्कणमणीनां छायया कान्त्या खचिताः रूषिताः वलयः चामरदण्डाः येषां तैः ।

"बालस्चामरदण्डे च जराविस्लथचर्म्मणि" इति विश्वः। चामरैः बालव्यजनैः क्लान्तहस्ताः। एतेन दैशिकं नृत्यं सूचितम्। तदुक्तं नृत्यसर्व्वस्वे—"खङ्गकन्दुकवस्त्रादिदण्डिकाचामरस्रजः। वीणाञ्च धृत्वा यत् कुर्य्युर्नृत्यं तत् दैशिकं भवेत्" इति। वेश्याः महाकालनाथम् उपेत्य नृत्यन्त्यो गणिकाः। त्वत्तो नखपदेषु नखक्षतेषु सुखान् सुखकरान्। "सुखहेतौ सुखे सुखम्" इति शब्दार्णवे। वर्षस्य अग्रबिन्दून् प्रथमबिन्दून् प्राप्य त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् अपाङ्गान् आमोक्ष्यन्ते। "परैः उपकृताः सन्तः सद्यः प्रत्युपकुर्व्वते" इति भावः। कामिनीदर्शनीयत्वलक्षणं शिवोपासनाफलं सद्यो लप्स्यसे इति ध्वनिः। ३५।

প্রতি পাদবিক্ষেপে যাহাদের কাঞ্চীদাম শ্রুতি মধুর শব্দ করিতে থাকে, ও দণ্ডদেশে কঙ্কণমণির দীপ্তিতে খচিত চামর লীলাবিলাসে আন্দোলন করিয়াও যাহাদিগের করকিসলয় ব্যথিত হয়, তাদৃশ নর্ত্তকী বারবিলাসিনীগণ তোমাহইতে নখক্ষতসুখকর প্রথম বর্ষা সলিলকণা লাভ করিয়া তোমার প্রতি মধুকরপংক্তির ন্যায় সুদীর্ঘ কটাক্ষ পাত করিতে থাকিবে। ৩৫।

The courtesans there (in the fane of Siva) whose girdles tinkle melodiously as they tread the measure and whose hands are wearied by the playfully waving chowries, the handles of which are inlaid with the sheen, glittering rays of the gems (set in the bracelets worn on their hands), having received from thee the first drops of rain soothing to their nail-sores, will shower on thee their 'side long looks' (as long) as the rows of black-bees—35.

Notes.

1. पादन्यासैः—पादानां न्यासाः (नि+अस्+घञ्) अर्पणानि तैः (६ तत्); by their measured treads. It refers to a kind of dance called देशिक नृत्य in which measured steps are gracefully placed by the dancing girls. For definition see Mallinatha's commentary.

2. क्वणितरसनाः—क्वणिताः शब्दायमानाः रशनाः मेखलाः यासां ताः (ब. व्री.); whose girdles tinkle. or make a kind of jingling sound; "देवालयप्रदक्षिणीकरणेन करग्रहीतचामरेण वेश्यानां भगवद्भक्तिकानां कटिमेखलाः वाद्यन्ति" इति सारोद्धारिण्याम्। The root क्वण् is intransitive and hence by the aphorism "गत्यर्थाकर्म्मकश्लिषशीङ्स्थासवसजनरुहजीर्य्यतिभ्यश्च," it takes क्त in the active voice.

3. लीलावधूतैः—लीलया विलासेन अवधूतानि कम्पितानि (अव + धू कर्म्मणि क्तः) तैः; shaken playfully.

4. रत्नच्छायाखचितवलिभिः—रत्नस्य कङ्कणमणेः छाया कान्तिः रत्नच्छाया (६ तत्) तया खचिताः हस्तस्थितकङ्कणमणिकान्तिर्व्वापिताः वलयः चामरदण्डाः येषां तैः (ब. व्र.); the handles of which are inlaid, mixed up with the sheen, glittering rays of the gems set in the bracelets, worn in their lower arms. But वल्लभ points out another meaning of it:—"रत्नच्छायया खचिताः प्रकटीकृताः वलयः उदरलेखाः यैः। तासां हि वासोयुग्माच्छादितानां चामरसंचिभासा मध्यवलयः प्रकटीभवन्ति"।

5. चामरैः—वालव्यजनैः; by the chowries. The chowrie is a brush of the tail of चमर (the Yak) set in a handle of such materials as suit the fancy. It is used as fan. It is sometimes made of the peacock's feathers.

6. नखपदसुखान्—नखपदेषु नखक्षतेषु सुखाः (सुखयन्ति इति सुखाः

पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रतिनवजवापुष्परक्तं दधानः।
नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ॥ ३६ ।

सुख् + णच्) सुखकराः; pleasing, or gratifying to their nail-sores. Nail-marks *i. e.*, the wounds the nails receive when dancing barefooted.

7. मधुकरश्रेणिदीर्घान्—मधुकुर्व्वन्ति मुखे धारयन्ति इति (मधु + कृ + कृञो हेतुताच्छील्यानुलोम्येषु" इति ताच्छील्ये टः। मधुकरः भ्रमु-करेऽपि भ्रमरे रूढ़ोऽयमिति सुभूतिरिति रायः। स्त्रियां—मधुकरी)। मधुकराणां श्रेणयः (६ तत्) तद्वत् दीर्घान् (उपमानसमासः); long like the rows of bees. It has reference to the collyrium in their eyes and natural liveliness and sprightliness. Cf. "विलोल-नेत्रभ्रमरैः गवाक्षाः" Raghu VII. 11. Cf. Shakespeare—"eyes streaming through the airy reigion." कटाक्षाः—sidelong glances of love.

8. Conjugations:—
सुच—सुचति, सुचते; सुमोच, सुमुचे; अमुचत, अमुक्त।

Prose order—पश्चात् (पशुपतेः) नृत्यारम्भे प्रतिनवजवापुष्परक्तं सान्ध्यं तेजो दधानः उच्चैः भुजतरुवनं मण्डलेन अभिलीनः सन् भवान्या शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिः सन् पशुपतेः आर्द्रनागाजिनेच्छां हर। ३६।

Paraphrase—ततः शम्भोः ताण्डवारम्भे उन्नतं भुजतरुवनं मण्डलाकारः समाश्रयन्, जवाकुसुमसंकाशं सान्ध्यं तेजो बिभ्रत् भवान्या निर्भयत्वात् निश्चलस्थनेत्रं दृष्टभक्तिः कृताशीर्वादश्च शिवस्य शोणिताार्द्रगजचर्म्मप्राप्तिवाञ्छां निवर्त्तय। ३६।

Change of voice—दधानेन • अभिलीनेन सता • दृष्टभक्तिना सता • आर्द्रनागाजिनेच्छा क्रियताम् । ३६ ।

Sanjivani—पश्चादिति । पश्चात् सन्ध्यावलयनन्तरं पशुपतेः शिवस्य नृत्यारम्भे ताण्डवप्रारम्भे प्रतिनवजवा-पुष्परक्तं प्रत्यग्रजवाकुसुमारुणं सन्ध्यायां भवं सान्ध्यं तेजो दधानः । उच्चैः उन्नतं भुजा एव तरवः तेषां वनं मण्डलेन मण्डलाकारेण अभिलीनः अभिव्याप्तः सन् । कर्त्तरि क्तः । भवानी भवपत्नी "इन्द्रवरुण-भवशर्व—" इत्यादिना ङीष् । आनुगागमश्च । शान्तः उद्वेगः गजाजिनदर्शनभयं ययोः ते अत एव स्तिमिते निश्चले नयने यस्मिन् कर्म्मणि तत् तथोक्तम् । "उद्वेग-स्त्वरिते क्लेशे भये मन्थरगामिनि" इति शब्दार्णवे । भक्तिः पूज्येषु अनुरागः । भावार्थे क्तिन्प्रत्ययः । दृष्टा दृष्टा वा भक्तिर्यस्य स दृष्टभक्तिः सन् । पशुपतेः आर्द्रं शोणि-तार्द्रं यत् नागाजिनं गजचर्म्म । "अजिनं चर्म्म कृत्तिः स्त्री" इत्यमरः । तत्र इच्छां हर निवर्त्तय । त्वम् एव तत्स्थाने भव इत्यर्थः । गजासुरमर्द्दनानन्तरं भगवान् महादेव तदीयम् आर्द्राजिनं भुजमण्डलेन बिभ्रत् ताण्डवं चकार इति प्रसिद्धिः । दृष्टभक्तिरिति कथं रूप-सिद्धिः दृष्टशब्दस्य "स्त्रियाः पुंवत्—"इत्यादिना पुंवद्-भावस्य दुर्घटत्वात् अपूरणीप्रियादिष्विति निषेधात् भक्ति-शब्दस्य प्रियादिषु पाठादिति । तदेतच्चाद्यं । दृढभक्तिरिति

शब्दम् आश्रित्य प्रतिविहितं गणव्याख्याने दृढं भक्तिरस्येति नपुंसकं पूर्व्वपदम् । अदार्ढ्यं निर्व्वाहमात्रपरत्वे दृढ़शब्दात् लिङ्गविशेषस्य अनुपकारित्वात् स्त्रीत्वम् अविवक्षितमिति । भोजराजस्तु—"भक्तौ च कर्म्मसाधनायाम् इत्यनेन सूत्रेण भज्यते सेव्यते इति कर्म्मार्थत्वे भवानीभक्तिरित्यादि भवति । भावसाधनायां तु स्थिरभक्तिर्भवान्यामित्यादि भवति" इत्याह । तदेतत् सर्व्वं सम्यक् विवेचितं रघुवंशसञ्जीवन्यां "दृढ़भक्तिरितिज्येष्ठे" इत्यत्र (RaghuXII.19) तस्मात् दृष्टभक्तिरित्यत्रापि मतभेदेन पूर्व्वपदस्य स्त्रीत्वेन नपुंसकत्वेन च रूपसिद्धिरस्तीति स्थितम् । ३६ ।

তদনন্তর সন্ধ্যাকালীন পূজাবসানে যখন ভূতনাথের নৃত্যারম্ভ হইবে, তৎকালে তুমি প্রত্যগ্র জবাপুষ্পসন্নিভ রক্তবর্ণ সন্ধ্যারাগ ধারণপূর্ব্বক প্রভুর অত্যুচ্চ ভুজতরুকানন মণ্ডলাকারে সমাচ্ছন্ন করিয়া তদীয় (প্রত্যগ্র রক্তাক্ত) আর্দ্র গজচর্ম্ম পরিগ্রহের বাসনা পরিপূর্ণ করিও। অর্থাৎ তুমি নাগাজিন স্বরূপ হইও। তখন দেবী ত্রিলোচনা ভবানী নিরুদ্বেগে স্তিমিত লোচনে ত্বদীয় ভক্তি দর্শন করিতে থাকিবেন।৩৬।

Afterwards, at the commencement of Siva's dance, reclining in a circular form on the lofty forest of his tree-like arms and assuming the twilight splendour of ruddiness like fresh Japa (China rose) flowers, remove his desire for the wet elephant's skin, whilst thy devotion will be observed by Parvati, his dear consort, with eyes calm because free from uneasiness—36.

Notes.

1. पश्चात्—सन्ध्यावल्यनन्तरं ; after the completion of the evening services.

2. प्रतिनवजवापुष्परक्तं—जवायाः पुष्पाणि जवापुष्पाणि (६ तत्)। प्रतिनवानि अभिनवानि जवापुष्पाणि (कर्म्मधारयः) तद्वत् रक्तं लोहितम् ("उपमानानि सामान्यवचनैः" इति उपमानसमासः); ruddy like fresh China roses blowing in the forest.

3. उच्चैः—(विभक्तिप्रतिरूपकम् अव्ययं) उन्नतं ; lofty.

4. भुजतरुवनं—भुजा एव तरवः इति भुजतरवः (रूपककर्म्मधारयः) तेषां वनं (६ तत्) ; the arms of Siva compared to trees all together making up a forest.

5. मण्डलेन—मण्डलाकारेण ; in a circular form. प्रकृत्यादित्वात् तृतीया।

6. अभिलीनः—(अभि + ली + कर्त्तरि क्तः) resting on.

7. भवान्या—(भव + "इन्द्रवरुणभवशर्व्वरुद्रमृड़हिमारण्ययवयवनमातुलाचार्य्याणामानुक्" इति आनुगागमः ङीष् च) भवपत्न्या ; the alternate form is भवा ; दृष्टभक्तिः इत्यत्र दृष्ट इत्यस्य अनुक्ते कर्त्तरि ३या।

8. शान्तोद्वेगस्तिमितनयनं—शान्तः (शम् + क्तः) दूरीभूतः उद्वेगः चित्तचाञ्चल्यं ययोः ते शान्तोद्वेगे (ब. व्री.) शान्तोद्वेगे अतएव स्तिमिते इति शान्तोद्वेगस्तिमिते (विशेषणसमासः)। ते नयने यस्मिन् कर्म्मणि तत् (ब. व्री.) दृष्ट इत्यस्य विशेषणम्। With the eyes calm, because of the removal of all un-easiness. Mallinatha says that the uneasiness springs from the sight of the bloody skin of the Gajasura. Bnavani is delighted to find the place of the elephant's bloody skin supplied by the cloud which being of a dusky red, like china roses (जवा) now abundant and being skirted, as it overhangs the forest of his tree-like arms

resembles the elephant's hide in colour and its danging limbs, as well as in its bulk and is mistaken for it by Siva in his religious enthusiasm. Saroddharini and Sumativijaya explain thus: रुधिरद्रवाविलगजाजिनावलोकनेन प्रतिदृश्यं नृत्यारम्भे तस्य उद्वेग आसीत्। स च त्वयि गजाजिनत्वं प्राप्ते भ्रान्तत्वेन निर्मितमयनत्वं".

9. आर्द्रनागाजिनेच्छां—"The elephant's skin belonged to an Asura named गज or मय who acquired such power that he would have conquered the gods and would have destroyed the munis had they not fled to Benares and taken refuge in a temple of Siva, who then destroyed the Asura and ripping up his body, stripped off the hide, which he cast over his shoulders for a cloak" Prof. M. William's Indian Wisdom. "तत्र पशुपतिः सन्ध्यासु रुधिरार्द्रं आविलं गजाजिनं सपरिधानः प्रसार्य नृत्यति" इति सारोद्धारिणी।

10. दृष्टभक्तिः—The dissolution of the compound offers great difficulties. The general rule laid down by Panini for the determination of the gender of the first member (which was originally a feminine base) of a compound word of the बहुव्रीहि and समानाधिकरण (*i. e.*, कर्मधारय) is "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियाम् अपूरणीप्रियादिषु." Here the word भक्ति falls under the प्रिय class and as such, if we dissolve the compound as दृष्टा भक्तिः यस्य स we get दृष्टाभक्तिः (and not दृष्टभक्तिः). Hence सामान्ये नपुंसकं इति कृत्वा दृष्टं भक्तिः यस्य स इति दृष्टभक्तिः इति नपुंसकपूर्वपदो बहुव्रीहिरिति। This is how the word दृष्टभक्ति has been explained in the मल्लव्याख्यान. So also वृत्तिकार says this:—"दीर्घनिवृत्तिमात्रपरो दृष्टभक्तिशब्दो

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः ।
सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मास्म भूर्विक्लवास्ताः॥३७॥

विग्रविशेषस्य अनपकारत्वात् स्त्रीत्वमविवक्षितमेव । तस्मात् भक्तेः स्त्रीलिङ्गत्वात् दृढभक्तिशब्दस्याप्रयोग इत्यभिप्रायः।'' Haradatta in his भाष्य on Panini's grammar, is of the same opinion. But भोजराज, in his सरस्वतीकण्ठाभरण on the same word says, that the word भक्तिः derived in the कर्मवाच्य falls under the प्रिय class and hence in भवानीभक्तिः &c. the ङीप् does not drop; but in स्थिरभक्तिः, the word भक्ति has been derived in the भाववाच्य and as such it does not fall under the प्रिय class, hence there is no objection in the first member's taking पुंवद्भाव । Thus we see that we can dissolve the compound in दृढभक्तिः in two ways viz (1) दृढं भक्तिः यस्य सः and (2) भज्+भावे क्तिः—भक्तिः,भजनम् । दृढा भक्तिः यस्य स दृढभक्तिः । (For further discussion vide Mallinatha's commentary on Raghu XII. 19.)

Prose order—तत्र नक्तं रमणवसतिं गच्छन्तीनां योषितां सूचिभेद्यैः तमोभिः रुद्धालोके नरपतिपथे कनकनिकषस्निग्धया सौदामन्या उर्वीं दर्शय; तोयोत्सर्गस्तनितमुखरः मास्म भूः ; यतः ताः विक्लवाः । ३७ ।

Paraphrase—अत्र उज्जयिन्यां रात्रौ रमणसदनं प्रति प्रस्थितानाम् अभिसारिकाणाम् अतिगाढैः ध्वान्तैः निरुद्धदृष्टिप्रसारे राजमार्गे कनकनिकषवत् रुचिरेण विद्युद्दाम्ना उन्मार्गेण पन्थानं दर्शय ; किन्तु वर्षगर्जिताभ्यां मन्दायमानो माऽस्म भूः यतस्ताः अभिसारोद्यता योषितः अतीव भीताः । ३७ ।

Change of voice—: * * उर्व्वी दर्श्यताम् * * तोयोत्सर्गस्तनितमुखरेण मास्म भावि, ताभिः विक्लवाभिः भूयते । ३७ ।

Sanjivani—इत्थं महाकालनाथस्य सेवाप्रकारमभिधाय पुनरपि नगरसञ्चारप्रकारमाह गच्छन्तीनामिति। तत्र उज्जयिन्यां नक्तं रात्रौ रमणवसतिं प्रियभवनं प्रति गच्छन्तीनां योषिताम् । अभिसारिकाणाम् इत्यर्थः । सूचिभिः भेद्यैः । अतिसान्द्रैरित्यर्थः । तमोभिः रुद्धालोके निरुद्धदृष्टिप्रसारे नरपतिपथे राजमार्गे कनकस्य निकषः निकष्यते इति व्युत्पत्त्या निकषोपलगतरेखा तस्येव स्निग्धं तेजो यस्याः तया । "स्निग्धं तु मसृणे सान्द्रे रम्ये क्लीबे तु तेजसि" इति शब्दार्णवे । सुदाम्ना अद्रिणा एकदिक् सौदामनी विद्युत् । "तेनैकदिक्"इत्यण् प्रत्ययः । तया उर्व्वीं मार्गं दर्शय । किञ्च तोयोत्सर्गस्तनिताभ्यां वृष्टिगर्ज्जिताभ्यां मुखरः शब्दायमानो मास्म भूः । कुतः । ताः योषितः विक्लवाः भीरवः । ततो वृष्टिगर्ज्जिते न कार्य्ये इत्यर्थः । नात्र तोयोत्सर्गसहितं स्तनितमिति विग्रहः विशिष्टस्येव केवलस्तनितस्यापि अनिष्टत्वात् । नच द्वन्द्वपक्षे "अल्पाच्तरम्"इति पूर्व्वनिपातशास्त्रविरोधः ।"लक्षणहेत्वोः क्रियायाः"इति सूत्रे विपरीतनिर्द्देशेन पूर्व्वनिपातशास्त्रस्य अनित्यत्वज्ञापनादिति । ३७ ।

ঘোর নিশীথকালে উজ্জয়িনীর রাজপথ সূচিভেদ্য তিমির জালে সমাচ্ছাদিত হইলে যখন অভিসারিকা বিলাসিনীগণ স্ব স্ব নাগর দলের গৃহযাত্রা করিবে, তখন তুমি নিকষপাষাণাঙ্কিত কাঞ্চন রেখার ন্যায়

সমুজ্জ্বলবিদ্যুল্লতাসহায়ে তাহাদিগের পথ প্রদর্শন করিয়া দিবে; কিন্তু সে সময়ে সলিল বর্ষণ বা গর্জ্জন করিও না; কেননা অভিসারোদ্যত রমণীগণের হৃদয় স্বভাবতই একান্ত ভীরু। ৩৭।

By thy lightning bright as streaks of gold on a touch-stone), show there the ground to the women leaving for the abodes of their lovers by night along the high road when the sight is obstructed by pitch-dark gloom; (lit. darkness that may be pierced with a needle) but be not noisy by thundering and discharging water, for they are timid—37.

Notes.

1. The poet has first mentioned the manner of his services to Siva and is now describing how he should travel there.

2. तत्र—उज्जयिन्यां । नक्तं—सप्तम्यन्तम् अव्ययं । रात्रौ ।

3. रमणवसतिं—वसति अत्र इति वसतिः (वस् + औणादिकः अति-प्रत्ययः) । आवासः, गृहं । रमयन्ति ये ते इति रमणाः (रम् + णिच् + नन्द्यादित्वात् ल्युः) वल्लभाः । रमणानां वसतिः तां (६ तत्) ; to the house of their lovers. "जात्याख्यायाम् एकस्मिन् बहुवचनम् अन्यतरस्याम्" इति जातौ पाक्षिकम् एकवचनम् । गमेः कर्म्मणि द्वितीया । यद्वा "लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्य्यनवः" इति कर्म्म-प्रवचनीयप्रतिपदयोगे २या । तत्र प्रति इति पदम् अध्याहार्य्यम् ।

4. गच्छन्तीनां—(गम् + शतृ + स्त्रियाम् ङीप् । भ्वादिगणीयत्वात् नुमागमश्च) । प्रस्थितानां ; setting out for.

5. योषितां—नारीणां । अत्र अभिसारिका एव सूच्यन्ते । "कान्ता-र्थिनी तु या याति सङ्केतं साभिसारिका" इति दर्पणवचनात् । Women on their way to the place of assignation are called अभिसारिकाs.

6. सूचिभेद्यैः—सूचिभिः भेद्यैः (३या तत्) अतिसान्द्रैः; lit. so very thick as may be pierced by needles; (hence) impervious. "अतिनिविड़त्वात् तमसां कविसमये सूचिभेद्यत्वमिष्यते। औपचारिकोऽयं धर्मः" इति सारोद्धारिण्याम्। Cf. How impenetrable darkness has been described in the मृच्छकटिक—'लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः। असत्पुरुषसेवेव दृष्टिर्विफलतां गता॥' Act I.

7. तमोभिः—"रुद्धालोके" इत्यत्र 'रुद्ध' इति पदस्य अनुक्ते कर्त्तरि तृतीया। यद्वा करणे तृतीया।

8. रुद्धालोके—रुद्धः (रुध् + कर्मणि क्तः) निरुद्धः प्रतिबद्धः आलोकः (आलोक्यते अनेन इति आलोकः आ + लोक + करणे अल्) दृष्टिप्रसारः यस्मिन् तस्मिन् (ब. व्री.); in which the sight has been obstructed.

9. नरपतिपथे—नरपतेः पन्थाः इति नरपतिपथः "ऋक्पूरब्धूःपथामानक्षे" इति समासान्त-अप्रत्ययः)। तस्मिन्। राजमार्गे; in the high road.

10. कनकनिकषस्निग्धया—निकष्यते इति निकषः (नि + कष् + कर्मणि घः) स्वर्णरेखा। कनकस्य निकषः इति कनकनिकषः (६ तत्); streaks of gold on a touch-stone. The word निकष is generally used in the sense of *the stone on which* the purity or alloy of gold is tested. Cf. 'निकषे हेमलेखेव तस्य धीरनपायिनी" इति कालिदासः। 'कनकनिकषस्य स्निग्धं (तेजः) इति कनकनिकषस्निग्धं (६ तत्), कनकनिकषस्निग्धमिव स्निग्धं यस्याः सा कनकनिकषस्निग्धा (सप्तम्युपमानेत्यादिना उत्तरपदलोपी बहुव्रीहिः), तया; "निकषस्य उपरि अर्पितायाः सुवर्णरेखायाः तेजः यथा दीप्यते तद्वत् दीप्तिमत्या" इति मल्लिनाथस्वामी। But स्निग्ध in the sense of तेजः is very rarely used in Sanskrit;

and Katayavema in his commentary on विक्रमोर्व्वशी explains the word कनकनिकषस्निग्धा thus :—कनकस्य निकषः घृष्टरेखा तद्वत् स्निग्धा रुचिरा ;"as bright as a streak of gold on a touch-stone. Cf. विक्रमोर्व्वशी—Act IV. 1. "कनकनिकषस्निग्धा विद्युत् प्रिया न ममोर्व्वशी।" सौदमन्या—सुदाम्ना अद्रिणा एकदिक् सौदामनी विद्युत्। (सुदामन्+"तेनैकदिक्"—(i. e., तृतीयान्तात् एकदिक् इत्यर्थे अणादयः स्युः। एका दिक् समाना दिक् इत्यर्थः। पूर्व्वस्तन इत्युक्तिः छन्दोऽधिकारनिवृत्त्यर्था)। इति अण्। "अन्" इति प्रकृतिभावात न टिलोपः। ततः स्त्रियां ङीप्। पक्षे सौदामिनी)। तया। करणे ३या।

11. उर्व्वीं—पन्थानं ; मार्गं। Lit. grounds. Here—the way.

12. तोयोत्सर्गस्तनितमुखरः—तोयस्य उत्सर्गः मोचनं इति तोयोत्सर्गः (६ तत्)। स्तन् + भावे क्त—स्तनितं, गर्ज्जनं। तोयोत्सर्गश्च (वृष्टिश्च) स्तनितञ्च इति तोयोत्सर्गस्तनिते (द्वन्द्वःसमासः) ताभ्यां मुखरः शब्दायमानः। मुखशब्देन वाक् लक्ष्यते, मुखं विद्यते यस्य इति मुख + "रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम्" यथा मुखरः कुञ्जरः) इति रः (तृतीया तत्पुरुषः। Here Mallinatha starts a discussion on the dissolution of the word by the द्वन्द्व compound. The general rule of Panini says "अल्पाच्तरम्" i. e, of the two words that form a द्वन्द्व compound, that which consists of the lesser number of vowels should go first. Hence स्तनित should have gone first. But Mallinaths says that the *Sutra* quoted above is not *compulsory* on all occasions,for Panini himself has acted against his own precept. Cf. "धर्मार्थसंज्ञे..." Here ... should have gone first. This infringement made by the Grammarian himself makes it clear that laws for the पूर्व्वनिपात made by him are not obliga-

तां कस्याञ्चिद्भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्रः।
दृष्टे सूर्य्ये पुनरपि भवान् वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः॥३८॥

tory on all occasions. He says further that it should not be dissolved by तोयोत्सर्गसहितं स्तनितं for that mars the sense altogether.

13. मास्मभूः—Bharata, Ramanatha and Parshabhyudaya read "मा च भूः" and this seems preferable. "एकस्य कर्त्तुः क्रियाद्वयसम्बन्धात चकारवानेव पाठः साधीयान्" इति विद्यासागरपादाः।

14. विक्लवास्ताः—Cf. सुतीव्रमुच्चैर्ध्वनतां पयोमुचां घनान्धकारावृतशर्वरीष्वपि। तड़ितप्रभादर्शितमार्गभूमयः प्रयान्ति रागाद् अभिसारिकाः स्त्रियः॥ Ritusamhara II 10.

15. Conjugations:—

रुध—रुणद्धि, रुन्धे; रुरोध, रुरुधे; रोत्स्यति, ते; लोट् हि—रुन्धि; अरौत्सीत्, अरुधत, अरुद्ध।

भिद—भिनत्ति, भिन्ते; बिभेद, बिभिदे; भेत्स्यति, ते; अभिदत्, अभैत्सीत्, अभित्त।

Prose order—चिरविलसनात खिन्नविद्युत्कलत्रः त्वं सुप्तपारावतायां कस्याञ्चित भवनवलभौ तां रात्रिं नीत्वा सूर्य्ये दृष्टे सति पुनरपि अध्वशेषं वाहयेत; तथाहि सुहृदां अभ्युपेतार्थकृत्याः न मन्दायन्ते खलु। ३८।

Paraphrase—निरन्तरस्फुरणात् खिन्नतड़ित्पत्नीकः स त्वं नीरवनिद्रालीढ़नेत्रकपोतायां अतः निःशब्दत्वात विश्रामानुकूलायां कस्यांचित् भवनवलभौ तां निशां यापयित्वा सूर्य्योदये पुनरपि अवशिष्टं पन्थानम् अतिक्रामेः; तथाहि अभ्युपेतवन्धुकार्य्याः महात्मान तत्सम्पादने न खलु विलम्बन्ते। ३८।

Change of voice—खिन्नविद्युत्कलत्रेण अध्वशेषः वाह्येत * सुहृदाम् अभ्युपेतार्थकृत्यैः न मन्दाय्यते । ३८ ।

Sanj vani—तामिति । चिरं विलसनात् स्फुरणात् खिन्नं विद्युत् एव कलत्रं यस्य स भवान् सुप्ताः पारावताः कलरवाः यस्यां तस्यां । विविक्तायाम् इत्यर्थः । "पारावतः कलरवः कपोतः" इत्यमरः । जनसञ्चारः तत्र असम्भावित एव इति भावः । कस्याञ्चित् भवनस्य वलभौ आच्छादने उपरिभागे इत्यर्थः । "आच्छादनं स्याद्वलभी गृहाणाम्" इति हलायुधः । तां रात्रिं नीत्वा सूर्य्ये दृष्टे सति । उदिते सति इत्यर्थः । पुनरपि अध्वशेषं वाहयेत् । तथाहि । सुहृदां मित्राणाम् अभ्युपेता अङ्गीकृता अर्थस्य प्रयोजनस्य कृत्या क्रिया यैः ते अभ्युपेतसुहृदर्थाः इत्यर्थः । सापेक्षत्वेऽपि गमकत्वात् समासः । "कृत्या क्रियादेवतयोः कार्य्ये स्त्री कुपिते त्रिषु" इति यादवः । "कृञः श च" इति चकारात् क्यप् । न मन्दायन्ते खलु न मन्दाः भवन्ति हि । न विलम्बन्ते इत्यर्थः । "लोहितादिडाज्भ्यः क्यष्" इति क्यष् । "वा क्यषः" इत्यात्मनेपदम् । ३८ ।

হে পয়োধর! তোমার প্রিয়তমা সৌদামিনী যামিনীযোগে বহুক্ষণ বিলাসসম্ভোগ হেতু নিতান্ত শ্রান্ত হইয়া পড়িবে সন্দেহ নাই; সুতরাং যে স্থানে কপোতগণ নিদ্রিত আছে তুমি তাদৃশ কোন রম্য অট্টালিকার উপরিদেশে যামিনী অতিবাহিত করিবে। যখন দিনমণি সমুদিত হইবেন, তখন পুনরায় অবশিষ্ট পথ পর্য্যটনে প্রবৃত্ত হইবে। কেননা, যে সকল ব্যক্তি বন্ধুর প্রিয় কার্য্য সাধনের জন্য

দৃঢ়প্রতিজ্ঞ হইয়া তাহাতে প্রবৃত্ত হন, তাঁহাদিগকে কদাচ শিথিল প্রযত্ন হইতে দেখা যায় না। ৩৮।

Having passed the night, on the terrace of some palace where pigeons roost, with thy lightning spouse fatigued by long and continued flashes, thou shouldst again take the rest of thy journey after sun-rise; for those who have undertaken the accomplishment of an important business for their friends, do not linger in the way—38.

Notes.

1. भवनवलभौ—भवनस्य गृहस्य वलभिः आच्छादनं उपरिभागः; वलभी। On the terrace of a palace.

2. सुप्तपारावतायां—सुप्ताः पारावताः यस्यां तस्यां (ब. व्री.); where the pigeons have taken shelter, gone to rest. Cf. "धूपैर्जालविनिःसृतैर्वलभयः सान्द्रप्रपारावताः" Vikrama II. 2. "सौधान्यत्यर्थतापाद् वलभिपरिचयद्विष्टपारावतानि" Malavi II. 12. "भोगिनां हि वासभवनेषु कूजितध्वानानिनादिपारावताः सन्ति। ते च स्वभावतस्त्वनिद्राः सन्तः कामनोत्कण्ठकूजितेन जागरयो भवन्ति। एतेन तस्याः सांनिध्यांहीपनं विभाव्यते" इति सारोद्धारिण्याम्। "ते हि कण्ठरुतश्रवणार्थं मायारकं गृहं धार्यन्ते" इति वल्लभः।

3 चिरविलसनात् &c.—"चिरविलसनेन सुरतसंमर्दः सूच्यते।" इति सारोद्धारिण्याम्। विद्युत् एव कलत्रं इति विद्युत्कलत्रं। मेघानां विद्युतः कलत्रत्वं इति कविसमयप्रसिद्धिः। खिन्नं विद्युत्कलत्रं यस्य सः, whose lightning wife has been exhausted by her frequent play.

4 अध्वशेषं—the rest of the way. वाहयेत्—वह्+णिच्+विधि यात् भवत्।

5 सुहृदां—"सुहृद्दुर्हृदौ मित्रामित्रयोः" इति निपातने सुहृच्छब्दः मित्रार्थे।

6. अभ्युपेतार्थकृत्याः—अभ्युपेता अभि+उप+इ+कर्मणि क्तः)

तस्मिन् काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु।
प्रालेयास्रं कमलवदनात् सोऽपि हर्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः॥३९॥

पङ्गीकृता। अर्थस्य प्रयोजनस्य कृत्या (कृ+क्यप्) अनुष्ठानम् इति अर्थकृत्या (षष्ठी तत्)। अभ्युपेता अर्थकृत्या यैः ते (ब. व्री.) स्वीकृतप्रयोजनसम्पादनाः; by whom the work has been accepted and undertaken. Here सुहृदां joins with अर्थ which is not independent, but is dependent being a member of the compound word अभ्युपेतार्थक्रिया। Its use is justified by the rule सापेक्षत्वेऽपि गमकत्वात् समासः। The usual form would have been अभ्युपेतसुहृदर्थकृत्याः।

7. कृत्या—the root कृ takes श also. Here 'also' implies क्यप. Hence by क्यप् we get कृत्या and by श we get क्रिया।

8. मन्दायन्ते—According to Patanjali the sutra "लोहितादिडाज्भ्यः क्यष्" is to be interpretated as "लोहितडाज्भ्यः क्यष्वचनं भृशादिषु इतराणि इति" *i. e.*, क्यष् to be attached to लोहित alone and to words formed by the affix डाच्; and to all other words of the लोहितादि list क्यङ् should be attached by including them under the भृशादि list. This also is the opinion of the वृत्तिकार who says—"यानि लोहितादिषु पठ्यन्ते, तेभ्यः क्यङ् एव"। Mallinath differs from them and derives all words of the लोहितादि class by attaching क्यष् to them. Hence according to him मन्द which falls under the लोहितादि list takes क्यष्। His analisis is मन्दा भवन्ति इति मन्दायन्ते, मन्दायन्तिवा; for nominal verbs formed by क्यष् are उभयपदी (वा क्यषः")। According to पतञ्जलि, वृत्ति, कैयट, नागेश &c., the

analisis is thus : अमन्दा मन्दा भवन्ति इति मन्दायन्ते। नतु मन्दायन्ति। For words with क्यङ् are आत्मनेपदि only.

Prose order—तस्मिन् काले प्रणयिभिः खण्डितानां योषितां नयनसलिलं शान्तिं नेयं, अतः भानोः वर्त्म आशु त्यज। सोऽपि नलिन्याः कमलवदनात् प्रालेयास्रं हर्तुं प्रत्यावृत्तः, त्वयि करुधि सति अनल्पाभ्यसूयः स्यात्। ३९।

Paraphrase—ये कामिनः अन्यसक्ताः रजनीमयापयन् ते प्रभाते प्रत्यावृत्ताः स्वस्वदुर्नयेन अपरासां जातेर्ष्याणां वल्लभानां कोपशान्तये यतिष्यन्ते किञ्च सूर्य्योऽपि देशान्तरे अपराभिर्नलिनीभिः सह यापितयामिनीकः तेनासौ अनत्यानां नलिनीनां कमलनयनात् हिमरूपं वाष्पजलम् अपनेतुं करं प्रसारयिष्यति एवं गते यदि त्वं तस्य प्रसार्य्यमाणं करं रुणत्सि तर्हि सोऽपि त्वां प्रति जातद्वेषो भविष्यति तस्मिन् जातद्वेषे तव कार्य्यहानि यच्च तेन ममानिष्टमवधारितम् अतो अर्वीन प्रभाते भानोरुदयस्थाध्वगमनं मास्म कार्षीः। ३९।

Change of voice—तस्मिन् काले प्रणयिनः ० ० नयनसलिलं शान्तिं नेष्यन्ति ० ० त्यज्यताम् ० तेनापि ० प्रत्यावृत्तम्। ० ० अनल्पाभ्यसूयेन भूयेत। ३९।

Sanjivani—तस्मिन्निति। तस्मिन् काले पूर्व्वोक्ते सूर्य्योदयकाले प्रणयिभिः प्रियतमैः खण्डितानां योषितां नायिकाविशेषाणाम्। "ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता" इति दशरूपके। नयनसलिलं शान्तिं नेयं नेतव्यम् "नयति" र्द्विकर्म्मकः। अतो हेतोः भानोः वर्त्म आशु शीघ्रं त्यज तस्य आवरको मा भूः इत्यर्थः। विपक्षे अनिष्टमाचष्टे सोऽपि भानुः नलानि अम्बुजानि अस्याः सन्तीति नलिनी पद्मिनी। "तृणेऽम्बुजे नलं ना तु राशि नाले तु न स्त्रियाम्" इति शब्दार्णवे। तस्याः स्वकान्तायाः कमलं स्वकुसुमम् एव वदनं तस्मात्

प्रालेयं हिमम् एव अस्रम् अस्रु हर्त्तुं शमयितुं प्रत्यावृत्तः प्रत्यागतः नलिन्याश्च भर्त्तुर्भानोः देशान्तरे नलिन्यन्तरगमनात् खण्डितात्वम् इत्याशयः ततः त्वयि करान् अंशून् रुणद्धि इति कररुत्। "क्विप्"। तस्मिन् कररुधि सति हस्तरोधिनि सति इति च गम्यते। "बलिहस्तांशवः कराः" इत्यमरः। अनल्पाभ्यसूयः अधिकविद्वेषः स्यात् प्रायेण इच्छाविशेषविघातात् द्वेषो रोषविशेषश्च कामिनाम् इति भावः। किञ्च ब्राह्मणं पार्कमीशानं विष्णुं वा द्वेष्टि यो जनः। श्रेयांसि तस्य नश्यन्ति रौरवञ्च भवेत् ध्रुवमिति निषेधात् कार्य्यहानिश्च इति ध्वनिः। ३९।

হে নীরদ! দিবাকরের উদয়কালে প্রণয়িগণ খণ্ডিতা নায়িকাকুলের নয়নজল অপনোদন করিবে; সুতরাং তুমি সেই সময়ে ভাস্করদেবের গতি রোধ করিও না। কেননা দিনমণিও প্রিয়তমা নলিনীর মুখকমল হইতে হিমরূপ অশ্রুজল বিদূরিতকরণার্থ প্রত্যাগত হইবেন। তখন তাঁহার পথ অবরুদ্ধ করিলে তোমার প্রতি তাঁহার ক্রোধ ও জন্মিবার অবশ্যই সম্ভাবনা। ৩৯।

At that time, tears of women jealous (of their lover's nocturnal adventures with some other mistress) are to be wiped off by their lovers; so quit the path of the sun quickly. He, too, having returned to wipe off the dew-tears from the lotus-face of beloved lotus-plant, would be highly incensed at this if thou hast obstruding his ray-hands.—39.

Notes.

1. तस्मिन् काले—पूर्व्वोक्ते सूर्य्योदयसमये। (At sun-rise.)

2. प्रणयिभिः—प्रियतमैः ; वल्लभैः ; शठैः इत्यर्थः by their lovers. "कृत्यानां कर्त्तरि वा" इति कर्त्तरि विकल्पे षष्ठी ।

3. खण्डितानां—This refers to one of the eight classes of heroines mentioned by the *Sanskrit rhetoricians.* It has been defined by कविराज thus :—"पार्श्वमेति प्रियो यस्या अन्यसम्भोगचिह्नितः । सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता ॥"

4. शान्तिनेयं—Lovers passing the night away from the embrace of their lady-love come back in the morning and with sweet words of affection rub the tears rolling down the cheeks of the jealous ladies. "रात्रौ बहिर्वासित्वापि प्रभाते तावद्दिनकृत्यार्थं अवश्यं पुरुषेण गृहमागन्तव्यम्, दिनकृत्यप्रवर्त्तनार्थञ्च दृष्टखापदुःखविक्लवायाः प्रियायाः केनापि वचनविन्यासेन करस्पर्शेन वा नयनाम्बुजलं निवारणीयं" इति चारित्रवर्धनः । Students through the immortal songs of Jayadeva are all familiar with the incident of Radha and Krishna and their constant quarrels and reconciliations.

5. भानोः—The sun is represented as the lover of नलिनी. The sun passed the night away from the sweet embrace of his dear नलिनी and so in the morning he has to propitiate her.

6. प्रालेयास्रं—प्रालेयमेव अस्रम् अश्रु इति ;(रूपकसमासः); tears of dews. Here the dews formed on the lotus are described as tears.

7. कमलवदनात्—कमलमेव वदनं तस्मात् (रूपक)। Here the lotus-plant (नलिनी) is the heroine and the lotus (कमल) is her face.

8. प्रत्यावृत्तः—प्रत्यागतः ; returned.

गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने
छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।
तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्य्या-
न्मोघीकर्त्तुं चटुलशफरोद्वर्त्तनप्रेक्षितानि ॥ ४० ।

9. कररुधि—करान् हस्तान् किरणान् च रुणद्धि इति कररुत् (कर + रुध् + क्विप् कर्त्तरि) तस्मिन् ।

10. अनल्पाभ्यसूयः—अल्पा अभ्यसूया इति अल्पाभ्यसूया (कर्म्मधारयः) अविद्यमाना अल्पाभ्यसूया यस्य सः ; he whose anger is not little ; *i. e.*, very angry. It is generally observed that lovers when they are impeded in the gratification of their desire by some person, become highly incensed. Hence the sun may be greatly incensed. Mallinatha here quotes a text to say that he who is jealous of a Brahman, the sun, Siva and Vishnu surely loses all his good and goes to the hell called *Raurava.* The cloud, if he obstructs the rays of the sun and thereby shows his jealousy to him, all his desires will be frustrated.

Prose order—गम्भीरायाः सरितः प्रसन्ने चेतसीव (प्रसन्ने) पयसि प्रकृतिसुभगः ते छायात्मापि प्रवेशं लप्स्यते ; तस्मात् अस्याः कुमुदविशदानि चटुलशफरोद्वर्त्तनप्रेक्षितानि धैर्य्यात् मोघीकर्त्तुं न अर्हसि । ४० ।

Paraphrase—यथा कश्चित् धीरोदात्तनायकः कस्याश्चित् उदात्ताया नायिकायाः सानुरागे हृदये लब्धप्रवेशः तत्कटाक्षादिभिर्विलासचेष्टाभिर्विमुग्धचित्तस्तया सह रममाणः सुखेन कालं नयति तथा त्वमपि गम्भीराया नाम नद्याः निर्म्मले जले प्रतिबिम्बितात्मा तद्रसाभ्यन्तरो भव सा तु त्वयि चटुलशफरोद्वर्त्तनरूपं कटाक्षं पातयिष्यति त्वं धृष्टनायक इव तस्या स्तत्तत्विलासचेष्टितम् अवज्ञया मा द्राक्षीः । ४० ।

Change of voice—* प्रकृतिसुभगेन * छायात्मनापि प्रवेश लप्स्यते; * न चल्यं ते (त्वया)। ४०।

Sanjivani—गम्भीराया इति। गम्भीरायाः नाम सरितः उदात्तनायिका च ध्वन्यते प्रसन्ने अनुरक्तत्वात् दोषरहिते चेतसि इव प्रसन्ने निर्म्मले पयसि प्रकृत्या स्वभावेन सुभगः सुन्दरः। "सुन्दरेऽधिकभाग्ये च दुर्हिनेतरवासरे। तुरीयांशे श्रीमति च सुभगः" इति शब्दार्णवे। ते तव छाया चासौ आत्मा च सोऽपि प्रतिबिम्बशरीरं वा प्रवेशं लप्स्यते साक्षात् प्रवेशम् अनिच्छोरपि इति भावः तस्मात् छायाद्वारापि प्रवेशावश्यम्भावित्वात् अस्याः गम्भीरायाः कुमुदवत् विशदानि धवलानि चटुलानि शीघ्राणि शफराणां मीनानाम् उद्वर्त्तनानि उल्लुण्ठितान्येव प्रेक्षितानि अवलोकनानि। "त्रिषु स्यात् चटुलं शीघ्रम्" इति विश्वः। एतावदेव गम्भीराया अनुरागलिङ्गम् धैर्य्यात् धार्ष्ट्यात् मोघीकर्त्तुं विफलीकर्त्तुं न अर्हसि न अनुरक्ता विप्रलम्भव्या इत्यर्थः। धूर्त्तलक्षणं तु लिम्पति नित्यं गमितां कामिनीमिति सुन्दरः। उपेत्यरक्तां यत्नेन रक्तां धूर्त्तो विमुञ्चतीति। ४०।

হে পয়োধর, তোমার স্বভাবসুন্দর মূর্ত্তিখানি ছায়ারূপে গম্ভীরা তরঙ্গিণীর বিমল সলিলে (উদাত্তনায়িকার নির্ম্মল হৃদয়ের ন্যায়) প্রবেশ লাভ করিবে; সুতরাং গম্ভীরভাব ধারণ করিয়া (অর্থাৎ ধৈর্য্যপূর্ব্বক ঔদাসীন্য অবলম্বনপূর্ব্বক) অনুরাগিণী সকামা সেই স্রোতস্বিনীর কুমুদবৎ বিশদ ও চঞ্চলশফরীর উদ্বর্ত্তনরূপ কটাক্ষপাত বিফল করিও না। ৪০।

And thyself, naturally amiable, will find entrance in the form of a shadow into the pellucid water of the *gambhira* like unto the virgin heart of a noble maid ; thou shouldst not, therefore, out of gravity (of temper *i. e*. indifference) on thy part, disappoint her (amorous) glances of the rapid gambols of the *safaras* bright as the lotus of the night *(kumuda)*—40.

Notes.

1. गम्भीरायाः—"This river and the *Gandhavati* in the vicinity of the temple of Siva which lately occurred are probably amongst the numerous and nameless brooks with which the province of *Malwa* abounds." Prof. Wilson. The late lamented Anandaram Baroon, however, thinks that it meant for the deep *Sipra* which the poet has mentioned by name in verse 31 ; and indeed there is no reason why we should not concur with him in the absence of any strong proof on the contrary.

2. प्रसन्ने—(प्र + सद् + क्तः कर्त्तरि) निर्मले ; lympid, pellucid.

3. चेतसि इव—चित्ते इव । This gives rise to an implied simile. Gambhira means (1) the stream called गम्भीरा (2) उदात्तनायिका, अनुपलक्षणीयमनोभावनायिका । प्रसन्ने— 1) मलादिदोषरहिते and (2) अनुरक्तत्वात् दोषरहिते । *Mallinatha* explains it in two ways—the cloud itself in the form of a shadow or its body reflected in water. अपि—the force of अपि as taken by Mallinath is—साक्षात् प्रवेशं अनिच्छोरपि इति भावः तस्मात् छाया द्वारापि प्रवेशावश्यम्भावित्वात् *i. e*., even though thou art unwilling to enter the heart directly as thou art not to linger in thy way, still &c. Saroddharini explains it very clearly thus :—

"छाया प्रतिबिम्बं तद्रूपः आत्मा छायात्मा प्रकृतिसुभगस्य पुरुषस्य गम्भीरायाः अनुपलक्षणीयमनोभावनायिकायाः छायात्मापि चिरादिलाषितरूपमपि चेतसि प्रवेशं लभते। अन्यभावेषु व्याख्या—यथा अन्योऽपि यः प्रकृतिसुभगः भवति तस्य छायात्मापि प्रतिकायालेख्यगतमपि रूपं कस्याचित् कस्याचित् गम्भीरायाः गाम्भीर्य्यगुणशालिन्याः चित्ते प्रविशति परोक्षेऽपि तदनुरागिणी भवति तथा गम्भीराया चेतसि तव छायात्मापि इति भावः।

4. कुमुदविशदानि—कुमुदानि इव विशदानि ("उपमानानि सामान्यवचनैः" इति उपमानसमासः); as white (bright) as the *kumudas i. e.*, lotuses that blow at night.

5. चटुलशफरोद्वर्त्तनप्रेक्षितानि—शफराणां मीनानां उद्वर्त्तनानि उत्लुण्ठितानि इति शफरोद्वर्त्तनानि (६ष्ठी तत्)। चटुलानि शीघ्राणि शफरोद्वर्त्तनानि इति कर्म्मधारयः); तानि एव प्रेक्षितानि (प्र+ईक्ष्+नपुंसके भावे क्त) अवलोकनानि, कटाक्षान् इत्यर्थः (रूपककर्म्मधारयः); the glances consisting of the rapid gambols of the safaras (or the fish). "The *safara* is described as a small white glistening fish, which darting rapidly through the wator, is not unaptly compared to the twinkling glances of a sparkling eye. Assigning the attributes of female beauty to a stream ceases to be incongruous, when we advert to its constant perzonification by the Hindus: and it is as philosophical as it is poetical to affiance a river and a cloud" Prof. Wilson. Cf. Kirata. VI. 16. "स ततार सैकतवतीरभितः शफरीपरिस्फुरितचारुदृशः। ललिताः सखीरिव बृहज्जघनाः सुरनिम्नगामुपयतीः सरितः॥"

6. धैर्य्यात्—धैर्य्यमवलम्ब्य; "ल्यब्लोपे कर्म्मण्यधिकरणे च" इति पञ्चमी। यद्वा हेतौ पञ्चमी। Mallinatha explains धैर्य्यात् by चाञ्चल्यात् which is nc doubt a bold flight from the sense of the original. We aggree with Pandit Vidyasagara in explaining it as—"धैर्य्यात् धैर्य्यमाश्रित्य गम्भीरायाः अनुरागलिङ्गदर्शनेऽपि निर्व्विकार-

तस्याः किञ्चित् करधृतमिव प्राप्तवानीरशाखं
हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम् ।
प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि
ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः ४१।

चित्तीभूत्वा इत्यर्थः ।" Herein we are sided by चारित्रवर्धन, सुमति विजय, वल्लभ and many others.

7. मोघोकर्त्तुं—अमोघानि मोघानि कर्त्तुं इति मोघीकर्त्तुं (अभूततद्भावे च्विः । गतिसमासश्च); विफलीकर्त्तुं ; to make futile, useless. शकधृषेत्यादिना अर्हधातोर्योगे तुमुन् ।

8. अत्र उपमारूपकयोः सङ्करः ।

Prose order—(हे) सखे प्राप्तवानीरशाखम् अतएव किञ्चित् करधृतमिव स्थितं मुक्तरोधोनितम्बं नीलं तस्याः सलिलवसनं हृत्वा लम्बमानस्य ते प्रस्थानं कथमपि भावि (यतः) ज्ञातास्वादः कः विवृतजघनां विहातुं समर्थः (न कोऽपीत्यर्थः) । ४१ ।

Paraphrase—यथा कश्चित् नायकः लज्जितया नायिकया करकमलगृहीत नितम्बात् नीलवसनम् बलात् अपहृत्य शनैः पलायते को वा रसज्ञः तादृशीं विवृतजघनां कान्तां पश्यन् द्रुतं यातुं क्षमते तथा त्वमपि स्पृष्टवेतसशाखम् त्यक्ततटं गम्भीरायाः नीलवर्णं सलिलम् आदाय जलभरमन्थरगतिः शनैः शनैः यास्यसि को वा त्वथा भाराक्रान्तः द्रुतं गन्तुमीशः स्यात् । ४१ ।

Change of voice—० ० ० प्रस्थानेन ० भाविना भूयते ज्ञातास्वादेन केन विवृतजघना विहातुं समर्था भूयते । ४१

Sanjivani—तस्या इति । हे सखे प्राप्ता वानीरशाखा वेतसशाखा येन तत् तथोक्तम् अत एव किञ्चित् ईषत् करधृतं हस्तावलम्बितम् इव स्थितं मुक्तः त्यक्तः रोधः तटम् एव नितम्बः कटिः येन तत् तथोक्तम् ।

"नितम्बः पश्चिमे श्रोणिभागेऽद्रिकटके कटाव" इति यादवः। नीलं कृष्णवर्णं तस्याः गम्भीरायाः सलिलम् एव वसनं हृत्वा अपनीय। "प्रस्थानसमये प्रेयसीवसनहरणं विरहतापापनोदनार्थम्" इति प्रसिद्धम्। लम्बमानस्य पीतसलिलभरात् लम्बमानस्य अन्यत्र जघनारूढ़स्य ते तव प्रस्थानं प्रयाणं कथमपि कृच्छ्रेण भावि कृच्छ्रत्वे हेतुमाह ज्ञातेति ज्ञातास्वादः अनुभूतरसः कः पुमान् विवृतं प्रकटीकृतं जघनं कटिः तत्पूर्व्वभागो वा यस्याः ताम्। "जघनं स्यात् कटेः पूर्व्वश्रोणिभागापरांशयोर्" इति यादवः। विहातुं त्यक्तुं समर्थः न कोऽपि इत्यर्थः।४१।

হে সখে, পূর্ব্বোক্ত গম্ভীরা নদীর (কোনও উদাত্তনায়িকার ন্যায়) নিতম্বরূপ তটপ্রদেশ হইতে মুক্ত ও জলবেতস লতাকৃষ্ট হওয়াতে কিয়দংশে হস্তগৃহীতরূপে প্রতীয়মান নীলবারিরাশিরূপ নীলাম্বর অপসৃত করিয়া (যে হেতু প্রস্থানকালে বিরহতাপ শান্তির জন্য প্রেয়সী বস্ত্র হরণ প্রসিদ্ধ) তুমি (জলপান হেতু গুরুভারাবনত বলিয়া) লম্বমান হইয়া অতি ক্লেশের (অনিচ্ছার) সহিত সে স্থান পরিত্যাগ করিবে (কারণ) জ্ঞাতাস্বাদ অর্থাৎ রসজ্ঞ ব্যক্তি কোথায় উন্মুক্তজঘনা নায়িকা পরিত্যাগ করে? (কোথাও নহে)। ৪১।

After removing its (*i. e.*, her—the river being compared with a matron) blue vest of water, which, having uncovered the buttocks of banks, and clung to the *Bayas* (a kind of aquatic reed) is, as if, a little raised with the hand, thou Oh my friend, with thy body elongated (owing to the great weight of the liquid imbibed) wilt take thy departure with no small difficulty, (for) who can easily forsake a woman with uncovered rump, that has experience of the pleasure (of enjoying it.)—41.

Notes.

1. प्राप्तवानीरशाखं—वानीरस्य वेतसस्य शाखा (६ष्ठी तत्) प्राप्ता वानीरशाखा येन तत् (बहुव्रीहिः)। "वनति भजते जलमिति (वन् + ईरण्) वानीरः" "शीत वानीर वञ्जुला." इत्यमरः। Prof. Wilson remarks on the word—"The *Vetasa* or *Bayas* is a kind of reed growing near brooks,"—having caught hold of the aquatic reeds.

2. किञ्चित् करधृतमिव स्थितं—किञ्चित् ईषत् (slightly) करेण धृतम् (३या तत्) करधृतमिव (इव उत्प्रेक्षावाची) स्थितम्; as if somewhat held up by the hand. The सुखबोधिका explains thus—"आक्रान्तिच्छन्त्यपि स्त्रीस्वभावाद् वसनं पाणिभ्यामवरुणद्धि अतएव करधृतमिव भवति"।

3. मुक्तरोधोनितम्बं—रोधः तटः एव नितम्बः कटिः रोधोनितम्बः (रूपक कर्म्मधारयः) मुक्तः रोधोनितम्बः येन तत् मुक्तरोधोनितम्बं (बहुव्रीहिः) तत् (रुध् + असुन् = रोधस्) uncovered loins in the shape of river banks.

4. तस्याः—गम्भीरायाः पूर्व्वोक्तायाः। Of the river Gambhira.

5. नीलं सलिलवसनं—सलिलमेव वसनम् (रूपक कर्म्मधा) the comparison of blue water to a sable garment is very befitting when the river is compared with a woman.

6. हृत्वा—having taken off according to Malli. It is the custom with lovers while departing, to take off the clothes of their sweet-hearts in order to abate the heat of their body generated by the affliction of the coming separation.

7. लम्बमानस्य—(लम्ब् + शानच्, कर्त्तरि) Mallinatha gives two reasons elongated (1) on account of the weight of the water

त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः ।
नीचैर्वास्यत्युपजिगमिषोर्देवपूर्व्वं गिरिं ते
शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥४२॥

drunk, (2) on account of lying on the loins of the river. But the सारोद्धारिणी explains लम्बमानस्य as विलम्बं कुर्व्वतः । And this seems preferable.

8. ते प्रस्थानं कथमपि भावि—thy departure will take place after strenuous efforts on thy part. भावि (भू + भविष्यति काले णिनिः adj. to प्रस्थानं) ।

N. B. Now our poet supports his remark by a अर्थान्तरन्यास ।

9. ज्ञातास्वादः कः—ज्ञातः अनुभूतः आस्वादः रसः येन सः (बहुव्रीहिः) तादृशः कः पुमान्—one who has had experience of the pleasure arising out of gratification of sensual enjoyment.

10. विवृतजघनां &c.—विवृतं प्रकटीकृतं जघनं कटिः तत्पूर्व्वभागो वा यस्याः सा विवृतजघना (बहुव्रीहिः) तां—a woman who has uncovered her loins. This is what Malli. reads. Commentators like भरत, सनातन, रामनाथ कल्याणमल्ल &c. read पुलिनजघनां and explains पुलिनमेव जघनं यस्याः सा तां तथोक्तां । In सारोद्धारिणी सुखबोधिका &c. the reading is विपुलजघनां meaning पृथुकटीं ।

11. According to सारोद्धारिणी the figure of speech in this stanza is रूपकोत्प्रेक्षार्थान्तरन्यासानां सङ्करः according to others रूपकोत्प्रेक्षालङ्कारः ।

12. Conjugation—हृ—हरति हरते, जहार जह्रे, हरिष्यति हरिष्यते, अहार्षीत् अहृत, हृत ।

हा—जहाति, जहौ, हास्यति, अहासीत्, हीन ।

Prose order—त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः स्रोतोरन्ध्रध्वनित

सुभगं (यथा तथा) दन्तिभिः पीयमानः काननोदुम्बराणाम् परिणमयिता शीतो वायुः देवपूर्व्वं गिरिम् उपजिगमिषोः ते नीचैः वास्यति। ४२।

Paraphrase—(हे मेघ!) तव वर्षणेन उपबृंहिताया भूम्याः गन्धसंसर्गेण सुरभिः, करिभिर्नासारन्ध्रैरव्यक्तमधुरं शब्दविशेषं कुर्व्वद्भिः आघ्रायमाणः वनजातजन्तुफलानां परिपाचयिता शीतलः पवनः देवगिरिम् उपगन्तुमिच्छोः तव (सम्बन्धे) मन्दं मन्दं प्रवक्ष्यति (त्वां मन्दं मन्दं वीजयिष्यतीत्यर्थः)। ४२।

Change of voice—त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्येण * * पीयमानेन * * परिणमयित्रा शीतेन वायुना वास्यते। ४२।

Sanjivani—त्वदिति। त्वन्निष्यन्देन तव वृष्ट्या उच्छ्वसितायाः उपबृंहितायाः वसुधायाः भूमेः गन्धस्य सम्पर्केण रम्यः सुरभिः इत्यर्थः। "स्रोतःशब्देन इन्द्रियवाचिना तद्विशेषो घ्राणं लक्ष्यते" "स्रोत इन्द्रिये निम्नगारये" इत्यमरः। स्रोतोरन्ध्रेषु नासाग्रकुहरेषु यत् ध्वनितं शब्दः तेन सुभगं यथा तथा दन्तिभिः गजैः पीयमानः वसुधागन्धलोभात् आघ्रायमाण इत्यर्थः अनेन मान्द्यम् उच्यते। काननेषु वनेषु उदुम्बराणां जन्तुफलानाम् "उदुम्बरे जन्तुफलो यज्ञाङ्गो हेमदुग्धकः" इत्यमरः। परिणमयिता परिपाचयिता "मितां ह्रस्व" इति ह्रस्वः। शीतो वायुः देवपूर्व्वं देवशब्दपूर्व्वं गिरिं देवगिरिम् इत्यर्थः उपजिगमिषोः उपगन्तुम् इच्छोः। "गमेः सन्नन्तादुप्रत्ययः"। ते तव नीचैः शनैः वास्यति त्वां वीजयिष्यति इत्यर्थः। सम्बन्धमात्रविवक्षायां षष्ठी। देवपूर्व्वं गिरिम् इत्यत्र देवपूर्व्वत्वं गिरिशब्दस्य न तु संज्ञिनस्तदर्थस्येति संज्ञायाः संज्ञिगतत्वाभावात् अवाच्यवचनं

दोषमाहुरालङ्कारिकाः तदुक्तम् एकावल्यां यदवाच्यस्य वचनमवाच्यवचनं हि तदिति। समाधानं तु देवशब्द-विशेषितेन गिरिशब्देन शब्दपरेण मेघोपगमयोग्यो देव-गिरिर्लक्ष्यते इति कथञ्चित् सम्माद्यम्। ४२।

(হে মেঘ) তোমার বর্ষণহেতু উচ্ছ্বসিত (ফাঁপা) মৃত্তিকার গন্ধ সংমিশ্রণ হেতু সুগন্ধবিশিষ্ট, (অতএব) হস্তিগণ কর্তৃক শুণ্ডর নাসিকাচ্ছিদ্রে মনোহর শব্দের সহিত আঘ্রাত, বনজাত যজ্ঞডুম্বুর ফল পাচক (পক্ককারক) শীতল বায়ু দেবগিরিগমনেচ্ছুক তোমাকে মন্দ মন্দ বীজন করিবে। ৪২।

(Oh cloud !) A cool breeze will gently fan thee, while thou art desirous of starting for Devagiri,—the breeze—pleasant owing to its connection with the smell of the earth swollen by thy downpours, drunk in (*i. e.*, smelt eagerly) by elephants in a manner agreeable to the hearing on account of the sounds produced in the nasal aperture of the proboscis, the ripener of the fruits of the Glomerous fig-trees growing in the forest.—42.

Notes.

1. त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः—तव निष्यन्दः वृष्टिः त्वन्निष्यन्दः (६ष्ठी तत्) (निष्यन्दः = नि + स्यन्द + कर्म्मणि घञ्) तेन उच्छ्वसिता उपबृंहिता (३या तत्) (उच्छ्वसिता = उत + श्वस् + कर्म्मणि क्त + आप्) वसुधा (कर्म्मधारय) भूमिः तस्याः गन्धः (६ष्ठी तत्) तस्य सम्पर्कः सम्बन्धः (सम् + पृच + भावे घञ्) तेन रम्यः सुरभिः (३या तत्) (रम्यः रमते अत्र इति रम अधिकरणे य)। (The wind) which is impregnated with the fragrance issuing from the ground swollen on account of the shower which thou hast shed. Commen-

tators like भरत, सनातन हरगोविन्द वल्लभ and others read पुण्यः instead of रम्यः and explain as मनोहरः or मनोरमः ।

2. स्रोतोरन्ध्रध्वनितसुभगम्—स्रोतसः घ्राणेन्द्रियस्य रन्ध्राणि कुहराणि (६ष्ठी तत्) तेषु यत् ध्वनितं शब्दः (७मी तत्) तेन सुभगं श्रुतिमधुरं (३या तत्) यथा तथा । This is an adverb qualifying the verb in पीयमानः । Mallinath takes the word स्रोतस् (meaning an organ of sense) to mean the special organ of smell by लक्षणा (transference).—In a manner delightful to the organ of hearing on account of the production of a peculiar sort of sound in the nasal pipe of the trunks of elephants.

3. दन्तिभिः पीयमानः—प्रशस्तौ दन्तौ स्तः येषाम् ते तैः (दन्त + प्राशस्त्यर्थे इनिः) पीयमानः (भ्वादि पा or दिवादि पी + शानच् कर्मणि) । Drunk in by the elephants i. e. the breeze being earnestly inhaled by the elephants. The elephants have a liking for the odour which come out of the ground when drenched with the rains after the summer season. This epithet indicates the mildness of the breeze.

4. काननोदुम्बराणाम् परिणमयिता—काननेषु यानि उदुम्बराणि काननोदुम्बराणि (७मी तत्पुरुष) काननोदुम्बराणां परिणमयिता (परि + नम + णिच् "तत्साधुकारिषु" तृन्, न लोकाव्ययेत्यादिना तृन्प्रत्ययस्य निषिद्धत्वात् काननोदुम्बराणाम् इत्यत्र शेष षष्ठी बोद्धव्या ; यद्वा तृच्प्रत्ययेन परिणमयिता इति पदं सिद्धं अतः अत्र कर्मण्येव षष्ठी । "मितां ह्रस्वः" इति घटादित्वात् नमधातोः उपधायाः ह्रस्वत्वम् ।—The ripener of the figs growing in the woods.

5. शीतो वायुः—a cool breeze—cool on account of the shower thou hast poured. वायुः—(वाति प्रवहति इति वा + कर्त्तरि उण्) ।

6. देवपूर्व्वं गिरिम्—देवगिरिमित्यर्थः। Cf. "हिरण्यपूर्व्वं कशिपुं प्रचचते" माघ। Mallinath here remarks that the peculiar construction of the word (which our poet was obliged to take resort to for the sake of metre only) should be understood in this way—viz the word देव should be placed before and united with the word गिरि but not with its import (idea conveyed by the word).

As regards the Geographical position, Professor Wilson remarks as follows :—

"Devagiri is the *mountain of the deity*, and may perhaps be the same with a place called, in the map, *Dewagur*, situated south of the *Chumbul*, in the centre of the province of *Malwa*, and precisely in the line of the cloud's progress; which as we shall hereafter find, has been continued nearly due north from *Oujein*. This hill is the site of a temple of *Kartikeya*; which, as well as that of *Siva* described above, we must suppose to have enjoyed, in the days of antiquity, considerable reputation, or they would not have been so particularly specified in the poem."

Dr. Fleet gives the position of Devagur (देवगड) thus—

"The village of *Deogada* is situated about sixty miles to the south-west of Jhansi, in Scindea's Dominions in central India."

However this is certain that the modern *Devagada* or Doulatabad is the ancient *Devagiri*.

7. उपजिगमिषोः ते नीचैः वास्यति—will gently fan thee that art desirous of proceeding (to Devagiri). Mallinath says that the 6th case ending ते is used in the place of the 2nd

तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः ।
रक्षाहेतोर्नवशशिभृता वासवीनां चमूना-
मत्यादित्यं हुतवहमुखे सम्भृतं तद्धि तेजः ॥ ४३।

case-ending त्वाम् by the poet in accordance with the rule विवक्षावशात् कारकाणि ।

8. The figure (अलङ्कार) of this stanza is अनुमान according to the सारोद्धारिणी and सुमतिविजय ।

9. Conjugation :—

वा—वाति ; लिट् ववौ, ववथ ववाथ ; लुङ्—अवासीत् ।

पा—पिबति ; लङ्—अपिबत् ; लुङ् अपात् ; लिट् पपौ ।

नम्—नमति ; ननाम ; अनंसीत्, नंस्यति ।

Prose order—तत्र नियतवसतिं स्कन्दं पुष्पमेघीकृतात्मा (सन्) व्योमगङ्गाजलार्द्रैः पुष्पासारैः भवान् (स्वयमेव) स्नपयतु, तत् वासवीनां चमूनां रक्षाहेतोः नवशशिभृता हुतवहमुखे सम्भृतम् अत्यादित्यं तेजः हि । यद्वा हि (यस्मात्) तत् वासवीनां चमूनाम् इत्यादि । ४३ ।

Paraphrase—तस्मिन् (देवगिरौ) नित्यसन्निहितं कार्त्तिकेयं कुसुम वर्षुक-जलधरीकृत-शरीरः (सन्) मन्दाकिनीतोयसिक्तैः कुसुमवृष्टिभिः भवान् अभिषिञ्चतु । तत् (कार्त्तिकेयः) सुरपतिसैनिकानां रक्षणार्थम् नवोनन्दु-कलाधारिणा (शिवेन) वह्निवदने प्रक्षिप्तं सूर्य्याधिकतेजोयुक्तं महः एव । ४३ ।

Change of voice—* नियतवसतिः स्कन्दः पुष्पमेघीकृतात्मना * * भवता स्नाप्यताम्, तेन * * सम्भृतेन अत्यादित्येन तेजसा (भूयते) । ४३ ।

Sanjivani—तत्रेति । तत्र देवगिरौ नियता वसतिः यस्य तं नित्यसन्निहितम् इत्यर्थः । पुरा किल तारका-ख्यासुरविजयसन्तुष्टसुरप्रार्थनावशात् भगवान् भवानी-

नन्दनः स्कन्दो "नित्यम् अहमिह सह शिवाभ्यां वसामि" इत्युक्त्वा तत्र वसति इति प्रसिद्धिः। स्कन्दं कुमारं स्वामिनं पुष्पाणां मेघः पुष्पमेघः पुष्पमेघीकृतात्मा कामरूपत्वात् पुष्पवर्षुकमेघीकृतविग्रहः सन् व्योमगङ्गाजलार्द्रैः पुष्पासारैः पुष्पस्रातैः। "धारासम्पात आसारः" इत्यमरः। भवान् स्वयम् एव स्नपयतु अभिषिञ्चतु स्वयंपूजायाः उत्तमत्वात् इति भावः। तथाच शम्भुरहस्ये "स्वयं यजति चेत् देवमुत्तमा सोदरात्मजैः। मध्यमा याजयेद्भृत्यैरधमा याजनक्रिया" इति। स्कन्दस्य पूज्यत्वसमर्थकम् अर्थान्तरं न्यस्यति रचेति। तत् भगवान् स्कन्द इत्यर्थः। विधेयप्राधान्यात् नपुंसकनिर्देशः। वासवस्य इमाः वासव्यः। "तस्येदम्" इत्यण्। तासां वासवीनाम् ऐन्द्रीणां चमूनां सेनानां रक्षा एव हेतुः तस्य रक्षाहेतोः रक्षया कारणेन रक्षार्थम् इत्यर्थः। "षष्ठी हेतुप्रयोगे" इति षष्ठी। नवशशिभृता भगवता चन्द्रशेखरेण वहति इति वहः। "पचाद्यच्"। हुतस्य वहः हुतवहः वह्निः तस्य मुखे सम्भृतं सञ्चितम् आदित्यम् अतिक्रान्तम् अत्यादित्यम्। "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" इति समासः। तेजो हि साक्षात् भगवतो हरस्य एव मूर्त्यन्तरम् इत्यर्थः अतः पूज्यमिति भावः। मुखग्रहणं तु शुद्धत्वसूचनार्थं तदुक्तं शम्भुरहस्ये "गवां पश्चात् द्विजस्याङ्घ्रि योगिनां हृत् कवेर्वचः। परं शुचितमं विद्यान्मुखं स्त्रीवह्निवाजिनाम्" इति।४३।

সেথানে (দেবগিরিতে) নিত্য সন্নিহিত কার্ত্তিকেয়দেবকে স্বদেহ পুষ্পবর্ষিমেঘরূপে পরিণত করিয়া (যে হেতু তুমি স্বেচ্ছাশরীরধারী) আকাশগঙ্গাজলসিক্ত পুষ্পধারাসম্পাত বর্ষণ করিয়া তুমি (স্বয়ং) অভিষিক্ত কর (কারণ) ইহা (কার্ত্তিকেয়) ইন্দ্রের সেনাবর্গের রক্ষার্থ নবচন্দ্রকলাধারী শিব কর্ত্তৃক অগ্নিমুখে প্রক্ষিপ্ত সূর্য্যাধিকতেজো-যুক্ত তেজঃই (তেজঃ ব্যতীত অপর কিছু নহে, অর্থাৎ সাক্ষাৎ শিবের মূর্ত্ত্যন্তর মাত্র)। ৪৩।

Thou, having first changed thyself into a cloud of flowers, (for thou art capable of taking any form thou choosest), shouldst suffuse *Skanda* (Kartikeya), who has a permanent abode in the place (Devagiri), with showers of floral-rains, drenched with the water of the celestial ganges; it (Skanda) being the lustrous humour, surpassing the sun in brilliance, cast by the God bearing the new-born Moon (viz Siva) in the mouth of *Agni* (Fire-god), for the safe-guard of the armies belonging to *Vasaba* (Indra)—43.

Notes.

1. तत्र—there (in Devagiri or Deogur).

2. नियतवसतिं—नियता नित्या वसतिः सान्निध्यं यस्य सः तम् (बहुव्री) one who has taken up (the place) as his eternal abode. Mallinath here alludes to the fact, that, at the request of the Gods pleased on account of the destruction of the demon *Taraka*, *Skanda* the son of Parvati, gave his assent to reside there in company with *Hara* and Parvati.

3. स्कन्दं—स्कन्दयति शोषयति दानवान् इति (स्कन्द + णिच् + अच्) the destroyer of demons. This is one of the appellations of कार्त्तिकेय। On the birth of this deity, as described in the latter hemistich of the stanza, Professor Wilson notes as

follows :—"The miraculous birth of the warrior deity, *Skanda*, was for the purpose of destroying *Taraka* an *Asura* or demon, who, by the performance of continued and severe austerities had acquired powers formidable to the Gods. The germ of *Skanda* was cast by *Siva* into the flame of *Agni* the god of fire; who being unable to sustain the increasing burden, transferred it to the goddess *Ganga*: she accordingly was delevered of the deity *Skanda*; who was afterwards received and reared, amongst thickets of the *Sara* reeds (Saccharum Sara) by the six daughters of a king, named *Krittica*; or, according to other legends by the wives of seven great *Rishis* or saints. In either case they form in astronomy the asterism of the *Pleiades*. Upon his coming to maturity *Skanda* encountered and killed the demon, who had filled the region of Indra with dismay.

4. पुष्पमेघीकृतात्मा—पुष्पप्रदः मेघः पुष्पमेघः (शाकपार्थिवादिवत् समासः) अपुष्पमेघः पुष्पमेघः कृतः इति अभूततद्भावे च्विः पुष्पमेघीकृतः ("कुगतिप्रादयः" इति गतिसमासः) पुष्पमेघीकृतः आत्मा येन सः पुष्पमेघीकृतात्मा (बहुव्री)—having transformed thyself, the ordinary cloud, into a cloud sprinkling flowers (because of supernatural powers consequent on the epithet कामरूपं in stanza No. 6, Canto I,)

5. व्योमगङ्गाजलार्द्रैः पुष्पासारैः—व्योम्नः आकाशस्य व्योम्नि आकाशे वा या गङ्गा व्योमगङ्गा मन्दाकिनीत्यर्थः तस्याः जलानि तैः आर्द्राः तैः तादृशैः पुष्पाणाम् आसाराः धारासम्पाताः तैः पुष्पासारैः। With showers of flowers moistened with the water of the heavenly Ganges (*Mandakini*).

6. भवान् स्नपयतु—Thou (thyself personally) perform

the ritual ceremony of bathing. Mallinath here cites a passage from ब्रह्मरहस्य meaning that worship of Gods executed personally is the best sort of worship.

7. तत्—it or that (*Skanda*) तेजः इति विधेयप्राधान्यात् नपुंसकत्वम् ।

8. वासवीनां चमूनां रक्षाहेतोः—for the safeguard of the armies of Indra. रक्षा एव हेतुः (रूपक-कर्म्मधारय) the sixth case-ending is due to the rule 'षष्ठी हेतुप्रयोगे'—when the word हेतु is used and causality is denoted the sixth case-ending takes place.

9. नवशशिभृता—the wearer of the newly-born phase of the moon—viz *Siva.* नवः शशी (कर्म्मधा) नवशशिनं बिभर्त्ति इति भृ+क्विप् कर्त्तरि नवशशिभृत् तेन (उपपद समास)।

10. हुतवहमुखे सम्भृतम्—sprinkled in the mouth of the Fire-god. (lit. the god that carries the oblations.) हुतम्—हु+क्त "नपुंसके भावे क्तः"। आज्यादिकम् हविः इत्यर्थः। वहति इति वहः: पचाद्यच् हुतस्य वहः=हुतवहः। "अग्निमुखाः वै देवाः" इति श्रुतेः। for the allusion see the notes on the word पावकिः in sloka No. 44. For the propriety of the word मुख see Mallinath मुखग्रहणम् &c. The substance of which is that the face of the firegod is the most sacred part.

11. अत्यादित्यं तेजः हि—आदित्यम् अतिक्रान्तम् (प्रादिसमासः) qualifying तेजः—the glory surpassing the sun (in brilliance) the particle हि is used in निश्चय or ऐतिह्य।

12. Rhetoric—the अलङ्कार here is जातिः वा ऊर्ज्जस्वि according to different authorities.

13. Conjugations—स्ना—स्नाति, सस्नौ, अस्नासीत्।
णिजन्त—स्नपयति वा स्नापयति।

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति ।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभिर्गर्ज्जितैर्नर्त्तयेथाः ॥ ४४ ।

भृ—भ्वादि—भरति, भरते ।

जुहोत्यादि—बिभर्त्ति, बिभृते, बभार, बिभराञ्चकार, बभ्रे, बिभराञ्चक्रे । अभार्षीत्, अभृत ।

Prose order—ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति हरशशिरुचा धौतापाङ्गं पावकेः तं मयूरं पश्चात् अद्रिग्रहणगुरुभिः गर्ज्जितैः नर्त्तयेथाः । ४४ ।

Paraphrase—गौरी सुतस्नेहवशात् यस्य (मयूरस्य) स्फुरत् प्रभामण्डलं स्वयमेव भ्रष्टं पिच्छम् उतपलदलेन सह श्रवणे धारयति, शिव शिरश्चन्द्रचान्द्रिकया अतिधवलितनेत्रान्तम् कार्त्तिकेयस्य तं शिखिनं देवगिरि गुहासक्रमण जनित प्रतिध्वनिवशादति गम्भीरैगर्ज्जनैं नर्त्तितं कारय । ४४ ।

Change of voice—* * भवान्या * * क्रियते * * धौतापाङ्गः * * स मयूरः * * (भवता) नर्त्त्येत । ४४ ।

Sanjivani—ज्योतिरिति । ज्योतिषः तेजसः लेखाः राजयः तासां वलयं मण्डलम् अस्य अस्तीति तथोक्तं भ्रष्टं नतु लौल्यात् स्वयं छिन्नम् इति भावः । यस्य मयूरस्य बर्हं पिच्छम् । "पिच्छबर्हे नपुंसके" इत्यमरः । भवानी गौरी पुत्रप्रेम्णा पुत्रस्नेहेन कुवलयस्य दलं पत्रं तत् प्रापि यद्योगि यथा तथा कर्णे करोति दलेन सह धारयति इत्यर्थः यद्वा दलप्रापि दलभाजि दलार्हे कर्णे करोति । "क्विबन्तात् सप्तमी" । दलं परिहृत्य तत्स्थाने बर्हं धत्ते

इत्यर्थः । नाथस्तु "कुवलयदलक्षेपि" इति पाठमनुसृत्य क्षेपो निन्दा अपसारणं वेति व्याख्यातवान् । हरशशिरुचा हरशशिरश्चन्द्रिकया धौतापाङ्गं स्वतोऽपि शौक्ल्यात् अतिधवलितनेत्रान्तम् । "अपाङ्गौ नेत्रयोरन्तौ" इत्यमरः । पावकस्य अग्नेः अपत्यं पावकिः स्कन्दः । "अत इञ्" इति इञ् । तस्य तं पूर्व्वोक्तं मयूरं पश्चात् पुष्पाभिषेचनानन्तरम् अद्रेः देवगिरेः कर्त्तुः ग्रहणेन गुहासंक्रमणेन गुरुभिः प्रतिध्वानमहद्भिः इत्यर्थः गर्ज्जितैः नर्त्तयेथाः नृत्यं कारय माङ्गलिकभावेन भगवन्तं कुमारम् उपास्स्व इति भावः । नर्त्तयेथा इत्यत्र अणावकर्म्मकाच्चित्तवत्कर्त्तृकादित्यात्मनेपदापवादः निगरणचलनार्थेभ्यश्चेति परस्मैपदं न भवति तस्य न पादम्याङ्यमाङ्यस्परिमुहरुचिनृतिवदवस इति प्रतिषेधात् । ४४ ।

পুত্রস্নেহ বশতঃ ভবানী যাহার উজ্জ্বল মণ্ডলাকার বর্ণযুক্ত স্বয়ং ভ্রষ্ট পিচ্ছ পদ্মদলের সহিত (অথবা পদ্মদল প্রাপ্তি যোগ্য) কর্ণে ধারণ করেন ও শিবাশরশ্চন্দ্র-কিরণে অধিকতর শুভ্র অপাঙ্গবিশিষ্ট কার্ত্তিকেয়ের সেই ময়ূরকে অগ্রে পুষ্পাভিষেচন করিয়া পরে গিরিগুহা প্রতিধ্বনি হেতু অতি গম্ভীর তোমার গর্জ্জন দ্বারা নর্ত্তিত করাইবে।৪৪।

(Oh cloud,) thou shouldst make that (well-known) peacock of *Kartikeya* dance, whose moulted plumes bedecked with brilliant circular marks, *Bhábani* wears on her ears in addition to the lotus-petals there (or instead of the lotus-petals) through the maternal affection for her son, and whose eye corners (already white) are still whitened

by the beams of the moon in the head of Siva, by means of thy thundering sounds, made the louder, on account of their being echoed in the mountain (caves) after sprinkling it (with floral showers.)—44.

Notes.

1. ज्योतिर्लेखावलयि—qualifying बर्हं। ज्योतिर्लेखावलयम् अस्य अस्ति इति इनिप्रत्ययः। ज्योतिः—(द्युत्+इस्),—having circlets of lustrous lines, compare 'तद्रागरेखावलयं तनोति' विक्रमोर्व्वशी।

2. गलितं—moulted or naturally fallen off, and not torn off by force owing to eagerness.

3. यस्य बर्हं भवानी &c.—whose plumes, the wife of Siva places on her ears (as pendants) simply out of affection towards her son पार्व्वतिः। भवानी=(भव+स्त्रियां ङीप् आनुगागमश्च)।

4. कुवलयदलप्रापि—this epithet is interpreted by Mallinath in two ways, first he takes it as an adverb modifying करोति and explains कुवलयस्य दलं (६ष्ठी तत्) तत्प्रापि (उपपद-समास) (प्र+आप्+णिनिः शीलार्थे) यथा भवति तथा। And puts the plume on her ears along with lotus-petals. Secondly he takes it as an attribute of कर्णे and explains कुवलयदलम् आप् (प्र+आप्+क्विप) तस्मिन् (६ष्ठी तत्)—and puts the plume on her ear after putting aside the lotus-petals there.

Again commentators like वल्लभ सुमतिविजय &c. taking it for an adjective of बर्हं explain thus कुवलयदलप्रापि=कुवलयदल-प्रापणशीलम्।

5. कर्णे करोति—wears upon ears (as pendants.)

6. हरशशिरुचा—हरस्य शशी (६ष्ठी तत्) हरशशिनः रुक् तया—by the beams of light emanating from the moon on the head of शिव।

7. धौतापाङ्गं—धौतौ अपाङ्गौ यस्य स तम् (बहुव्रीहि)। An

adjective qualifying नयनम्—having the corners of eyes made whitened. Mallinath remarks that although naturally white they were still more enhanced in whiteness on account of the moon light.

8. पावकेः—lit. belonging to the son of the God of Fire. पुनाति इति पावक (पु+ण्वुल् कर्त्तरि) पावकस्य अपत्यं पुमान् पावकिः अपत्यार्थे ष्णि or इञ्। On the origin of the birth of कार्त्तिकेय Prof. Wilson remarks:—"*Skanda* or *Kartikeya* is the son of *Siva* and *Parvati*. There are various legends respecting his birth one of which is presently noticed by the poet. Several instances of the solitrry production of offspring occur in the Hindoo as well as in the Grecian mythology. Thus as Pallas sprang from the brow of Jupiter we have Skanda generated solely by the deity *Siva*. The miraculous birth of the warrior deity, Skanda, was for the purpose of destroying *Taraka* an *Asura* or demon, who by the performance of continued and severe austerities. had acquired powers formidable to the Gods, The germ of *Skanda* was cast by *Siva* into the flame of *Agni* the God of Fire; who being unable to sustain the increasing burden, transferred it to the Goddess *Gunga* she accordingly was delivered of the deity, *Skanda*; who was afterwards received and reared, amongst thickets of the *Sara* reeds (saccharun sara) by the six daughters of a king named Krittika; or according to other legends by the wives of seven great Rishis or saints. Upon his coming to maturity *Skanda* encountered and killed the demon who had filled the region of Indra with dismay."

आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा
सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्
स्रोतोमूर्त्त्या भुवि परिणतां रन्तिदेवस्य कीर्त्तिम्॥४५॥

भरत सनातन &c. read हरशशिरुचाप्याययेस्तं मयूरं and explain तं मयूरं प्रथमम् आप्याययेः तर्पयिष्यसि &c.

9. तं मयूरं—that (famous) peacock which belongs to Skanda.

10. पश्चात्—afterwards- after sprinkling with floral rains (अपर+अस्तात्, अपरस्य पश्चभावः वक्तव्यः)।

11. अद्रिग्रहणगुरुभिः गर्जितैः नर्त्तयेथाः—cause the peacock to dance through thy thundering noise heightened owing to its being reverberated in the mountains, अद्रेः ग्रहणम् (६ तत्) अद्रिग्रहणेन गुरुणो (३या तत्) तैः qualifying गर्जितैः (गर्ज्जं नपुंसके भावे क्त)। For the reflexive form in नर्त्तयेथाः see Malli.

12. Rhetoric—the अलङ्कार in the verse is उदात्त or जातिः according to the सारोद्धारिणी &c.

13. Conjugations:—

क्व—अकार्षीत्, अकृत।

नृत्—अनर्त्तीत्।

Prose order—एनं शरवणभवं देवम् आराध्य वीणिभिः सिद्धद्वन्द्वैः जलकणभयात् मुक्तमार्गः (सन्) उल्लङ्घिताध्वा सुरभितनयालम्भजां भुवि स्रोतोमूर्त्त्या परिणतां रन्तिदेवस्य कीर्त्तिं मानयिष्यन् व्यालम्बेथाः। ४५।

Paraphrase—पूर्व्वोक्तं षडाननं देवम् उपास्य वीणाधारिभिः तं देवम् उपवीणयितुमागतैः सिद्धमिथुनैः वीणाक्वणनप्रतिबन्धिजलसेकभयात् दत्तमार्गः

सन् कियदध्वानम् अतिक्रान्तश्च सन् गोमेधयागे गोवधोत्पन्नां जगति नदीप्रवाहरूपापन्नां दशपुरपतेः रन्तिदेवस्य कीर्त्तिं सत्करिष्यन् अवतरेः । ४५ ।

Change of voice—* * मुक्तमार्गेण उल्लङ्घिताध्वना * * * मानयिष्यता (त्वया) व्यालम्बेत । ४५ ।

Sanjivani—आराध्येति । एनं पूर्व्वोक्तं शराः वाणतृणानि । "शरो वाणे वाणतृणे" इति शब्दार्णवे । तेषां वनं शरवणम् । "प्रनिरन्तःशरेत्यादिना" णत्वम् । तत्र भवः जन्म यस्य तं शरवणभवं देवं स्कन्दम् । "शरजन्मा षड़ानन" इत्यमरः । अवर्ज्यो वहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपद इति वामनः । अवर्ज्यः अगतिकत्वात् आश्रयणीय इत्यर्थः । आराध्य उपास्य वीणिभिः वीणावद्भिः "व्रीह्यादित्वादिनिः" सिद्धद्वन्द्वैः सिद्धमिथुनैः भगवन्तं स्कन्दम् उपवीणयितुम् आगतैः इति भावः जलकणभयात् जलसेकस्य वीणाक्वणनप्रतिवन्धकत्वात् इति भावः मुक्तमार्गः त्यक्तवर्त्मा सन् उल्लङ्घिताध्वा कियन्तम् अध्वानं गत इत्यर्थः सुरभितनयानां गवाम् आलम्भेन संज्ञपनेन जायते इति तथोक्तां भुवि लोके स्रोतोमूर्त्त्या प्रवाहरूपेण परिणतां रूपविशेषम् आपन्नां रन्तिदेवस्य दशपुरपतेः महाराजस्य कीर्त्तिं चर्म्मण्वत्याख्यां नदीम् इत्यर्थः मानयिष्यन् सत्करिष्यन् व्यालम्बेथाः आलम्ब्य अवतरेः इत्यर्थः । पुरा किल राज्ञो रन्तिदेवस्य गवालम्भेषु एकत्र सम्भृतात् रक्तनिष्यन्दात् चर्म्मराशेः काचित् नदी सस्यन्दे सा चर्म्मण्वतीति आख्यायते । ४५ ।

শরবণভব এই দেবকে আরাধনা করিয়া, বীণাযুক্ত অতএব জলকণভীত সিদ্ধমিথুন কর্তৃক ত্যক্তমার্গ হইয়া কিয়দ্দূর গমন করিয়া জগতে (গোমেধাদি যজ্ঞে) গাভীবধজাত (চর্ম্মণ্বতী) স্রোতস্বিনীরূপে পরিণত রন্তিদেবের কীর্ত্তির সম্মানার্থ তৎসমীপে অবতরণ করিবে।

Thou, after worshipping the Deity produced in Sara forests, (viz Kartikeya) having thy track left unobstructed by pairs of *Siddhas* carrying lutes through fright of (thy) water drops also having travelled some distance, oughtest hang down to pay respects to the fame of *Rantideva* arising out of the sacrifice of kine, which (fame) being metamorphosed in the shape of a river in the world.—45.

Notes.

1. **एनं शरवणभवं देवमाराध्य**—having worshipped the aforementioned Deity born in a forest of Sara reeds. For the allusion regarding the origin of the epithet **शरवणभव** see the notes on the word पावकि in No. 44. The णत्व in the epithet is due to the rule "प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायाम्"। शराणाम् वनम् शरवणम् (६ तत), भवः (भू+अप्_ भावे) जन्म, शरवणे भवः यस्य स तम्। व्यधिकरण बहुव्रीहिः by the dictum of वामन—सप्तम्यौ &c. see Mallinath, which means that a व्यधिकरण बहुव्रीहि is obligatory when a word like जन्म is the उत्तरपद in a बहुव्रीहि compound.

2. **वीणिभिः सिद्धद्वन्द्वैः**—by the pairs of सिद्ध's (a kind of Demi god) with lyres in hand ; (the object of their arrival being to propitiate Skanda with their musical performances). वीणिभिः वीणाः सन्ति एषाम् इति वीणा+इनि "व्रीह्यादिभ्यश्च", सिद्धानां द्वन्द्वम् (६ तत्) द्वे द्वे इति द्वन्द्वम् निपातनात्।

3. जलकणभयात् मुक्तमार्गः—commentators like भरतसनातन &c. read दत्तमार्गः and रामनाथ reads दत्तवर्त्मा। In all these readings however, the sense remains almost the same—जलस्य कणः (६ तत्) जलकणः तस्मात् भयम् तस्मात् इति ५मी। मुक्तः मार्गः यस्य सः वहुव्रीहिः। Through fear of their lute strings getting moistened they drawing quickly back will leave thy path unobstructed.

4. उल्लङ्घिताध्वा—having passed over the way (i. e. some distance). उल्लङ्घितः अध्वा येन सः वहुव्रीहिः। उत् + लन्घ + क्त कर्मणि।

5. सुरभितनयालम्भजां—produced from the sacrifice of the daughters of सुरभि or the celestial cow. Professor Wilson notes—"the sacrifice of the horse or of the cow, the गोमेध or अश्वमेध appears to have been common in the earliest periods of the Hindoo rituals. It has been conceived that the sacrifice was not real but typical; and that the form of sacrificing only was performed upon the victim, after which it was set at liberty. The text of this passage however is unfavorable to such a notion as the metamorphosis of the blood of the kine into a river certainly implies that blood was diffused." सुरभेः तनयाः तासाम् आलम्भः तस्मात् तेन वा जायते इति जन् + ड कर्त्तरि + आप् आलम्भः=संज्ञपनं=बलिप्रदानं (आ + लम्भ + घञ्)।

6. भुवि स्रोतोमूर्त्त्या परिणतां—स्रोतसः (or स्रोतसः) मूर्त्तिस्तया (६ तत् पु.) transformed in the form of a current of water (*i. e.*, a river) in this earth. Prof. Wilson remarks. "The name of this river is not mentioned in the text of the poem,

but is said by the commentators to be the *charmanvati*; and such a name occurs in major Wilford's lists, from the *Puranas*, amongst those streams which seem to arise from the northwest portion of the *Vindhya* mountains. The modern appellation of the *charmanvati* is generally conceived to be the *churnball*, which corresponds with it in source and situation; and which as it must have been traversed by the cloud in its northerly course, would most probably have been described by the poet."

7. रन्तिदेवस्य कीर्त्तिम्—the glory or fame (embodied in the shape of a river) of *Rantideva*. Rantideva a prince of the Lunar Dynasty (चन्द्रवंश) of whom Dowson remarks:—"A pious and benevolent king of the Lunar race; sixth in descent from *Bharat*. He is mentioned in *Mahabharat* and *Puranas* as being enormously rich, very religious, and charitable and profuse in his sacrifices." But in connection with this name Prof. Wilson notes:—*Rantideva* is the name of a king of the चन्द्रवंश or family of the Moon: from his performance of the *Gomedha* (गोमेध) or sacrifice of the cow, which is prohibited in the present period of the world, (कलियुग) he must belong to one of the preceding *Yugas* or eyes. I find in Sir William Jone's lists, the eighteenth men in the line of the Moon in the second age (त्रेतायुग) is *Rantinava*, and as that is the only name resembling the appellation in our text, it is perhaps a corruption or error for *Rantideva*."

8. मानयिष्यन् व्यालम्बेथाः—(मान+णिच्+लृट) come downwards in order to pay respects.

9. Rhetoric—the figure of the sloka is रूपक।

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात् प्रवाहम् ।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी-
रेकं मुक्तागुणामिव भुवः स्थूलमध्येन्द्रनीलम् ॥४६॥

10. Conjugations—राध्—अरात्सीत् ; रराध ।

लन्घ—अलङ्घीत्, अलङ्घिष्ट ; ललङ्घ, ललङ्घे ।

लन्व—अलम्बिष्ट ; ललम्बे ।

Prose order—शार्ङ्गिणः वर्णचौरे त्वयि जलमादातुमवनते (सति) पृथुमपि दूरभावात् तनुं तस्याः सिन्धोः प्रवाहं गगनगतयः नूनं दृष्टीः आवर्ज्य एकं स्थूलमध्येन्द्रनीलं भुवः मुक्तागुणम् इव प्रेक्षिष्यन्ते । ४६ ।

Paraphrase—श्रीकृष्णवत्कृष्णवर्णशालिनि भवति सलिलग्रहणाय अवनते सति स्थूलमपि दूरत्वात् सूक्ष्मतया प्रतीयमानं चर्म्मण्वत्याख्यायाः नद्याः जलप्रवाहं सिद्धादयः खेचराः सत्यं दृष्टीः नियम्य एकयष्टिकं वृहदिन्द्रनीलमध्यमणिसमन्वितं धारित्रीदेव्याः कण्ठमुक्ताहारमिव द्रक्ष्यन्ति । ४६ ।

Change of voice—* * पृथुरपि दूरभावात् तनुः तस्याः सिन्धोः प्रवाहः गगनगतिभिः * * एकः स्थूलमध्येन्द्रनीलः भुवः मुक्तागुणः इव प्रेक्षिष्यन्ते । ४६ ।

Sanjivani—त्वयीति । शार्ङ्गिणः कृष्णस्य वर्णस्य कान्तेः चौरे वर्णचौरे तत्तुल्यवर्णे इत्यर्थः त्वयि जलम् आदातुम् अवनते सति पृथुम् अपि दूरभावात् दूरत्वात् तनुं सूक्ष्मतया प्रतीयमानं तस्याः सिन्धोः चर्म्मण्वत्याख्यायाः प्रवाहं गगने गतिर्येषां ते गगनगतयः खेचराः सिद्धगन्धर्व्वादयः । "अयमपि बहुव्रीहिः पूर्व्ववत् जन्माद्युत्तरपदेषु" द्रष्टव्यः । नूनं सत्यं दृष्टीः आवर्ज्य नियम्य एकम्

एकयष्टिकं स्थूल: महान् मध्य: मध्यमणीभूत: इन्द्रनील: यस्य तं भुव: भूमे: मुक्तागुणं मुक्ताहारम् इव प्रेक्षिष्यन्ते। अत्र अत्यन्तनीलमेघसङ्गतस्य प्रवाहस्य भूकण्ठमुक्तागुणत्वेन उत्प्रेक्षणात् उत्प्रेक्षेव इयमिति इवशब्देन व्यज्यते। निरुक्तकारस्तु तत्र तत्रोपमा यत्र इवशब्दस्य दर्शनमिति इवशब्ददर्शनात् अत्राप्युपमैवेति बभाम। ४६।

(হে জলদ) কৃষ্ণের বর্ণাপহারক (অর্থাৎ তদ্বৎ কৃষ্ণকান্তি) তুমি জল গ্রহণার্থ অবনত হইলে (সিদ্ধগন্ধর্ব্বাদি) গগনোর্দ্ধস্থিতগণ নিশ্চয়ই দৃষ্টি অবনত করিয়া, বিস্তৃতা হইলেও দূরতানিবন্ধন সূক্ষ্মরূপে প্রতীয়মান সেই (চর্ম্মণ্বতী) নদীর প্রবাহকে ধরিত্রীদেবীর বৃহৎমধ্যনীলকান্তমণিযুক্ত একগাছি মুক্তামালার ন্যায় দেখিবে। ৪৬।

(O cloud !) Thou that hast stolen the colour of Krishna (i. e. dark coloured) while coming down to take water, the passers by of the sky (viz Siddhas &c.) casting downward glances will actually see the stream of the river (chambul) seemingly thin though (really) of great dimensions on account of distance, as if it were a pearl-string bedecked with a massive blue-jewel (sapphire) in the midst.—46.

Notes.

1. शार्ङ्गिण: वर्णचौरे—one who has stolen the complexion of the holder of bow made of horns (*i. e.*, Krishna); stript of metaphor means one of a dark complexion. (शृङ्ग + अण् = शार्ङ्गम् अस्ति अस्य इति शार्ङ्गी तस्य।

2. त्वयि जलमादातुम् अवनते—while thou wouldst bend down (upon the river) to acquire water. त्वयि "यस्य च भावेन भाव-

लक्षणम्" इति भावे ७मी। अवनते—(अव + नम + क्त कर्त्तरि qualifying त्वयि) ।

3. पृथुमपि दूरभावात् तनुम्—although large still appearing as small and thin owing to great distance. दूरभावात् इत्यत्र हेतौ ५मी। दूरस्य भावः दूरभावः तस्मात् । (पृथु = प्रथ् to extend + कु कर्त्तरि) ।

4. तस्याः सिन्धोःप्रवाहः—the current of that river (viz—charmanvati or chumbal) सिन्धुः वमथुदेशाब्धिनदे ना सरिति स्त्रियाम् इति मेदिनी ।

5. गगनगतयः—गगने आकाशे गति येषां ते गगनगतयः "अवर्ज्यो हि बहुव्रीहिर्व्यधिकरणः जन्माद्युत्तरपदे" इति वामनोक्तेः व्यधिकरण बहुव्रीहिः—the frequenters of the firmament.

6. नूनं—सत्यं an indeclinable used as an adverb of प्रेक्षिष्यन्ते ।

7. दृष्टीः आवर्ज्य—turning the visual organ obliquely downwards. दृश्यते आभिः इति दृश् करणे क्तिन् = दृष्टयः लोचनानि = eyes आवर्ज्य = आङ् + वृज + ल्यप् ।

8. एकं स्थूलमध्येन्द्रनीलं—एकं = एकयष्टिकं, composed of one string only. मध्यः = मध्यमणीभूतः इन्द्रनीलः, स्थूलः मध्येन्द्रनीलः यस्य स तं बहुव्रीहिः qualifying मुक्तागुणम् having one large blue jewel (sapphire) set in the centre.

9. भुवः—belonging to the earth (personified).

10 मुक्तागुणमिव प्रेक्षिष्यन्ते—मुक्तानाम् गुणः तं—the sky-goers) will see as if it (the river) were a single string of pearls. With regard to the similarity in the sloka Prof. Wilson remarks:—"this comparison when understood is happily imagined ; but to understand it, we must suppose ourselves

तामुत्तीर्य्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम्।
कुन्दक्षेपानुगमधुकरश्रीमुषामात्मविम्बं
पात्रीकुर्व्वन् दशपुरवधूनेत्रकौतूहलानाम्॥४७।

above the cloud, and to be looking obliquely downwards upon its dark body; as shining drops of rain form a continuous line on either side of it, and connect it with the earth."

11. Rhetoric—for the figure of speech *vide* Malli. He criticises निरुक्तकार and states that the अलङ्कार here is उत्प्रेक्षा and not उपमा।

12. Conjugation—व्रज्—लट् व्रजति लिट् वव्राज ववजे लुङ्—अव्राजीत, अव्रजिष्ट।

ईक्ष् लिट् ईक्षाञ्चक्रे लुङ्—ऐक्षिष्ट।

Prose order—तामुत्तीर्य्य परिचितभ्रूलताविभ्रमाणां पक्ष्मोत्क्षेपात् उपरिविलसतकृष्णशारप्रभाणाम् कुन्दक्षेपानुगमधुकरश्रीमुषाम् दशपुरवधूनेत्र-कौतूहलानाम् आत्मविम्बं पात्रीकुर्व्वन व्रज। ४७।

Paraphrase—पूर्व्वोक्तां चर्म्मण्वतीम् उत्तीर्य्य भ्रूमूलताविलासानां नेत्र-लोमावनमनात् उपरि दीप्यमान कृष्णशवलद्युतीनां क्षिप्यमान नाख्यकुसुमानुधावि भ्रमर शोभानुकारिणाम् रन्तिदेवनगर दशपुर पुरस्त्रीनां नयनाभिलाषाणां स्वमूर्त्तिं विषयीकुर्व्वन् गच्छ। ४७।

Change of voice—(त्वया) * * पात्रीकुर्व्वता व्रज्यताम्। ४७।

Sanjivani—तामिति। तां चर्म्मण्वतीम् उत्तीर्य्य भ्रुवो लता: इव भ्रूलता:। "उपमितिसमास:"। तासां विभ्रमा: विलासा: परिचिता: कृता: येषु तेषां पक्ष्माणि

नेत्रलोमानि । "पक्ष्म सूत्रे च सूक्ष्मांशे किञ्जल्के नेत्रलोमनि" इति शाश्वतः । तेषाम् उत्क्षेपात् उन्नमनात् हेतोः कृष्णाश्च ताः शाराश्च कृष्णशाराः नीलशाराः । "वर्णो वर्णेन" इति समासः । कृष्णरक्तसिताः शारा इति यादवः । ततश्च शारशब्दात् एव सिद्धे कार्ष्ण्ये पुनः कृष्णपदोपादानं कार्ष्ण्यप्राधान्यार्थं रक्तत्वं तु न विवक्षितम् उपमानानुसारात् तस्य स्वाभाविकस्य स्त्रीनेत्रेषु सामुद्रिकविरोधात् इतरस्य अप्रसंगात् क्वचित् भावकथनं तु उपपत्तिविषयम्" । उपरि विलसन्त्यः कृष्णशाराः प्रभाः येषां तेषां कुन्दानि माघ्यकुसुमानि तेषां क्षेपः इतस्ततः चलनं तस्य अनुगाः अनुसारिणः ये मधुकराः तेषां श्रियं मुष्णन्ति इति तथोक्तानां क्षिप्यमाणकुन्दानुधाविमधुकरकल्पानाम् इत्यर्थः दशपुरं रन्तिदेवस्य नगरं तत्र वध्वः स्त्रियः । "वधूर्जाया स्नुषा स्त्री च" इत्यमरः । तासां नेत्रकौतूहलानां नेत्राभिलाषाणां साभिलाषदृष्टीनाम् इत्यर्थः आत्मबिम्बं स्वमूर्त्तिं पात्रीकुर्व्वन् विषयीकुर्व्वन् व्रज गच्छ । ४७ ।

(হে জলদ) তাহা (চর্ম্মণ্বতী নদী) উত্তীর্ণ হইয়া ভ্রূলতাবিলাসযুক্ত (উর্দ্ধদৃষ্টি বশতঃ) পক্ষ্মোৎক্ষেপহেতু উপরে শোভমান কৃষ্ণশবল প্রভাযুক্ত (অতএব) বিক্ষিপ্তকুন্দপুষ্পানুগামি ভৃঙ্গশোভাহরণকারী দশপুরবধূগণের সাভিলাষ দৃষ্টির বিষয়ীভূত স্বমূর্ত্তি হইয়া চলিয়া যাও । ৪৭ ।

(On cloud)! after crossing her (the river chambal),

go thou (while going) making thy body the object of curious looks of the eyes of the ladies of *Dasapura* which eyes are adorned with the motions of eyebrows resembling creepers, and which having sable and checkered pencils of lights glowing up on account of the up-lift of the eye lashes, and hence pilfering the beauty of bees pursuing the motions of shaking *kunda* flowers. – 47.

Notes.

1. ताम् उत्तीर्य —having crossed her (the river charmanvati) (उत्+तॄ क्त्वाच स्थाने ल्यप)।

2. परिचितभ्रूलताविभ्रमाणाम्—भ्रुवः लताः इव भ्रूलताः ("उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इति उपमितसमासः। भ्रूलतानां विभ्रमाः (६ तत) भ्रूलताविभ्रमाः, भ्रूलताविभ्रमाः परिचिताः कृताः (सम्पादिताः) यैः तानि तेषां बहुव्रीहि। Qualifying दशपुरवधूनेत्रकौतूहलानाम्—adorned with (beautiful curly) motions of the eyebrows (of the दशपुर ladies) resembling (beautiful) creepers.

3. पक्ष्मोत्क्षेपात्—पक्ष्मणाम् उत्क्षेपः (६ तत्) तस्मात्—owing to the up-raise of eye lashes.

4. उपरिविलसत्कृष्णशारप्रभाणाम्—"कृष्णरक्तसिताः शाराः" a mixture of black red and white is called शार। कृष्णाश्च ताः शाराश्च "वर्णो वर्णेन" इति कर्मधारयसमासः। कृष्णशाराः प्रभाः कृष्णशारप्रभाः (कर्मधाः) : उपरि विलसन्त्यः उपरिविलसन्त्यः (सहसुपा इति समासः) उपरिविलसन्त्यः कृष्णशारप्रभाः येषां तानि तेषां (बहुव्री.)—having black and variegated rays of lights bursting forth owing to the up-raising of eye lashes. The idea of the poet will be clear while we bear in mind the fact that while the ladies in their eagerness to see the cloud up-lifted their eyes, pencils of

lights having three different colours issued out of the three different coloured parts of their eyes viz black white and red (in the corner).

5. कुन्दक्षेपानुगमधुकरश्रीमुषाम्—कुन्दानां क्षेपः कुन्दक्षेपः अनुगच्छन्ति ये ते अनुगाः (अनु + गम् + ड कर्त्तरि) कुन्दक्षेपस्य अनुगाः कुन्दक्षेपानुगाः मधु कुर्व्वन्ति इति मधुकराः (मधु + कृ + ट कर्त्तरि) कुन्दक्षेपानुगाः ये मधुकराः (कर्म्मधा.) कुन्दक्षेपानुगमधुकराः तेषां श्रीः कुन्दक्षेपानुगमधुकरश्रीः तां मुष्णन्ति यानि (कुन्दक्षेपानुगमधुकरश्रीः मुष् + क्विप् कर्त्तरिप्राच्ये, "उपपदमतिङ्" इति सूत्रेण उपपद तत्पुरुष समासः) तेषां । Stealing i. e. imitating the beauty of bees adhering shaking *kunda* flowers. Prof. Wilson "The *kunda* (Jasminum pubescens) bears a beautiful white flower ; and the large black bee being seated in the centre of its cup, they afford a very delicate and truly poetical resemblance to the dark *iris* and white ball of a full black eye." Here the commentator *Bharata* reads कुन्दक्षेपानुगमधुकरश्रीजुषाम् and interprets श्रियं शोभां जुषन्ति भजन्ति यानि तानि तेषां ।

6. दशपुरवधूनेत्रकौतूहलानाम्—दशपुरे याः वध्वः दशपुरवध्वः तासां नेत्राणि दशपुरवधूनेत्राणि तेषां कौतूहलानि दशपुरवधूनेत्रकौतूहलानि तेषां दशपुरवधूनेत्रकौतूहलानाम् । नेत्रकौतूहलानाम् इत्यत्र "क्वचिदभिहितो भावः द्रव्यवत् प्रकाशते" इति नियमेन सकौतूहलनेत्राणाम् इत्यर्थः। Of the eager looks of the ladies of the city of *Dasapura* (the capital of *Rantideva*). With regard to this name दशपुर Prof. Wilson remarks, "According to its etymology *Dasapura* should mean a district ; that of ten cities. It is said however by the commentators, to be the name of a city : and by Mallinath to be that of the city of *Rantideva*. If he is

ब्रह्मावर्त्तं जनपदमथ च्छायया गाहमानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः ।

correct, it may possibly be the modern *Rintimpore.* or *Rantampore,* especially as that town, lying a little to the north of Chumbul, and in the line from *Oujein* to *Thanesar* is consequently in the course of the cloud's progress, and the probable position of *Dasapura.*"

On this point Dr. Fleet observes:—"*Mandasor* (Mandisor Mundasore, Mundisoor &c. of maps) or more properly *Dasar*, the ancient *Dasapura*, on the north or left bank of the river *Siwaná* is the chief town of the Mandasore District of *Scindia's* dominions in the western Malwa Division of central India. Dasor is the name by which in preference to Manddasore the town is habitually spoken of by the common people of the locality. And in some *Sanads* or warrants of about a century and half ago, I found this form *Dasor* used in the vernacular passages." So also *Pundits* still habitually use the form *Dasapura* in their correspondence. However the case may be perhaps a clue may be had from the work entitled दशपुरमाहात्म्य ।

7. आत्मबिम्बं—आत्मनः बिम्बः तं (६ तत्) (your) own image.

8. पात्रीकुर्व्वन् गच्छ—अपात्रं पात्रं कुर्व्वन् इति अभूततद्भावे च्वि । कृ + शतृ कर्त्तरि गति समासः । पात्रीकुर्व्वन् इत्यत्र पात्रमित्यस्य दशपुरवधूनेत्रकौतूहलानाम् इत्यनेन सह सम्बन्धः । Go having made the object (of sight).

9. Rhetoric—according to the Bombay commentators the अलङ्कार is उपमा ।

10. Conjugation—मुष्—मुष्णाति, अमोषीत् अमुषत् ।
गम्—गच्छति अगमत्

राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा
धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥४८॥

Prose order—अथ ब्रह्मावर्त्तं जनपदं छायया गाहमानः क्षत्रप्रधनपिशुनं तत् कौरवं क्षेत्रं भजेथाः यत्र गाण्डीवधन्वा शितशरशतैः राजन्यानां मुखानि धारापातैः कमलानि त्वम् इव अभ्यवर्षत्। ४८।

Paraphrase—तदनन्तरं ब्रह्मावर्त्ताख्यं देशं स्वरूपप्रवेशस्य निषिद्धत्वात् प्रतिविम्बमण्डलेन, प्रविशन् सन् प्रख्यातकौरवयुद्धसूचकं क्षेत्रं गच्छ यस्मिन् क्षेत्रे गाण्डीवी अर्ज्जुनः निशितशरनिकरैः विपक्षराजानां मुखानि प्रावृषि आसारैः पङ्कजानि त्वम् यथा तथा वृष्टवान् चिच्छेद इति भावः। ४८।

Change of voice—* * गाहमानेन * * क्षेत्रं भजेरत, गाण्डीवधन्वना * * कमलानि त्वया इव अभ्यवर्षन्त। ४८।

Sanjivani—ब्रह्मावर्त्तमिति। अत्र मनुः "सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम्। तं देवनिर्म्मितं देशं ब्रह्मावर्त्तं प्रचक्षते" इति। अथ अनन्तरं ब्रह्मावर्त्तं नाम जनपदं देशं छायया अनातपमण्डलेन गाहमानः प्रविशन् नतु स्वरूपेण। "पीठक्षेत्राश्रमादीनि परिहृत्यान्यतो व्रजेत्" इति वचनात्। क्षत्रप्रधनपिशुनम् अद्यापि शिरःकपालादिमत्तया कुरुपाण्डवयुद्धसूचकम् इत्यर्थः। "युद्धमायोधनं जन्यं प्रधनं प्रविदारणम्" इत्यमरः। तत् प्रसिद्धं कुरूणाम् इदं कौरवं क्षेत्रं भजेथाः कुरुक्षेत्रं व्रज इत्यर्थः यत्र कुरुक्षेत्रे गाण्डी अस्य अस्तीति गाण्डीवं धनुर्विशेषः। "गाण्डग्रजगात् संज्ञायामिति मत्वर्थीयो वप्रत्ययः। कपिध्वजस्य गाण्डीवगाण्डिवौ पुंनपुंसकौ"

इत्यमरः। तत् धनुः यस्य सः गाण्डीवधन्वा अर्ज्जुनः। "वा संज्ञायामित्यनङादेशः"। शितशरशतैः निशित-वाणसहस्रैः राजन्यानां राज्ञां मुखानि धाराणाम् उदक-धाराणां पातैः कमलानि त्वम् इव अभ्यवर्षत् अभिमुखं वृष्टवान् शरवर्षेण शिरांसि चिच्छेद इत्यर्थः। ४८।

(হে জলদ!) ছায়ারূপে ব্রহ্মাবর্ত্ত জনপদে প্রবেশপূর্ব্বক ক্ষত্রিয়গণের যুদ্ধসূচক কুরুক্ষেত্রে গমন করিও, যে ক্ষেত্রে গাণ্ডীবধারী অর্জ্জুন শাণিতশরনিকরে রাজন্যগণের মুখমণ্ডল, বৃষ্টিধারাপাতে পদ্ম গুলিকে তোমার ন্যায়, বর্ষণ করিয়াছিলেন (অর্থাৎ ছেদন করিয়াছিলেন)। ৪৮।

(Oh cloud)! Thou shouldst go to the battle-field of the *Kurus* which indicates the fight of *Kshatras* where the wielder of the *Gandiva* (viz Arjuna) showered hundreds of sharp arrows on the faces of the *Rajanyas* princes,) just as thou dost shower the lotuses with heavy down pours, after having entered into the province called *Brahmavarta* in the form of a shadow.—48.

Notes.

1. अथ ब्रह्मावर्त्तं जनपदं—then the country named *Brahmavarta.* For the definition of the denomination see Mallinath. He cites Manu which means "the province bounded by the two celestial rivers named सरस्वती and दृषद्वती is called ब्रह्मावर्त्तं। Prof. Wilson renders the term thus "Brahmavarta is the abode of *Brahma* or the holy land of the Hindoos." Commentators like भरत सनातन रमानाथ सुमतिविजय &c. read अधः and explains अधस्—अधस्तात् गाहमानः। अधस्=अधस्तात् छायया &c.

2. छायया गाहमाना—having entered by shadow (because of the prohibition)· see the hemistich quoted by Mallinath.

3. क्षत्रप्रधनपिशुनं—क्षत्राणाम् प्रधनं युद्धम् क्षत्रप्रधनस्य पिशुनं सूचकम् (षष्ठीतत् पु.) which indicates the destruction of Kshatriyas or warrior tribes. The propriety of the epithet is explained by Mallinath, as the field still contains human skulls &c. but which is very doubtful.

4. तत् कौरवम् क्षेत्रं भजेथाः—(thou) shouldst visit that field pertaining to the descendants of *Kuru*. कौरवं क्षेत्रं = कुरुक्षेत्रं separated for the sake of metre. Upon this word Prof. Wilson notes as follows :—"कुरुक्षेत्र the field of the *Kurus* is the scene of the celebrated battle between them and the *Pandus* which forms the subject of the *Mahabharata* It lies a little to the south-east of *Taknesar* (*i.e.* Thaneswar) and is still a place of note and pilgrimage." On this point Mr. A. Borooah remarks :—"To the south-east of *Kuluta* beyound *Trigarta* lay the district of *Kurukshetra*, residents of which were styled *Sarasvatas* from the river *Sarasvati*. In the limited sense it is the tract near the holy lake still known by the same name to the south of *Thaneswar*.

5. यत्र गाण्डीवधन्वा—गाण्डी ग्रन्थिः अस्य अस्ति इति (गाण्डी + मत्वर्थीय व) तत् गाण्डीवं धनुः यस्य सः गाण्डीवधन्वा "वा संज्ञायाम्" इति धनङ् आदेशः पाणिनिः ।—where (in Kurukshetra) the wielder of the bow called *Gandiva* (*viz. Arjuna.*) "Arjuna was the friend and pupil of *Krishna*, and the third of the *Pandava* Princes." Professor Wilson notes "As the horse and swords

हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे ।
कृत्वा तासामभिगममपां सौम्य सारस्वतीना-
मन्तःशुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥४९॥

of chilvalry received particular names, so the weapons of the Hindoo knights have been similarly honoured Gandiva is the bow of *Arjuna*.

6. शितशरशतैः—शिताः निशिताः शराः वाणाः शितशराः (कर्मधा) तेषां शतानि तैः (षष्ठीतत् पु) (शत=शि, यद्वा शो + कर्म्मणि क्त) by means of hundreds (innumerable) of whetted arrows.

7. राजन्यानां मुखानि—(राजन् + यण्) the faces of the Kshatriya kings.

8. धारापातैः—धारायाम् पाताः तैः (षष्ठीतत्) आसारैः इत्यर्थः— by means of showers.

9. कमलानि त्वम् इव—As thou (showerest) the lotuses.

10. अभ्यवर्षत्—अभि + वृष् + लङ् द् literally showered, here pierced (with arrows).

11. Rhetoric—according to Saroddharini and others the अलङ्कार is उपमा ।

12. Conjugations:—भज्—भजति, भजते । बभाज, भेजे । अभाक्षीत्, अभक्त । वृष्—वर्षति ववर्ष अवर्षीत् ।

Prose order—बन्धुप्रीत्या समरविमुखो लाङ्गली अभिमतरसां रेवतीलोचनाङ्कां हालां हित्वा याः सिषेवे (हे) सौम्य ! त्वं तासां सारस्वतीनाम् अपाम् अभिगमं कृत्वा अन्तः शुद्धः भविता अपि वर्णमात्रेण कृष्णः । ४९ ।

Paraphrase—बन्धुस्नेहातिशय्यात् नतु अशौर्य्यात् युद्धविरतः हलभृत्

वलरामः स्वप्रियानयनप्रतिविम्बयुक्ताम् अतः मनोभिरामां ईप्सितस्वादसमन्वितां सुरां परित्यज्य याः सारस्वतीः अपः पीतवान्, हे सुभग मेघ त्वम् तानि जलानि निषेव्य अन्तरात्मनि अश्यामः (निर्म्मलः पापहीनश्च) भविष्यसि परन्तु केवलेन वर्णेन एव श्यामः भविष्यसि। ४९।

Change of voice—* * समरविमुखेन लाङ्गलिना * * याः सिषेविरे * * त्वया अन्तःशुद्धेन भवितव्यम् अपि वर्णमात्रेण कृष्णेण (भवितव्यम्)। ४९।

Sanjivani—हित्वेति। बन्धुप्रीत्या कुरुपाण्डवस्नेहेन नतु भयेन समरविमुखो युद्धनिस्पृहः लाङ्गलम् अस्य अस्तीति लाङ्गली हलधरः अभिमतरसाम् अभीष्टस्वादां तथा रेवत्याः स्वप्रियायाः लोचने एव अङ्कः प्रतिविम्बितत्वात् चिह्नं यस्याः तां हालां सुराम्। "सुरा हलिप्रिया हालेत्यमरः। अभिप्रयुक्तं देशभाषापदमित्यत्र सूत्रे हालेति देशभाषापदमप्यतीव कविप्रयोगात् साध्व्" इति उदाजहार वामनः। हित्वा त्यक्त्वा दुस्त्यजाम् अपि इति भावः याः सारस्वतीः अपः सिषेवे हे सौम्य सुभग त्वं तासां सरस्वत्याः नद्याः इमाः सारस्वत्यः तासाम् अभिगमं सेवां कृत्वा अन्तः अन्तरात्मनि शुद्धः निर्म्मलः निर्दोषः भविता। "खुलटचाव" इति टच्। अपि सद्य एव पूतो भविष्यसि इत्यर्थः। "वर्त्तमानसामीप्ये वर्त्तमानवद्वा" इति वर्त्तमानप्रत्ययः। वर्णमात्रेण वर्णेन एव कृष्णः श्यामः नतु पापेन इत्यर्थः अन्तःशुद्धिरेव सम्पाद्या नतु वाह्या वहिःशुद्धोऽपि सूतवधप्रायश्चित्तार्थं सारस्वतसलिलसेवी

तत्र भगवान् बलभद्र एव निदर्शनम् अतो भवतापि सरस्वती सर्व्वथा सेवितव्या इति भाव:। ४८।

হে সৌম্য (জলধর)! বন্ধুস্নেহবশতঃ যুদ্ধবিমুখ হলধর সুস্বাদু ও রেবতীদেবীর লোচনচিহ্ন বিশিষ্ট (অর্থাৎ রেবতীদেবীর চক্ষুচ্ছায়া-সম্বলিত) সুরা ত্যাগ পূর্ব্বক যাহা (যে জল) সেবন করিয়াছিলেন তুমি সেই সরস্বতী নদীর জল সেবন করিয়া অন্তরে শুদ্ধ অর্থাৎ নির্দোষ হইবে (কেবল) বর্ণে কাল থাকিবে। ৪৯।

Oh gentle one! Thou, after drinking the waters of the river Sarasvati wilt become purified at heart and only remain black in complexion, the waters which the wielder of the plough (viz. Balaram) used to drink having relinquished the wine in spite of its good taste and its being marked with (the shadow of) the eye of Revati (his wife) when he kept himself aloof from the battle out of love towards his relatives.—49.

Notes.

1. बन्धुप्रीत्या—बन्धव: कौरव: पाण्डवाश्च तेषां प्रीति: तया हेतौ ३या—owing to the regard for kinsmen.

2. समरविमुख:—विगतं मुखं यस्य स विमुख: "प्रादिभ्य: धातुजस्य उत्तरपदलोपश्च" इति बहुव्रीहि समास: समरे विमुख: समरविमुख: (७मी तत्)—not inclined to fight.

3. लाङ्गली—प्रशस्तं लाङ्गलं हलं प्रहरणभूतम् अस्ति यस्य इति (लाङ्गल+इनि प्राशस्त्ये) हलधर:—the bearer of plough. Prof. Wilson remarks:—*Balarama* is the eldest brother of *Krishna*. He is called लाङ्गली, हलभृत् &c. from his being armed with a ploughshare; which he is said to have employed as bills were formerly used, for pulling his enemies down from their

horses &c. which enabled him then to dispatch them with his club. Although *Krishna* took an active part in the warfare between the *Kurus* and *Pandus*, Balaram refused to join either party: and retired into voluntary seclusion, filled with grief at the nature of the contest: "deserting" the poet says "his favourite liquor marked by the eyes of *Revati*" that is emulating their brightness as she shared the revels of her husband, even according to *Kalidasa* the inebriating eyes of his wife."

His life :—Balaram the elder son of *Basudeva* and *Devaki* was carried to *Gokula*, to preserve his life from the attempts to murder by *Kansa*. There he was nurtured by Nanda and *Rohini* along with his brother *Krishna* the latter being brought up by *Jasada*. Balaram and his brother grew up together, and both proved their strength by killing many demons such as (धेनुक, शकट) *Dhenuka Sakata* &c. He killed Rukmi (रुक्मी) while gambling with him, he also destroyed Dvivid (द्विविद) the monstrous monkey who took away his weapons. On another occasion he killed the learned (सूत) Suta in a sudden fit of anger as the latter took his seat on the place where व्यास used to sit down, and was not in a hurry to receive him. For this sin Balaram had to perform great penance in the act of visitting all the sacred places (तीर्थसेवा). And hence he came to the river सरस्वती। He remained apathetic in the great *Kuruksetra* war and died just before *Krishna* in द्वारका।

4. अभिमतरसा—अभिमतः इष्टः रसः स्वादः यस्याः तां वहुव्रीहिः। 'रसः स्वादे रसो गन्धे' इत्यमरः। Possessed of the favourite taste.

5. रैवतीलोचनाङ्कां—रेवत्याः बलरामपत्न्याः लोचने चक्षुषी रेवतीलोचने एव अङ्कः चिह्नं यस्याः सा तां बहुव्रीहिः। प्रतिबिम्बितत्वात् छायायाः रेवतीलोचनाङ्कितत्वम्। Saroddharini remarks—सहपानात् रेवतीलोचनप्रतिबिम्बसम्भवः। अनेन बन्धुयुद्धविषादेन च रेवतीमपि परित्यक्तवानिति युज्यते। Having the marks of the eyes of Revati (reflected in the wine). His wife being always present in his revelries and hence so called compare—रेवतीवदनोच्छिष्ट परिपूतपुटे दृशौ। Magh II.

6. हालां हित्वा याः सिषेवे—याः=सारस्वतीः अपः (हित्वा=हा+क्त्वाच्) सिषेवे=सेव्+लिट् ए) the waters of the river Saraswati, of which (he) indulged in drinking after refraining from wine.

7. सौम्य त्वं—सोमो देवता अस्य इति (सोम+यण्) "सौम्यन्तु सुन्दरे सोमदेवते" इत्यमरः—Oh handsome one! thou.

8. तासां सारस्वतीनाम् अपाम्—सरस्वत्याः इमाः तासाम् (सरस्वती+अण् भवार्थे)—those waters of the river *Saraswati*. "The *Saraswati*" Prof. Wilson says "or as it is corruptedly called the Sursooty, falls from the southern portion of the *Himalaya* mountains and runs into the great desert when the maps lose it; or it is lost in sands. It flows a little to the northwest of *Kurukshetr a*; and though rather out of the line of the cloud's progress, not sufficiently so to prevent the introduction into the poem of a stream so celebrated and so holy."

9. अभिगम कृत्वा—(अभि+गम+अप् भावे)—having made the proper use. Commentators like भरत रामनाथ वल्लभ read अधिगमं instead of अभिगमं। This reading is to be preferred

तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम् ।
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः
शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्म्मिहस्ता ॥५०॥

in as much as it gives directly the sense required (अधिगमं =सेवां) ।

10. अन्तः शुद्धः भविता—अन्तः सप्तम्यन्तमव्ययम् (भविता=भू + तृच् कर्त्तरि वाच्ये) अन्तरात्मनि इत्यर्थः । (Thou) wilt be purified in thy inner self.

11. अपि वर्णमात्रेण कृष्णः—वर्णं एव वर्णमात्रेण "मयूरव्यंसकादयश्च" इति नित्यसमासः । Only remain black in complexion. The Bombay editions read असि in the place of अपि and connects it with भविता as भवितासि ।

12. The figure of speech is अनुमान here.

13. Conjugations :—

हा—जहाति ; जहौ अहासीत् ।

सेव—सेवते ; सिषेवे असेविष्ट ।

Prose order—तस्मात् अनुकनखलं शैलराजावतीर्णां सगरतनयस्वर्ग-सोपानपंक्तिम् जह्नोः कन्यां गच्छेः, या गौरीवक्त्रभ्रुकुटिरचनां फेनैः विहस्य इव इन्दुलग्नोर्म्मिहस्ता सती शम्भोः केशग्रहणम् अकरोत् । ५० ।

Paraphrase—तस्मात् कुरुक्षेत्रात् कनखलाद्रिसमीपस्थां हिमाचल-पतितां कपिलशापभ्रष्टसगरराजपुत्राणाम स्वर्गप्राप्तिसाधनभूतां भगवतीं जाह्नवीं गच्छ या (गङ्गा) हरशिरोमणिभूतचन्द्रकलां ऊर्म्मिहस्तेन स्पृष्टा सापत्नरोषात् पार्व्वतीमुखभ्रूभङ्करणं शुभ्र फेनैः उपहस्य इव शिवस्य जटाजूटं आकर्षति स्म ।

Change of voice—(त्वया) * * शैलराजावतीर्णा सगरतनय-

स्वर्गसोपानपंक्तिः जह्नोः कन्या गच्छेत, यया * इन्दुलग्नोर्म्मिहस्तया शम्भोः केशग्रहणम् अक्रियत । ५० ।

Sanjivani—तस्मादिति। तस्मात् कुरुक्षेत्रात् कनखलस्य अद्रेः समीपे अनुकनखलम्। "अनुर्यत्समयेत्यव्ययीभावः"। शैलराजात् हिमवतः अवतीर्णां सगरतनयानां स्वर्गसोपानपंक्तिं स्वर्गप्राप्तिसाधनभूताम् इत्यर्थः जह्नोः नाम राज्ञः कन्यां जाह्नवीं गच्छेः गच्छ। "विध्यर्थे" लिङ्। या जाह्नवी गौर्य्याः वक्त्रे या भ्रुकुटिरचना सापत्नरोषात् भ्रूभङ्करचनं तां फेनैः विहस्य हसित्वा इव। "धावल्यात् फेनानां हासत्वेन" उत्प्रेक्षा। इन्दौ शिरोमाणिक्यभूते लग्नाः ऊर्म्मयः एव हस्ताः यस्याः सा इन्दुलग्नोर्म्मिहस्ता सती शम्भोः केशग्रहणम् अकरोत् यथा काचित् प्रौढ़ा नायिका सपत्नीम् असहमाना स्वबाल्भ्यं प्रकटयन्ती स्वभर्त्तारं सह शिरोरत्नेन केशेषु आकर्षति तद्वत् इति भावः। इदञ्च पुरा किल भगीरथप्रार्थनया भगवतीं गगनपथात् पतन्तीं गङ्गां गङ्गाधरो जटाजूटेन जग्राहेति कथाम् उपजीव्य उक्तम्। ५०।

(হে মেঘ!) সেই স্থান (কুরুক্ষেত্র) হইতে কনখল পর্ব্বত সমীপে হিমাচল হইতে অবতীর্ণা সগররাজপুত্রগণের স্বর্গ-প্রাপ্তির সোপানভূতা জাহ্নবী (নদীতে) গমন করিবে, যে জাহ্নবী গৌরী মুখে (সপত্নীদ্বেষ জনিত) ভ্রুকুটী রচনা (শুভ্রবর্ণ) ফেনরাশি দ্বারা (যেন) উপহাসপূর্ব্বক (শিবশিরঃস্থিত) চন্দ্রকলা উর্ম্মিরূপ হস্ত দ্বারা স্পর্শ করিয়া শিবের কেশ গ্রহণ করিয়াছিল। ৫০।

(Oh cloud, thou shouldst go from that place (*Kurukshetra*) to the daughter of *Jahnu* (viz. the Ganges) near

the *Kanakhala* mountain, where she fell down from the king of the mountains (viz. the *Himalayas*) (which river) being like a flight of stair-case to heaven for the offspring of *Sagara* and who (the Ganges) caught hold of the locks of *Siva* with her band of waves (which) touched the (phase of) the moon on the head (of *Siva*) after (disdainfully) laughing as it were, with her foam (or lather) at the jealous frown on the face of *Gowri*.—50.

Notes.

1. तस्मात्—कुरुक्षेत्रात्—from the place viz. *Kurukshetra*.

2. अनुकनखलं—कनखलस्य समीपे अनुकनखलं अव्ययीभाव समासः "अनुर्यत् समया" that is the particle अनु is compounded with that word whose proximity is denoted and is an अव्ययीभाव। By or near the hill called कनखल।

On this epithet Prof. Wilson observes as follows:—"the name is *Kalakhala* in the original, but it more properly is as given above. The meaning of the word, agreeably to a forced etymology, is thus explained in the गङ्गाद्वार· महात्म्यम् a section of the स्कन्दपुराणम् thus,—खलः को नात्र मुक्तिं वै भजते तत्र मज्जनात्। अतः कनखलं तीर्थं नाम्ना चक्रुः मुनीश्वराः॥ That is, 'what man कः, so wicked खलः, as not to obtain न, future happiness from bathing there." Hence the holy sages have called this तीर्थः by the name of कनखलः। It also occurs in this passage of the हरिवंश portion of the महाभारत। गङ्गाद्वारं कनखलं सोमो वै यत्र संस्थितः॥ "गङ्गाद्वार and कनखल and where the moon impends," and in both instances is applied to the place when the Ganges descends into the low ground of

Hindoostan. The name is still retained, as appears from the testimony of an impartial witness Lieut. Webb, in his survey of the sources of the Ganges :—"the party arrived at हरिद्वार and encamped at the village of *Kanakh'hala* (*Kanakhala*) on the west bank of the Ganges, at the distance of about two miles from Fair." The Ganges does not now descend at *Kanakhal*, and it is a questions for geologists to solve, whether the Ganges has, in the course of nineteen centuries, so corroded the skirt of the mountain, as to have thrown back the gorge through which she passes, a distance of two miles.'

3. शैलराजावतीर्णां—शैलानां शैलेषु वा राजा शैलराजः (षष्ठी वा सप्तमी तत्) राजाहः सखिभ्यः टच् इति समासान्त टच् तस्मात् अवतीर्णां भूपतितां (पञ्चमी तत्पु.)—descended from the lord of mountains (i. e. The Himalayas).

4. सगर तनय स्वर्ग सोपान पंक्तिम्—सगरस्य तन्नामकस्य नरपतेः तनयाः पुत्राः (षष्ठीतत्पु.) तेषां स्वर्गः तस्य सोपानानि तेषां पङ्क्तिः तां (षष्ठीतत् पु.) सगरपुत्रस्वर्गप्राप्तिसाधनभूतां इति भावः this being an adjective qualifying कन्यां—being as it were, a flight of steps of a stair case to the celestial region for the sons of the king *Sagara*.

5. जह्नोः कन्यां गच्छेः—approach the daughter of *Jahnu*. *Jahnu* is the name of a *Rishi*, who upon being disturbed in the performance of his austere fervour, by the passage of the river Ganges became angry and drank up its waters. On being propitiated, however he allowed the stream to re-issue from his ear or according to other authorities his thigh. Hence the Ganges is called his daughter from the second birth.

On the mythological account Prof. Wilson notes :— "The Ganges according to the legend, was brought from heaven by the religious rites of *Bhagiratha*, the great-grandson of *Sagara* ; who as well as that king had engaged in a long series of acts of austerity for the purpose of procuring the descent of the river to wash the ashes of Sagara's 60000 sons. The youths had been reduced to this state by the indignation of *Kapila*, a saint, whose devotions they had disturbed in their eager quest of the horse, that was to be the victim of an *Aswamedha* by their father. Their misfor tunes didnot, however, cease with their existence ; as their admission to *Swarga* depended, according to the instructions of *Garuda* (गरुड़) upon the use of water of the Ganges, in the administration of their funeral rites. At this period the Ganges watered the plains of heaven alone ; and it was no easy undertaking to induce her to resign those for an humble and earthly course. *Sagara* his son *Ansuman* and grandson *Dilipa* died without being able to effect the descent of the heavenly strean : but his great grandson *Bhagiratha* was more fortunate, and his long continued austeritics were rewarded by the fall of the Ganges, the bathing of the ashes of his ancestors, with the holy water and the establishment of them in the enjoy ment of *Swarga*."

6. या गौरीवक्त्रभ्रुकुटिरचनां फेनैः विहस्य इव—
भ्रुकुटीनां भ्रुभङ्गानाम् रचना विरचनं (६तत्पु.), गौर्याः वक्त्रं ६ष्ठी तत् (वक्त्रं – उच्यते अनेन इति वच् करणे त्र) गौरीवक्त्रे या भ्रुकुटि रचना (७मी तत् पु.) तां । who (the Ganges) having laughed

तस्याः पातुं सुरगज इव व्योम्नि पश्चार्द्धलम्बी
त्वञ्चेदच्छस्फटिकविशदं तर्कयेस्तिर्य्यगम्भः।

(in scorn) as it were, by her (white) foam at the frowns arising out of jealousy in the face of *Gouri* (Siva's wife).

7. इन्दुलग्नोर्म्मिहस्ता—ऊर्म्मयः तरङ्गाः एव हस्ताः बाहवः ऊर्म्मिहस्ताः (रूपक कर्म्मधा.) इन्दौ चन्द्रकलायां लग्नाः संसक्ताः इन्दुलग्नाः (७मी तत पु.) इन्दुलग्नाः ऊर्म्मिहस्ताः यस्याः सा (बहुब्रीहि) an adjective qualifying या (जाह्नवी)। having touched the moon (on the head of *Siva*) with hands in the shape of waves (of the river).

8. शम्भोः केशग्रहणम् अकरोत्—शं शुभं भवति यस्मात् इति (शम्+भू+डु अपादानवाच्ये) तस्य केशानां जटानां ग्रहणं धारणम् (षष्ठीतत्) caught hold of the locks of *Siva.* For the gist of the last hemistich see *Malli.* begining with यथा काचित् प्रौढ़ा नायिका इत्यादि। On this point Prof. Wilson adds.—"The earth being unable to bear the sudden descent of so great a river as the Ganges, *Siva* was induced, at the intercession of *Bhagiratha* to interpose his sacred head. Accordingly *Gunga* first alighted on the head of the deity, and remained for a considerable period wandering amongst the tresses of his long and entangled hair, to the extreme jealousy and displeasure, according to *Kalidasa* of the Goddess *Gouri*, *Siva's* consort.

9. The अलङ्कार of the Stanza is उत्प्रेक्षा।

10 Conjugations:—

कृ—करोति कुरुते, अकार्षीत् अकृत चकार चक्रे।

हस्—हसति, अहसीत् जहास।

संसर्पन्त्या सपदि भवतः स्रोतसि च्छाययासौ
स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा ॥ ५१ ।

Prose order—सुरगजः इव व्योम्नि पश्चार्द्धलम्बी अच्छस्फटिकविशदं तस्याः अम्भः तिर्य्यक् (यथा तथा) पातुं त्वं तर्कयेः चेत् सपदि स्रोतसि संसर्पन्त्या भवतः छायया असौ अस्थानोपगतयमुनासङ्गमा इव अभिरामा स्यात्। ५१।

Paraphrase—कश्चित् दिग्गज इव आकाशे पश्चार्द्धभागेन स्थित्वा निर्म्मलस्फटिकशुभ्र. गङ्गायाः जलं तिरश्चीनं यथा तथा पातुं त्वम् विचारयेः चेत् (तर्हि) (स्रोतप्रतिफलितेन तव प्रतिविम्बेन असौ गङ्गा प्रयागात् अन्यत्र प्राप्तकालिन्दीसंसर्गा इव मनोहरा स्यात्। ५१।

Change of voice—सुरगजेन इव व्योम्नि पश्चार्द्धलम्बिना * * त्वया तर्क्येत चेत् * * असुया अस्थानोपगतयमनासङ्गमया इव अभिरामया भूयेत।

Sanjivani—तस्या इति। सुरगज इव कश्चित् दिग्गज इव व्योम्नि पश्चात् अर्द्धं पश्चार्द्धम्। "पृषोदरादित्वात्" साधुः। तेन लम्बते इति पश्चार्द्धलम्बी सन् पश्चार्द्धभागेन व्योम्नि स्थित्वा पूर्व्वार्द्धेन जलोन्मुख इत्यर्थः। "केचित् पूर्व्वार्द्धलम्बो"इति पठन्ति। अच्छस्फटिकविशदं निर्म्मलस्फटिकावदातं तस्याः गङ्गायाः अम्भः तिर्य्यक् तिरश्चीनं यथा तथा पातुं त्वं तर्कयेः विचारयेः चेत् सपदि स्रोतसि प्रवाहे संसर्पन्त्या संक्रामन्त्या भवतः छायया प्रतिविम्बेन असौ गङ्गा अस्थाने प्रयागात् अन्यत्र उपगतः प्राप्तः यमुनासङ्गमः यया सा तथाभूता इव अभिरामा स्यात् ॥ ५१ ।

দিগ্‌গজের ন্যায় আকাশমার্গে পশ্চার্দ্ধলম্বী হইয়া (অর্থাৎ পূর্ব্বার্দ্ধ জলে ও পশ্চার্দ্ধ আকাশে অবস্থাপিত করিয়া) যদি তুমি স্ফটিকবৎ সুনির্ম্মল তাহার (গঙ্গার) জল বক্রভাবে পান করিতে সংকল্প কর তবে সেই ক্ষণে স্রোতে প্রতিফলিত তোমার ছায়াদ্বারা সেই গঙ্গা (প্রয়াগব্যতিরিক্ত) অপর স্থানে যমুনামিলিতার ন্যায় শোভাশালিনী হইবেন। ৫১।

In the manner of a heavenly elephant, placing the lower half of thy body on the sky, if thou think of drinking obliquely her (of the Ganges) water as lympid as transparent crystals, then she (the Ganges) will at once look as graceful as if she had been united with (the river) *Jamuna* at a different place (from *Prayaga*), on account of thy shadow being reflected in the current of the river.—51.

Notes.

1. सुरगजः इव—सुरस्य गजः (६ष्ठी तत्) or सुरश्चासौ गजश्चेति (कर्म्मधा)—like celestial elephant.

2. व्योम्नि पश्चार्द्धलम्बी—अपर + अस्तात् = पश्चात् पश्चात् अर्द्धं, पश्चार्द्धं "पृषोदरादीनि यथोपदिष्टम्" इति निपातनात् साधुः। पश्चार्द्धेन लम्बते यः स इति (पश्चार्द्ध + लम्ब् + णिनि) पश्चार्द्धलम्बी adjective to both सुरगज and त्वम्। Having the lower half of the body rested on the sky (the upper half coming in contact with water). Commentators like भरत सनातन रामनाथ सुमतिविजय हरगोविन्द कल्याणमल्ल read पूर्व्वार्द्धलम्बी instead of पश्चार्द्धलम्बी and explains "having the upper part of the body hanging down."

3. अच्छस्फटिकविशदं तस्याः अम्भः—अच्छः निर्म्मलः स्फटिकः प्रस्तरविशेषः (कर्म्मधा) अच्छस्फटिकः इव विशदं शुभ्रम् "उपमानानि सामान्यवचनैः" इति उपमान समासः—her water as transparent as clear crystals.

4. तिर्य्यक् पातुं त्वं तर्कयेः चेत्—तिर्य्यक् (तिरस्+अन्च् क्विप् कर्त्तरि) an indeclinable used as an adverb of पातुं । Shouldst thou imagine to drink obliquely (her water).

5. सपदि स्रोतसि संसर्पन्त्या भवतः छायया—सपदि an indeclinable means झटिति or तत्क्षणात् संसर्पन्त्या—(सं+सृप्+शतृ+ङीप्) प्रतिफलितया। On account of thy shadow being immediately reflected in the stream.

6. असौ—she (*i. e.*, the river Ganges).

7. अस्थानोपगतयमुनासङ्गमा इव—नञ् (अन्यत्) स्थानं (नञ् तत्पुरुष) प्रयागातिरिक्तं स्थानमित्यर्थः । अस्थाने उपगतः अस्थानोपगतः (७मी तत्पुरुष), यमुनायाः सङ्गमः (सम् + गम् +अप् भावे) यमुनासङ्गमः, अस्थानोपगतः यमुनासङ्गमः यस्याः सा (बहुव्री)—as it were the Ganges had been joined by the river यमुना at a different place from Allahabad. The shadow of the cloud is likened to the river *Jamna* on account of its blackness. *Jamna* the well-known tributary to the Ganges, is famous for the blue colour of its water. Some books read अस्थानोपनत in the place of अस्थानोपगत ।

8. अभिरामा स्यात्—अभिरामा (अभि + रम् णिच् ण कर्त्तरि) स्त्रियामाप्—will look beautiful. In lieu of यमुनासङ्गमेवाभिरामा commentators like भरत रामनाथ हरगोविन्द सारोद्धारिणी वल्लभ मल्लिनाथ &c. prefer the reading यमुनासङ्गमेनाभिरामा । In both these readings the sense is almost the same.

9. Rhetoric—the अलङ्कार of the stanza is उपमा or better शुद्धोपमा ।

10. Conjugations—

तर्क—लट् तर्कयति लिट् तर्कयामास लुङ् अततर्कत् तर्कित ।

आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥५२॥

Prose order—आसीनानां मृगाणाम् नाभिगन्धैः सुरभितशिलं तस्याः एव प्रभवं तुषारैः गौरम् अचलं प्राप्य अध्वश्रमविनयने तस्य शृङ्गे निषण्णः (सन्) शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् शोभां वक्ष्यसि। ५२।

Paraphrase—उपविष्टानाम् (शयितानाम्) कस्तूरिकामृगाणाम् मृगमदगन्धैः कषायितप्रस्तरं गङ्गायाः कारणभूतं हिमशुभ्रं हिमाचलम् आसाद्य तस्य मार्गगमनजनितक्लमनिवारके शिखरे उपविष्टः सन् त्वं शुभ्र शिववाहन षण्डोद्भिन्न कर्दमतुलनां लप्स्यसे। ५२।

Change of voice—* * तस्य शृङ्गे निषण्णेन (त्वया) शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेया शोभा वक्ष्यते। ५२।

Sanjivani—आसीनानामिति। आसीनानाम् उपविष्टानां मृगाणां कस्तूरिकामृगाणाम् अन्यथा नाभिगन्धानुपपत्तेः नाभिगन्धैः कस्तूरीगन्धैः तेषां तदुद्भवत्वात् अत एव मृगनाभिसंज्ञा च। "मृगनाभिर्मृगमदः कस्तूरी च" इत्यमरः। अथवा नाभयः कस्तूर्यः। "नाभिः प्रधाने कस्तूर्यां मदे च क्वचिदीरित" इति विश्वः। तासां गन्धैः सुरभिताः सुरभीकृताः शिलाः यस्य तं तस्याः गङ्गायाः एव प्रभवति अस्मात् इति प्रभवः कारणं तुषारैः गौरं सितम्। "अवदातः सितो गौर" इत्यमरः। अचलं प्राप्य विनीयते अनेन इति विनयनम्। "करणे

ल्युट् । अध्वश्रमस्य विनयने अपनोदके तस्य हिमाद्रेः शृङ्गे निषसः सन् शुभ्रः यः त्रिनयनस्य त्र्यम्बकस्य वृषः वृषभः । "सुकृते वृषभे वृष" इत्यमरः । तेन उत्खातेन विदारितेन पङ्केन सह उपमेयाम् उपमातुम् अर्हां शोभां वक्ष्यसि वोढ़ासि । वहतेर्ल्युट् । त्रिनयनेत्यत्र पूर्व्वपदात् संज्ञायामग इति णत्वं न भवति क्षुभ्नादिषु चेति निषेधात् । तस्याः प्रभवम् इत्यादिना हिमाद्रौ मेघस्य वैवाहिकौ गृहविहारौ ध्वन्यते ॥ ५२ ।

উপবিষ্ট কস্তূরিকা মৃগগণের নাভিগন্ধে সুবাসিত শিলাযুক্ত তুষার হেতু শুভ্রবর্ণ সেই গঙ্গার উৎপাদক পর্ব্বত (হিমাচল) প্রাপ্ত হইয়া পথশ্রমনাশক পর্ব্বতচূড়ায় উপবেশন করিয়া তুমি শুভ্রবর্ণ শিব বৃষ কর্ত্তৃক (বপ্রক্রীড়াকালে) উৎখাত কর্দ্দমের শোভার উপমা ধারণ করিবে। ৫২ ।

Thou, after approaching the mountain (viz. the Himalayas) which is white with (eternal) snows and whose rocks breathe fragrance on account of the musk-deer lying there, and which is the birth-place of that river (*i. e.*, the Ganges) being seated on the peak of it (the Himalayas) which is conducive to abate the fatigue of travel wilt attain a grace well comparable to the (heap of) clay dug up by the bull of the God with three eyes (*i. e.*, Siva) (duridg its sport of digging up of lands).— 52.

Notes.

1. आसीनानां मृगाणाम् नाभिगन्धैः—आसीनानां (आस + शानच् कर्त्तरि) मृगाणाम्—मृग्यते असौ इति मृग (मृग्+अ कर्म्मणि) । कस्तूरी-

मृगाणाम् इत्यर्थः। नाभीनाम् (कस्तूरीभूतानां) गन्धाः तैः (६ष्ठी तत्) यद्वा नाभयः कस्तूर्यः तासां नाभीनां, गन्धाः तैः (षष्ठी तत्पु.)—owing to the musk of the musk deer sitting *i. e.*, lying there, Prof. Wilson here notes—"the animal is what is called the Thibet musk but its favourite residence is among the lofty Himalaya mountains."

2. सुरभितशिलं—सुरभिताः (सुरभ + इतच् तारकादित्वात्) सुगन्धयुक्ताः शिलाः प्रस्तराः यस्य स तं (बहुव्रीहि), an adjective to अचलं। Whose rocks are scented sweetly.

3. तस्याः एव प्रभवम्—प्रभवति अस्मात् इति (प्र + भू + अपादानवाच्य अप्) कारणम्—her (of the Ganges) cause of birth (source).

4. तुषारैः गौरम् अचलं प्राप्य—अचलः न चलति यः सः (नञ् + चल् + अन् कर्त्तरि)—having reached the mountain white with snows.

5. अध्वश्रमविनयने—अध्वनः श्रमः अध्वश्रमः, विनीयते अनेन इति (वि + नी + अनट् करणे) विनयनं नाशकम् इत्यर्थः—refresher of the fatigue of the journey. Adjective to शृङ्गे। The सारोद्धारिणी explain thus- अध्वश्रमविनयने मार्गखेदोपनोदाय अध्वनः श्रमः अध्वश्रमः तं विनयति इति एव शीलं अध्वश्रमविनयि तस्मै।

6. तस्य शृङ्गे निषण्णः—निषण्णः = (नि + सद् + क्त कर्त्तरि) उपविष्टः —sitting on a peak of the *Himalayas.*

7. शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयां—त्रीणि नयनानि यस्य सः त्रिनयनः (बहुव्रो) तस्य वृषः त्रिनयनवृषः (६ तत्) शुभ्रः त्रिनयनवृषः शुभ्रत्रिनयनवृषः (कर्मधा.) तेन उत्खातं शुभ्रत्रिनयनवृषोत्खातं (३या तत्पु.) यत् पङ्कं शुभ्रत्रिनयनवृषोत्खातपङ्कं (कर्मधा) उपमातुमर्हां इति (उप + मा + यत्) तेन उपमेया (३या तत्पु.) तां, adjective qualifying शोभा। The णत्व in त्रिनयन does not take place because the word falls

तञ्चेद्वायौ सरति सरलस्कन्धसङ्घट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः ।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै-
रापन्नार्त्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ५३

under the class called क्षुभ्न by the sutra "क्षुभ्नादिषु च"। Worthy of being compared to the clay turned up by the bull of the God with three eyes (viz *Siva*); (It being the nature of a bull that while sporting he digs up earth &c. with his horns.) The cloud is likened to a heap of mud on account of its colour.

8. शोभां वत्स्यसि—(वह + स्यति लट्)—wilt attain the beauty of.

9. The अलङ्कार of the sloka is उपमा।

10. Conjugations—

वह—वहति वहते, लिट् उवाह ऊहे। लुङ्—अवाक्षीत् अवोढ़ लुट् वोढ़ा। क्त ऊढ़।

Prose order—वायौ सरति (सति) सरलस्कन्धसंघट्टजन्मा उल्काक्षपितचमरीबालभारः दवाग्निः तं बाधेत चेत् एनं वारिधारासहस्रैः अलं शमयितु अर्हसि उत्तमानां सम्पदः आपन्नार्त्तिप्रशमनफलाः हि । ५३ ।

Paraphrase—पवने वहति (सति) देवदारुकाण्डसंघर्षणोत्पन्नः अग्निकणलिप्तदग्धचमरीकेशकलापः वनवह्निः तं हिमाचलं पीड़येत् यदि (तर्हि) असंख्यैः जलधारावर्षणैः एनं दावाग्निं निर्व्वापयितु अर्हसि महतां सम्पदः विपन्नदुःखनिवारणप्रयोजनाः खलु । ५३ ।

Change of voice—* * सरलस्कन्धसङ्घट्टजन्मना उल्काक्षपितचमरी-

वालभारेण दवाग्निना स बाध्येत चेत् एनं * * त्वया शम्यते उत्तमानां सम्पद्भिः आपन्नार्त्तिप्रशमनफलाभिः भूयते । ५२ ।

Sanjivani—तमिति । वायौ वनवाते सरति वाति सति सरलानां देवदारुद्रुमाणां स्कन्धाः प्रदेशविशेषाः । "अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरो" इत्यमरः । तेषां सङ्घट्टेन सङ्घर्षणेन जन्म यस्य स तथोक्तः । "जन्मोत्तरपदत्वात् व्यधिकरणोऽपि बहुव्रीहिः साधु"रित्युक्तम् । उल्काभिः स्फुलिङ्गैः क्षपिताः निर्दग्धाः चमरीणां वालभाराः केशसमूहा, येन दव एव अग्निः दवाग्निः वनवह्निः । "वने च वनवह्नौ च दवो दाव इहेष्यते" इति यादवः । तं हिमाद्रिं बाधेत चेत् पीडयेत् यदि एनं दवाग्निं वारिधारासहस्रैः शमयितुम् अर्हसि युक्तञ्च एतत् इत्याह उत्तमानां महतां सम्पदः समृद्धयः आपन्नानाम् आर्त्तानाम् आर्त्तिप्रशमनम् आपन्निवारणम् एव फलं प्रयोजनं यासां ताः तथोक्ताः हि अतो हिमाचलस्य दावानलस्त्वया शमयितव्यः इति भावः । ५२ ।

বনবায়ুবহনহেতু দেবদারুকাণ্ডঘর্ষণজাত অগ্নিস্ফুলিঙ্গ সম্পর্কে চমরীদিগের কেশরাশি দগ্ধকারী দাবানল যদি ইহাকে (হিমাচলকে) উৎপীড়িত করে তবে প্রভূত জলধারা বর্ষণ দ্বারা ইহাকে (দাবানলকে) সম্যক্ নির্ব্বাপিত করিবে যেহেতু মহৎলোকের ঐশ্বর্য্যের বিপদ্গ্রস্ত ব্যক্তির ক্লেশ নিবারণ করাই (একমাত্র) ফল। ৫৩।

The wind blowing, if the forest-fire generated by the friction of the trunks of the *Sarala* trees, completely singe up the mass of hair of the *Chomree* animals by its sparks

and be injurious to the mountain then it behoves thee to thoroughly put it out by means of innumerable showers of rain, for the sole end of the riches of the good being to abate the affliction of the miserable.—53.

Notes.

1. वायौ सरति—वायौ यस्य च भावेन भावलक्षणमिति ७मी सरति गच्छति सति (सृ + शतृ) while the wind has been blowing. Other reading स्फुरति।

2. सरलस्कन्धसङ्घट्टजन्मा—सरलानां देवदारु द्रुमानाम् स्कन्धाः काण्डाः (६ष्ठी तत्) सरलस्कन्धानां संघट्टः घर्षणं (६ष्ठी तत्) सरलस्कन्धसङ्घट्टात् जन्म यस्य सः सरलस्कन्धसङ्घट्टजन्मा "पञ्चम्यौ हि बहुव्रीहिः व्यधिकरणः जन्माद्युत्तर-पदे" इति व्यधिकरण बहुव्रीहि समासः। That generated by the friction of trunks of the *Deodar* trees.

3. उल्काक्षपितचमरीवालभारः—उल्काभिः स्फुलिङ्गैः क्षपिताः दग्धाः (क्षप्+णिच्+क्त कर्मणि) (३या तत्), वालानां केशानां भाराः समूहाः वालभाराः (६ष्ठी तत्) चमरीणां मृगविशेषाणां वालभाराः चमरीवालभाराः (६ष्ठी तत्) उल्काक्षपिताः चमरीवालभाराः येन सः (बहुव्रीहि) an adjective to दवाग्निः। That has burnt up the heap of hairs of the chowri or yak, by its sparks of flames. भरत सनातन रामनाथ कल्याण मल्ल &c read क्षयित for क्षपित।

4. दवाग्निः—दवः एव अग्निः (रूपक कर्मधा) वनवह्निः—conflagragration of forests. Prof. Wilson remarks—"The conflagration of woods in India is of frequent occurrence; and the causes of it are here described by the poet. The intertwining branches of the *Saral* (Pinus Longifoshia) of the Bamboo and other trees, being set in motion by the wind, their mutual friction engenders flame"

ये संरम्भोत्पतनरभसाः स्वाङ्गभङ्गाय तस्मिन्
मुक्ताध्वानं सपदि शरभा लङ्घयेयु र्भवन्तम् ।
तान् कुर्व्वीथास्तुमुलकरकावृष्टिपातावकीर्णान्
के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ।५४॥

5. तं बाधेत चेत्—if injures that mountain (viz. the Himalayas)

6. एनं वारिधारा सहस्रैः अलं शमयितुम् अर्हसि वारीणां धारा सम्पातः (६ष्ठीतत्) तासां सहस्रैः—it behoves thee to thoroughly put that out by many a downpours. अलं completely or thoroughly omitted by Mallinath.

7. हि—तथाहि because, in as much as.

8. उत्तमानां सम्पदः—the resources of the high minded.

9. आपन्नार्त्ति प्रशमनफलाः—आपन्नानां विपद्ग्रस्तानां आर्त्तिः पीड़ा (६ष्ठी तत्) (आपन्न—आङ+पद्+क्त कर्त्तरि) (आर्त्ति—आङ्+ऋ क्तिन् भावे) आपन्नार्त्तेः प्रशमनं (६ष्ठीतत्), आपन्नार्त्तिप्रशमनं फलं यासां ताः आपन्नार्त्तिप्रशमनफलाः (बहुव्रीहिः) an adjective to सम्पदः—the sole end being to abate the suffering of the distressed.

10. Rhetoric—the अलङ्कार of the stanza is अर्थान्तर न्यास ।

11. Conjugations—बाध्—बाधते । लिट् बबाधे । लुङ् अबाधि । शम्—शाम्यति । लिट् शशाम । लुङ् अशमत, अशमीत् ।

Prose order—तस्मिन् संरम्भोत्पतनरभसाः ये शरभाः मुक्ताध्वानं भवन्तं सपदि स्वाङ्गभङ्गाय लङ्घयेयुः तान् तुमुलकरका वृष्टिपातावकीर्णान् कुर्व्वीथाः निष्फलारम्भयत्नाः केवा परिभवपदं न स्युः । ५४

Paraphrase—पूर्व्वोक्ते हिमाचले क्रोपोत्तमयनवेगयुक्ताः ये अष्टापद मृगविशेषाः त्यक्तशरभीतपतनमार्गं त्वाम झटिति स्वीयाङ्गभङ्गरूपतया अवि-

क्रमेयुः (चेत् तर्हि) पूर्व्वोक्तान् मृगविशेषान् भीषणवर्षोपलपातविचित्तान् कुरुष्व। ५४।

Change of voice—* * संरम्भोत्पवनरभसैः यैः शरभैः मुक्ताध्वा भवान् * * लंघ्येत ते तुमुल करकावृष्टि पातावकीर्णाः (त्वया) क्रियेरन् निष्फलारम्भयत्नैः कैः * न भूयेत। ५४।

Sanjivani—य इति। तस्मिन् हिमाद्रौ संरम्भः कोपः (संरम्भः संभ्रमे कोपे इति शब्दार्णवे।) तेन उत्पतने उत्प्लवने रभसः वेगः येषां ते तथोक्ताः (रभसो हर्षवेगयोरिति विश्वः।) ये शरभाः अष्टापदमृगविशेषाः (शरभः शलभे चाष्टापदे प्रोक्तो मृगान्तरे इति विश्वः।) मुक्ताः अध्वा शरभोत्प्लवनमार्गः येन तं भवन्तं सपदि स्वाङ्गभङ्गाय लङ्घयेयुः (सम्भावनायां लिङ्।) भवतोऽतिदूरत्वात् स्वाङ्गभङ्गातिरिक्तं फलं नास्ति लङ्घनस्य इत्यर्थः तान् शरभान् तुमुलाः सङ्कुलाः करकाः वर्षोपलाः (वर्षोपलस्तु करकेत्यमरः।) तासां वृष्टिः तस्याः पातेन अवकीर्णान् विचित्तान् कुर्व्वीथाः कुरुष्व (विध्यर्थे लिङ्।) क्षुद्रोऽपि अधिक्षिपन् प्रतिपक्षः सद्यः प्रतिक्षेप्तव्यः इति भावः तथाहि आरभ्यन्ते इति आरम्भाः कर्म्माणि तेषु यत्नः उद्योगः स निष्फलः येषां ते तथोक्ताः निष्फलकर्म्मोपक्रमाः इत्यर्थः अतः के वा परिभवपदं तिरस्कारपदं न स्युः न भवन्ति सर्व्व एव भवन्ति इत्यर्थः। यदत्र घनोपलस्तु करक इति यादववचनात् करकशब्दस्य नियतपुंलिङ्गताभिप्रायेण करकाणाम् अवृष्टिरिति केषाञ्चित् व्याख्यानं

तत् सत्यं न, अनुमन्यन्ते वर्षोपलस्तु करकेत्यमरवचन-व्याख्याने क्षीरस्वामिना कमण्डलौ च करकः सुगते च विनायक इति नानार्थे पुंस्यपि वक्ष्यतीति वदता उभय-लिङ्गताप्रकाशनात्। यादवस्य तु पुंलिङ्गताविधाने तात्पर्य्यं नतु स्त्रीलिङ्गतानिषेधे इति न तद्विरोधोऽपि। करकस्तु करङ्के स्यादाकोशे च कमण्डलौ। पक्षिभेदे करे चापि करका तु घनोपले इति विश्वप्रकाशवचने तु उभयलिङ्गता व्यक्तैवेति न कुत्रापि विरोधवार्त्ता अत एव रुद्रः वर्षोपलस्तु करका करकोऽपि च दृश्यते इति। ५४।

(হে মেঘ) সেই স্থানে (হিমালয়ে) কোপহেতু উল্লম্ফনবেগশালী যে সকল শরভ (মৃগ বিশেষ) তাহাদের পথপরিত্যাগকারী তোমাকে ঝটিতি অঙ্গ ভঙ্গের জন্য লঙ্ঘন (অবমান) করিবে তাহাদিগকে তুমি তুমুলশীলাবৃষ্টি পাত পূর্ব্বক বিক্ষিপ্ত করিবে কর্ম্মে নিষ্ফল প্রযত্ন হইলে (আপনাকে) কে তিরস্কৃত না মনে করে? অর্থাৎ সকলেই করে। ৫৪।

There (in the *Himalayas*) the antilopes called *Sarava* being impulsive in their bounds arising out of resentment (against thee) might at once try to cross thee that hast left alone their way, only for the sake of breaking their own limbs, thou oughtest to scatter them by pouring down heavy showers of hail stones for who will not be the object of ridicule that has been unsuccessful in the attempt of work!

Notes.

1. तस्मिन्—there (in the *Himalays*)
2. संरम्भोत्पतनरभसाः—संरम्भेण कोपेन उत्पतनं उल्लम्फनं (इत्या

तत्) संरम्भोत्पतने रभसः वेगः येषां ते (व्यधिकरण बहुव्रो impulsive in their angry bounds and jumps.

3. ये शरभाः—those *Sarava* deer. Prof. Wilson notes :—The Sarava is a fabulous animal described as possesing eight legs, and of a fierce untractable nature. It is supposed to haunt these mountains especially"

4. मुक्ताध्वानं भवन्तं—मुक्तः त्यक्तः अध्वा मार्गः येन सः (बहुव्रो) तं तथोक्तं भवन्तं (भा + डवतु)—thou that hast removed from their path. कल्याणमल्ल reads मुक्तध्वानं for मुक्ताध्वानं।

5. सपदि स्वाङ्ग भङ्गाय लङ्घयेयुः—स्वेषां अङ्गानि तेषां भङ्गः तस्म (षष्ठी तत्पु.)—may suddenly make an attempt to bestride thee. Malli. explains that the *Sarava* deer will have no other consequence than breaking their own limbs in as much as thou (the cloud) art far above them.

N. B. Instead of the hemistich of the text commentators like भरत सनातन रामनाथ हरगोविन्द कल्याणमल्ल वल्लभ सुमति विनय Wilson and others read thus—ये त्वां मुक्तध्वनिम सहनाः स्वाङ्ग भङ्गाय तस्मिन् दर्पोत्सेकादुपरि शरभा लङ्घयिष्यन्त्यलङ्घ्यम्। The proseorder and paraphrase thus—तस्मिन् (हिमालये) मुक्तध्वनिं (कृतघोषं) अलङ्घ्यं (लङ्घयितुमशक्यम्) त्वाम् असहनाः (सोढुमक्षमाः ये शरभाः दर्पोत्सेकात (बलावलेपात्) स्वाङ्गभङ्गाय (स्वशरीरभङ्गार्थं) उपरि लङ्घयिष्यन्ति (उत्पतिष्यन्ति)। the latter hemistich is the same.

6. तान् कुर्वीथाः तुमुल करकावृष्टिपातावकीर्णान् कुर्व्वीथाः तुमुलाः घनसंश्लिष्टाः करकाः वर्षोपलाः (कर्मधा) तासां वृष्टिः (षष्ठी तत्पु.) तस्याः पातः (षष्ठी तत्पु.) तेन अवकीर्णाः (अव + कॄ + क्त कर्मधा) (३या

तत्र व्यक्तं दृषदि चरणन्यासमर्द्धेन्दुमौलेः
शश्वत्सिद्धैरुपचितबलिं भक्तिनम्रः परीयाः ।
यस्मिन् दृष्टे करणविगमादूर्द्धमुद्धूतपापाः
सङ्कल्पन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ॥५५॥

तत् पु-) तान् adjective to तान्—thou shouldst, scatter them (the Saravas) by means of heavy showers of hails. कल्याणमल्ल reads thus तुमुलकरकावृष्टि हासावकीर्णान् ।

7. निष्फलारम्भ यत्नाः केवा—आरभ्यन्ते येते इति (आङ् + रभ + घञ् कर्म्मणि वाच्ये नुमागमश्च) आरम्भाः कार्य्याणि तेषु आरम्भेषु यः यत्नः उद्योगः (७मी तत् पु.) निस् नास्ति फलं यस्मिन् सः (बहुव्री) निष्फलः, निष्फलः आरम्भः यत्नः येषां ते निष्फलारम्भयत्नाः (बहुव्री). adjective qualifying के । who indeed that are frustrated in the attempt of their work.

8. परिभवपदं न स्युः—परिभवः (परि + भू + अप्) तिरस्कारः तस्य पदं आस्पदं (६ष्ठीतत्पु.) Not become the object of blame.

9. The अलङ्कार is अर्थान्तरन्यास ।

10. Conjugations :—लङ्घ्—लङ्घति लङ्घते ललङ्घ ललङ्घे । अलङ्घीत अलङ्घिष्ट ।

Prose order—तत्र दृषदि व्यक्तं शश्वत् सिद्धैः उपचितबलिं अर्द्धेन्दुमौलेः चरणन्यासं भक्तिनम्रः परीयाः यस्मिन् दृष्टे (सति) उद्धूतपापाः (सन्तः) श्रद्दधानाः करणविगमात् ऊर्द्धं स्थिरगण पद प्राप्तये सङ्कल्पन्ते ।५५।

Paraphrase—तस्मिन् हिमाचले शिलाविशेषे प्रकटं सर्व्वदा योगिभिः यथोक्तोपकरणैः पूजितं शिवस्य पादविन्यासचिह्नं भक्तिविनतः सन् (त्वं) प्रदक्षिणं कुरु यस्मिन् पदचिह्ने अवलोकिते सति निर्दग्धकलुषाः विश्वासिनः जनाः कलेवर त्यागानन्तरं नित्यशिवानुचर पदलाभाय समर्थाः भवन्ति । ५५ ।

Change of voice—* * व्यक्तः * * उपचितबलिः अर्द्धेन्दुमौलेः चरणन्यासः भक्तिनम्रेण (त्वया) परीयेत * * उद्धूतपापैः श्रद्दधानैः * * सङ्कल्प्यते । ५५ ।

Sanjivani—तत्रेति । तत्र हिमाद्रौ दृषदि कस्याञ्चित् शिलायां व्यक्तं प्रकटं शश्वत् सदा सिद्धैः योगिभिः (सिद्धिर्निष्पत्तियोगयोरिति विश्वः ।) उपचितबलिं रचितपूजाविधिम् (बलिः पूजोपहारयोरिति यादवः ।) अर्द्धश्चासौ इन्दुश्चेति अर्द्धेन्दुः (अर्द्धः खण्डे समेंऽशके इति विश्वः ।) स मौलौ यस्य तस्य ईश्वरस्य चरणन्यासं पादविन्यासं भक्तिः पूज्येषु अनुरागः तया नम्रः सन् परीयाः प्रदक्षिणं कुरु (परिपूर्व्वादिणो लिङ् ।) यस्मिन् पादन्यासे दृष्टे सति उद्धूतपापाः निरस्तकल्मषाः सन्तः श्रद्दधानाः विश्वसन्तः पुरुषाः श्रद्धा विश्वासः आस्तिक्यबुद्धिरिति यावत् (श्रदन्तरोरुपसर्गवद्वृत्तिर्वक्तव्येति श्रत्पूर्व्वात् दधातेः शानच् ।) करणस्य चैत्रस्य विगमात् ऊर्द्ध्वं देहत्यागानन्तरम् (करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपीत्यमरः ।) स्थिरं शाश्वतं गणानां प्रमथानां पदं स्थानम् (गणाः प्रमथसंख्यौघा इति वैजयन्ती ।) तस्य प्राप्तये सङ्कल्पन्ते समर्था भवन्ति । क्लृपेः पर्य्याप्तिवचनस्य अलमर्थत्वात् तद्योगे नमः स्वस्तीत्यादिना चतुर्थी अलमिति पर्य्याप्त्यर्थग्रहणमिति भाष्यकारः । अव्यक्तं व्यञ्जयामास शिवः श्रीचरणद्वयम् । हिमाद्रौ शाम्भवादीनां सिद्धये सर्व्वकर्म-

याम्। दृष्ट्वा श्रीचरणं सम्यक् साधकः स्थिरयेत्तनुम्। इच्छाधीनशरीरो हि विचरेच्च जगत्त्रयमिति शम्भुरहस्ये।५५।

সে স্থানে (হিমালয়ে) শিলায় প্রকটিত সর্ব্বদা যোগিগণ কর্তৃক পূজিত শিবের পাদন্যাস চিহ্ন ভক্তিনম্র হইয়া (তুমি) প্রদক্ষিণ করিবে শ্রদ্ধান্বিত ব্যক্তিগণ যাহা দর্শন করিয়া নিরস্তপাপ হইয়া দেহত্যাগের পরে নিত্যপ্রমথ পদ প্রাপ্তির যোগ্যতা লাভ করিয়া থাকেন। ৫৫।

There (in the Himalayas) (thou) oughtest bowing reverently circumambulate the foot print of the wearer of the half moon on the forehead (*i. e. Siva* marked on a rock & worshipped continually with offerings by *Jogees* after perceiving which the believers being absolved from their sins will qualify themselves for the eternal post of *Ganas* of Siva on the relinquishment of their mortal coils.—55.

1. तत्र—there (i. e. in the Himalays)

2. दृषदि व्यक्तं—व्यक्ताचित् शिलायां विलिखितं दृषद् (दृ+षद् + क्विप् अधिकरणे ,—marked on a piece of stone.

3. शश्वत् सिद्धैः—सिद्धाः योगिनः तैः। by the anchorites continually.

4. उपचित बलिं—उपचितः रचितः बलिः पूजाविधिः यस्य सः तं (बहुव्री) adjective to चरणन्यासं worshipped with offerings.

5. अर्द्धेन्दुमौलेः चरणन्यासं—अर्द्धंयासौ इन्दुश्चेति अर्द्धेन्दुः (कर्मधा) अर्द्धेन्दुः मौलौ चूड़ायाम् यस्य सः तस्य ; चरणयोः न्यासः तं (६ष्ठीतत्पु.)—foot marks of the God bearing a phase of the moon on his head. Prof. Wilson says " The fancied or artificial print of some deity on hills and detached stones is a common occurrence in the creeds of the East."

6. भक्तिनम्रः परीयाः—(भज + क्तिन् भावे) भक्त्या पूज्यानुरागेण नम्रः (नम्+र) विनतः adjective to त्वम् understood. परीयाः (परि + इण + यास् लोडर्थे लिङ्)—circumambulate (the mark) being bent down in reverence.

7. यस्मिन् दृष्टे—यस्य च भावेन भाव लक्षणम् इति सप्तमी—which (foot mark) being seen.

8. उद्धूत पापाः श्रद्दधानाः—उद्धूतानि निरस्तानि पापानि येषां ते (बहुव्रीः) श्रद्दधानाः (श्रत् + धा + शानच् कर्त्तरि) although श्रत् is not an उपसर्ग still it is enjoined by वार्त्तिककार कात्यायन as such by the rule "श्रदन्तरोः उपसर्गवद् वृत्तिः वक्तव्या" इति—faithful believers who are purged from their sins. these two epithets have a noun जनाः understood.

9. करण विगमात् ऊर्द्ध—क्रियते अनेन इति करणम् (कृ + अनट् करणे) देहः तस्य करणस्य विगमः (वि + गम + अप्) त्यागः तस्मात् ऊर्द्धम् अनन्तरम् । अन्यारादितरेत्यादिना करणविगमात् इत्यत्र पञ्चमी । after the separation from body. भरत सनातन रामनाथ &c read करण विगमाद् दूरमुद्धूत पापाः, सारोद्धारिणी explains thus दूरं यथा भवति तथा उद्धूतपापाः गतकल्मषाः निर्धूय प्रनष्टपाप्मानः इत्यादि ।

10. स्थिरगणपद मासये सङ्कल्पन्ते—गणानां प्रमथानां पदं स्थानं स्थिरं गणपदं स्थिरगणपदं (कर्म्मधा) (इष्टीपु) तस्य प्राप्तिः (२तत्) तस्मै सङ्कल्पन्ते समर्था भवन्ति (सम् + क्लृप् + लट् अन्ते) make themselves fit to attain the eternal position of the adherents of *siva* भरत सनातन &c. read कल्पन्तेऽस्य instead of सङ्कल्पन्तं and explains अस्य शिवस्य इति ।

11. The अलङ्कार is अवसर according to सारोद्धारिणी but हेतु according to others.

12. Conjugation—क्लृप् (क्लृप्) कल्पते चक्लृपे अकल्पिष्ट ।

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्य्यमाणाः
संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः।
निर्ह्रादस्ते मुरज इव चेत् कन्दरेषु ध्वनिः स्यात्
सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः॥५६॥

Prose order—(हे मेघ) अनिलैः पूर्य्यमाणाः कीचकाः मधुरं शब्दायन्ते संसक्ताभिः किन्नरीभिः त्रिपुरविजयः गीयते कन्दरेषु ते निर्ह्रादः मुरजे ध्वनिः इव स्यात् चेत् (तर्हि) तत्र पशुपतेः सङ्गीतार्थः समग्रः भावी ननु। ५६।

Paraphrase—हे जलधर वायुभिः आपूर्य्यमाणाः कीचकवेणवः श्रवणसुखं यथा तथा नदन्ति संमिलिताभिः वाद्यानुषक्ताभिः वा अश्वमुखीभिः त्रिपुरदाहादिशिवविजयव्यापारः उद्गीयते गुहासु प्रतिध्वनितः तव नादः मुरजाख्यवाद्ययन्त्रे शब्दः इव स्यात् चेत् तर्हि तस्मिन् शिवचरणन्याससमीरे नित्यविराजमानस्य देवदेवस्य सङ्गीतवस्तु सम्पूर्णः भविष्यति खलु वंशमुरज वाद्यसमन्वित गीत प्रक्रमेण सङ्गीतस्य सामग्र्यम् इति गूढार्थः। ५६।

Change of voice—कीचकैः * * शब्दाय्यते संसक्ताः किन्नर्य्यः त्रिपुरविजयं गायन्ति * * निर्ह्रादेन * ध्वनिना इव भूयेत * * सङ्गीतार्थेन समग्रेण भाविना भूयते। ५६।

Sanjivani—शब्दायन्त इति। हे मेघ अनिलैः पूर्य्यमाणाः कीचकाः वेणुविशेषाः (वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धता इत्यमरः।) मधुरं श्रुतिसुखं यथा तथा शब्दायन्ते शब्दं कुर्व्वन्ति (शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे इति क्यङ्।) अनेन वंशवाद्यसम्पत्तिरुक्ता संसक्ताभिः संयुक्ताभिः वंशवाद्यानुषक्ताभिर्वा संरक्ताभिरिति

पाठे संरक्तकण्ठीभिः इत्यर्थः किन्नरीभिः किन्नरस्त्रीभिः त्रयाणां पुराणां समाहारः त्रिपुरम् (तद्धितार्थोत्तरपदेति समाहार समासः। पात्रादित्वात् नपुंसकत्वम्।) तस्य विजयः गीयते कन्दरेषु दरीषु (दरी तु कन्दरो वा स्त्रीत्य-मरः।) ते तव निर्ह्रादः मुरजे वाद्यभेदे ध्वनिः इव मुरज-ध्वनिः इव इत्यर्थः स्यात् चेत् तर्हि तत्र चरणसमीपे पशुपतेः नित्यं सन्निहितस्य शिवस्य सङ्गीतं सम्यक् गीतं तत् एव अर्थः सङ्गीतार्थः सङ्गीतवस्तु (अर्थोऽभिधेयरैवस्तु प्रयोजननिवृत्तिष्वित्यमरः।) समग्रः सम्पूर्णः भावी ननु भविष्यति खलु। भविष्यति गम्यादय इति भविष्यदर्थे णिनिः ॥ ५६ ॥

হে মেঘ বায়ুপ্রপূর্ণ কীচক বংশ সুমধুর শব্দ করিতেছে পরস্পর মিলিতা অথবা বংশবাদনানুরক্তা কিন্নরীগণ ত্রিপুরবিজয় গাহিতেছে (আর) যদি তোমার ধ্বনি পর্ব্বতগুহায় প্রতিধ্বনিত হইয়া মৃদঙ্গ-ধ্বনির ন্যায় হয় (তবে) সেই চরণ নিকটস্থ শিবের সংগীতের সম্পূর্ণতা লাভ নিশ্চয়ই করিবে। ৫৬।

The *Kichaka* bamboos produce a sweet sound being filled up with wind, the *Kinnara* females sing in concert (or with flutes) the victory of *Tripura* (by *siva*) and if thou make noise in the caves (so that it be reverberated) there the concert of *siva* will be fully completed—56.

Notes.

1. पवनैः पूर्य्यमाणाः कीचकाः—पूर्य्यमाणाः (पूर कर्म्मणि शानच्) a class of bamboos (with lateral apertures) filled with the

प्रलेयाद्रेरुपतटमतिक्रम्य तांस्तान् विशेषान्
हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम् ।

wind. The whistling of the wind in hollow bamboos may easily be conceived to afford the music of the pipe or the flute.

2. मधुरं शब्दायन्त—शब्दायन्ते (शब्द+शब्दवैर कलहेत्यादिना क्यङ्, शब्दाय which is the nominal root, +लट् अन्ते) produces a sweet sound.

3. संसक्ताभि: किन्नरीभि:—(सम+सञ्ज् क्त+कर्त्तरि क्रियायाम् =संसक्ता: ताभि:) the *Kinnara* females joined together or engaged in playing upon flutes &c. The Kinnaras are a race of demi-gods attendant upon *Kubera*.

4. त्रिपुरविजय: गीयते (गै+ते कर्म्मणि) the victory of *Tripura* (by Siva) is being sung upon. "Tripura is the name of a city or three cities collectively. These formed the domain of a celebrated demon or *Asura* destroyed by Siva and reduced to ashes.

5. कन्दरेषु ते निर्ह्रादः मुरजे ध्वनिः इव स्यात् If there be your thundering noise echoed in the mountain caves resembling the sound of the drum-like musical instrument मुरज or मृदङ्ग।

6. संगीतार्थः ननु पशुपतेः &c भावी=(भू+णिनि भविष्यत् अर्थे) संगीतम् एव अर्थः प्रयोजनीयं वस्तु (रूपक)—(then) there (at the foot mark) the concert of the God Siva will be fully complete, of which I am sure.

7. The अलङ्कार is. उपमानुप्राणितस्वभावोक्तिः।

8. Conjugation—गै—गायति। जगौ। अगासीत्। भू—भवति। बभूव। अभूत्।

तेनोदीचीं दिशमनुसरेस्तिर्य्यगायामशोभी
श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः॥५७॥

Prose order—प्रालेयाद्रेः उपतटं तान् तान् विशेषान् अतिक्रम्य (अनुसरेः) हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम् (अस्ति) तेन बलिनियमनाभ्युद्यतस्य विष्णोः श्यामः पादः इव तिर्य्यगायामशोभी सन् उदीचीम् दिशम् अनुसरेः । ५७ ।

Paraphrase—हिमाद्रेः तटसमीपे तान् तान् प्रसिद्धान् दर्शनयोग्यान् पदार्थान् तीर्त्य गच्छेः ततो मानसयायिनो राजहंसा येन क्रौञ्चबिलेन सञ्चरन्ते जामदग्न्यस्य यशःप्रवृत्तिकारणं तत् क्रौञ्चाद्रिरन्ध्रम् आश्रित्य तिरश्चीनदैर्घ्यशोभी अतएव बलिदैत्यबन्धने प्रवृत्तस्य त्रिविक्रमस्य कृष्णवर्णम् आकाशव्यापिनं चरणमनुकुर्व्वन् उत्तरांदिशमनुगच्छ ॥ ५७ ।

Change of voice—* * अनुसियतां त्वया । येन यशोवर्त्मना क्रौञ्चरन्ध्रेण भूयते तेन * अभ्युद्यतस्य विष्णोः श्यामेन पादेन इव तिर्य्यगायामशोभिना उदीची दिक् अनुसियताम् । ५७ ।

N. B.—सञ्जीवन्यां सूतांपिण्डभेदं भित्वा इत्यत्र सूतांपिण्डभेदं विभिद्य इत्येवं साधु ।

Sanjivani—प्रालेयाद्रेरिति । प्रालेयाद्रेः हिमाद्रेः उपतटं तटसमीपे (अव्ययं विभक्तीत्यादिना समीपार्थेऽव्ययीभावः ।) तान् तान् (वीप्सायां द्विरुक्तिः ।) विशेषान् द्रष्टव्यार्थान् (विशेषोऽवयवे द्रव्ये द्रष्टव्योत्तमवस्तुनीति शब्दार्णवे ।) अतिक्रम्य अनुसरेः गच्छेः इति अनागतेन सम्बन्धः हंसानां द्वारं हंसद्वारम् (मानसप्रस्थायिनो हंसाः क्रौञ्चरन्ध्रेण सञ्चरन्त इत्यागमः ।) भृगुपतेः जामदग्न्यस्य यशोवर्त्म यशःप्रवृत्तिकारणम् इत्यर्थः

यत् क्रौञ्चस्य अद्रेः रन्ध्रम् अस्ति तेन क्रौञ्चविलेन बलेः दैत्यस्य नियमने बन्धने अभ्युद्यतस्य प्रवृत्तस्य विष्णोः व्यापकस्य त्रिविक्रमस्य श्यामः कृष्णवर्णः पादः इव तिर्य्यगायामेन छिद्रप्रवेशनार्थं तिरश्चीनदैर्घ्येण शोभते इति तथाविधः सन् उदीचीम् उत्तरां दिशम् अनुसरेः अनुगच्छ। पुराकिल भगवतो देवात् धूर्ज्जटेः धनुरुपनिषदम् अधीयानेन भृगुनन्दनेन स्कन्दस्य स्पर्द्धया क्रौञ्चशिखरिणाम् अतिनिशितविशिखमुखेन हेलया मृत्पिण्डमेदं भित्त्वा ततः क्रौञ्चभेदादेव सद्यः समुज्जृम्भिते कस्मिन्नपि यशःचौरनिधौ निखिलमपि जगज्जालम् आप्लावितमिति कथा श्रूयते ॥ ५७ ॥

(হে মেঘ) হিমালয়ের তটপ্রদেশে সেই সমস্ত (বিখ্যাত) দ্রষ্টব্য বস্তুজাত অতিক্রম করিয়া (অর্থাৎ দর্শন করিয়া) পরশুরামের যশঃ কারণভূত ক্রৌঞ্চপর্ব্বতস্থিত (মানসগমনোৎসুক) হংসগণের দ্বার স্বরূপ ছিদ্র পথে উত্তরদিগভিমুখে গমন করিবে সেইক্ষণে বক্র ও দীর্ঘভাবে গমনশীল তোমাকে বলিদৈত্যদমনে নিরত বিষ্ণুর কৃষ্ণবর্ণ পাদের ন্যায় দেখাইবে। ৫৭।

While crossing the (wellknown) objects of wonder on the sides of the Himalayas thou shouldst proceed towards the North through the hole of the *Krauucha* mountain the path of fame of *Parasurama* and the way (to Manasa) of the geese; while thus passing obliquely and in an elongated position thou wilt look like the black foot of *Vishnu* employed in suppressing the *Daitya Vali*.—57

Notes.

1. प्रालेयाद्रेः उपतटं—प्रालेयस्य हिमस्य अद्रिः पर्व्वतः प्रालेयाद्रिः तस्य तटस्य समीपे उपतटं अव्ययं विभक्ति समीपेत्यादिना अव्ययीभावसमासः —on the slopes of the Himalayas.

2. तान् तान् विशेषान् अतिक्रम्य—तान् तान् वीप्सायां द्विर्भावः—having passed those (well-known) wonderful objects.

3. हंसद्वारं—हंसानां द्वारं (६ष्ठीतत् पु.)—the door of the Geese (in their way to the lake Manasa) It is customary with the poets to describe the flight of the goose on the advent of rains.

4. भृगुपतियशोवर्त्म—भृगुकुलस्य पतिः भृगुपतिः भृगुशब्देन लक्षणया भृगुकुलं बोध्यते ६ष्ठीतत्पु. समासः तस्य भृगुपतेः यशः (६ष्ठीतत्) तस्य भृगुपतियशसः वर्त्म (६ष्ठीतत् पु-) the path of glory of Parasurama. For the allusion see notes on the epithet क्रौञ्चरन्ध्रम् ।

5. यत् क्रौञ्चरन्ध्रम्—क्रौञ्चस्य तन्नामधेयस्य गिरेःरन्ध्रं छिद्रम् (६ष्ठीतत्पु.) —that pass of the mount क्रौञ्च । Prof. Wilson remarks "I have not been able to make any thing of this pass or hole क्रौञ्चरन्ध्र । The original text states it to be on the very skirt उपतट of the snowy mountain; and calls it also हंसद्वार "the gate of the geese" who fly annually this way to the *Manaswarboar* lake. *Krouncha* is described as a mountain in the Mahabharat and being personified is there called the son of *Mainaka*. A mountain also called *Krauncha meru* occurs in Mr. Wilford's lists, amongst those mountains situated in the north. It must lie at some distance from the plains, and perhaps the poet by using the term उपतट implies its relative situation with the loftiest part of the range or proper snow-clad mountains. The *Krounch* pass or defile

in the Krounch mountain is said to have been made by the arrows of भृगुपति or परशुराम who was educated by *siva* on mount *Kailash* and who thus opened himself a passage from the mountains upon the occasion of his travelling southwards to destroy the क्षत्रिय's or military race."

In the वायुपुराणम् we get a different account. इन्द्र and कार्त्तिकेय had a dispute about their respective strength and agreed to come to a decision by running a race round the mount क्रौञ्च. Disagreeing at the result they appealed to the mount who falsely decided in favour of इन्द्र. On this कार्त्तिकेय being highly enraged hurled his शक्ति or spear at the mountain and pierced it through. This account of वायुपुराण is corroborated by Mallinath see the commentary.

Dowson notes that the pass is somewhere situated in the Himalayas and is opened by परशुराम ।

6. तेन—by that pass of क्रौञ्च ।

7. वलिनियमनाभ्युद्यतस्य विष्णोः श्यामः पादः इव—वलेः प्रह्लादपौत्रस्य दैत्यस्य नियमनं बन्धनं (६ष्ठीतत्पु) तस्मिन् वलिनियमने अभ्युद्यतः प्रवृत्तः (७मी तत्पु) तस्य adjective to विष्णोः—like to the black leg of *Vishnu* engaged in suppressing the दैत्य वलि । This well-known allusion refers to the वामनावतार । Prof. Wilson quotes" The 5th incarnation oi vishnu was in a Brahman Dwarf under the name of *Vamana*. It was wrought to restrain the pride of the दैत्य वलि। The latter after having conquered the gods expelled them from the स्वर्ग; he was generous true to his word compassionate and charitable. विष्णु under the form of a little Brahman presented himself before him while he was sacrificing and asked him for three paces of land to

गत्वा चोर्द्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः।

build a hut. vali ridiculed the apparent imbecility of the dwarf in telling him that he ought not to limit his demand to a bequest so trifling; that his generosity could bestow a much larger donation of land. Vaman answered that being of so small a stature, what he asked was more than sufficient. The prince immediately granted his request and to ratify his donation poured water into his right hand, which was no sooner done, than the dwarf grew so prodigiously that his body filled the universe! He measured the earth in one pace and the heavens with another, and then summoned वलि to give him his word for the third. The prince then recognized विष्णु adored him and presented his head to him; but विष्णु satisfied with his submission sent him to govern the पाताल and permitted him to return every year to the earth the day of the fulmoon in the month of November."

8. तिर्य्यगायामशोभी—तिर्य्यङ् आयामः तिरश्चीनं दैर्घ्यं (कर्मधा) तेन तिर्य्यगायामेन शोभते यः सः (तिर्य्यगायाम+शुभ्+णिनि उपपद-तत्पु.) तथाविधः सन्—extending (thy body) obliquely (in the hole of (क्रौञ्च) and thereby looking beautiful.

9. उदीचीं दिशम् अनुसरेः—proceeds toward the Northern direction.

13. The अलङ्कार is उपमा।

11. Conjugations

क्रम—क्राम्यति क्रामति क्रमते क्रम्यते। चक्राम चक्रमे। अक्रमीत्।

सृ—सरति। ससार। असार्षीत्।

शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः॥५८॥

Prose order—ऊर्ध्वं च गत्वा दशमुखभुजोच्छ्वासितप्रस्थसन्धेः त्रिदशवनितादर्पणस्य कैलासस्य अतिथिः स्याः यः कुमुदविशदैः शृङ्गोच्छ्रायैः खं वितत्य प्रतिदिनं राशीभूतः त्र्यम्बकस्य अट्टहासः इव स्थितः । ५८ ।

Paraphrase—ततः ऊर्ध्वं च गत्वा यस्य प्रस्थसन्धयः दशवक्त्रस्य बाहुभिः विश्लेषिताः स्फाटिकमयत्वात् बिम्बग्रहणसमर्थतया यो देवाङ्गनानां दर्पणकार्यं सम्पादयति यश्च कुमुदवत् शुभ्रैः उन्नतैः शृङ्गैः आकाशं व्याप्य दिने दिने राशीभूतः त्रिनेत्रस्य अतिहास इव लक्ष्यते तस्य कैलासगिरेः दर्शनेन आत्मानं पवित्री कुरु । ५८ ।

Change of voice—* * अतिथिना भूयताम् * येन राशीभूतेन अट्टहासेन इव स्थीयते ।

N B.—स्थितः—तिष्ठते वर्त्तमाने कर्त्तरि क्तः "क्तस्य च वर्त्तमाने" इत्यत्र चकारस्य अनुक्तसमुच्चयार्थत्वात् केषाञ्चित् अकर्म्मकाणां धातूनां कर्त्तरि वर्त्तमाने क्तः स्यात् इति नियमात् तेन वाच्यपरिवर्त्तने स्थीयते नतु स्थितम् । ५८ ।

Sanjivani— गत्वेति । क्रौञ्चबिलनिर्गमनानन्तरम् ऊर्ध्वञ्च गत्वा दशमुखस्य रावणस्य भुजैः बाहुभिः उच्छ्वासिताः विश्लेषिताः प्रस्थानां सानूनां सन्धयः यस्य तस्य एतेन नयनकौतुकसद्भावः उक्तः त्रिर्दश परिमाणम् एषाम् अस्तीति त्रिदशाः (संख्ययाव्ययेत्यादिना बहुव्रीहिः । बहुव्रीहौ संख्येये डजित्यादिना समासान्तो डच् प्रत्ययः ।) त्रिदशानां देवानां वनिताः तासां दर्पणस्य (कैलासस्य स्फाटिकत्वात् रजतत्वाद्वा बिम्बग्राहित्वेन इदमुक्तम् ।) कैलासस्य अतिथिः स्याः यः कैलासः कुमुदविशदैः निर्मलैः

शृङ्गाणाम् उच्छ्रायैः औन्नत्यैः खम् आकाशं वितत्य व्याप्य प्रतिदिनं दिने दिने राशीभूतः त्र्यम्बकस्य त्रिलोचनस्य अट्टहासः अतिहासः इव स्थितः। अट्टावतिशयक्षौमा-विति यादवः। धावल्यात् हासत्वेन उत्प्रेक्षा। हासा-दीनां धावल्यं कविसमयसिद्धम् ॥ ५८ ॥

(ক্রৌঞ্চরন্ধ্র হইতে বহির্গত হইয়া) ও ঊর্দ্ধে গমন করিয়া রাবণ-বাহুদ্বয় দ্বারা উত্তোলিত প্রস্থ সন্ধি সমন্বিত স্বর্গবাসিনী রমণী গণের দর্পণ স্বরূপ কৈলাস পর্ব্বতের অতিথি হইবে, যে কৈলাস কুমুদপুষ্পধবল উন্নতশৃঙ্গে আকাশ পরিব্যাপ্ত করিয়া যেন শিবের রাশী-ভূত অট্টহাস্য স্বরূপে অবস্থিত আছে। ৫৮।

(After issuing out of the hole of *Krauncha*) and soaring upwards thou shouldst be a guest of the Kailash mountain the mirror of the goddesses (on account of its being made of crystals or silver) and whose upland joints are raised by the arms of Ravana the tenheaded),and which (mountain) having extended its lily-white peaks in the sky is seated as it were the mass of loud laughter of *siva* piled up day after day (because laughter is considered as a substance of white colour).—58.

Notes.

1. ऊर्द्ध्वं च गत्वा—having gone upwards.

2. दशमुखभुजोच्छ्वासित प्रस्थसन्धेः—दश मुखानि यस्य सः (बहुव्री) दशमुखः तस्य भुजाः (६तत्पु.) तैः दशमुखभुजैः (३यातत्) उच्छ्वासिताः दशमुखभुजोच्छ्वासिताः, प्रस्थानां तटानाम् सन्धयः प्रस्थसन्धयः (६ष्ठीतत्पु.) दशमुखभुजोच्छ्वासिताः प्रस्थसन्धयः यस्य स तस्य (बहुव्री) adjective to कैलासस्य—the joints of whose sides have been uplifted by the

arms of *Ravana* (lit. the tenfaced राचस : Prof. Wilson— "This alludes to a legend of Ravana's having attempted to remove the mountain from its situation, although he did not succeed, he considerably unhinged its foundations. Compare समुत्क्षिपन् यः पृथिवीभृतां वरम् इत्यादि शिशुपालवध १ । ५० ।

3. त्रिदश वनिता दर्पणस्य—त्रिः दश परिमाणमेषाम् अस्ति इति त्रिदशाः (संख्याव्ययेत्यादिना बहुव्रीहि) यद्वा त्रिस्रः बाल्यकौमारयौवनरूपाः दशाः येषाम् ते त्रिदशाः तेषां वनिताः तासां दर्पणः तस्य (स्फटिकमयत्वात् दर्पणत्वेन कल्पना)—A mirror to the wives of the Gods.

4. कैलासस्य अतिथिः स्याः—अतिथि= (अत् + इथिन् कर्त्तरि)— be a guest to the mountain of Kailash.

5. कुमुदविशदैः शृङ्गोच्छ्रायैः—कुमुदानि इव विशदाः तैः उपमानानि सामान्य वचनैः इति उपमान समासः शृङ्गाणाम उच्छ्रायः (षष्ठीतत् पु.) उच्छ्राय = (उद् + श्रि + घञ् भावे) तैः करणे तृतीया । by means of lofty peaks as white as *Kumud* flowers.

6. यः खं वितत्य—वितत्य = (वि + तन् + क्त्वा स्थाने ल्यप्)—Who (the Kailash) extending (himself) in the firmament.

7. प्रतिदिनं—दिने दिने इति अव्ययं विभक्तीत्यादिना अव्ययीभाव समासः—day by day. the other forms are प्रतिदिनेन प्रतिदिनात् प्रतिदिने परिदिनम् अनुदिनम् इत्यादि। भरत सनातन रामनाथ सारोद्धारिणी सुमतिविजय वल्लभ Wilson and others read प्रतिदिशम् for प्रतिदिनम् and interprets दिशि दिशि i. e. in every directions.

8. राशीभूतः—अराशिः राशिः जातः राशि + अभूततद्भावे च्वि + भूतः गतिसमासः । accumulated in a heap.

9. त्र्यम्बकस्य—त्रीणि अम्बकानि नयनानि यस्य सः (बहुव्रीहि) तस्य शिवस्य—Of the three-eyed one that is of *siva*.

10. अट्टहासः इव स्थितः (स्था + क्त कर्त्तरि) stands like the loud

उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे
सद्यःकृत्तद्विरददशनच्छेदगौरस्य तस्य ।
शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्री-
मंसन्यस्ते सति हलभृतो मेचके वाससीव ॥५९॥

laughter. Sanskrit poets in accordance with the rule of rhetoric always describe laughter as a white substance, C. f. "यशसि धवलता वर्ण्यते हासकीर्त्योः" साहित्यदर्पण। Now as the mountain *Kailash* is made of either crystal or silver our poet aptly compares it with accumulated laughter of *siva*.

11. The अलङ्कार of the sloka is उत्प्रेक्षा according to the rule "सम्भावनमथोत्प्रेक्षा प्रकृतस्य परात्मना" मम्मटभट्ट।

12. Conjugations—तन्—तनोति तनुते। ततान तेने। अतनीत् अतानीत् अतत अतनिष्ट।

स्था—तिष्ठति। तस्थौ। अस्थात्।

Prose order—स्निग्धभिन्नाञ्जनाभे त्वयि तटगते (सति) सद्यः कृत्तद्विरददशनच्छेद गौरस्य तस्य अद्रेः मेचके वाससि अंसन्यस्ते सति हलभृतः इव स्तिमित नयनप्रेक्षणीयां शोभां भवित्रीम् उत्पश्यामि। ५९।

Paraphrase—श्यामले वस्त्रे स्कन्धन्यस्ते सति शुभ्रकान्तेः बलदेवस्य या शोभा जायते मसृणमर्दितकज्जल सवर्णे भवति सानुगते सति सद्यश्छिन्न-गजदन्तवत् धवलस्य तस्य गिरेः कैलासस्य तादृशी निश्चलनेत्र निरीक्षणीयाशोभा भाविनीति मन्ये (अथवा भवितेति पश्यामीव। ५९।

Change of voice—* * स्तिमितनयन प्रेक्षणीया शोभा भवित्री * उत्पश्यते। ५९।

Sanjivani—उत्पश्यामीति। स्निग्धं मसृणं भिन्नं मर्दितं च यत् अञ्जनं कज्जलं तस्य आभा इव आभा

यस्य तस्मिन् त्वयि तटगते सानुगते सति सद्यः कृत्तस्य छिन्नस्य द्विरददशनस्य गजदन्तस्य छेदवत् गौरस्य धवलस्य तस्य अद्रेः कैलासस्य मेचके श्यामले (कृष्णनीलासित-श्यामकालश्यामलमेचका इत्यमरः ।) वाससि वस्त्रे अंसन्यस्ते सति हलभृतो बलभद्रस्य इव स्तिमिताभ्यां नयनाभ्यां प्रेक्षणीयां शोभां भवित्रीं भाविनीम् उत्पश्यामि शोभा भविष्यतीति तर्कयामि इत्यर्थः । श्रौती पूर्णोपमा अलङ्कारः ॥ ५९ ॥

নবকর্ত্তিত হস্তিদন্ত খণ্ডবৎ শুভ্রবর্ণ সেই পর্ব্বতের (কৈলাসের) তটদেশে মসৃণবিমর্দ্দিত কজ্জলবর্ণবৎ কৃষ্ণ তুমি অবস্থিত হইলে (শুভ্রবর্ণ শরীর) বলরামের স্কন্ধদেশে ন্যস্ত কৃষ্ণবর্ণ বস্ত্রখণ্ডের ন্যায় পলকবিহীননেত্রদর্শনযোগ্য শোভা ধারণ করিবে ইহা আমি অনুমান করিতেছি । ৫৯ ।

(Oh cloud) when thou as black as glossy collyrium well powdered shouldst remain on the sides of it (the mount) as white as a piece of newly-cut ivory, I fancy, the beauty resembling that of Balaram wearing a piece of black cloth on his shoulder will be worthy of being perceived with motionless eyes.—59.

Notes.

1. स्निग्धभिन्नाञ्जनाभे—स्निग्धं मसृणं भिन्नं मर्द्दितं यत् अञ्जनं कज्जलं तस्य (विशेषण द्वयेन कर्म्मधा) स्निग्धभिन्नाञ्जनस्य आभा इव आभा यस्य स तस्मिन् (खापदादिवत् उपमानोत्तरपदलोपी बहुव्री) shining like glossy powdered antimony mixed up with oil.

2 त्वयि तटगते सति—त्वयि "यस्य च भावेन भाव लक्षणम्" इति सप्तमी thou standing on the slopes of the mountain (Kailash)

हित्वा तस्मिन् भुजगवलयं शम्भुना दत्तहस्ता
क्रीडाशैले यदि च विचरेत् पादचारेण गौरी ।

3. सद्यः कृत्तद्विरददशनच्छेद गौरस्य तस्य—सद्यस् समाने अहनि अह्नि वा इति सद्यस् निपातनात् सिद्धम् सद्यस् कृत्त. (कृत्+क्त कर्म्मणि) 'सह सुपा' इति समासः द्वौ रदौ दन्तौ यस्य स द्विरदः (बहुव्री) हस्ती द्विरदस्य दशनः द्विरददशनः (६ष्ठीतत् पु.) सद्यःकृत्तः द्विरददशनः सद्यःकृत्तद्विरद दशनः (कर्म्मधा) तस्य च्छेदः सद्यःकृत्तद्विरददशनच्छेदः इव गौरः शुभ्रः तस्य "उपमानानि सामान्य वचनैः" इति उपमान समासः । तस्य कैलासस्य अद्रेः of that mountain) white as a newly cut piece of the tusk of elephant.

4 मेचके वाससि अंसन्यस्ते सति—अंसे न्यस्तं तस्मिन् (नि + अस् + क्त कर्त्तरि) ७मीतत्पु.—A piece of black cloth being placed on the shoulder.

5. हलभृतः इव—हलं तद्रूपं अस्त्रं बिभर्त्ति यः स (हल + भृ + क्विप कर्त्तरि उपपद तत्पु.) like the wielder of plough.

6. स्तिमितनयन प्रेक्षणीयां (स्तिम्+क्त कर्त्तरि) स्तिमिते नयने स्तिमित नयने (कर्म्मधा) ताभ्यां स्तिमितनयनाभ्यां प्रेक्षणीया (प्र + ईक्ष + अनीय कर्म्मणि) ३या ततपुरुष तां an adjective to शोभां—worthy of being seen by motionless eyes.

7. शोभां भवित्रीम् उत्पश्यामि—भवित्रीं = भू + तृच् + स्त्रियां ङीप् भाविनीं adjective to शोभां—I think the beauty will take place.

8. The अलङ्कार is श्रौती पूर्णोपमा ।

9. Conjugations

दृश्—पश्यति । ददर्श । अद्राक्षीत् ।

स्तिम्—स्तिम्यति । तिष्टेम स्तीम्यति ।

भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः
सोपानत्वं कुरु मणितटारोहणायाग्रयायी ॥६०॥

Prose order—तस्मिन् क्रीड़ा शैले शम्भुना भुजगवलयं हित्वा दत्तहस्ता (सती) गौरी पादचारेण विचरेत् यदि च (तर्हि) अग्रयायी स्तम्भितान्तर्जलौघः भङ्गीभक्त्या विरचितवपुः (सन्) मणितटारोहणाय सोपानत्वं कुरु । ६० ।

Paraphrase—तत्रक्रीड़ाशैले कैलासे गौरी भुजङ्गात् भीता माभवत् इति भुजगरूपं कङ्कणं परित्यज्य शिवेन गृहीतकरा सती गौरी यदि पादचारेण विचरेत तर्हि त्वं पुरोगतः घनीभावं प्रापितान्तर्जलप्रवाहः तथा भङ्गीरचनयाच कल्पितशरीरः सन् तयोः मणितटारोहणसौकर्य्यार्थं सोपानकार्य्यं विधेहि । ६० ।

Change of voice—* शम्भुना दत्तहस्तया गौर्य्यां यदि विचर्य्यत तर्हि *विरचितवपुषा स्तम्भितान्तर्जलौघेन अग्रयायिणा *सोपानत्वं क्रियताम् ।६०।

Sanjivani - हित्वेति । तस्मिन् क्रीडाशैले कैलासे (कैलासः कनकाद्रिश्च मन्दरो गन्धमादनः । क्रीडार्थं निर्मिताः शम्भोर्देवैः क्रीडाद्रयोऽभवन्निति शम्भुरहस्ये ।) शम्भुना शिवेन भुजगः एव वलयः कङ्कणं हित्वा गौर्य्याः भीरुत्वात् त्यक्त्वा दत्तहस्ता सती गौरी पादचारेण विचरेत् यदि तर्हि अग्रयायी पुरोगतः तथा स्तम्भितो घनीभावं प्रापितः अन्तर्जलस्य ओघः प्रवाहो यस्य स तथाभूतः भङ्गीनां पर्व्वणां भक्त्या रचनया विरचितवपुः कल्पितशरीरः सन् मणीनां तटं मणितटं तस्य आरोहणाय सोपानत्वं कुरु सोपानभावं भज इत्यर्थः ॥ ६० ॥

(হে মেঘ) সেই ক্রীড়া পর্ব্বতে সর্পবলয় পরিত্যাগ করিয়া শিব

কর্ত্তৃক গৃহীত হস্তা গৌরী যদি পাদচারণ পূর্ব্বক ভ্রমণ করেন তবে তুমি অগ্রগামী হইয়া স্বান্তঃস্থবারিরাশিস্তম্ভিত করিয়া স্বশরীর পর্ব্ব [ধাপ] রচনা বিশিষ্ট করিয়া রত্নময় সানুদেশারোহণে সোপান ভাব ধারণ করিবে। ৬০।

(O cloud) And in case held in hand by that of *Gouri* *Siva* got rid of the bangle of snakes be pleased to walk on foot in that mount of enjoyment (then) thou shouldst go before her having suppressed in a conjealed form thy mass of water within thyself and also having metamorphosed thy body inthe shape of step-like order and become a flight of steps for ascending the sides of the mount made of precious stones.— 60.

Notes.

1. तस्मिन् क्रीड़ा शैले—क्रीड़ायाः शैलः (६ष्ठीतत्पु.) तस्मिन्—at that mountain of sport, viz. the *Kailash*.

2. अमुना—(अस् + मु + ङ अपादान वाच्ये)—by Siva.

3. भुजगवलयं हित्वा—भुजं वक्रं गच्छति इति (भुज + गम् ड कर्त्तरि) भुजगः एव वलयः (रूपक समासः तं—having put off the bangle of snake. This is owing to the timidity of *Gouri* the wife of *siva*.

4. दत्तहस्ता गौरी—दत्तः हस्तः यस्यां सा (बहुव्री) adjective to *Gouri*—helping her by the hand.

5. पादचारेण विचरेत् यदि च—(चर् + घञ् भावे) चारः पादयोः चारः तेन करणे ३या—In case walks on foot. Other reading is विहरेत् instead of विचरेत ।

6. अग्रयायी—अग्रे याति यः सः (अग्र + या + णिनि उपपदतत्पु.) —having gone before her.

तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम्।
ताभ्यो मोक्षस्तव यदि सखे घर्मलब्धस्य न स्यात्
क्रीड़ालोलाः श्रवणपरुषैर्गर्जितैर्भाययेस्ताः॥६१॥

7. स्तम्भितान्तर्जलौघः—स्तम्भितः (स्तम्भ् + णिच् + क्त कर्मणि) अन्तर्गतं जलम् अन्तर्जलं गतिसमासः तस्य ओघः (६ष्ठीतत् पु.) अन्तर्जलौघः स्तम्भितः अन्तर्जलौघः यस्य येन वा सः (बहुव्री)—having suppressed the mass of water inside.

8. भङ्गीभक्त्या विरचितवपुः—भङ्गीनां भक्तिः (६ष्ठी ततपु.) तया करणे ३या विरचितं (वि + रच् + क्त कर्मणि) वपुः येन सः विरचितवपुः (सन्)—having transformed the body in the shape of undulating stepl-ike form.

9. मणितटारोहणाय सोपानत्वं कुरु—मणीनां तटं मणितटं तस्य आरोहणम् (६ ततपु.) तस्मै मणितटारोहणाय "तुमर्थाच्च भाववचनात्" इति ४र्थी विभक्तिः। सोपानस्य भावः सोपानत्वं भावे त्वतलौ इति त्वप्रत्ययः—perform the office of stair-case for ascending the sides of mountain of jewels. This is because the mountain Kailas is made of precious stones.

N. B. Instead of the last line :सोपानत्वं कुरु मणितटारोहणायायथायी commentators like भरत सनातन रामनाथ हरगोविन्द and Wilson read सोपानत्वं व्रज पदसुखस्पर्शमारोहणेषु।

10. The अलङ्कार is अनुप्रास in the sloka.

11. Conjugations—

चर्—चरति, चचार, अचारीत्।

कृ—करोति कुरुते, चकार चक्रे। अकार्षीत् अकृत।

Prose order—अत्र सुरयुवतयः वलयकुलिशोद्घट्टनोद्गीर्णतोयं त्वां अव-

धारा गृहत्वम् अवश्यं नेष्यन्ति हे सखे घर्म्मलब्धस्य तव यदि ताभ्यः मोक्षः न स्यात् तर्हि क्रीड़ालोलाः ताः श्रवणपरुषैः गर्ज्जितैः भाययेः । ६१ ।

Paraphrase—तस्मिन् क्रीड़ाशैले सुराङ्गनाः त्वां वलयकोटिभिः विदारयिष्यन्ति ततः विदीर्णरन्ध्रेभ्यः नवतोयं त्वां सर्व्वथा यन्त्रधारागृहत्वं प्रापयिष्यन्ति हे सखे निदाघतापहारकं त्वां लब्धनिर्वृतयस्ताः यदि मोक्तुं नेच्छन्ति तर्हि पर कार्य्यहन्त्रीः स्वार्थपराश्च सुरयुवतीः श्रुतिकटुभिः गर्ज्जितैः त्रासयेः ।

Change of voice—तत्र सुरयुवतिभिः वलयकुलिशोद्घट्टनोद्गीर्णतोयः त्वं यन्त्रधारागृहत्वम् अवश्यं नेष्यसे हे सखे घर्म्मलब्धस्य तव यदि ताभ्यः मोक्षेण न भूयेत तर्हि क्रीड़ालोलाः ताः श्रवणपरुषैः गर्ज्जितैः भाय्यरन् (त्वया) । ६१ ।

Sanjivani—तत्रेति । तत्र कैलासे अवश्यं सर्व्वथा सुरयुवतयः वलयकुलिशानि कङ्कणकोटयः "शतकोटिवाचिना कुलिशशब्देन कोटिमात्रं लक्ष्यते" । तैः उद्घट्टनानि प्रहाराः तैः उद्गीर्णम् उत्सृष्टं तोयं येन तं त्वां यन्त्रेषु धाराः यन्त्रधाराः तासां गृहत्वं कृत्रिमधारागृहत्वं नेष्यन्ति प्रापयिष्यन्ति हे सखे मित्र घर्म्मे निदाघे लब्धस्य "घर्म्मलब्धत्वञ्चास्य देवभूमिषु सर्व्वदा सर्व्वर्त्तुसमाहारात् प्राथमिकमेघत्वाद्वा यथोक्तम् आषाढ़स्य प्रथम" इति । तव ताभ्यः सुरयुवतिभ्यः मोक्षो न स्यात् यदि तदा क्रीड़ालोलाः क्रीड़ासक्ताः प्रमत्ताः इत्यर्थः ताः सुरयुवतीः श्रवणपरुषैः कर्णकटुभिः गर्ज्जितैः करणैः भाययेः त्रासयेः । अत्र हेतुभयाभावात् आत्मनेपदं पुगागमश्च न ।

সে স্থানে (কৈলাসে) অবশ্যই সুরাঙ্গনাগণ বলয়াগ্রভাগ প্রহার দ্বারা ক্ষরিত জল সমন্বিত তোমাকে (জলসেকার্থ) যন্ত্রধারাগৃহত্ব প্রাপ্ত করাইবেক, গ্রীষ্মে লব্ধ (অতএব অতি প্রিয়) বলিয়া হে সখে যদি তাহা-

দিগের নিকট মুক্তি না পাও তাহা হইলে ক্রীড়ানিরতা তাহাদিগকে শ্রুতিকঠোর ধ্বনিতে ভয় দেখাইবে। ৬১।

There (in the *Kailash*) the celestial nymphs will surely use thee, that art trickling with water on account of the friction of the points of their bangles, as a bath-room of water spray, but Oh my friend! If thou that art obtained by them in summer (hence very dear) cannot extricate thyself from them then thou shouldst frighten them engaged in sportive amusements with thundering noise unpleasant to the hearing.—61.

Notes.

1. तत्र—in that mountain.

2. अवश्यम् सुरयुवतयः—सुराणाम् युवतयः (६ष्ठी तत्पु.) the damsels of the heaven assuredly.

3. वलयकुलिशोद्घट्टनोद्गीर्णतोयं—वलयानां कुलिशानि कोटिदेशाः वलयकुलिशानि (कुलिशं=कुलेनि पर्व्वते शेते यत् तत्) कुलिन् + शी + ड कर्त्तरि) वलयकुलिशैः उद्घट्टनानि प्रहाराः (३या तत्पु.) तैः उद्गीर्णम् (उत् + गॄ + क्त कर्म्मणि) उतस्तृष्टं (३या तत्पु.) वलयकुलिशोद्घट्टनोद्गीर्णं तोयं येन सः तं (बहुव्री) an adjective to त्वाम्—shedding water on account of the friction of the beating of the points of the bangles (in the arms). The सारोद्धा. मल्लि वल्लभ and others explains कुलिश as वज्र or हीरक and so कुलिशवलयः=हीरक वलयः। Prof. Wilson notes—"The diamond and thunder bolt according to Hindu notion are of one substance and are called by the same appellation वज्र।"

4. त्वां यन्त्रधारागृहत्वं नेष्यन्ति—यन्त्रेषु (यन्त्राणाम् वा) धाराः यन्त्रधाराः (६ वा ७मी तत्पु.) तासां गृहम् (६ तत्पु.) तस्य भावः तत् (भावे त्वतद्वौ) नेष्यन्ति (नी + स्यन्ति लृट)—will utilyse thee as an apartment of shower-bath. The term यन्त्रधारागृहत्वं is explained by मल्लि thus अनेकधार धनुरान्तर्व्विवरावभासित पुत्तलिकादीनि तत् वरत

धारायन्त्रे प्रवृत्तवारिधाराभिः उपलक्षितं ग्रीष्मतापशमनं धनिनां धाम धारागृहमुच्यते । Prof. Wilson remarks as follows "Literally 'they shall take thee as being the abode of an artificial water work. —a jet deau or according to some commentators a vessel for sprinkling water."

5 हे सखे—Oh my friend the cloud.

6. घर्म्मलब्धस्य तव—घर्म्मे ग्रीष्मे लब्ध आसादितः तस्य (७मी तत्पु.)—of thee that hast been obtained in the summer season (by the heavenly damsels).' Mallinath reminds us the lines आषाढस्य प्रथम दिवसे &c. The सारोद्धारिणी explains निदाघकाले प्राप्तस्य ।

7. ताभ्यः मोक्षः न स्यात् यदि—in case (thy) release is not to be had from them (the damsels). This is owing to the fact that the showers of cloud are very pleasant in the summer.

8. क्रीडालोलाः ताः—the damsels that are given to or addicted to sports or frolics. मल्लि explains as क्रीडासु नवकेलिषु लोलाः आसक्ताः ।

9. श्रवणपरुषैः गर्ज्जितैः—श्रवणयोः परुषाणि (७मी तत्पु.) तैः गर्ज्जितैः शब्दैः (गर्ज्ज + क्त भावे "नपुंसके भावे क्तः" इति सूत्रेण) करणैः—by means of thundering noise very unpleasant to the ear.

10. भाययेः. नतु भापयेथाः भीषयेथाः वा । यत्र कर्तृकारकात् भयमुत्पद्यते तत्र भीधातोः आत्मनेपदं पुगागमः षुगागमश्च भवति सुरयुवतीनां कर्तृकारकात् भयात् न भयम् किन्तु करणकारकात् गर्ज्जितात् भयं अतो नात्मनेपदं पुगागमः षुगागमश्च तेन भापयेथाः भीषयेथाः वा इत्येवं न रूपम् इति सुधीभिर्विभाव्यम् भाययेः—(भी + णिच् यासुट् विधिलिङ्) shouldst frighten (them) the सारोद्धारिणी मल्लि सुमतिविजय and others read भापयेः, and वल्लभ and others भीषयेः but grammatically these readings are incorrect. The Panini sutra भीस्म्योर्हेतुभये (the roots भी and स्मि take the reflexive or आत्मनेपद form in the causative base if the action is effected by the agent himself) and also पुगागम by the rule "भियो हेतुभये षुक्" [illegible] [illegible] by

हेमाम्भोजप्रसवि सलिलं मानसस्यादद्दानः
कुर्व्वन् कामं क्षणमुखपटप्रीतिमैरावतस्य।
धुन्वन् कल्पद्रुमकिशलयान्यंशुकानीव वातै-
र्नानाचेष्टैर्जलद ललितैर्निर्व्विशेस्तं नगेन्द्रम् ॥६२॥

the rule भीतिङ्गौ वा &c. are not applicable here in as much as the cloud strikes fear through noise गर्ज्जितैः hence Mallinath is perfectly correct in reading भाययेः and interpreting भय हेतुभयाभावात् आत्मनेपदं युगागमश्च न ।। ६१ ।

11. The अलङ्कार is अनुप्रास।

12. Conjugations—

नी—नयति नयते। निनाय निन्ये अनैषीत् अनेष्ट।

णिजन्तभी—भाययति। भीषयते and भापयते।

Prose order—मानसस्य हेमाम्भोजप्रसवि सलिलम् आददानः ऐरावतस्य क्षणमुखपटप्रीतिम् कुर्व्वन् वातैः अंशुकानीव कल्पद्रुमकिसलयानि धुनन् हे जलद! इत्थं नानाचेष्टैः ललितैस्तं नगेन्द्रं निर्व्विशेः। ६२।

Paraphrase—हे जलधर! तत्र मानसाख्यसरोवरस्य स्वर्णकमलजनकं जलं पिब, मुखे पटेनावृते या प्रीतिर्जायते जलदानकाले शिवसेवार्थमागतस्य ऐरावतस्य तां प्रीतिं समुत्पादय, वायुभिः सूक्ष्मवस्त्रवत् कल्पवृक्षपल्लवानि कम्पय, इत्थं बहुविधैः विलासक्रीड़ितैः तं कैलासं यथेष्टं समुपभुङ्क्ष्व।६२।

Change of voice—॰ आददानेन ॰ कुर्व्वता ॰ धुन्वता ॰ स नगेन्द्रः निर्विश्येत। ७२।

Sanjivani—हेमेति। हे जलद हेमाम्भोजानां प्रसवि जनकम्। "जिदृक्ष्यादिना" इनिप्रत्ययः। मानसस्य सरसः सलिलम् आददानः पिबन् इत्यर्थः तथा ऐरावतस्य इन्द्रगजस्य कामचारित्वाद्वा शिवसेवार्थम् इन्द्रागमनाद्वा समागतस्य इति भावः क्षणे जलदानकाले मुखे पटेन या

प्रीतिः तां कुर्व्वन् तथा कल्पद्रुमाणां किशलयानि पल्लवभूतानि अंशुकानि सूक्ष्मवस्त्राणि इव । "अंशुक वस्त्रमात्रे स्यात् परिधानोत्तरीययोः । सूक्ष्मवस्त्रे नातिदीप्तवे" इति शब्दार्णवे । वातैः मेघवातैः धुन्वन् नाना बहुविधाः चेष्टाः तोयपानादयो येषु तैः ललितैः क्रीड़ितैः । "ना भावभेदे स्त्रीनृत्ये ललितं त्रिषु सुन्दरे । अस्त्रियां प्रमदागारे क्रीड़िते जातपल्लवे" इति शब्दार्णवे । तं नगेन्द्रं कैलासं कामं यथेष्टं निर्व्विशैः समुपभुङ्क्ष्व । "निर्व्वेशो भृतिभोगयो" इत्यमरः । यथेच्छविहारो मित्रगृहेषु मैत्र्याः फल सहजमित्रञ्च तौ कैलासः मेघपर्व्वतयोः अब्जसूर्य्ययोः अब्धिचन्द्रयोः शिखिजीमूतयोः समीराग्न्योः मित्रता स्वयम् इति भावः । ६२ ।

মানস সরোবরের স্বর্ণপদ্ম প্রসবকারি বারি পান করিয়া(শিবপূজার্থাগত ইন্দ্রের) ঐরাবতের কিয়ৎকাল মুখবসন প্রীতি উৎপাদন করিয়া কল্পবৃক্ষের সূক্ষ্মবসনসদৃশনবপত্র বায়ু দ্বারা কম্পিত করিয়া (ইত্যাদি) নানাবিধ মনোরম কার্য্যের সহিত সেই পর্ব্বতরাজকে উপভোগ করিও । ৬২ ।

Drinking the water of the Manasa lake which produces lotuses of gold, providing *Airabata* with the pleasure of a momentary covering for his face and fluttering like fine pieces of cloths the new shoots of the Kalpa tree by thy winds, Oh thou ! enjoy heartily the king of mountain Kailash) with amusements of the like nature.—62.

Notes.

1. जलद—जलानि ददाति इति (जल + दा + क कर्त्तरि) Oh sloud ! in the case of address.

2. मानसस्य—of (the lake of) Manaswarobar. Prof. Wilson notes—Manasa, Manaswrobar or commonly Mansarabar is a celebrated lake situated in the centre of the Himalaya mountains and was long said to be the source of

the Ganges and Brahmaputra river; with respect to the first of these the statement has been found to be erroneous.

3. हेमाम्भोजप्रसवि सलिलं—हेम्नः अम्भोजानि (६ तत्पु.) तेषां हेमाम्भोजानां प्रसवः अस्ति अस्य प्रसवि (प्रसव + इनि अस्त्यर्थे "व्रीह्यादिना इनि"—the water producing lotuses of gold.

4. आददानः— आ + दा + शानच् कर्त्तरि। "आङो दोऽनास्यविहरणे" इति आत्मनेपदम् 'आङो'ऽस्वप्रसारे" इति वोपदेवः। Appropriating or drinking.

5. ऐरावतस्य—of the elephant called ऐरावत (who came either of his free will or with Indra who came to worship *Siva*.

6. क्षणमुखपटप्रीतिं कुर्व्वन्—पटेन प्रीतिः पटप्रीतिः (३या तत्पु.) मुखस्य मुखे वा पटप्रीतिः (६ष्ठी ७मी वा तत्पु.) मुखपटप्रीतिः क्षणं क्षणे वा मुखपटप्रीतिः क्षणमुखपटप्रीतिः (७मी तत्पु. २या तत्पु. वा) तां—procuring momentary pleasure arising out of a veil of the face. Mallinath explains क्षण at the time of drinking water but the सारोद्धारिणी explains कुञ्जराः किल मुखपटेन प्रावार्य्यन्ते।

7. कल्पद्रुमकिसलयानि—कल्पप्रदः द्रुमः कल्पद्रुमः शाकपार्थिवादिवत् मध्यपदलोपी कर्म्मधारय। तेषां किसलयानि—the new shoots of the Kalpa tree. Kalpa tree is one of the five kinds which flourish in नन्दन garden.

पञ्चैते देवतरवो मन्दारः पारिजातकः ।
सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥

8. अंशुकानि इव वातैः धुन्वन्—shaking by the breezes in the manner of fine cloths.

9. नानाचेष्टैः—नानाबहुविधाः चेष्टाः येषु तानि तैः (बहुव्री)—having diverse sports.

10. ललितैः—क्रीडाभिः करणे सहार्थे वा तृतीया with amusements.

11. तं नगेन्द्रं—नगेषु नगानां वा इन्द्रः श्रेष्ठः नगेन्द्रः यद्वा नगेषु इन्द्रः इव उपमित समासः न गच्छति यः स नगः "नगोऽप्राणिष्वन्यतरस्याम्" इति नञः प्रकृतिभावः विकल्पितः the negative particle नञ् remains unchanged optionally when an inanimate object is denoted.

तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन्।
या वः काले वहति सलिलोद्गारमुच्चैर्विमाना
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम्॥६३।

12. कामं निर्विशेः—कामं = सम्यक् enjoy fully or at your pleasures निर् + विश = to enjoy सनातन and हरगोविन्द read कामात् instead of काम and explains स्वेच्छया।

N. B. Instead of the last hemistich of the text the above mentioned scholiasts read धुन्वन वातैः सजलपृषतैः कल्पवृक्षांशु-कानि छायाभिन्नस्फटिकविशदं निर्विशेस्तं नगेन्द्रम्॥ But this sloka is not explained by commentators like भरत कल्याणमल्ल रामनाथ। This sloka is in the opinion of our venerable Pundit I. C. Vidyasagar a spurious one, being not from the pen of Kalidas and one of the few spurious slokas explained by Mallinath.

13. The अलङ्कार of the sloka is उपमा।

14. Conjugations:—

धु—धुनोति धुनुते। दुधाव दुधुवे अधावीत अधोष्ट।

विश्—विशति. विवेश. अविक्षत।

Prose order—(हे) कामचारिन् प्रणयिन इव तस्य उत्सङ्गे स्रस्तगङ्गा-दुकूला अलकां दृष्ट्वा त्वं न ज्ञास्यसे न, मुक्ताजालग्रथितम् अलकं कामिनी इव उच्चैर्विमाना या वः काले सलिलोद्गारम् अभ्रवृन्दं वहति। ६३।

Paraphrase—प्रियतमस्य क्रोड़े नितम्बस्खलितसितांशुकानायिकेव तस्य कैलासस्य ऊर्द्ध्वभागे मन्दाकिनीधारा कुबेरनगरी वर्त्तते हे कामचारिन् बहुशो दृष्टपूर्वां तां विलोक्य त्वं प्रत्यभिज्ञास्यसि एव। उन्नततमभूमिकगृहा या निर्म्मापा नायिका मौक्तिकसरैः प्रथुमान् चूर्णकुन्तलानिव वर्षासु सजल-सलिलधारम् मेघकदम्बं बिभर्त्ति। ६३।

Change of voice—*त्वया न ज्ञास्यते न, * मुक्ताजालग्रथितः अलकः कामिन्या इव उच्चैर्विमानया यया वः काले * उह्यते। ६३।

Sanjivani—तस्येति। प्रणयिनः प्रियतमस्य इव

तस्य कैलासस्य उत्सङ्गे ऊर्द्धभागे। "उत्सङ्गो मुक्तसंयोगे सक्थन्यूर्द्धतलेऽपि च" इति मालतीमालायाम्। गङ्गा दुकूलं शुभ्रवस्त्रम् इव। "उपमितसमासः। दुकूलं सूक्ष्मवस्त्रे स्यादुत्तरीये सितांशुके" इति शब्दार्णवे। अन्यत्र तु गङ्गा इव दुकूलं तत् स्रस्तं यस्याः तां तथोक्ताम् अलकां कुवेरनगरीं दृष्ट्वा कामिनीम् इवेति शेषः हे कामचारिन् त्वं पुनः त्वं तु न ज्ञास्यसे इति न किन्तु ज्ञास्यसे एव इत्यर्थः। "कामचारित्वस्ते पूर्व्वमपि वहुकृत्वो दर्शनसम्भवादज्ञानमसम्भावितमेवेति निश्चयार्थं नञ्द्वयप्रयोगः तदुक्तं "स्मृतिनिश्चयसिद्धार्थेषु नञ्द्वयप्रयोग" इति। उच्चैर्विमानानि उन्नतानि सप्तभूमिकभवनानि "विमानोऽस्त्री देवयाने सप्तभूमौ च सद्मनि" इति यादवः। तानि यस्यां सा। "मेघसंवाहनस्थानसूचनार्थम्" इदं विशेषणम्। अन्यत्र विमाना निष्कोपा या अलका वो युष्माकं काले मेघकाले इत्यर्थः। "कालस्य सर्व्वमेघसाधारण्यात् वः" इति वहुवचनम्। सलिलम् उद्गिरतीति सलिलोद्गारं स्रवत्सलिलधारम् इत्यर्थः अभ्रवृन्दं मेघकदम्बकं कामिनी स्त्री मुक्ताजालैः मौक्तिकसरैः ग्रथितं प्रत्युप्तम्। "पुंस्यस्त्रियां मौक्तिके मुक्ते" इति यादवः। अलकम् इव चूर्णकुन्तलानि इव। "जातावेकवचनम्। अलकाश्चूर्णकुन्तलाः" इत्यमरः। वहति विभर्त्ति। कैलासस्य अनुकूलनायकत्वम् अलकायाश्च स्वाधीनपतिकात्वनायिकात्वं ध्वन्यते "एकायत्तोऽनुकूलः स्यादिति" "प्रियोपलालिता नित्यं स्वाधीनपतिका सतीति" च लक्षयन्ति उदाहरन्ति च "लालयन्नलकप्रान्तान् रचयन् पत्रमञ्जरीम् एकां विनोदयन् कान्तां छायावदनुवर्त्तते" इति। ६३।

इति श्रीमहोपाध्यायमल्लिनाथसूरिविरचितायां मेघसन्देशव्याख्यायां सञ्जीवन्यां पूर्व्वमेघः ।

হে স্বেচ্ছাচারিন্ মেঘ তুমি, প্রণয়ি নায়কের ন্যায় সেই কৈলাস-পর্ব্বতের উর্দ্ধভাগে (পক্ষে ক্রোড়দেশে) স্থিতা শুভ্রবস্ত্রের ন্যায় প্রতীয়মানা ক্ষরিতা গঙ্গা সমন্বিতা (পক্ষে গঙ্গারূপ শুভ্রবস্ত্র যারা পরিত্যক্তা অর্থাৎ বিবসনা) (কোন নায়িকার ন্যায় অলকা নগরীকে দেখিয়া নিশ্চয়ই চিনিতে পারিবে, যে উচ্চ সপ্ততলপ্রাসাদযুক্তা (পক্ষে সম্পূর্ণ কোপরহিতা) অলকা নগরী (পক্ষে নায়িকা) তোমাদের অর্থাৎ মেঘসমূহের উদয়কালে জলধারা ক্ষরণ-কারি মেঘসমূহকে নায়িকা মুক্তাজালবদ্ধ চূর্ণ কুন্তল গুলির ন্যায় ধারণ করে। ৬৩।

Thou that roamest at pleasure must, looking at Alaka, at once recognise her (the city compared with a woman) with the Ganges as her white dress fallen off her and which (the city) has been placed on the top of the mount Kailash as a lady on the lap of her lover, and she (the city) having high seven storied houses bears in thy season (*i. e.*, the rainy season) a collection of clouds trickling with water drops just as a lady devoid of jealousy bears her wrinkled curls adorned with rows of pearls.—63.

Notes.

1. प्रणयिनः इव तस्य उत्सङ्गे — उत् + सन्ज + घञ on his (mount Kailash) lap as on that of a lover.

2. स्रस्तगङ्गादुकूलां अलकां दृष्ट्वा—गङ्गा दुकूलमिव गङ्गादुकूलं (उपमितं व्याघ्रादिभिः सामान्याप्रयोगे इति उपमित समासः) (स्रन्स् + क्त कर्त्तरि) स्रस्तं गङ्गादुकूलं यस्याः सा तां स्रस्तगङ्गादुकूलां adjective to अलकां—seeing *Alaka* devoid of her white garment of the Ganges. Alaka is the capital of Kuber the king of the यक्ष class, the poet describes her as a lady with a white garment in the shape of the river Ganges as the Ganges water is always white.

3. कामचारिन्—कामेन स्वेच्छया चरति यः सः (काम + चर् + णिनि

कर्त्तरि) यद्वा कामचारः (कम्+घञ्=कामः, चर्+घञ्=चारः कामेन चारः कामचार ३या तत्पु.) अस्ति अस्य कामचार+इनि तत्सम्बोधने।

4. त्वं पुनः न ज्ञास्यसे न—त्वम् ज्ञास्यसे एव—of course thou shouldst recognize. The आत्मनेपद in ज्ञास्यसे is owing to the sutra अकर्मकाच्च For the use of double negatives see the dictum of *Vamana* quoted by Mallinath which means when the ideas of remembrance certainty and axiomatic truths are denoted two negative particles are to be used.

5. उच्चैः विमाना या—उच्चैः उन्नतानि विमानानि सप्तभूमिकभवनानि यस्यां सा बहुव्री (in case of the city) अन्यत्र उच्चैः सम्पूर्णं विगतः मानः कोपः यस्याः सा (प्रादिभ्यः धातुजस्य उत्तरपदलोपः इति बहुव्री) (in case of lady ,—that (city) has lofty seven storied houses or that (lady) has fully given up jealousy &c. भरत सनातन रामनाथ हरगोविन्द कल्याणमल्ल &c. read उच्चैर्विमानैः। करणभूतैः विमानैः अभ्रवृन्दवहनम् इत्यर्थः।

6. वः काले—at your (of the clouds) season. Mallinath supports the plural वः by stating that diverse clouds collect at the rainy seasons.

7. सलिलोद्गारम् अभ्रवृन्दम्—सलिलम् उद्गिरति यत् तत (सलिल+उत्+गॄ+अण् कर्मण्यण् इति सूत्रेण) adjective to अभ्रवृन्दम् अभ्राणाम् वृन्दम् (६ तत्पु.)—a lot of clouds shedding drops of water.

8. कामिनी मुक्ताजालग्रथितम् अलकम् इव—मुक्तानाम् जालानि (६ तत्पु.) तैः ग्रथितः (ग्रन्थ+क्त कर्मणि) तम्—as a lady (bears) pending curls of locks of hair bedecked with strings of pearls.

9. वहति—bears or supports agrees with the nominatives या and कामिनी।

N. B. In this stanza mount Kailash is described as a अनुकूल नायक and अलका as a स्वाधीन पतिका नायिका।

10. The अलङ्कार is उपमा।

11. Conjugations—

स्रन्स्—स्रंसते सस्रंसे, अस्रंसिष्ट।

वह्—वहति, उवाह, अवाक्षीत्, वहते, ऊहे अवोढ़।

उत्तरमेघः।

—:o:—

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
सङ्गीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम्।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः॥१।

Prose order—ललितवनिताः सचित्राः संगीताय प्रहतमुरजाः मणिमयभुवः अभ्रंलिहाग्राः प्रासादाः विद्युत्वन्तं सेन्द्रचापं स्निग्धगम्भीरघोषं अन्तस्तोयं तुङ्गं त्वां तैस्तैःविंशेषैः तुलयितुम् अलम्। १।

Paraphrase—यस्यामलकायां देवगृहाणि तैस्तैः सादृश्यनिर्वाहकैः धर्मैः त्वां सर्व्वथा अनुकुर्व्वन्ति। तथाहि यथा प्रासादाः रम्याभिर्वनिताभिः अधिष्ठिताः तथा त्वं तड़िल्लताभिः विराजितः यथा प्रासादाः विचित्रालेख्यसनाथाः तथा त्वं शक्रधनुषा विचित्रितः यथा प्रासादाः तौर्य्यत्रिकाय ताड़ितमृदङ्गाः तथा त्वं श्रुतिमधुर गर्ज्जित समन्वितः यथा प्रासादाः जलभ्रान्तिजन्मणिमयकुट्टिमाः तथा त्वम् अन्तर्गतजलभरचिक्कणः, यथा प्रासादाः मेघस्पर्शिशिखराः तथा त्वमपि अत्युन्नतः। १।

Change of voice—ललितवनितैः सचित्रैः प्रहतमुरजैः मणिमयभूमिः अभ्रंलिहाग्रैः प्रासादैः * * तुलयितुम् अलं भूयते। १।

Sanjivani—विद्युत्वन्तमिति। यत्र अलकायां ललिताः रम्याः वनिताः स्त्रियो येषु ते सह चित्रैः वर्त्तन्ते इति सचित्राः। "आलेख्याश्चर्य्ययोश्चित्रमित्यमरः। तेन सहेति तुल्ययोग इति बहुव्रीहिः। वोपसर्ज्जनस्य" इति सह-

शब्दस्य समासः। सङ्गीताय तौर्य्यत्रिकाय प्रहतमुरजाः ताड़ितमृदङ्गाः। "मुरजा तु मृदङ्गे स्यात् ढक्कामुरजयोरपि" इति शब्दार्णवे। मणिमय्यः मणिविकाराः भुवो येषु अभ्रं लिहन्तीति अभ्रंलिहानि अभ्रङ्कषाणि। "वहाभ्रे लिह इति खश्प्रत्ययः। अरुर्द्विषे" त्यादिना मुमागमः। अग्राणि शिखराणि येषां ते तथोक्ताः अतितुङ्गाः इत्यर्थः प्रासादाः देवगृहाणि। "प्रासादो देवभूभुजाम्" इत्यमरः। विद्युतः अस्य सन्तीति विद्युत्वन्तं सेन्द्रचापम् इन्द्रचापवन्तं स्निग्धः श्राव्यः गम्भीरः घोषः गर्ज्जितं यस्य तम् अन्तः अन्तर्गतं तोयं यस्य तं तुङ्गम् उन्नतं त्वां तैः तैः विशेषैः ललितवनितत्वादिधर्म्मैः तुलयितुं समीकर्त्तुम् अलं पर्य्याप्ताः। अलं भूषणपर्य्याप्तिशक्तिवारणवाचकमित्यमरः। अत्र उपमानोपमेयभूतमेघप्रासादधर्म्माणां विद्युद्वनितादीनां यथासंख्यमन्योन्यसादृश्यात् मेघप्रासादसादृश्यसिद्धिरिति बिम्बप्रतिबिम्बभावेनेयं पूर्णोपमा। १।

যে অলকা নগরীতে প্রাসাদ সকল ললিত বনিতাপূর্ণ চিত্র সমন্বিত গীতবাদিত্রের জন্য মৃদঙ্গধ্বনিযুক্ত মণিময় হর্ম্ম্যতলযুক্ত গগনস্পর্শী বলিয়া বিদ্যুৎযুক্ত ইন্দ্রধনুসমন্বিত মধুরগম্ভীরগর্জ্জনযুক্ত জলসমন্বিত উন্নত তোমার সহিত সেই সকল (পূর্ব্বোক্ত ললিতবনিতাদি) গুণবশতঃ তুলিত হইতে সমর্থ হয়। ১।

There (in *Alaka*) the divine palaces replete with beautiful females, pictures with sounds of drums beaten for concert,

with floors made of precious stones and with tops kissing the clouds may fitly be compared with thee possessed of lightening and rainbow, a sweet and deep noise, water inside and height (that is) in all the particular attributes.—1.

Notes.

1. यत्र—अलकायाम् where (in *Alaka*).

2. ललितवनिताः—ललिताः वनिताः येषु ते (बहुव्री) adjective to प्रासादाः—having beautiful women.

3. सचित्राः—सह चित्रैः वर्त्तन्ते तेन सह तुल्ययोगे इति (बहुव्री)—having pictures or portraits.

4. सङ्गीताय प्रहतमुरजाः—सङ्गीताय तौर्य्यत्रिकाय तादर्थ्ये ४र्थी वाच्या इति ४र्थी। प्रहताः ताड़िताः मुरजाः मृदङ्गाः येषु ते (बहुव्री)।

5. मणिमयभुवः—मणिमय्यः (मणि + मयटविकारे) भुवः येषु ते (बहुव्री)—having floors of jewels.

6. अभ्रंलिहाग्राः प्रासादाः—अभ्रम् आकाशं लिहन्ति इति (अभ्र + लिह् "वहाभ्रे लिहः" इति + खश् + अरुर्द्विषेत्यादिना मुमागमश्च) अभ्रंलिहानि अग्राणि येषां ते तथोक्ताः प्रासादाः देवायतनानि—the palatial residences of gods licking the sky.

7. विद्युत्वन्तं—विद्युतः अस्य सन्ति इति (विद्युत् + मतुप्) तं—having or possessing the lightening.

8. सेन्द्रचापं—इन्द्रस्य चापं इन्द्रचापं (६ तत्पु.) सह इन्द्रचापेन वर्त्तते इति सेन्द्रचापः (तुल्ययोगे बहुव्री) तं—having rain-bows.

9. स्निग्धगम्भीरघोषं—(स्निह + क्त) स्निग्धश्च गम्भीरश्च स्निग्धगम्भीरः(विशेषणद्वयेन कर्म्मधा.) स्निग्धगम्भीरः घोषः यस्य सः तं (बहुव्री)—possessing pleasant and deep noise.

10. अन्तस्तोयं—अन्तः अन्तर्गतं तोयं जलं यस्य सः तं (बहुव्री)—having water within (thyself).

हस्ते लीलाकमलमलके बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः।
चूड़ापाशे नवकुरवकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम्॥२।

11. तुङ्गं त्वां—thou that art lofty.

12. तैस्तैः विशेषैः—by those particulars (mentioned before).

13. तुलयितुम् अलम्—तुलयितुम् (तुला शब्द + णिच् + तुमुन्) अलम् शक्ताः—worthy of being compared.

N. B. In this sloka alternate epithets are applied respectively to प्रासादाः and त्वाम्।

14. The अलङ्कार is पूर्णोपमा।

15. Conjugations—

लिह्—लेढि लीढे, लिलेह लिलिहे, अलिचत् अलिचत अलीढ़।

स्निह—स्निह्यति, सिष्णेह अस्निहत्।

Prose order—यत्र वधूनां हस्ते लीलाकमलम्, अलके बालकुन्दानुविद्धम् आनने श्रीः लोध्ररजसा पाण्डुतां नीता, चूड़ापाशे नवकुरवकम्, कर्णे चारु शिरीषं, सीमन्ते च त्वदुपगमजं नीपं वर्त्तते। २।

Paraphrase—यस्यामलकायाम् विलासिन्यः युगपत् ऋतुषट्कसम्भूतां सम्पत्तिम् उपभुञ्जते तथाहि ता लीलार्थं शरज्जं पद्मं हस्ते बिभ्रति अलकान् हेमन्तप्रादुर्भूतैः कुन्दैः अनुविद्धान् कुर्व्वन्ति, मुखसुषमासम्पादनाय लोध्रकुसुमपरागैः अनुलिप्तं विदधति, कवरीं प्रत्यग्रवासन्तकुरवकां सम्पादयन्ति, कर्णयुगलं ग्रैष्मेण कोमलेन शिरीषपुष्पेण विभूषयन्ति मस्तककेशवीथ्याञ्च वार्षिकं कदम्बकुसुमं धारयन्ति। २।

Change of voice—* लीलाकमलेन भूयते, बालकुन्दानुविद्धेन भूयते

लोध्रकुसुमरजः आनने श्रियं पाण्डुतां नीतवत्, * कुरवकेण भूयते * चारुणा शिरीषेण भूयते, त्वदुपगमजेन नीपेन भूयते (वा उत्पद्यते) । २ ।

N. B. (१) यद्यपि प्रथमपुरुषे अस्तिभवतीति क्रियाद्वयं न प्रयुज्यते तथापि प्रयुक्तमेवेति बोध्यम् तेन नाध्याहारदोषः इति फलितम् ।

(२) यद्यप्यत्र षण्णाम् ऋतूनां समाहारो नाभिहितः तथापि तत्तत्कार्य्याणां वसन्तकुन्दादीनां समाहारकथनात् अभिहित एव अन्यथा कारणं विना कथं कार्य्यसिद्धिः अतः अलकायां युगपत् ऋतुषट्कप्रादुर्भावः ततस्तत्तत्कार्य्योत्पत्तिरिति फलितार्थः ।

Sanjivani—सम्प्रति सर्व्वदा सर्व्वर्त्तुसम्पत्तिमाह हस्ते इति । यत्र अलकायां वधूनां स्त्रीणां हस्ते लीलार्थं कमलं लीलाकमलम् । "शरत्लिङ्गमेतत् तदुक्तं शरत् पङ्कजलक्षणा" इति । अलके कुन्तले जातावेकवचनम् अलकेषु इत्यर्थः बालकुन्दैः प्रत्यग्रमाघ्यकुसुमैः अनुविद्धम् अनुवेधः ग्रथनम् । "नपुंसके भावे क्तः । यद्यपि कुन्दानां शैशिरत्वम् अस्ति माघ्यं कुन्दमित्यभिधानात् तथापि हेमन्ते प्रादुर्भावः शिशिरे प्रौढत्वमिति व्यवस्थाभेदेन हेमन्तकार्य्यत्वमित्याशयेन बालविशेषणम् । अलकमिति प्रथमान्तपाठे समभोप्रक्रमभङ्गः स्यात् । नाथस्तु नियतपुंलिङ्गताहानिश्चेति दोषान्तरमाह तदसत् स्वभाववक्रालकानि तासाम् निर्धूतान्यलकानि पातितमुरः क्षतस्नोऽधरः खण्डित इत्यादिषु प्रयोगेषु नपुंसकलिङ्गतादर्शनादि" इति । आनने मुखे लोध्रप्रसवानां लोध्रपुष्पाणां शैशिराणां रजसा परागेण । "स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने" इत्यमरः । पाण्डुतां नीता श्रीः शोभा

चूड़ापाशे केशपाशे नवकुरवकं वासन्तः पुष्पविशेषः कर्णे चारु पेशलं शिरीषं ग्रैष्मः पुष्पविशेषः सीमन्ते मस्तककेशवीथ्याम्। "सीमन्तमस्त्रियां मस्तकेशवीथ्यामुदाहृतम्" इति शब्दार्णवे। तव उपगमः मेघागम इत्यर्थः तत्र जातं त्वदुपगमजं वार्षिकम् इत्यर्थः नीपं कदम्बकुसुमम् सर्व्वत्र अस्तीति शेषः। अस्तिर्भवतिपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति न्यायात्। इत्थं कमलकुन्दादितत्तत्कार्य्यसमाहाराभिधानादर्थात् सर्व्वर्तुसमाहारसिद्धिः कारणं विना कार्य्यस्यासिद्धेरिति भावः। २।

যেখানে (অলকায়) বধূদিগের হস্তে লীলাকমল, অলকে কুন্দকোরক বন্ধন, বদনশোভা লোধ্রপুষ্প কিঞ্জল্কধূলি দ্বারা ধবলতা প্রাপ্ত, কেশপাশে নূতন কুরবকপুষ্প, কর্ণে সুন্দর শিরীষ পুষ্প, আর সীমন্তে (সিঁথিতে) তোমার (মেঘের) আগমনজনিত কদম্ব পুষ্প বিরাজিত আছে। ২।

Where (in Alaka) the females have lotuses for play in their hands, have budding Kunda (Jasmine) flowers in laid within their pending curls, have their facial grace turned white with the pollen of the *Lodra* flowers, have newly blown *Kurabaka* flowers in their braids, have pretty *Sirisha* flowers on their ears, and have the *Kadamba* flowers in the parting line of their hair which blossom at thy advent.—2.

Notes.

1. यत्र वधूनाम् हस्ते लीलाकमलम्—लीलायाः कमलम् अश्वघासादिवत् तादर्थ्ये ६ समासः—where (in the *Alaka*) the यक्ष females have lotuses for sport in their hands. The lotus being the sign of the autumn, (शरद्)।

2. अलके बालकुन्दानुविद्धम्—बालानि कुन्दानि (कर्मधा.) तैः तेषां वा अनुविद्धत् (अनु + व्यध् + क्त भावे "नपुंसके भावे क्त" इति अनुवेधः = अनुवेधनम् = ग्रन्थनम्) अनुविद्धम् is a noun—with budding (new) *Kunda* flowers inlaid in their curls. The Kunda being the sign of early winter or the dewy season (हेमन्त)। Some edition read अलकम् इत्यादि but see the criticism of Mallinath on the wodr.

3. आनने लोध्ररजसा पाण्डुतां नीता श्रीः—लोध्राणाम् प्रसवः पुष्पम् (६ तत्पु.) तस्य रजसा परागेन पाण्डोः भावः पाण्डुता ताम् नीता (नी + क्त कर्मणि) श्रीः शोभा वर्त्तते इति शेषः—the beauty in the face has been turned white by the pollens of the flowers of the *Lodhra* tree. The लोध्र being the sign of winter (शीत)।

4. चूड़ापाशे नव कुरवकम्—चूड़ानाम् पाशः (६ तत्पु.) यद्वा सुन्दरी चूड़ा चूड़ापाशः (अस्वपदविग्रह नित्यसमास) तस्मिन् नवं कुरवकम् (कर्मधा.) —fresh *Kurabaka* flowers in braided hairs. The *Kurabaka* being the sign of spring (वसन्त)।

5. चारुकर्णे शिरीषं—चारुः कर्णः (कर्मधा) तस्मिन् the Sirisha flowers on graceful ears. The *Sirish* being the sign of summer (ग्रीष्म)।

6. सीमन्ते च त्वदुपगमजं नीपं—सीमन्ते (सीमा + अन्त सीमन्तः पृषोदरादित्वात् साधु) तस्मिन् तव उपगमः त्वदुपगमः (६ तत्पु.) उपगमः = (उप + गम् + अप् भावे) त्वदुपगमं or त्वदुपगमात् जायते यत् तत् (त्वदुपगम + जन् + ड कर्त्तरि उपपद तत्पु.)—the *Kadamba* or Nipa flower which thy advent has given birth to being on the parting line of hair. The *Kadamba* or Nipa being the sign of rainy season (वर्षा)।

7. The अलङ्कार is स्वभावोक्ति in this sloka.

8. Conjugations—

यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः।
आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥ ३।

व्यध्—विध्यति, विव्याध, अव्यात्सीत्।

जन्—जायते, जज्ञे, अजनि, अजनिष्ट।

Prose order—यस्यां यक्षाः उत्तमस्त्रीसहायाः सितमणिमयानि ज्योतिश्छायाकुसुमरचितानि हर्म्यस्थलानि एत्य त्वद्गम्भीरध्वनिषु पुष्करेषु शनकैः आहतेषु कल्पवृक्षप्रसूतं रतिफलं मधु आसेवन्ते। ३।

Paraphrase—यस्यामलकायां देवयोनिविशेषाः ललिताङ्गनासहचराः सन्तः स्फटिकमणिनिर्मितानि प्रतिबिम्बितनक्षत्रतया अम्लानकुसुमरचितानीव लक्ष्यमाणानि हर्म्यस्थलानि प्राप्य मेघगर्जितसदृशशब्देषु वाद्यभाण्डमुखेषु मन्दं मन्दं ताड़ितेषु कल्पद्रुमसम्भूतं रतिफलाख्यं मद्यम् समादृत्य पिबन्ति। ३।

Change of voice—यस्यां यक्षैः उत्तमस्त्रीसहायैः सद्भिः • • आसेव्यते। ३।

Sanjivani—यस्यामिति। यस्याम् अलकायां यक्षाः देवयोनिविशेषाः उत्तमस्त्रीसहायाः ललिताङ्गनासहचराः सन्तः सितमणिमयानि स्फटिकमणिमयानि चन्द्रकान्तमयानि वा अत एव ज्योतिषां तारकाणां छायाः प्रतिबिम्बानि एव कुसुमानि तैः रचितानि परिष्कृतानि। "ज्योतिस्ताराग्निभाज्वालादृक्पुत्राध्वरात्मसु" इति वैजयन्ती। एतेन पानभूमेरम्लानशोभत्वमुक्तम्। हर्म्यस्थलानि एत्य प्राप्य त्वद्गम्भीरध्वनिः इव ध्वनिः येषां तेषु

पुष्करेषु वाद्यभाण्डमुखेषु। "पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले" इत्यमरः। शनकैः मन्दम् आहतेषु सत्सु एतच्च नृत्यगीतयोरप्युपलक्षणम् कल्पवृक्षप्रसूतं कल्पवृक्षस्य काङ्क्षितार्थप्रदत्वात् मध्वपि तत्र प्रसूतम् रतिः फलं यस्य तत् रतिफलाख्यं मधु मद्यम् आसेवन्ते आदृत्य पिबन्ति इत्यर्थः। तालक्षीरसितामृतामलगुडोन्मत्तास्थिकालाह्वयादर्विन्द्रद्रुममोरटेक्षुकदलीगुग्गुप्रसूनैर्युतम्। इत्यबेन्मधुपुष्पभङ्गुरचितं पुष्पद्रुमूलाहृतं क्वाथेन स्मरदीपनं रतिफलाख्यं स्वादु शीतं मधु इति मदिरार्णवे। ३।

যে অলকায় উত্তমস্ত্রীসম্মিলিত যক্ষগণ শুভ্র (স্ফটিক) মণিময় (অতএব) নক্ষত্রের প্রতিবিম্বহেতু পুষ্পরচিতরূপে প্রতীয়মান প্রাসাদস্থলে আগমন করিয়া তোমার গম্ভীরধ্বনির ন্যায় ধ্বনিযুক্ত পুষ্কর নামক (মৃদঙ্গবৎ) বাদ্যযন্ত্র মৃদুরূপে বাদিত হইলে (অর্থাৎ নৃত্যগীতবাদিত্রের সহিত) কল্পবৃক্ষজাত রতিফল নামক মদ্য পান করে।৩।

Where (in Alaka) the Jakshas (a class of demi gods) in company with good (beautiful) females coming in (their) palatial residences built of white jewels (crystals &c.) and (hence) decorated by the reflections of stars resembling beds of flowers, eagerly drink the wine named *Ratiphala* produced by the tree called *Kalpa* with the sounds of gently beaten ends of drums—sounds as deep as thine own.—3.

Notes.

N. B. Before coming to this sloka we should bear in mind that the two following slokas which occur here in some editions are passed unnoticed over by scholiasts and editors

like भरत सनातन रामनाथ हरगोविन्द कल्याणमल्ल Prof. Wilson and Pundit Vidyasagar, as spurious; although explained by Mallinath they are considered as interpolations, witness his remark—श्लोकद्वयं प्रक्षिप्तम्।

यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पा
हंसश्रेणी रचितरशना नित्यपद्मा नलिन्यः।
केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा
नित्यज्योत्स्ना प्रतिहततमोवृत्तिरम्याः प्रदोषाः॥
आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तै
र्नान्यस्तापः कुसुमशरजादिष्टसंयोग साध्यात्।
नाप्यन्यस्मात् प्रणयकलहाद्विप्रयोगोपपत्ति
र्वित्तेशानां नच खलु वयो यौवनादन्यदस्ति॥

1. यस्यां यक्षाः—in which city (Alaka) the *Jakshas.*

2. उत्तमस्त्रीसहायाः—उत्तमाः स्त्रियः (कर्म्मधा) उत्तमस्त्रियः सहायाः येषां ते (बहुव्री)—accompanied by good females (of the यक्ष class).

3. सितमणिमयानि (अतएव) ज्योतिश्छायाकुसुमरचितानि—सिताः शुभ्राः मणयः (कर्म्मधा.) सितमणीनां विकाराः तानि सितमणिमयानि (विकारे मयट् प्रत्ययः)।—made of white jewels and (therefore). ज्योतिषां नक्षत्राणां छायाः प्रतिबिम्बानि (६ष्ठी तत्पु.) ज्योतिश्छायाः एव कुसुमानि (रूपक कर्म्मधारयः) तैः रचितानि भूषितानि; both are adjectives to हर्म्यस्थलानि—decorated with flower-like reflections of stars. Cf. ज्योतिषां प्रतिबिम्बानि प्राप्नुवन्त्युपहारताम्। कुमार ६। ४२।

4. हर्म्यस्थलानि एत्य—हर्म्याणाम् स्थलानि (६ तत्पु.)—places in palaces. सारोद्धारिणी explains as धवलगृहाणाम् उपरितनभूमीः प्राप्य and the सुमतिविजय as हर्म्यस्थलानि गृहकुट्टिमस्थानानि।

5. त्वद्गम्भीरध्वनिषु पुष्करेषु—गम्भीरः ध्वनिः गम्भीरध्वनिः तव गम्भीरध्वनिः त्वद्गम्भीरध्वनिः (६ तत्पु.) त्वद्गम्भीरध्वनिः इव ध्वनिः येषां तानि तेषु (उपमानोत्तर पद बहुव्री)—the skin of the drum having sound

मन्दाकिन्याः पयसि शिशिरैः सेव्यमाना मरुद्भि-
र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः
संक्रीड़न्ते मणिभिरमरप्रार्थिता यत्र कन्याः॥४॥

as deep as thine own. The 7th case-ending is owing to the rule यस्य च भावेन भावलक्षणम्।

6. मनकैः आहतेषु—beaten (for music) gently.

7. कल्पवृक्षप्रसूतम्—कल्पप्रदः वृक्षः कल्पवृक्षः (शाकपार्थिवादिवत् मध्यपदलोपी समासः) कल्पवृक्षप्रसूतम् (प्र + सू + कर्त्तरि क्तः ततः कल्पवृक्षे कल्पवृक्षस्य वा प्रसूतं सप्तमीतत्पुरुषः षष्ठीतत्पुरुषो वा समासः। "स्वामीश्वराधिपति दायाद साक्षिप्रतिभू प्रसूतैश्च" (एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः यथा गवां गोषु वा प्रसूतः गा एवानुभवितुं जात इत्यर्थः) इति षष्ठीसप्तमीनियमात्। अतएव "तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः इत्यादि प्रयोगः।—produced from the *Kalpa tree.*

8. रतिफलं—रतिः फलं यस्य तत् (बहुव्रो) a kind of intoxicating beverage. Mallinath cites a passage from मदिरार्णव enumerating the constituents. भरत सनातन रामनाथ हरगोविन्द and Wilson read रतिरस meaning रतौ रसः अनुरागः यस्मात् तत्।

9. मधु आसेवन्ते—eagerly drink the wine.

10. The अलङ्कार is रूपक।

11. Conjugations—

सेव—सेवते, सिषेवे, असेविष्ट।

हन्—हन्ति; जघान, अवधीत्।

Prose order—यत्र अमरप्रार्थिताः कन्याः मन्दाकिन्याः पयसि शिशिरैः मरुद्भिः सेव्यमाना सत्यः अनुतटरुहां मन्दाराणां छायया वारितोष्णाः सत्यः कनकसिकतामुष्टिनिक्षेपगूढैः अतएव अन्वेष्टव्यैः मणिभिः संक्रीड़न्ते। ४।

Paraphrase—यस्यामलकायाम् अलौकिकसौन्दर्य्यतया सुरकामिता: यक्षकुमार्य्य: स्वर्णदी सलिलसंपृक्ततया शीतलै: वातै: सेव्यमाना: सत्य: तटजातानां मन्दारवृक्षाणां अनातपेन प्रशमितातपाश्च सत्य: स्वर्णवालुकासु निक्षेपेण संवृतै: अतएव मृग्यै: रत्नै: गुप्तमणिसंज्ञया दैशिकक्रीड़या क्रीड़न्ति। ४।

Change of voice—यत्र अमरप्रार्थिताभि: कन्याभि: * सेव्यमानाभि: * वारितोष्णाभि: सतीभि: * संक्रीड्यते। ४।

Sanjivani—मन्दाकिन्या इति। यत्र अलकायाम् अमरप्रार्थिता: सुन्दर्य्य इत्यर्थ: कन्या: यक्षकुमार्य्य:। "कन्या कुमारिकानार्य्यो:" इति विश्व:। मन्दाकिन्या: गङ्गाया: पयसि सलिले शिशिरै: शीतलै: मरुद्भि: सेव्यमाना: सत्य: तथा अनुतटं तटेषु रोहन्तीति अनुतटरुह: (क्विप्) तेषां मन्दाराणां छायया अनातपेन वारितोष्णा: शमितातपा: सत्य: कनकस्य सिकतासु मुष्टिभि: निक्षेपेण गूढ़ै: संवृतै: अत एव अन्वेष्टव्यै: मृग्यै: मणिभि: रत्नै: संक्रीडन्ते गुप्तमणिसंज्ञया दैशिकक्रीडया सम्यक् क्रीडन्ति इत्यर्थ:। क्रीडोऽनुसंपरिभ्यश्चेत्यात्मनेपदम्। रत्नादिभिर्वालुकादौ गुप्तैर्द्रष्टव्यकर्म्मभि:। कुमारीभि: कृता क्रीडा नाम्ना गुप्तमणि: स्मृता। रासक्रीडा गूढ़मणिर्गुप्तकेलिखुलायनम्। पिण्डकन्दुकदण्डाद्यै: स्मृता दैशिककेलय इति शब्दार्णवे। ४।

যে অলকায় দেবতাপ্রার্থিতা (যক্ষ) কন্যাগণ মন্দাকিনীর জলে শীতল বায়ুদ্বারা সেবিত (উপবীজিত) হইয়া ও মন্দাকিনীতটজাত মন্দারবৃক্ষের ছায়াদ্বারা নিবারিতাতপ হইয়া, স্বর্ণময় বালুকা মধ্যে হস্তমুষ্টিদ্বারায় নিক্ষিপ্ত হওয়াতে আবৃত অতএব অন্বেষণযোগ্য রত্নদ্বারায় ক্রীড়া করে। ৪।

Where (in Alaka) the (Jaksha) girls, worthy of being asked (in matrimony) by the gods, being served (fanned) by the winds made cool in the waters of the *Mandakini* (the heavenly Ganges) and being screened from the heat (of the sun) by the shade of the *Mandara* trees growing on the bank (of the river) play, with jewels which are secretly thrown in the sands of gold by the fist and then to be sought out.—4.

Notes.

1. यत्र—where (in Alaka)

2. अमरप्रार्थिताः कन्याः—अमरैः देवैः प्रार्थिताः (प्र + अर्थ + क्त कर्मणि) परिणयार्थं याचिताः कन्याः कुमार्यः—Jaksha maidens to be sought (in marriage) by the gods (on account of their beauty).

3. मन्दाकिन्याः पयसि शिशिरैः मरुद्भिः—by the breezes made cool in the water of the *Mandakini*. The Bombay editions read सलिलशिशिरैः for पयसि शिशिरैः।

4. सेव्यमाना—(सेव् + शानच् कर्मणि) being served that is fanned.

5. अनुतटरुहां मन्दाराणां छायया—तटस्य समीपे अनुतटं ("अनुर्यत्समया" इत्यव्ययीभावः) अनुतटं रोहन्ति ये ते (अनुतट + रुह + क्विप् उपपदतत्पु.) अनुतटरुहः तेषां—by the shade of the *Mandara* trees on the banks (of the *Mandakini*.)

6. वारितोष्णाः (सत्यः)—वारितः (वृ + णिच् + क्त कर्मणि) उष्णः यासां ताः (बहुव्री)—protected from the heat (of the sun).

7. कनकसिकतामुष्टिनिक्षेपगूढैः (अतएव) अन्वेष्टव्यैः—कनकस्य सिकताः (६ष्ठी तत्पु.) कनकसिकताः तासु कनकसिकतासु; मुष्टिभिः

नीवीबन्धोच्छ्वसितशिथिलं यत्र विम्बाधराणां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।
अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपान्
ह्रीमूढ़ानां भवति विफलप्रेरणा चूर्णमुष्टिः ॥ ५ ।

निक्षेपः मुष्टिनिक्षेपः (३या तत्पु.) तेन मुष्टिनिक्षेपेण गूढ़ाः (गुह+क्त कर्म्मणि) मुष्टिनिक्षेपगुढाः (३या तत्पु.) कनकसिकतासु मुष्टिनिक्षेपगूढ़ाः तैः (७मी तत्पु.) सिकताशब्दः स्त्रीलिङ्गः नित्य बहुवचनान्तश्च । (अतएव) अन्वेष्टव्यैः अन्वेषणयोग्यैः (अनु + इष् + तव्य कर्म्मणि)—hidden by throwing with the fist (of the hand) in the golden sands (and hence) to be searched out (by playmates).

8. मणिभिः संक्रीड़न्ते—play (their games) by gems, see Mallinath for the various plays of girls; though the root क्रीड़ is परस्मैपदी still it becomes आत्मनेपदी after सम् by the rule "क्रीडोऽनुसम्परिभ्यश्च" ।

N. B. This sloka is omitted by scholiast,like भरत सनातन रामनाथ हरगोविन्द कल्याणमल्ल वल्लभ Wilson etc. as a spurious one and an interpolation in the opinion of I. C. Vidyasagar.

9. The अलङ्कार is स्वभावोक्ति in the stanza.

10. Conjugations—

क्रीड़—क्रीड़ति, चिक्रीड़ अक्रीड़ीत्, परिक्रीड़ते संक्रीड़ते इत्यादि ।

Prose order—यत्र अनिभृतकरेषु प्रियेषु नीवीबन्धोच्छ्वसितशिथिलं क्षौमं रागात् आक्षिपत्सु सत्सु ह्रीमूढ़ानां विम्बाधराणां चूर्णमुष्टिः अर्चिस्तुङ्गान् रत्नप्रदीपान् अभिमुखं प्राप्यापि विफलप्रेरणा भवति । ५ ।

Paraphrase—यस्यामलकायाम् प्रियतमेषु अनुरागात् अधृतप्रेरणैः करैः त्रुटितनीवीबन्धं अतएव शिथिलतया सुकराक्षेपं दुकूलम् अपहरत्सु सत्सु लज्जिताः मुग्धाङ्गनाः लज्जासंकोचवारणाय कुङ्कुमचूर्णमुष्टिं निक्षिपन्त्यः

इह साच अर्च्चिस्तुङ्गान् रत्नप्रदीपान् अभिमुखं प्राप्यापि दीपानां रत्नमयत्वात् निर्व्वापयितुं न शेके। ५।

Change of voice—• चूर्णमुष्ट्या विफलप्रेरणया भूयते।५।

Sanjivani—नीवीति। यत्र अलकायाम् अनिभृतकरेषु चपलहस्तेषु प्रियेषु नीवी वसनग्रन्थिः। "नीवी परिपण ग्रन्थौ स्त्रीणां जघनवाससि" इति विश्वः। नीवी एव बन्धः नीवीबन्धः। "चूतवृक्षवदपौनरुक्त्यम्"। तस्य उच्छ्वसितेन त्रुटितेन शिथिलं क्षौमं दुकूलं रागात् आचिपत्सु आहरत्सु सत्सु ह्रीमूढ़ानां लज्जाविधुराणां बिम्बं बिम्बिकाफलम्। "बिम्बं फलं बिम्बिकायाः प्रतिबिम्बे च मण्डले" इति विश्वः। बिम्बम् इव अधरो यासां तासां बिम्बाधराणां स्त्रीविशेषाणाम्। "विशेषाः कामिनी कान्ता भीरुर्बिम्बाधराङ्गना" इति शब्दार्णवे। चूर्णस्य कुङ्कुमादेः मुष्टिः अर्च्चिर्भिः मयूखैः तुङ्गान्। "अर्च्चिर्मयूखशिखयो" इति विश्वः। रत्नानि एव प्रदीपान् अभिमुखं यथा तथा प्राप्य अपि विफलप्रेरणा दीपनिर्व्वाणाक्षमत्वात् निष्फला भवति। अत्र अङ्गनानां रत्नप्रदीपनिर्व्वाणप्रवृत्त्या मौग्ध्यं व्यज्यते। ५।

যে স্থানে (অলকায়) চঞ্চলহস্ত প্রিয়তম কর্ত্তৃক অনুরাগবশতঃ বিম্বাধরবিশিষ্ট যক্ষপত্নীগণের নীবীবন্ধ স্খলিত হওয়া বশতঃ শ্লথ কৌষের বস্ত্র আক্ষিপ্ত হইলে লজ্জাবিমূঢ়া হওয়াতে তাহাদের (দীপনির্ব্বাণার্থ কুঙ্কুমাদি) চূর্ণমুষ্টি উন্নতশিখাবিশিষ্ট রত্নময়প্রদীপের অভিমুখে পতিত হইয়াও বৃথাপ্রযুক্ত (নিষ্ফল) হয়। ৫।

Where (in *Alaka*) the handfuls of cosmetic powders

(like kumkuma &c.) of the *Jaksha* females, having lips like the *Bimba* fruits, overpowered by bashfulness whilst their lovers with trembling hands take off the vests of silk loosened by the unfastening of the knot (of the girdle) on account of (carnal) passion, are thrown in vain at the lamp of jewels having great blaze, although the handfuls (of powders) meet the lamps.—5.

Notes.

1. यत्र—where (in the *Alaka.*)

2. अनिभृतकरेषु प्रियेषु—न निभृताः निस्तब्धाः अनिभृताः (नञ् + नि + भृ + क्त) अनिभृताः कराः येषां ते तेषु (बहुव्री) प्रियेषु (प्री + क कर्त्तरि) भावे सप्तमीविभक्तिः "यस्य च भावेन भावलक्षणम्" इति सूत्रात्—lovers with quickly moving hands.

3. नीवीबन्धोच्छ्वसितशिथिलं क्षौमं—नीवी एव बन्धः (रूपकसमासः) Mallinath accounts for the tautology by citing examples भूतछत्र &c. तस्य नीवीबन्धस्य उच्छ्वसितम् (उत् + श्वस् + क्त भावे नपुंसके भावे क्त इति सूत्रात्) (६ष्ठी तत्पु.) तेन नीवीबन्धोच्छ्वसितेन शिथिलं (३या तत्पु.) क्षौमं (क्षुमा + अण्) क्रमिकोषल्यवस्त्रम्—silken dress slackened by the untying of the fastening of the knot (of the belt).

4. रागात् आक्षिपत्सु—(आङ् + क्षिप् + शतृ, casting aside out of amorous propensity.

5. क्रीमूढानां बिम्बाधराणाम्—ह्रिया मूढाः (३या तत्पु.) तासां, बिम्बम् इव अधरः यासां ताः तासां (उपमितानुप्राणित बहुव्री.)—females having lips resembling *Bimbas* who are overcome with shame. भरत सनातन and others read यक्षाङ्गनानां instead of बिम्बाधराणाम्।

6. चूर्णमुष्टिः—चूर्णस्य मुष्टिः (६ तत्पु.)—handfuls of aromaict powders like *Kumkum* (कुङ्कुम) &c.

नेत्रा नीताः सततगतिना यद्विमानाग्रभूमी-
रालेख्यानां स्वजलकणिकादोषमुत्पाद्य सद्यः ।
शङ्कास्पृष्टा इव जलमुचस्त्वादृशा यत्र जालै-
र्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ॥६॥

7. अर्चिस्तुङ्गान् रत्नप्रदीपान्—अर्चिभिः शिखाभिः तुङ्गाः उन्नताः तान् (३या तत्पु.) adjective to रत्नप्रदीपान्, रत्नानि एव प्रदीपाः तान्—lamps of jewels having high (bright) flames. मल्लि explains तेजसा प्रवृद्धान् । सुमति explains उच्चैस्तरान् ।

8. अभिमुखं प्राप्य अपि—अभिगतं मुखं यस्मिन् कर्मणि तत् यथा तथा (प्रादिभ्योधातुजस्य उत्तरपदलोपश्च इति बहुव्री) an adverb modifying प्राप्य—even coming face to face that is reaching fully. भरत सनातन &c read अभिमुखगतान् ।

9. विफलप्रेरणा भवति—विगतं फलं यस्य तत् विफलं (बहुव्री) विफलं प्रेरणं यस्याः सा (बहुव्री) adjective to चूर्णमुष्टिः—the flinging become fruitless.

10. The अलङ्कार is विशेषोक्ति here.

11. Conjugations—

क्षिप—क्षिपति, क्षिपति, क्षिपते । चिक्षेप । अक्षैप्सीत् ।

आप्—आप्नोति, आप, आपत् ।

Prose order—हे जलद ! नेत्रा सततगतिना यद्विमानाग्रभूमीः नीताः सद्यः आलेख्यानां स्वजलकणिकादोषम् उत्पाद्य त्वादृशाः जलमुचः शङ्कास्पृष्टा इव धूमोद्गारानुकृतिनिपुणाः जर्जराः यत्र जालैः निष्पतन्ति ६ ।

Paraphrase—यस्यामलकायाम् त्वादृशा मेघाः वायुना विमानाग्रभूमौ नीयन्ते नीताश्च ते तत्र जलकणिकाभिः आलेख्यानां स्फाटनरूपं दोषम् उत्पादयन्ति तेन सापराधत्वात् भयाविष्टा इव जायन्ते ततश्च धूमनिर्गममनुकुर्वाणाः विशीर्णाश्च सन्तः गवाक्षरन्ध्रैः निष्क्रम्य पलायन्ते । ६ ।

Change of voice—* * नीतैः * * त्वादृशैः जलमुग्भिः शङ्कास्पृष्टैरिव धूमोद्गारानुकृतिनिपुणैः जर्जरैः * निष्पत्यते । ६ ।

N. B. सञ्जीवन्यां त्वाम् इव पश्यन्ति इति प्रमादजम् त्वमिव दृश्यन्ते इत्येवं साधु ।

Sanjivani—हे मेघ नेत्रा प्रेरकेण सततगतिना सदागतिना वायुना। "मातरिश्वा सदागतिः" इत्यमरः। यद्विमानाग्रभूमीः यस्याः अलकायाः विमानानां सप्तभूमिकभवनानाम् अग्रभूमीः उपरिभूमिकाः नीताः प्रापिताः त्वाम् इव पश्यन्ति इति त्वादृशाः त्वत्सदृशाः इत्यर्थः। "त्यदादिषु दृशोऽनालोचनेकञ् च" इति कञ् प्रत्ययः। जलमुचः मेघाः आलेख्यानां सच्चित्राणाम्। "चित्रं लिखितरूपाढ्य स्यादालेख्यन्तु यत्नत" इति शब्दार्णवे। स्वस्य जलकणिकाभिः जलकणैः दोषं स्फोटनम् उत्पाद्य सद्यः शङ्कास्पृष्टाः इव सापराधत्वात् भयाविष्टाः इव। "शङ्का वितर्कभययोः" इति शब्दार्णवे। धूमोद्गारस्य धूमनिर्गमस्य अनुकृतौ अनुकरणे निपुणाः कुशलाः जर्ज्जराः विशीर्णाः सन्तः जालमार्गैः गवाक्षरन्ध्रैः निष्पतन्ति निष्क्रामन्ति। यथा केनचित् अन्तःपुरसञ्चारवता दूतेन गूढ़वृत्त्या रहस्यभूमिं प्रापिताः तत्र स्त्रीणां व्यभिचारदोषम् उत्पाद्य सद्यः साशङ्काः कृमवेशान्तराः जाराः क्षुद्रमार्गैर्निष्क्रामन्ति तद्वदिति ध्वनिः। प्रकृतार्थे शङ्कास्पृष्टा इवेत्युत्प्रेक्षा। ६।

(হে মেঘ) যে অলকায় প্রেরক বায়ু কর্ত্তৃক সপ্ততলভবনের অগ্রভূমি প্রাপিত তোমার ন্যায় জলবিন্দুবর্ষী মেঘ সকল (গৃহস্থিত)

সুন্দর চিত্রগণের দোষ উৎপাদন করিয়া (অর্থাৎ নিজজলবিন্দু দ্বারা সিক্ত করিয়া) যেন শঙ্কান্বিত হইয়া ধূমের নির্গমনের অনুকরণে কুশলতার সহিত গবাক্ষপথে বিভক্তভাবে বিনির্গত হয়। ৬।

(Oh cloud !). Where (in *Alaka*) water-shedding clouds like thee being conducted by their leader, the ever-going wind, to the (room of the) seven-storied buildings there and damaging the good paintings (within), with their own particles of water and immediately being stricken, as it were, with fright and being experts in imitating the flight of smoke they (the clouds) pass away through the window devided in peices.—6.

Notes.

1. यत्र—where (in *Alaka*).

2. नेत्रा सततगतिना—(नी + तृन्) "तच्छीलतद्धर्मतत्साधुकारिषु तृन्" सतता गतिः यस्य सः सततगतिः तेन (बहुव्री)—by the leader (wind) that ever moves.

3. यद्विमानाग्रभूमीः नीताः—यस्याः अलकायाः विमानानि (६ तत्पु.) यद्विमानानि तेषां यद्विमानानाम्, अग्राः भूमयः अग्रभूमयः (कर्म्मधा) यद्विमानानाम् अग्रभूमयः (६ तत्पु.) ताः यद्विमानाग्रभूमीः नीताः (नी + क्त कर्म्मणि)—being led to the upper quarters of the seven-storied buildings of which city.

4. त्वादृशाः जलमुचः—त्वम् इव दृश्यन्ते इति युष्मद् + दृश् + कञ् "त्यदादिषु दृशः अनालोचने" इति सूत्रेण) त्वत्समानाः इत्यर्थः। जलानि मुञ्चन्ति इति (जल + मुच् + क्विप कर्त्तरि)—clouds (literally showerers of water) like thee.

5. आलेख्यानां—"आलेख्यं तु यत्नतः" इति शब्दार्णवे—of the good portraits (carefully painted).

यत्र स्त्रीणां प्रियतमभुजोच्छ्वासितालिङ्गनाना-
मङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः ।
त्वत्संरोधापगमविशदैश्चन्द्रपादैर्निशीथे
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः ॥७॥

6. स्वजलकणिकादोषम्—उत्पाद्य—स्वेषां जलानि (६ तत्पु.) तेषां कणिकाः (६ष्ठीतत्पु.) ताभिः दोषः (३या तत्पु.) तम् उत्पाद्य (उत्+पद्+णिच्+क्त्वास्थाने ल्यप्)—producing injury with their own drops of water (to the pictures). The different readings are नवजलकणैर्दोषम् and सलिलकणिकादोषम् । Our vidyasagara ventures a new reading as निजजलकणैर्दोषमुत्पाद्य !

7. सद्यः शङ्कास्पृष्टाः इव—समाने अहनि इति सद्यस् निपातनात् साधु । शङ्कया स्पृष्टाः (३या तत्पु.)—as if struck with fear at once.

8. धूमोद्गारानुकृतिनिपुणाः— (उद्+गॄ+भावे घञ्=उद्गारः धूमस्य उद्गारः (६ तत्पु.) धूमोद्गारः तस्य (अनु+कृ+भावे क्तिन्) अनुकृतिः (६ष्ठी तत्पु.) तस्यां निपुणाः (७मी तत्पु.)—dexterous in mimicking the escape of smoke, adjective to जलमुचः ।

9. जर्जराः जालैः निपतन्ति—being devided in pieces depart by flying through the windows. Instead of यत्र जालैः Mallinath reads जालमार्गैः ।

N. B. For the implied simile (ध्वनि) see Mallinath beginning with यथा कैनचित् &c.

10. The अलङ्कार is उत्प्रेक्षा ।

11. Conjugations—

पत्—पतति, पपात, अपप्तत् ।

पद्—पद्यते, पेदे, अपादि ।

नी—नयति, नयते, निनाय निन्ये, अनैषीत्, अनेष्ट ।

Prose order—यत्र निशीथे त्वत्संरोधापगमविशदैः चन्द्रपादैः स्फुटजललवस्यन्दिनः तन्तुजालावलम्बाः चन्द्रकान्ताः प्रियतमभुजोच्छ्वासितालिङ्गनानां स्त्रीणां सुरतजनिताम् अङ्गग्लानिं व्यालुम्पन्ति । ७ ।

Paraphrase—यस्यामलकायां अर्द्धरात्रे चन्द्रातपप्रान्तलम्बिसूत्रगुम्फिताः चन्द्रकान्तमणयः मेघावरणापगमनात् विशदानां चन्द्रकिरणानां सम्पर्केण उल्वणान् जललवान् स्रावयन्ति ते च जललवाः प्रियतमाश्लेषमुक्तानां विलासिनीनां गात्रे पतिताः तासां रतिलीलासम्भूताम् अवयवग्लानताम् अपनुदन्ति । ७ ।

Change of voice—* स्फुटजललवस्यन्दिभिः तन्तुजालावलम्बैः चन्द्रकान्तैः * सुरतजनिता अङ्गग्लानिः व्यालुप्यते । ७ ।

Sanjivani—यत्रेति । यत्र अलकायां निशीथे अर्द्धरात्रे । "अर्द्धरात्रनिशीथौ द्वौ" इत्यमरः । त्वत्संरोधस्य मेघावरणस्य अपगमेन विशदैः निर्म्मलैः चन्द्रपादैः चन्द्रमरीचिभिः । "पादा रश्म्यङ्घ्रितुर्य्यांशाः" इत्यमरः । स्फुटजललवस्यन्दिनः उल्वणाम्बुकणस्राविणः तन्तुजालावलम्बाः वितानलम्बिसूत्रपुञ्जाधाराः तद्गुणगुम्फिताः इत्यर्थः चन्द्रकान्ताः चन्द्रकान्तमणयः प्रियतमानां भुजैः उच्छ्वासितानि श्रान्त्या जलसेकाय वा शिथिलितानि आलिङ्गनानि यासां तासां स्त्रीणां सुरतजनिताम् अङ्गग्लानिम् अवयवानां ग्लानतां व्यालुम्पन्ति अपनुदन्ति । ७ ।

যে অলকায় অর্দ্ধরাত্রে তোমার (মেঘের) আবরণ বিগম হেতু উভ্র চন্দ্রকিরণ দ্বারা প্রকটজলকণাক্ষরণকারী (চন্দ্রাতপ সম্বদ্ধ) রজ্জুতে গ্রথিত চন্দ্রকান্তমণি গুলি প্রিয়তমভুজদ্বয়ের গাঢ় আলিঙ্গন হইতে মুক্ত যক্ষাঙ্গনা দিগের সুরতজনিত অঙ্গগ্লানি অপনোদন করে। ৭।

Where (in *Alaka*) at midnight moon-jewels (*Chandra*

kanta gems) pending in nets of thread (of the ceiling cloth) and shedding sprays of water by virtue of (the contact of) moon beams transparent owing to the withdrawal of thy obstruction, abate the fatigue generated by sensual enjoyments of the females while the embrace with arms has been slackened of the dearest lovers.—7.

Notes.

1. यत्र—where (in Alaka).

2. निशीथे—at midnight.

3. त्वत्संरोधापगमविशदैः चन्द्रपादैः—तव संरोधः (षष्ठी तत्पु.) अस्य अपगमः (अप + गम + अप् भावे) (षष्ठी तत्पु.) तेन विशदाः (३या तत्पु.) तैः । चन्द्रस्य (चन्द + रन कर्त्तरि) पादाः तैः (षष्ठी तत्पु.)—through the moon beams clear on account of the absence of thy obstruction.

4. स्फुटजललवस्यन्दिनः—जलस्य लवाः बिन्दवः (६ष्ठी तत्पु.) स्फुटाः जललवाः (कर्म्मधा.) तान् स्फुटजललवान् स्यन्दन्ते ये ते इति (स्फुटजललव + स्यन्द् + णिनि शीलार्थे उपपद तत्पु.) adjective to चन्द्रकान्ताः—shedding drops of water.

5. तन्तुजालावलम्बाः—तन्तोः जालानि (६ष्ठी तत्पु.) तानि अवलम्बन्ते ये ते इति (तन्तुजाल + अव + लम्ब + अच् कर्त्तरि पचाद्यच् उपपद तत्पु.) —hanging in nets of threads, adjective to चन्द्रकान्ताः । The चारित्रवर्द्धिणी gives another reading and explains यन्त्रजालावलम्बाः पुत्तलिकादियुक्तेषु जालेषु अवलम्बन्ते येते तथोक्ताः ।

6. चन्द्रकान्ताः—चन्द्रकान्त or the moon gem which is supposed to absorb the rays of the moon, and to emit them again in the form of pure and cool moisture.

7. प्रियतमभुजोच्छ्वासितालिङ्गनानाम्—अतिशयेन प्रियाः प्रियतमाः (प्रिय

अक्षय्यान्तर्भवननिधयः प्रत्यहं रक्तकण्ठै-
रुद्गायद्भिर्धनपतियशः किन्नरैर्यत्र सार्द्धम् ।
वैभ्राजाख्यं विबुधवनितावारमुख्यासहायाः
बद्धालापा बहिरुपवनं कामिनो निर्विशन्ति ।८।

+तमप्)तेषां भुजाः (षष्ठी तत्पु.) तैः उच्छ्वासितानि(उत्+श्वस्+णिच्+क्त कर्मणि) (३या तत्पु.) प्रियतमभुजोच्छ्वासितानि आलिङ्गनानि यासां ताः तासां (बहुव्रो) adjective to स्त्रीणां—with slackened embraces by the arms of their lovers. The सारोद्धारिणी reads प्रियतमभुजालिङ्गनोच्छ्वासितानां and explains thus—प्रियतमस्य वल्लभस्य भुजालिङ्गनं बाहुपरिरम्भणं तेन उच्छ्वासितानां प्रबलश्वासमानिनीनां पीड़ितानाम् इत्यर्थः । Also वल्लभ—भर्तृभुजबन्धनपीड़ितानां ।

8. स्त्रीणां सुरतजनिताम् अङ्गग्लानिं व्यालुम्पन्ति—सुरतेन जनिता (जन+णिच्+क्त कर्मणि) (३या तत्पु.) ताम् अङ्गानां ग्लानिः (ग्लै+क्तिन भावे) (६ष्ठी तत्पु.) तां, व्यालुम्पन्ति (वि+आ+तौदादिक लुप्+अन्ति लट्)—dispel the bodily fatigue arising out of sexual gratification of the females.

9. The अलङ्कार is अनुप्रास ।

10. Conjugations—

लुप् तुदादि—लुम्पति, लुम्पते, लुलोप, लुलुपे, अलुपत्, अलुप्त, also दिवादि लुप्यति &c.

श्वस्—श्वसिति, शश्वास, अश्वसीत ।

Prose order—यत्र अक्षय्यान्तर्भवननिधयः विबुधवनितावारमुख्यासहायाः बद्धालापाः कामिनः प्रत्यहं धनपतियशः उद्गायद्भिः रक्तकण्ठैः किन्नरैः सार्द्धं वैभ्राजाख्यं बहिरुपवनं निर्विशन्ति । ८ ।

Paraphrase—यस्यामलकायां अविच्छिन्नभोगायतनसम्पत्तिसम्पन्नाः प्रस्तुतविविधसंलापाः कामुकाः देवाङ्गनावारमुख्याभिः परिवर्धितसम्मोदाः सन्तः

कुवेरकीर्त्तिं तारतरम् गायद्भिः सुश्राव्यकण्ठध्वनिभिः किन्नरैः सह प्रतिदिनं वैभ्राजाख्ये वहिरुपवने सुखेन समयमतिवाहयन्ति । ८ ।

Change of voice—यत्र अक्षय्यान्तर्भवननिधिभिः विबुधवनितावारमुख्यासहायैः बद्धालापैः कामिभिः प्रत्यहम् धनपतियशः उद्गायद्भिः रक्तकण्ठैः किन्नरैः सार्द्धं वैभ्राजाख्यं वहिरुपवनं निर्व्विश्यते ।

Sanjivani—अक्षय्येति । यत्र अलकायां क्षेतुं शक्याः क्षय्याः (क्षय्यजय्यौ शक्यार्थे इति निपातः ततो नञ्‌समासः ।) भवनानाम् अन्तः अन्तर्भवनम् (अव्ययं विभक्तीत्यादिना अव्ययीभावः ।) अक्षय्याः अन्तर्भवने निधयो येषां ते तथोक्ताः (यथेच्छभोगसम्भावनार्थमिदं विशेषणम्) विबुधवनिताः अप्सरसः ता एव वारमुख्याः वेश्याः ता एव सहायाः येषां ते तथोक्ताः (वारस्त्री गणिका वेश्या रूपाजीवाथ सा जनैः। सत्कृता वारमुख्या स्यादित्यमरः ।) बद्धालापाः सम्भावितसंलापाः कामिनः कामुकाः प्रत्यहम् अहनि अहनि (अव्ययं विभक्तीत्यादिना समासः ।) रक्तः मधुरः कण्ठः कण्ठध्वनिः येषां ते तैः सुन्दरकण्ठध्वनिभिः धनपतियशः कुवेरकीर्त्तिम् उद्गायद्भिः उच्चैर्गायद्भिः देवगानस्य गान्धारग्रामत्वात् तारतरं गायद्भिः इत्यर्थः किन्नरैः सार्द्धं सह विभ्राजस्य इदं वैभ्राजं वैभ्राजम् इति आख्या यस्य तत् वैभ्राजाख्यम् (विभ्राजेन गणेन्द्रेण जातं वैभ्राजमाख्ययेति शम्भुरहस्ये ।) चैत्ररथस्य नामान्तरमेतत् वहिरुपवनं निर्विशन्ति अनुभवन्ति ॥ ८ ॥

যে অলকায়, বাসভবনে অক্ষয় নিধিসমন্বিত, অপ্সরা নামক শ্রেষ্ঠ

স্বর্গবেশ্যা সম্মিলিত ও (তাহাদিগের সহিত) আলাপকারী কামিগণ প্রত্যহ উচ্চৈঃস্বরে ধনপতিযশঃগানকারী মধুরকণ্ঠ কিন্নরগণের সহিত বৈভ্রাজ (চৈত্ররথ) নামক বহিরুদ্যান উপভোগ করে। ৮।

Where (in *Alaka*) the libertines, having inexhaustible wealth within their residences, being joined by *Apsarases* the finest of heavenly courtezans and engaged in conversation (with them) daily enjoy the outer garden named *Baibhraja* in company with the *Kinnaras* with sweet voice employed in singing loudly the fame of *Kubera* (the god of riches).—8.

Notes.

1. यत्र—where (in Alaka .

2. अक्षय्यान्तर्भवननिधयः—क्षेतुं शक्याः इति (क्षि + य शक्यार्थे कर्मणि-वाच्ये) "क्षय्य जय्यौ शक्यार्थे" इति इकारस्य अयादेशः निपातितः। न क्षय्याः अक्षय्याः (नञ् तत्पु.) भवनानां (भू + अनट अधिकरणे) अन्तः अन्तर्भवनम् अन्तर्भवने वा ("अव्ययं विभक्ति" इत्यादिना अव्ययीभावः) अन्तर्भवने निधयः (७मी तत्पु.) अक्षय्याः अन्तर्भवननिधयः येषां ते (बहुव्री) adjective to कामिनः—having inexhaustible wealth in their palaces. Mallinath points out the propriety of this epithet as यथेच्छ &c. (to be enjoyed in any way.)

3. विबुधवनितावारमुख्यासहायाः—विबुधानां वनिताः अप्सरसः (६ष्ठी तत्पु.) ताः एव वारमुख्याः (रूपकसमासः) विबुधवनितावारमुख्याः सहायाः येषां ते (बहुव्री)—accompanied by courtezans of *Apsarases* respected by all.

4. बद्धालापाः—बद्धः आलापः यैः ते (बहुव्री)—engaged in conversation. मल्लिम, सुमति and others read बद्धापानं which is explained बद्धं रचितम् आपानं वाह्यपानगोष्ठी यत्र तत्।

5. कामिनः प्रत्यहं—(कम् + णिनि कामिन् यद्वा कामः अस्ति एषां)

गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः
पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च ।
मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारै-
र्नैशोमार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥९॥

अहनि अहनि प्रत्यहं (अव्ययं विभक्तीत्यादिना अव्ययीभावसमासः)—the libertine lovers daily.

6. रक्तकण्ठैः धनपतियशः उद्गायद्भिः किन्नरैः सार्द्धम्—रक्तः मधुरः कण्ठः कण्ठध्वनिः येषां ते तैः (बहुव्री) adjective to किन्नरैः। धनपतियशः धनानां पतिः (६ष्ठी तत्पु.) कुवेरः, धनपतेः यशः (६ष्ठी तत्पु.) तत् उद्गायद्भिः उच्चैः गायद्भिः (उत्+गै+शतृ) see Mallinath देवगानस्य गान्धारग्रामत्वात् । किन्नरैः सार्द्धं—along with the *Kinnaras* who have sweet voice and who are engaged in loudly singing the glory of the master of riches कुवेर ।

7. वैभ्राजाख्यं बहिरुपवनं निर्विशन्ति—विभ्राजस्य इदं वैभ्राजं (विभ्राज+अण् or ण) वैभ्राजम् आख्या यस्य तत् (बहुव्री) बाहिरम् उपवनं बाह्यरुपवनं (कर्मधा.) निर्विशन्ति "निर्वेशोभृतिभोगयोः" इत्यमरः उपभुञ्जते—enjoy the outer garden called वैभ्राज or चैत्ररथ ।

N. B. This stanza is omitted by भरत, सनातन, रामनाथ, हरगोविन्द, कल्याणमल्ल and Wilson and considered spurious interpolation by Pandit I. C. Vidyasagar.

8. The अलङ्कार is काव्यलिङ्ग here.

9. Conjugations:—

चि—चिनोति, चिनाति चिचाय । अचैषीत् ।

विश्—विशति, विवेश, अविक्षत् ।

Prose order—यत्र कामिनीनां नैशोमार्गः गत्युत्कम्पात् अलकपतितैः

मन्दारपुष्पैः तथा (पतितैः) पत्रच्छेदैः तथा कर्णविभ्रंशिभिः कनककमलैः तथा (शिरःपतितैः) मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैः हारैश्च सवितुः उदये सूच्यते। ९।

Paraphrase—य स्यामलकायाम् अभिसारिकाः रात्रौ येन पथा कान्तसदनं गतवत्यः स पन्थाः सूर्य्योदये पदस्खलनात् अलकभ्रष्टैः मन्दारकुसुमैः लिङ्गैः पतितैः पत्रलताखण्डैः लिङ्गैः तथा कर्णस्खलितैः सुवर्णकमलैः लिङ्गैः तथा शिरःपतितैः मौक्तिकसरैः लिङ्गैः तथा स्तनतटे त्रुटितसूत्रैः स्खलितैः हारैश्च लिङ्गैः अनुमीयते। ९।

Change of voice—* * * नैशं मार्गं सूचयन्ति। ९।

Sanjivani—गत्युत्कम्पादिति। यत्र अलकायां कामिनीनाम् अभिसारिकाणां निशि भवः नैशः मार्गः सवितुः उदये सति गत्या गमनेन उत्कम्पः चलनं तस्मात् हेतोः अलकेभ्यः पतितैः मन्दारपुष्पैः सुरतरुकुसुमैः तथा पत्राणां पत्रलतानां छेदैः खण्डैः पतितैः इति शेषः तथा कर्णेभ्यः विभ्रश्यन्ति इति कर्णविभ्रंशीनि तैः कनकस्य कमलैः (षष्ठ्या विवक्षितार्थलाभे सति मयटा विग्रहे अध्याहारदोषः एवमन्यत्राप्यनुसन्धेयम्।) तथा मुक्ताजालैः मौक्तिकसरैः शिरोनिहितैः इत्यर्थः तथा स्तनयोः परिसरः प्रदेशः तत्र छिन्नानि सूत्राणि येषां तैः हारैश्च सूच्यते ज्ञाप्यते मार्गपतितमन्दारकुसुमादिलिङ्गैः अयमभिसारिकाणां पन्थाः इत्यनुमीयते इत्यर्थः। ९।

যে অলকায় সূর্য্য উদিত হইলে অভিসারিকাগণের রাত্রিকালীন পথ, গমনহেতুকম্প-(চলন)-বশতঃ অলক হইতে পতিত মন্দারপুষ্পদ্বারা ও (পথপতিত) পত্রলতাখণ্ডদ্বারা ও কর্ণ হইতে ভ্রষ্ট স্বর্ণপদ্মদ্বারা ও (শিরোভূষণ) মুক্তাজালদ্বারা এবং কুচতটে ছিন্নসূত্রহারদ্বারা (এই সকল চিহ্নদ্বারা) সূচিত হয়। ৯।

Where (in *Alaka*) after sun-rise the nocturnal track of *Abhisarikas* (females travelling in quest of lovers) is pointed out, by *Mandar* flowers fallen off from the pending curls of (their) hairs on account of the jerking produced from locomotion, by bits of leaves &c., by lotuses of gold fallen down from (their) ears, by strings of pearls (from heads) and by necklaces the threads of which are torn on the spaces of (their) breasts.—9.

Notes.

1. यत्र—where (in *Alaka*).

2. कामिनीनां—अभिसारिकाणां—"कान्तार्थिनी तु या याति सङ्केतं साभिसारिका"—of the *Abhisarika* females that is the females that resort to the previously appointed abode of their lovers. Prof. Wilson notes:—"The Hindoos always send the lady to seek her lover, and they usually add a very reasonable degree of ardour and impatience."

3. नैशः मार्गः—निशि भवः नैशः (निश् or निशा + अण् वा ण)—nocturnal path-way.

4. सवितुः उदये—(सू + तृन् कर्त्तरि = सवितृ) तस्य उदये (उत् + इ or अय् + अच्) भावे ७मी विभक्तिः—after the rising of the sun.

5. गत्युत्कम्पात्—गत्या गमनेन उत्कम्पः (३या तत्पु.) तस्मात् हेतौ ५मी—on account of the jerking arising out of locomotion. The सारोद्धारिणी explains:—चलद्भुजघनभराक्रान्ततया घनतरांशभिरतिरस्कृतमार्गान्तरालसंरम्भसञ्चरणसञ्जातत्वात् शरीरप्रकम्पः इत्यर्थः ।

6. अलकपतितैः मन्दारपुष्पैः—अलकेभ्यः पतितानि तैः (५मी तत्पु.) मन्दाराणां पुष्पाणि (६ तत्पु.) तैः—by the *Mandar* flowers dropped from the hair-curls.

मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं
प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम् ।
सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघै-
स्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥ १० ॥

7. पत्रच्छेदैः—पत्राणां छेदाः (६ तत्पु.) तैः—by pieces of leaves &c. In some M.S. S. the reading is पत्रच्छेद्यैः पत्राणां छेदनम् अर्हन्ति इति पत्रच्छेद्यानि तैः ।

8. कर्णविभ्रंशिभिः च कनककमलैः—कर्णेभ्यः विभ्रश्यन्ति इति कर्णविभ्रंशीनि (कर्ण + वि + भ्रन्श् + शीलार्थे अशीलार्थे वा णिनिः उपपद तत्पु.) तैः कनकस्य कमलानि (६ तत्पु.) तैः कनककमलैः । Mallinath here remarks that words should not be compounded by suffix मयट् (in मध्यपदलोपी compounds) in such cases—by the golden lotuses dropped from the ears (of the ladies).

9. मुक्ताजालैः—मुक्तानाम् जालानि (६ तत्पु.) तैः—by the strings of pearls (for the head).

10. स्तनपरिसरच्छिन्नसूत्रैः च हारैः सूच्यते—स्तनयोः परिसरः प्रदेशः (६ तत्पु.) तस्मिन् छिन्नानि (छिद + क्त (७मीतत्पु.) स्तनपरिसरच्छिन्नानि सूत्राणि येषां ते तैः(बहुव्री.)—Is indicated by necklaces the strings of which are torn off on the space of their breasts. The सारोद्धारिणी वल्लभ and others read मुक्ताजालग्रस्तनपरिमलैश्छिन्नसूत्रैः and explain मुक्तासु लग्नः स्तनयोः परिमलः मलयजादीनाम् आमोदः येषां ते तैः ।

N. B. This stanza is a spurious interpolation in the opinion of Pandit I. C. Vidyasagar.

11. The अलङ्कार is अनुमान ।

12. Conjugations—

सूच्—सूचयति, सुसोच, असुसूचत् ।

भ्रन्श्—भ्रंशते भ्रश्यति, बभ्रंश बभ्रंशे, अभ्रशत् अभ्रंशिष्ट ।

Prose order—यत्र मन्मथः धनपतिसखं देवं साक्षात् वसन्तं मत्वा भयात् षट्पदज्यं चापं प्रायः न वहति। तस्य आरम्भः सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येषु अमोघैः चतुरवनिताविभ्रमैः एव सिद्धः। १०।

Paraphrase—यस्यामलकायां कामः कुबेरबन्धुः शिवः बन्धुप्रीत्या निजरूपेण वसतीति विजानन् भालेक्षणदाहात् बिभ्यत्प्रायेण भृङ्गमौर्वीकं पुष्पमयं कार्मुकं न बिभर्त्ति तस्य कामिजनविजयव्यापारस्तु कामिलक्ष्येषु अवन्ध्यप्रयोगैः भ्रूभङ्गचतुरैः विलासिनीविभ्रमैरेव साध्यते। १०।

Change of voice—यत्र मन्मथेन * न उह्यते * * आरम्भं सभ्रूभङ्गप्रहितनयनाः * अमोघाः चतुरवनिताविभ्रमा एव साधयन्ति (यद्वा आरम्भेण सिद्धेन भूयते)। १०।

Sanjivani—मत्वेति। यत्र अलकायां मन्मथः कामः धनपतेः कुबेरस्य सखा धनपतिसखः (राजाहःसखिभ्यष्टच्।) तं देवं महादेवं साक्षात् वसन्तं सखिस्नेहात् निजरूपेण वसन्तं वर्त्तमानं मत्वा ज्ञात्वा भयात् भालेक्षणभयात् षट्पदाः एव ज्या मौर्व्वी यस्य तं चापं प्रायः प्राचुर्य्येण न वहति न बिभर्त्ति। कथं तर्हि तस्य कार्य्यसिद्धिः अत आह सभ्रूभङ्गेति तस्य मन्मथस्य आरम्भः कामिजनविजयव्यापारः सभ्रूभङ्गं प्रहितानि प्रयुक्तानि नयनानि दृष्टयो येषु तैः तथोक्तैः कामिनः एव लक्ष्याणि तेषु अमोघैः सफलप्रयोगैः इत्यर्थः मन्मथचापोऽपि क्वचिदपि मोघः स्यादिति भावः चतुराश्च ताः वनिताश्च तासां विभ्रमैः विलासैः एव सिद्धः निष्पन्नः। यत् अनर्थंकरं पाक्षिकफलञ्च तत्प्रयोगाद्वरं निश्चितसाधनप्रयोग इति भावः। १०।

যে অলকায় কুবেরবন্ধু দেব (শিব) নিজরূপে বাস করেন জানিয়া

कন্দর্প ভয়বশতঃ ভ্রমরজ্যাযুক্ত ধনুঃ প্রায়ই ধারণ করেন না (তথাপি) তাঁহার কামিজনবিজয়কর্ম্ম কামিজনলক্ষ্যে অব্যর্থ ভ্রূভঙ্গযুক্তনয়নসমন্বিত চতুর বনিতাবিলাস দ্বারাই সিদ্ধ হয়। ১০।

Where (in Alaka) *Kama* (cupid) knowing the God (*Siva*) friend of *Kubera* (the presiding deity of riches) personally resides there generally does not use his bow with black-bees for its string out of fright (of *Siva*), but his object (viz. the subjection of libertines) being effected by the dalliance (or blandishment) joined with frowning looks of eyes, of smart ladies—dalliance never unsuccessful upon libertines as its mark (for hitting).—10.

Notes.

1. यत्र—where (in *Alaka*).

2. मन्मथः—मनः मथ्नाति यः सः (मनस् + मन्थ् + अच् कर्त्तरि) the god of love (Cupid).

3. धनपतिसखं देवं—धनानां पतिः (६ तत्पु.) धनपतिः तस्य धनपतेः सखा (६ तत्पु.) "राजाहःसखिभ्यष्टच्" इति समासान्त टच् धनपतिसखः तं—the God friend of the god of wealth.

4. साक्षात् वसन्तं मत्वा—(सह + अक्ष + अत्—क्विप् कर्त्तरि) साक्षात् an indeclinable. (वस + शतृ) वसन्तं मत्वा (मन + क्त्वा)—knowing that (the God) lives personally.

5. भयात्—(भी + अच् भयसुखेत्यादिना क्लीबत्वम्) हेतौ ५मी—out of fear. Cf. तावत् स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार कुमार ३। ७२।

6. षट्पदज्यम् चापं—षट् पदानि येषां ते षट्पदाः (बहुव्री) षट्पदाः ज्या यस्य स तम् (बहुव्री) चापं—the bow that has (a group of) black-bees for its string. Cf. अलिपंक्तिरनेकशस्तया &c. कुमार ४। १५।

वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं
पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पान्।

7. प्रायः न वहति—प्रायस् an indeclinable meaning बाहुल्येन, generally;—does not wield ordinarily.

8. तस्य आरम्भः—(आ+रभ+घञ् कर्म्मणि)—his (cupid's) endeavours (viz. the subjection of people).

9. सभ्रूभङ्गप्रहितनयनैः—भ्रुवोः भङ्गः भ्रूभङ्गः (६ष्ठीतत् पु.) भ्रूभङ्गेण सह वर्त्तमानं सभ्रूभङ्गं यथा भवति तथा (तुल्ययोगे वहुव्री.) सभ्रूभङ्गं प्रहितानि (प्र+हि or धा+क्त कर्म्मणि) सुप् सुपेति समासः) सभ्रूभङ्गप्रहितानि नयनानि येषु ते तैः (वहुव्री) adjective to चतुरवनिताविभ्रमैः।—with eyes cast with frownings.

10. कामिलक्ष्येषु—अमोघैः—कामयन्ते इति कामिनः (कम्+णिनि) यद्वा कामाः सन्ति एषां ते (काम+इनि) कामिनः एव लक्ष्याणि (रूपक कर्म्मधा) तेषु न मोघाः अमोघाः (नञ् तत् पु) तैः—never unsuccessful on the libertines as marks (of arrows &c.)

11. चतुरवनिताविभ्रमैः एव सिद्धः—चतुराश्च ताः वनिताश्चेति (कर्म्मधारयः) चतुरवनिताः तासां विभ्रमाः (६तत्पु.) तैः, ऐवकारः सावधारणार्थः, सिद्धः (सिध्+क्त कर्म्मणि)—are effected by the dalliance of clever fine females. Scholiasts like भरत, रामनाथ, हरगोविन्द Wilson &c., read चटुलवनिताविभ्रमैः taking चटुल as an adjective of विभ्रम।

12. The अलङ्कार of the stanza is व्यतिरेक।

13. Conjugations—

सिध्—सिध्यति, सिषेध, असिधत्।

हि—हिनोति, जिघाय, अहैषीत्।

वह्—वहति, वहते, उवाह, ऊहे, अवाक्षीत्, अवोढ़।

वस्—वसति, उवास, अवात्सीत्।

लाक्षारागं चरणकमलन्यासयोग्यञ्च यस्या-
मेकः सूते सकलमबलामण्डनं कल्पवृक्षः ॥११ ।

Prose order—यस्याम् एकः कल्पवृक्षः चित्रं वासः, नयनयोः विभ्रमादेशदक्षं मधु किसलयैः सह पुष्पोद्भेदं भूषणानां विकल्पान्, चरणकमलन्यासयोग्यं लाक्षारागं (किं बहुना) सकलम् अबलामण्डनं सूते ।११ ।

Paraphrase—यत्रालकायाम् एकः कल्पतरुः नानावर्णं परिधेयं वसनं सूते नेत्रविभ्रमोपदेशकं देहावभूषकं मद्यं जनयति, कक्षधार्य्यं किसलयं पुष्पञ्च समुत्पादयति अपराणि देहधार्य्याणि भूषणानि विधत्ते, चरणरञ्जनानुकूलं लाक्षारसञ्च सम्पादयति इत्थं चतुर्व्विधम् अबलाभूषणजातम् एकस्मादेव कल्पवृक्षात् समुत्पद्यते तेन न नानासाधनसम्पादनप्रयासः ।-११ ।

Change of voice—* सूयते. * सूयन्ते, पुष्पोद्भेदः सूयते, चरणकमलन्यासयोग्यः लाक्षारागश्च सूयते. एकेन कल्पवृक्षेण * सूयते । ११ ।

Sanjivani—कक्षधार्य्यं देहधार्य्यं परिधेयं विलेपनम् । चतुर्द्धा भूषणं प्राहुः स्त्रीणामन्यच्च देशिकमिति रत्नाकरे तदेतदाह वास इति । यस्याम् अलकायां चित्रं नानावर्णं वासः वसनं परिधेयमण्डनमेतत् नयनयोः विभ्रमाणाम् आदेशे उपदेशे दक्षम् अनेन विभ्रमद्वारा मधुनो मण्डनत्वमनुसन्धेयं तत्र मण्डनादिवत् देहधार्य्येऽन्तर्भाव्यं मधु मद्यं किसलयैः पल्लवैः सह पुष्पोद्भेदम् उभयञ्चेत्यर्थः इदं तु कक्षधार्य्यं भूषणानां विकल्पान् विशेषान् देहधार्य्यमेतत् तथा चरणकमलयोः न्यासस्य समर्पणस्य योग्यं रज्यते अनेन इति रागः रञ्जकद्रव्यं लाक्षा एव रागः तं लाक्षारागम् इदञ्च अङ्गरागादिविलेपनमण्डनोपलक्षणं सकलं सर्व्वं चतुर्व्विधम् अपि इत्यर्थः अबलामण्डनं योषित्प्रसाधन-

जातम् एकः कल्पवृक्षः एव सूते जनयति ननु नानासाधन-सम्पादनप्रयास इत्यर्थः । ११ ।

যে অলকা নগরীতে এক কল্পবৃক্ষই বিচিত্র বস্ত্র (পরিধেয় ভূষণ), চক্ষুর্দ্বয়ের বিলাসোপদেশে পটু মদ্য (নয়ন বিলাসোৎপাদন দ্বারা মদ্য দেহধার্য্য ভূষণ মধ্যে গণনীয়), নবপত্রের সহিত প্রস্ফুটিত পুষ্প (কচধার্য্যভূষণ), বিবিধ (বিশেষ বিশেষ) ভূষণ (দেহধার্য্যভূষণ) এবং চরণপদ্মে ন্যাস (লাগান) যোগ্য লাক্ষারূপ রক্তবস্তু (বিলেপনভূষণ), সকল (অর্থাৎ চারি প্রকার) অঙ্গনাদিগের ভূষণ উৎপাদন করে।১১।

In which city (*Alaka*) the *Kalpa* tree alone generates all (*i. e.*, four sorts of) ornaments of females (by producing) the dress having diverse hues, the liquor dexterous in instructing amorous movements to the eyes, blooming flowers with (new) shoots, diverse sorts of (other) decorating ornaments, and the red dye of lac worthy of being painted on the feet resembling lotuses.—11.

Notes.

1. यस्यां—in which city (*Alaka*).

2. चित्रं वासः—robe having various colours, this being the परिधेयमण्डन or decorating substance for putting on or to be worn.

3. नयनयोः विभ्रमादेशदक्षं मधु—विभ्रमाणाम् विलासानाम् आदेशः उपदेशः (६ तत्पु.) तस्मिन् विभ्रमादेशे दक्षं निपुणं adjective to मधु= मद्यम्—the liquor that is skilful in instructing amorous movements of the eyes. Although wine is no ornament still by adorning the eyes it falls under the head of देहधार्य्य or decoration of body.

4. किसलयैः सह पुष्पोद्भेदं—(उत् + भिद् + घञ् भावे) उद्भेदः पुष्पा

वाम् उद्भेदः तं, किसलयैः इति सहयोगे तृतीया—the opening of flowers (*i. e.*, opened flowers) with sprouts of new leaves. This is कचधार्य्य (ornament for the hair).

5. भूषणानां विकल्पान्—various particulars of ornaments. This being the decoration classed as देहधार्य्य (of the body).

6. चरणकमलन्यासयोग्यञ्च लाक्षारागं—चरणे कमले इव ("उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इति उपमित समासः) तयोः न्यासः (नि + अस् + घञ् भावे) (७मी तत्पु.) तस्य योग्यं (६ तत्पु.); रज्यते अनेन इति (रञ्ज् + घञ् करणे) लाक्षा एव रागः (रूपक कर्मधा) तं—red lac-dye fit to be painted on the soles of feet resembling lotus-flowers. This being the decoration classed as विलेपन (anointment of the body).

N. B. Mallinath cites a passage from रत्नाकर which enumerates the four classes of decorating substance of the females viz. (1) for the hair, (2) for the body (3) wearing (4) for anointment.

7. सकलम् अबलामण्डनं—सकलं चतुर्विधं, अबलानां मण्डनं (६ष्ठी तत्पु.)—all the decorating ornaments of the ladies. सकलं refers to the four classes.

8. एकः कल्पवृक्षः (एव) सूते—एकः (अनन्यसहायः)—the Kalpa tree alone generates all (the ornaments).

N. B. Here our poet finishes the description of Alaka. This *sloka* is omitted by scholiasts like भरत.सना.राम. हर.कल्याण and others and also is an interpolation in the opinion of Pandit I. C. Vidyasagar.

9. The अलङ्कार of the stanza is दीपक ।

10. Conjugations—

तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन।
यस्योपान्ते कृतकतनयः कान्तया वर्द्धितो मे
हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः॥ १२॥

नू—नूते, नूयते, नुनुवे, अनूत।

भिद—भिनत्ति, बिभेद, अभिदत, अभैत्सीत्।

Prose order—तत्र धनपतिगृहान् उत्तरेण सुरपतिधनुश्चारुणा तोरणेन दूरात् लक्ष्यम् अस्मदीयम् आगारं वर्त्तते यस्य उपान्ते मे कान्तया वर्द्धितः कृतकतनयः हस्तप्राप्यस्तवकनमितः बालमन्दारवृक्षः अस्ति। १२।

Paraphrase—तत्रालकायां कुवेरभवनस्य उत्तरस्यां दिशि मणिमयत्वात् अनेकरूपत्वाच्च शक्रचापसुन्दरेण बहिर्द्वारेण दूरात् प्रत्यभिज्ञेयम् मदीयं गृहं वर्त्तते यस्य प्राकारान्तः पार्श्वदेशे मत्प्रियया पोषितः पुत्त्रत्वेन अभिमन्यमानः हस्तावचेयैः पुष्पगुच्छैः नमितः सुरतरुबालकः अस्ति। १२।

Change of voice—* लक्ष्येण अस्मदीयेन आगारेण भूयते। * * वर्द्धितेन कृतकतनयेन हस्तप्राप्यस्तवकनमितेन बालमन्दारेण भूयते। १२।

Sanjivani—इत्थमलकां वर्णयित्वा तत्र स्वभवनस्य अभिज्ञानमाह तत्रेति। तत्र अलकायां धनपतिगृहान् उत्तरेण उत्तरस्मिन् अदूरदेशे (एनबन्यतरस्यामदूरेऽपञ्चम्या इत्येनप्प्रत्ययः। एनपा द्वितीयेति द्वितीया। गृहाः पुंसि च भूम्न्येव इत्यमरः।) अस्माकम् इदम् अस्मदीयम् (वृद्धाच्छ इति छप्रत्ययः।) आगारं गृहं सुरपतिधनुश्चारुणा मणिमयत्वात् अनेकरूपत्वाच्च इन्द्रचापसुन्दरेण तोरणेन बहिर्द्वारेण दूरात् लक्ष्यं दृश्यम् अनेन अभि-

स्थानेन दूरत एव स्रातुं शक्यम् इत्यर्थः अभिज्ञानान्तरमाह यस्य आगारस्य उपान्ते प्राकारान्तःपार्श्वदेशे मे मम कान्तया वर्द्धितः पोषितः कृतकतनयः कृत्रिमसुतः पुत्त्वेन अभिमन्यमान इत्यर्थः हस्तप्राप्यैः हस्तावचेयैः स्तवकैः गुच्छैः नमितः (स्याद्गुच्छकस्तु स्तवक इत्यमरः।) बालो मन्दारवृक्षः कल्पवृक्षः अस्ति इति शेषः। १२।

সেই অলকায় কুবেরগৃহের উত্তরে অদূরে ইন্দ্রধনুর ন্যায় সুন্দর তোরণ বশতঃ দূর হইতে দর্শনযোগ্য আমাদের গৃহ (আছে) যাহার প্রাকার পার্শ্বে আমার পত্নী কর্তৃক পরিবর্দ্ধিত পোষ্যপুত্র স্বরূপ হস্তগ্রাহ্যপুষ্পস্তবকাবনত ক্ষুদ্র মন্দার বৃক্ষ (আছে)। ১২।

There (in *Alaka*) is our house just to the north of the palace of the lord of wealth (*Kubera*), which (our house) is visible from distance on account of the arched gate as graceful as a rain-bow ; by the side of which (house) there is a young *Mandar* plant hung down with bunches of blossoms within reach of the hand, and fostered and accepted as an adopted child by my wife.—12.

Notes.

1. तत्र—There (in *Alaka*).

2. धनपतिगृहात् उत्तरेण—धनानां पतिः (६ष्ठी तत्पु.) धनपतेः गृहाः (६ष्ठी तत्पु.) तान् the word गृह when in the masculine gender is always in the plural. When neuter it admits of the three genders. उत्तरेण (उत्तर + एनप् "एनबन्यतरस्याम् अदूरे अपञ्चम्याः" इति एनप्प्रत्ययः) The sutra means that एनप् is added optionally to a word when the import is proximity, in all case-

endings except the 5th case-ending. Then गृहान् takes the 2nd case-ending by the sutra "एनपा द्वितीया" which means—words take the 2nd or the 6th case-ending when governed by another word with एनप् affix. Scholiasts like सनातन् रामनाथ हरगोविन्द कल्याणमल्ल read धनपतिगृहादुत्तरेण in lieu of धनपति-गृहानुत्तरेण ।

3. अस्मदीयम् आगारं—(अस्माकम् इदम् इति अस्मद् + छ or ईय) —our house.

4. सुरपतिधनुश्चारुणा तोरणेन—सुराणां पतिः सुरपतिः (६ तत्पु.) तस्य सुरपतेः धनुः (६ष्ठीतत् पु.) सुरपतिधनुः इव चारुः तेन ("उपमानानि सामान्यवचनैः" इति उपमान समासः) तेन—by the gate (which has an arch) as beautiful as the rain-bow (because the gate is made of jewels and of a large size.)

5. दूरात् लक्ष्यं—to be viewed from a distance (by this sign viz. the arched gate).

6. यस्य उपान्ते—by the inner wall of which house. भरत, सनातन, रामनाथ, हरगोविन्द and कल्याणमल्ल read यस्योद्याने and this reading is approved by our Vidyasagar.

7. मे कान्तया वर्द्धितः—(वृध् + णिच् + क्त कर्म्मणि) fostered by my wife.

8. कृतकतनयः—(कृ + क्त कर्म्मणि = कृत + कण् = कृतकः) कृतकः तनयः (कर्म्मधा.)—adopted son.

9. हस्तप्राप्यस्तवकनमितः बालमन्दारवृक्षः—हस्ताभ्याम् प्राप्याः हस्तप्राप्याः (प्र + आप् + य) (३या तत्पु.) हस्तप्राप्याः स्तवकाः (कर्म्मधा.) हस्तप्राप्य-स्तवकाः तैः नमितः ; मन्दार एव वृक्षः (मयूरव्यंसकादित्वात् समासः) बालः मन्दार-वृक्षः (कर्म्मधा.)—young *Mandar* plant having clusters of flowers to be reached by the hand.

वापी चास्मिन् मरकतशिलाबद्धसोपानमार्गा
हैमैश्छन्ना विकचकमलैः स्निग्धवैदूर्य्यनालैः ।
यस्यास्तोये कृतवसतयो मानसं सन्निकृष्टं
नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः॥१३॥

N. B. Now the यक्ष informs the cloud of the peculiar signs of his home.

10. The अलङ्कार is उदात्त ।

11. Conjugations—

वृध्—वर्द्धते, ववृधे, अवर्द्धिष्ट, अवृधत् ।

आप्—आप्नोति, आप, आपत् ।

Prose order—अस्मिन् मरकतशिलाबद्धसोपानमार्गा स्निग्धवैदूर्य्यनालैः हैमैः विकचकमलैः छन्ना वापी च अस्ति यस्याः तोये कृतवसतयः हंसाः त्वामपि प्रेक्ष्य व्यपगतशुचः सन्निकृष्टमपि मानसं न आध्यास्यन्ति । १३ ।

Paraphrase—अस्य मदीयागारस्य पुरतः मरकतप्रस्तरैः रचितसोपाना स्निग्धवैदूर्य्यनालैः सौवर्णैः स्फुटपंकजैः परिव्याप्ता काचित् दीर्घिकाप्यस्ति, यस्याः सलिले कृतनिवासाः राजहंसा वर्षाकालेपि व्यपगतकलुषजलत्वात् वीतदुःखाः सन्तः अतएव सन्निहिततया सुगमस्यापि मानसाख्यसरसः नोत्कण्ठया आरिष्यन्ति । १३ ।

Change of voice—अस्मिन् मरकतशिलाबद्धसोपानमार्गया * * छन्नयावाप्या च भूयते * कृतवसतिभिः हंसैः * व्यपगतशुग्भिः * नाध्यास्यते।१३।

Sanjivani—इतः पञ्चभिः श्लोकैरभिज्ञानान्तरमाह वापीति। अस्मिन् मदीयागारे मरकतशिलाभिः बद्धः सोपानमार्गः यस्याः सा तथोक्ता विदूरे भवाः वैदूर्य्याः (विदूराज् ञ्य इतिञ्यप्रत्ययः।) वैदूर्य्याणाम् विकाराः

वैदूर्य्याणि (विकारार्थे अन्प्रत्ययः ।) स्निग्धानि वैदूर्य्याणि नालानि येषां तैः हैमैः सौवर्णैः विकचकमलैः छन्ना वापी च अस्ति इति शेषः यस्याः वाप्याः तोये कृतवसतयः कृतनिवासाः हंसाः त्वां मेघं प्रेक्ष्य अपि व्यपगतशुचः वर्षाकालेऽपि व्यपगतकलुषजलत्वात् वीतदुःखाः सन्तः सन्निकृष्टं सन्निहितं सुगमम् अपि इत्यर्थः मानसं मानससरः न आध्यास्यन्ति न उत्कण्ठिष्यन्ति । आध्यानमुत्कण्ठास्मरणमिति काशिकायाम् । १३ ।

তথায় (আমার বাটীতে) মরকতশিলাবদ্ধসোপানসমন্বিত মসৃণ বৈদূর্য্যমণিময়নালযুক্ত-প্রস্ফুটিত-স্বর্ণকমলপূর্ণ বাপী আছে। যে বাপী-জলে বাস করিয়া তোমাকে (মেঘকে) দেখিয়াও দুঃখরাহিত্যবশতঃ (বর্ষাকালেও বাপীজল কলুষিত হয় না বলিয়া) হংসগণ নিকটস্থ মানসসরোবরের জন্য উৎকণ্ঠিত হয় না (অথবা স্মরণ করে না)। ১৩।

Also there (in my house) is a tank with a path of rows of stair-case built of emerald jewels and which is replete with full-blown lotuses of gold with stalks of glazed *Vaidurja* gems ; living in its waters the geese unacquainted with grief even looking at thee are never anxious for the lake *Manasa* in its vicinity.—13.

Notes.

1. अस्मिन् च—also there (in the house).

2. मरकतशिलाबद्धसोपानमार्गा—मरकतानां शिलाः (६ तत्पु.) ताभिः बद्धः (३या तत्पु.) मरकतशिलाबद्धः, सोपानानां मार्गः (६ तत्पु.) मरकतशिलाबद्धः सोपानमार्गः यस्याः सा (बहुव्री)—the path to the flight of steps being built of emerald stones.

3. स्निग्धवैदूर्यनालैः हैमैः विकचकमलैः छन्ना—(स्निह + क्त) स्निग्धानि विदूरे भवाः वैदूर्याः (विदूर+ञ्य) वैदूर्याणां विकाराः (वैदूर्य+अन्) वैदूर्याणि, स्निग्धानि वैदूर्याणि (कर्मधा.) स्निग्धवैदूर्याणि नालानि येषां तैः (बहुव्री) ; हैमैः (हेम+अण्),विकचानि कमलानि (कर्मधा.) तैः छन्ना (छद+क्त कर्मणि)—covered over with fullblown golden lotuses having stalks of glazed *Vaidurja* gems. भरत and हरगोविन्द read कमलमुकुलैः for विकचकमलैः । वल्लभ reads स्युता for छन्ना and explains प्रोता सम्बद्धा इत्यर्थः ।

4. यस्याः तोये कृतवसतयः हंसाः—कृता वसतिः यैः ते (बहुव्री)—the geese living in the waters of which (tank).

5. त्वां प्रेक्ष्य अपि व्यपगतशुचः—(वि+अप+गम्+क्त) व्यपगताः शुचः (शुच्+क्विप् भावे) येषां ते (बहुव्री)—remain without grief (because they are quite sure that the water will remain perfect transparent) seeing thee.

6. सन्निकृष्टं मानसं न आध्यास्यन्ति—सन्निकृष्टं (सम्+नि+कृष्+क्त) आध्यास्यन्ति (आङ्+ध्यै+स्यन्ति लृट्) आध्यानम् उत्कण्ठापूर्वकं स्मरणमिति मानसमित्यत्र "वा स्मृत्यर्थदयेशाम् कर्मणि" षष्ठ्यपि स्यात् । आध्यान is to remember anxiously—are never anxious for the Manasa lake though it is very near. भरत, रामनाथ, हरगोविन्द, कल्याणमल्ल &c. read न ध्यास्यन्ति (to think).

7. The अलङ्कार is उदात्त ।

8. Conjugations—

ध्यै—ध्यायति, दध्यौ, अध्यासीत् ।

छद—छादयति छादयते ।

स्निह—स्निह्यति, सिष्णेह, असिहत् ।

तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः
क्रीड़ाशैलः कनककदलीवेष्टनप्रेक्षणीयः ।
मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण
प्रेक्षोपान्तस्फुरिततड़ितं त्वां तमेव स्मरामि ।१४।

Prose order—तस्याः तीरे पेशलैः इन्द्रनीलैः रचितशिखरः कनककदलीवेष्टनप्रेक्षणीयः क्रीड़ाशैलः अस्ति । हे सखे ! उपान्तस्फुरिततड़ितं त्वां प्रेक्ष्य मद्गेहिन्याः प्रिय इति कातरेण चेतसा तमेव स्मरामि । १४ ।

Paraphrase—तस्या वाप्यास्तटभूमौ इन्द्रनीलमणिमयशृङ्गः वेष्टनभूतानां स्वर्णकदलीनां तेजसा दूरात् लक्ष्यः एकः कृत्रिमः आक्रीड़पर्व्वतः वर्त्तते प्रान्तविलसद्विद्युन्नतं भवन्तं पश्यतो मे स एव मत्प्रियायाः प्रियत्वात् समुपजातस्वानन्दभीतेः स्मृतिपथम् आयाति ।१४।

Change of voice—* * रचितशिखरेण * प्रेक्षणीयेन भूयते * स एव स्मर्यते । १४ ।

N. B. रचितशिखरः कनककदलीवेष्टः अतएव प्रेक्षणीयः अतएव रम्यदर्शनः इत्येवमर्थो न मल्लिनाथाभिप्रेतः तन्मते रचितशिखरः कनककदलीवेष्टनप्रेक्षणीयः कनककदलीवेष्टनेन प्रेक्षणीयः दूरात् लक्षणीयः इत्येवमर्थः ।

Sanjivani—तस्या इति । तस्याः वाप्याः तीरे पेशलैः चारुभिः (चारौ दक्षे च पेशल इत्यमरः ।) इन्द्रनीलैः रचितशिखरः इन्द्रनीलमणिमयशिखर इत्यर्थः कनककदलीनां वेष्टनेन परिधिना प्रेक्षणीयः दर्शनीयः क्रीड़ाशैलः अस्ति इति शेषः हे सखे उपान्तेषु प्रान्तेषु स्फुरिताः तड़ितः यस्य तं तथोक्तम् इदं विशेषणं कदलीसाम्यार्थमुक्तम् इन्द्रनीलसाम्यं तु मेघस्य स्वाभाविकम् इत्यनेन

सूच्यते त्वां प्रेक्ष्य मद्गेहिन्याः प्रियः इति हेतोः तस्य शैलस्य मद्गृहिणीप्रियत्वात् हेतोः इत्यर्थः कातरेण भीतेन चेतसा (भयञ्चात्र सानन्दमेव वस्तूनामनुभूतानां तुल्यश्रवणदर्शनात् ।"श्रवणात् कीर्त्तनाद्वापि सानन्दा भीर्यथा भवेदिति" रसाकरे दर्शनात् ।) तम् एव क्रीड़ाशैलम् एव स्मरामि एवकारो विषयान्तरव्यवच्छेदार्थः सदृशवस्त्वनुभवात् दृष्टार्थस्मृतिर्जायते इत्यर्थः। अतएवात्र स्मरणाख्योऽलङ्कारः तदुक्तं सदृशानुभवादन्यस्मृतिः स्मरणमुच्यते इति। निरुक्तकारस्तु त्वां तमेव स्मरामीति योजयित्वा मेघे शैलत्वारोपमाचष्टे तदसङ्गतम् अद्र्याकारारोपस्य पुरोवर्त्तिन्यनुभवात्मकत्वेन स्मरतिशब्दप्रयोगायोगात् शैलत्वभावनास्मृतिरित्यपि नोपपद्यते भावनायाः स्मृतित्वे प्रमाणाभावात् अनुभवायोगात् सादृश्योपन्यासवैयर्थ्याच्च विसदृशेऽपि शालग्रामे हरिभावनादर्शनादिति । १४ ।

তাহার (বাপীর) তীরে সুচারুইন্দ্রনীলমণি-নির্ম্মিত-শিখরদেশ সম্পন্ন স্বর্ণময়কদলী বৃক্ষের বেষ্টন (অর্থাৎ চারিধারে অবস্থান) হেতু দর্শনীয় ক্রীড়া পর্ব্বত (আছে) হে সখে (মেঘ) প্রান্তভাগে দীপ্তিমত্তড়িল্লতাবিশিষ্ট তোমাকে(অতএব সেই ক্রীড়া শৈলের সদৃশ) আমার [গৃহিণীর প্রিয় পর্ব্বত বলিয়া আনন্দভয়যুক্ত অন্তঃকরণে স্মরণ করিতেছি।১৪।

On the margin of it (the tank) there is an (artificial) hill of pleasure the peak of which is built of fine sapphires and which is worthy of being looked at on account of the circumference of plantain plants of gold. Oh my friend! perceiving thee that art encircled with flashing lightenings

(thereby resembling the hill) I with apprehensive heart remember the hill because it is dear to my wife.—14.

Notes.

1. तस्याः तीरे—On the bank of the tank. भरत सना. राम. and others read यस्याः तीरे ।

2. पेशलैः इन्द्रनीलैः रचितशिखरः—इन्द्रनीलाः (अविग्रह नित्यसमासः) तैः रचितं (रच्+क्त कर्म्मणि) शिखरं यस्य सः—the peak of which (hill) is built of beautiful blue jewels (*i. e.* sapphires).

3. कनककदलीवेष्टनप्रेक्षणीयः क्रीड़ाशैलः—कनकानां कदल्यः (६ष्ठीतत्पु.) तासां वेष्टनं (६ष्ठीतत्पु.) (वेष्टनं = वेष्ट्+अनट् करणे) तेन प्रेक्षणीयः (३याततपु.) (प्र + ईक्ष + अनीय कर्म्मणि) क्रीड़ायाः शैलः (६ष्ठीतत्पु.)—a hill of sports worthy of being seen on account of having a circular line of rows of plaintain trees of gold around the hill. The commentator हरगोविन्द reads without compounding it as कनककदलीवेष्टनः प्रेक्षणीयः । Our Vidyasagar prefers this reading and remarks समस्तपक्षे कनककदलीनां वेष्टनम् एकमेव क्रीड़ाशैलस्य प्रेक्षणीयत्वे हेतुः असमस्तपक्षे तु इन्द्रनीलरचितशिखरत्वम् कनककदलीवेष्टनत्वञ्च इत्युभयं हेतुः ।

4. (हे) सखे—मेघ इति शेषः—Oh friend !

5. उपान्तस्फुरिततड़ितं त्वाम् प्रेक्ष्य—उपान्तेषु स्फुरिताः (स्फुर्+क्त कर्त्तरि) (७मीतत् पु.) उपान्तस्फुरिताः तड़ितः यस्य सः (बहुव्री) तं—On seeing thee that hast flashing lightening at thy skirts; this adjective is added to the cloud in order to compare it with the hill which has golden plantain trees resembling lightening in colour.

6. मद्गृहिण्याः प्रिय इति—मम गेहिनी तस्याः (६ तत्पु.) because the hill is dear to my wife.

रक्ताशोकश्चलकिशलयः केसरश्चात्र कान्तः
प्रत्यासन्नौ कुरवकवृतेर्माधवीमण्डपस्य ।

7. कातरेण चेतसा—with apprehension in the mind (the apprehension is here mixed with joy on seeing the resemblance of the dear hill.

8. तमेव स्मरामि—I recollect it (the hill).

9. The अलङ्कार of the stanza is स्मरण in accordance with the rule "सदृशानुभवात् अन्यस्मृतिः स्मरणम्" meaning the recollection of some (previously known) substance on seeing the resemblance. Mallinath here criticises निरुक्तकार who takes त्वां (the cloud) with तम् (the hill) identically एव स्मरामि। According to निरुक्तकार then the text ought to be अनुभवामि and not स्मरामि because we never say *remember* a thing after viewing it, but say we *perceive* it. Hence we see Mallinath is perfectly correct in his criticism. See Mallinath beginning with अतएवात्र &c. यद्वा अत्र स्मृत्यलंकारः "सदृशानुभवात् वस्तुस्मृतिः स्मरणमुच्यते" स च उपान्तस्फुरिततडितमिति काव्यलिङ्गं प्राणदत्वेन अपेक्षते इत्युभयोः अङ्गाङ्गिभावेन संकरः। "हेतोर्वाक्य पदार्थत्वे काव्यलिङ्गमुदाहृतम्।" उपान्तस्फुरिततडितमेतत् विशेषणं यच्चास्य कनककदलीवेष्टनप्रेक्षणीयस्य क्रीडाशैलस्य स्मरणं प्रति कान्तिमत्सादृश्यात् हेतुः।

N. B. महिम explains the resemblance thus:—तथाहि तमालश्यामलत्विषस्तडिल्लताकर्बुरितोपान्तस्य मेघस्य कनककदलीपरिवेषपोतकान्तिमन्मरकतमणिश्यामलेन शिखरेण शिखरिणा क्रीडाशैलसादृश्यम् प्रतीयमानमेवेति काव्यार्थः।

10. Conjugations—

स्मृ—स्मरति, सस्मार, अस्मार्षीत्।

एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्याः॥१५॥

Prose order—अत्र कुरवकवृतेः माधवीमण्डपस्य प्रत्यासन्नौ चलकिसलयः रक्ताशोकः कान्तः केशरश्च (इत्युभौ स्तः।) एकः मया सह तव सख्याः (दोहदच्छद्मना) वामपादाभिलाषी अन्यः (मया सह) दोहदच्छद्मना अस्याः वदनमदिरां काङ्क्षति। १५।

Paraphrase—अत्र कुरवकावरणवेष्टितम् अतिमुक्तलतागृहम् उभयतः चञ्चलपल्लवः रक्ताशोकः कमनीयः वकुलश्च इत्युभौ वर्त्तेते। तयोः एकः अहमिव दोहदच्छद्मना प्रियायाः आशिञ्जितनूपुरेण वामचरणेन सम्पर्कम् अभिलषति अपरश्चाहमिव दोहदच्छद्मना अस्या गण्डूषमद्यं वाञ्छति। १५।

Change of voice—* प्रत्यासन्नाभ्यां * इत्युभाभ्यां भूयते, एकेन * वामपादाभिलाषिणा भूयते अन्येन * वदनमदिरा काङ्क्ष्यते। १५।

Sanjivani—रक्तेति। अत्र क्रीडाशैले कुरवकाः एव वृतिः आवरणं यस्य तस्य मधौ वसन्ते भवाः माधव्यः तासां मण्डपः तस्य अतिमुक्तलतागृहस्य (अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवीलतेत्यमरः।) प्रत्यासन्नौ सन्निकृष्टौ चलकिशलयः चञ्चलपल्लवः अनेन वृक्षस्य पादताड़नेषु प्राञ्जलित्वं व्यज्यते रक्ताशोकः (रक्तविशेषणं तस्य स्मरोद्दीपकत्वादुक्तं "प्रसूनकैरशोकस्तु श्वेतो रक्त इति द्विधा। बहुसिद्धिकरः श्वेतो रक्तोऽत्र स्मरवर्द्धन" इत्यशोककल्पे दर्शनात्।) कान्तः कमनीयः केसरः वकुलश्च (अथ केसरे वकुल इत्यमरः।) स्त इति शेषः। एकः तयोरन्यतरः प्राथमिकत्वादशोक इत्यर्थः मया सह तव सख्याः स्वप्रियाया इत्यर्थः वामपादाभिलाषी दोहदच्छद्मनेति

अत्रापि सम्बन्धनीयं स च अहं च अभिलषाव इत्यर्थः अन्यः केसरः दोहदं वृक्षादीनां प्रसवकारणं संस्कार-द्रव्यम् (तरुगुल्मलतादीनामकाले कुशलैः कृतम्। पुष्पा-द्युत्पादकं द्रव्यं दोहदं स्यात्तु तत्क्रियेति शब्दार्णवे।) तस्य छद्मना व्याजेन (कपटोऽस्त्री व्याजदम्भोपधयश्छद्म कैतवे इत्यमरः।) अस्याः तव सख्याः वदनमदिरां गण्डूषमद्यं काङ्क्षति मया सहेति अत्रापि सम्बन्धनीयम्। अशोकवकुलयोः स्त्रीपादताड़नगण्डूषमदिरे दोहदमिति प्रसिद्धिः। स्त्रीणां स्पर्शात् प्रियङ्गुर्विकसति वकुलः शीधुगण्डूषसेकात् पादाघातादशोकस्तिलककुरवकौ वीक्षणालिङ्गनाभ्याम्। मन्दारो नर्म्मवाक्यात् पटुमृदुहसना-च्चम्पको वक्त्रवाताच्चूतो गीतान्नमेरुर्विकसति च पुरो-नर्त्तनात् कर्णिकारः। १५।

সেই ক্রীড়াশৈলে কুরবকবৃক্ষবৃতি-(বেড়া)-বিশিষ্ট মাধবীলতামণ্ডপের সন্নিকটবর্ত্তী কম্পিতপল্লবযুক্ত রক্তাশোকবৃক্ষ ও কমনীয় বকুলবৃক্ষ (আছে); একটী (অর্থাৎ রক্তাশোক) দোহদচ্ছলে (পুষ্পোদ্গমের হেতুভূত সংস্কার দ্রব্যচ্ছলে) আমার সহিত, তোমার (মেঘের) সখীর (অর্থাৎ আমার পত্নীর) মনোরম অথবা বামচরণ অভিলাষ করে, অন্যটী (বকুল) দোহদচ্ছলে আমার সহিত তাঁহার (আমার পত্নীর) মুখমদ্য আকাঙ্ক্ষা করে। ১৫।

There (on the hill) are a red *Asoka* tree with shaking bunches of leaves and a graceful *Kesar* (*Bakul*) tree just in the neighbourhood of the grove of *Madhabi* creepers with an enclosure (or hedge) of *Kurabaka* trees; one (viz. the *Asoka*) has an yearning, like me, for the beautiful or the left

foot of thy friend (*i. e.* my wife) and the other (viz. the *Kesar*) with me longs for the wine of her mouth under the pretext of an active substance capable of generating flowers.—15.

Notes.

1. अत्र—there (on the artificial hill of pleasure.)

2. कुरवकवृतेः माधवीमण्डपस्य—कुरवकाः वृतिः यस्य स तस्य (बहुव्री) adjective to माधवीमण्डपस्य मण्डं पीयते अस्मिन् इति (मण्ड + पा + क अधिकरणे) मधौ भवा माधवी (मधु + अण् + ङीप्) तस्याः मण्डपः (षष्ठी तत्पु.) तस्य—the bower of *Madhabi* creepers hedged by the trees called *Kurabaka*.

3. प्रत्यासन्नौ—(प्रति + आ + सद् + क्त कर्त्तरि) just in the neighbour hood of. भरत, रामनाथ and others read प्रत्यासन्नः ।

4. चलकिशलयः रक्ताशोकः—चलति इति चलः (चल् + अच् पचादि) चलः किशलयः यस्य सः (बहुव्री) रक्तश्चासौ अशोकश्चेति (कर्मधा.)—the red *Asoka* (Jonesia Asoka) having its new sprouts shaking to and fro. Mallinath here points out that the *Asoka* by shaking its branches is as it were begging to have a kick from females. See also the propriety of the epithet रक्त in रक्ताशोक as quoted by Mallinath.

5. कान्तः केसरश्च—(कम् + क्त कर्म्मणि)—and the beautiful *Kesar* (Bakul) tree (Mimusops Elengi) भरत and others read केसरवृक्ष ।

6. एकः मया सह—one of the two (*i. e., Asoka*) with me.

7. तव सख्याः वामपादाभिलाषी—वामः वननीयः दक्षिणेतरः वा पादः वामपादः (कर्म्मधा.) तं वामपादम् अभिलषति यः सः इति(वामपाद + अभि + लष् + णिनि उपपद तत्पु.)—yearns for a kick from the beautiful or left foot of thy friend (*i. e.*, my wife) the epithet दोहदच्छद्मना is understood here, for explanation see below. See also Mallinathपादाघातादशोकःइत्यादि। Prof. Wilson remarks: "These allusions refer to some particular notions of the

तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
र्मूले बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः।
तालैः शिञ्जावलयसुभगैर्नर्त्तितः कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः॥१६॥

Hindoos respecting the *Kesar* and *Asoka* which plants are said to blossom upon being touched respectively by the face or foot of a female; the story is probably, originally poetical."

8. अन्यः दोहदच्छद्मना—अपरः केशरः इत्यर्थः। दोहदं पुष्पाद्युत्पादकं द्रव्यं तस्य दोहदस्य छद्म तेन (६ तत्पु.) The other under the plea of दोहद or active substances necessary for producing flowers &c. out of the proper season. मया सह is understood after अन्यः।

9. अस्याः वदनमदिरां काङ्क्षति—वदनस्य मदिरा तां (६ तत्पु.) asks for the mouthfuls of wine of her (my wife).

N. B. These fanciful ideas of the Sanskrit poets are comprised within the class called कविप्रौढोक्ति by the rhetoricians, the origin of which is very difficult to make out. A list of them is given in the साहित्यदर्पण beginning with मालिन्यं व्योम्नि पापेऽयशसि धवलता वर्ण्यते हासकीर्त्योः इत्यादि।

10. The अलङ्कार of the stanza is उपमा। अत्र अतिशयोक्तिमूलत्वाभावात् न सहोक्तिः अलङ्कारः। सहशब्दस्य समानार्थकत्वात् मया सह मया समः इत्यर्थकत्वात् आर्थी पूर्णोपमा इति सुधीभिर्विभाव्यम्।

11. Conjugations—

लप्—लपति लपते, ललाप, लेपे, अलापीत्, अलपीत्, अलपीष्ट।

काङ्क्ष्—काङ्क्षति, चकाङ्क्ष, अकाङ्क्षीत्।

Prose order—तन्मध्ये स्फटिकफलका अनतिप्रौढवंशप्रकाशैः मणिभिः

मूले बद्धा काञ्चनी वासयष्टिः अस्ति च, शिञ्जावलयसुभगैः तालैः मे कान्तया नर्त्तितः वः सुहृत् नीलकण्ठः दिवसविगमे याम् अध्यास्ते । १६ ।

Paraphrase—तयोः वृक्षयोः मध्यदेशे तरुणवेणुकान्तिभिः मरकतमणिभिः मूले रचितवेदिका स्फटिकमयपीठा सौवर्णी वासयष्टिः वर्त्तते क्वणतकङ्कणमनोज्ञैः करतलवादनैः मम कान्तया कारितलास्यलीलः युष्माकं बन्धुः शिखण्डी सायं यामधिष्ठाय निशां यापयति । १६ ।

Change of voice—* स्फटिकफलकया * बद्धया काञ्चन्या वासयष्ट्या भूयते * नर्त्तितेन वः सुहृदा नीलकण्ठेन * या अध्यास्यते । १६ ।

Sanjivani—तन्मध्ये इति । किञ्चेति चार्थः तन्मध्ये तयोर्द्वयोर्मध्ये अनति प्रौढ़ानाम् अनतिकठोराणां वंशानां प्रकाश इव प्रकाशो येषां तैः तरुणवेणुसच्छायैः मणिभिः मरकतशिलाभिः मूले बद्धा कृतवेदिकेत्यर्थः स्फटिकं स्फटिकमयं फलकं पीठं यस्याः सा काञ्चनस्य विकारः काञ्चनी सौवर्णी वासयष्टिः निवासदण्डः अस्तीति शेषः शिञ्जा भूषणध्वनिः (भूषणानान्तु शिञ्जितमित्यमरः। भिदादित्वादङ् । शिञ्जिधातुरयं तालव्यादिः नतु दन्त्यादिः ।) शिञ्जाप्रधानानि वलयानि तैः सुभगाः रम्याः तैः तालैः करतलवादनैः मे मम कान्तया नर्त्तितः वो युष्माकं सुहृत् सखा नीलकण्ठः मयूरः (मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुगित्यमरः।) दिवस-विगमे सायंकाले यां यष्टिकाम् अध्यास्ते यस्याम् आस्ते इत्यर्थः (अधिशीङ्स्थासां कर्मेति कर्मत्वात् द्वितीया।) तत्रागारमित्यारभ्य पञ्चसु श्लोकेषु समृद्धवस्तुवर्णनादुदात्ता-लङ्कारः तदुक्तं तदुदात्तं भवेद्यत्र समृद्धं वस्तु वर्ण्यते इति ।

नचैषा स्वभावोक्तिर्भाविकं वा तत्र यथास्थितवस्तुवर्णनात् अत्र तु कविप्रतिभोत्थापितसम्भाव्यमानैश्वर्य्यशालिवस्तुवर्णनादारोपितविषयत्वमिति ताभ्यामस्य भेद इत्यलङ्कारसर्व्वस्वकारः । १६ ।

আরও সেই বৃক্ষদ্বয়মধ্যে অনতিকঠোরবংশের ন্যায় হরিদ্বর্ণ মণিদ্বারা মূলদেশে সম্বদ্ধ (অর্থাৎ তদ্দ্বারা তলদেশে বেদিকা নির্ম্মিত) স্ফটিকফলকযুক্ত স্বর্ণময় নিবাসদণ্ড আছে, বলয়শিঞ্জনহেতু মনোরম করতালের দ্বারা আমার কান্তা কর্ত্তৃক নর্ত্তিত তোমাদের (মেঘদের) বন্ধু ময়ূর সন্ধ্যাকালে যাহাতে অবস্থান করে। ১৬।

Also between them (the two trees) there is a roosting perch made of gold having (in the midst) a crystal tablet and having the base built of green gems as glossy as the colour of a not very ripe (young) bamboo, upon which, in the evening, takes its seat thy friend the blue-necked (a peacock) (first) being caused to dance by my wife with the clapping sounds of hands—sounds sweet on account of the tinklings of the bangles.—16.

Notes.

1. तन्मध्ये च—तयोः मध्यं तस्मिन् (६ तत्पु.)—moreover between them (the trees).

2. अनतिप्रौढ़वंशप्रकाशैः मणिभिः मूले वद्धा—अतिशयितः प्रौढ़ः (प्र + वह + क्त कर्म्मणि) अतिप्रौढ़ः (प्रादिसमासः) स न भवति इति अनतिप्रौढ़ः (नञ् तत्पु.) अनतिप्रौढ़ः वंशः (कर्म्मधा.) अनतिप्रौढ़वंशः तस्य अनतिप्रौढ़वंशस्य प्रकाशः इव प्रकाशः येषां ते तैः (सप्तम्युपमानेत्यादिना उपमानोत्तरपदलोपी बहुव्री)—built at the base by jewels resembling the colour of young bamboo (that is to say emeralds).

3. स्फाटिकफलका—स्फटिकात् स्फाटिकमयं फलकं यस्याः सा (बहुव्री) adjective to वासयष्टिः। Cf. उत्कीर्णा इव वासयष्टिषु इत्यादि विक्रमोर्व्वशी.

4. काञ्चनी वासयष्टिः—काञ्चनस्य विकारः काञ्चनी (काञ्चन + अण् + ङीप्) वासस्य यष्टिः (६ तत्पु.)—roosting perch made of gold.

5. शिञ्जावलयसुभगैः तालैः—शिञ्जा (शिञ्ज् + अङ् भिदादित्वात् + आप्) (jingling sound) प्रधानानि वलयानि (शाकपार्थिवादिवत् मध्यपदलोपी समासः) तैः शिञ्जावलयैः सुभगाः मनोहराः तैः (३या तत्पु.) तालैः करतालवाद्यैः (करणे तृतीया)— by means of clappings of hands pleasing to the ear on account of the jingling sound of the bangles. भरत, सनातन, हरगोविन्द, कल्याणमल्ल and others read शिञ्जद्वलयसुभगैः = क्वणत्कङ्कणमनोहरैः; this is preferable.

6. मे कान्तया नर्तितः—(नृत् + णिच् + क्त कर्मणि)—caused to dance by my wife.

7. वः सुहृत् नीलकण्ठः—सुहृत् सु शोभनं हृदयं यस्य सः (बहुव्री) "सुहृद्दुर्हृदौ मित्रामित्रयोः" इति हृदयशब्दस्य हृदादेशः, नीलः नीलवर्णः कण्ठः यस्य सः (बहुव्री) मयूरः (literally one having a blue neck)—thy friend the blue-necked one (a peacock).

8. दिवसविगमे याम् अध्यास्ते—दिवसस्य विगमः (वि + गम + अप् भावे) (६ तत्पु.) तस्मिन्, वासयष्टिम् वासस्य यष्टिः (अश्वघासादिवत् तादर्थ्ये ६ समासः) ताम् अध्यास्ते वसति "अधिशीङ्स्थासां कर्म" इति सूत्रेण याम् इत्यत्र आधारस्य कर्मत्वम् । (*i. e.*, the locative case becomes the accusative case of the verb from the roots शी, स्था, आस् when prefixed by the particle अधि)—where takes his seat at the close of the day time.

9. The अलङ्कार is उदात्त ।

10. Conjugations—

आस्—आस्ते, आसाञ्चक्रे, आसिष्ट ।

नृत्—नृत्यति, ननर्त, अनर्तीत् ।

एभिः साधो हृदयनिहितैर्लक्षणैर्लक्षयेथाः
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा ।
क्षामच्छायं भवनमधुना मद्वियोगेन नूनं
सूर्य्यापायेन खलु कमलं पुष्यति स्वामभिख्याम्।१७।

Prose order—हे साधो! हृदयनिहितैः एभिः लक्षणैः द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ दृष्ट्वा च अधुना मद्वियोगेन नूनं क्षामच्छायं भवनं लक्षयेथाः तथाहि सूर्य्यापाये कमलं स्वाम् अभिख्यां न खलु पुष्यति । १७ ।

Paraphrase—हे निपुण, (हे मेधावन्) मेधावत्तया अविस्मृतैः एभिः पूर्व्वनिर्द्दिष्टैः तोरणादिभिः अभिज्ञानैः प्रियया द्वारोपान्ते लिखितयोः शङ्खपद्मयोः दर्शनरूपाभिज्ञानान्तरेण च मम प्रवासात् निरुत्सवतया हतश्रीकं गृहं निश्चिनुयाः तथाहि सूर्य्यविरहे पद्मम् आत्मीयां शोभां न खलु उपचिनोति । १७ ।

Change of voice—* * लक्ष्येत * * :कमलेन स्वा अभिख्या न पुष्यते । १७ ।

Sanjivani—एभिरिति । हे साधो निपुण (साधुः समर्थो निपुणो वेति काशिकायाम् ।) हृदयनिहितैः अविस्मृतैरित्यर्थः एभिः पूर्व्वोक्तैर्लक्षणैः तोरणादिभिरभिज्ञानैः द्वारोपान्ते एकवचनमविवक्षितं द्वारपार्श्वयोरित्यर्थः लिखिते वपुषी आकृती ययोः तौ तथोक्तौ शङ्खपद्मौ नाम निधिविशेषौ (निधिर्ना शेवधिर्भेदाः पद्मशङ्खादयो निधेरित्यमरः ।) दृष्ट्वा च नूनं सत्यं अधुना इदानीम् (अधुनेति निपातः ।) मद्वियोगेन मम प्रवासेन क्षामच्छायम् उत्सवोपरमात् क्षीणकान्ति भवनं मद्गृहं लक्षयेथाः निश्चिनुयाः तथाहि सूर्य्यापाये सति कमलं पद्मं स्वाम् आत्मी-

याम् अभिख्यां शोभाम् (अभिख्या नामशोभयोरित्यमरः ।) न पुष्यति न उपचिनोति खलु सूर्य्यविरहितं पद्मामिव पतिविरहितं गृहं न शोभते इत्यर्थः । १७ ।

হে নিপুণ (মেঘ) ! হৃদয়াস্থিত (অবিস্মৃত) পূর্ব্বোক্ত (তোরণাদি) চিহ্নদ্বারা আরও দ্বারপার্শ্বে শঙ্খ ও পদ্ম (নিধিদ্বয়) এই দুইটীর আকৃতি লিখিত দেখিয়া, এক্ষণে আমার অনুপস্থিতিতে নিশ্চয়ই দীপ্তিশূন্য (আমার) ভবন লক্ষ্য করিবে, যেহেতু সূর্য্য অপগত হইলে কমল আপনার শোভা ধারণ করে না। ১৭।

Oh skilful one (cloud) ! thou shalt point out my home, at present indeed bereft of glory owing to my absence (as) a lotus does not bear its grace on the setting of the sun, by these signs collected in thy mind (*i. e.*, not forgotten) and by looking at (the picture of) *Sankha* and *Padma* (inexhaustible treasures of *Kubera*) painted on the two sides of the gate.—17.

Notes.

1. (हे) साधो—Oh skilful cloud, skilful because the possibility of the mission rests on the cleverness of the messenger cloud, hence the address.

2. हृदयनिहितैः एभिः लक्षणैः—हृदये निहितानि (नि + धा or नि + क्त कर्म्मणि) रचितानि (७मी तत्पु.) तैः adjective to लक्षणैः करणे तृतीया—by means of the foregoing marks retained in the mind.

3. द्वारोपान्ते—द्वारस्य उपान्तः (६ तत्पु.) तत्र here Mallinath remarks that the singular in उपान्त is meant for the dual by the poet ;—by the sides of the gate.

4. लिखितवपुषौ—लिखिते चित्रिते वपुषी आकृती ययोः तौ (बहुव्रीहि) adjective to शङ्खपद्मौ—the figures of which have been written,

5. शङ्खपद्मौ दृष्ट्वा च—शङ्खश्च पद्मश्च तौ (इतरेतर द्वन्द्व) कुवेरस्य निधिविशेषौ । These are two of the nine निधि's of कुवेर । चोरस्वामी in the अमरकोष enumerates thus :—महापद्मश्च पद्मश्च शङ्खोमकरकच्छपौ । मुकुन्दकुन्दनीलाश्च खर्व्वश्च निधयो नव ॥ Also रामाश्रम on अमरकोष—पद्मोऽस्त्रियां महापद्मः शङ्खोमकरकच्छपौ मुकुन्दनन्दनीलाश्च खर्व्वश्च निधयो नव ॥ Now these निधि's or auriferous gems may be taken to be things such as पद्म=lotus ; and (some of them, to be large numbers as पद्म is equivalent to 10,000 millions. Prof. Wilson concludes by saying—"agreeably to the system of the तान्त्रिक's the निधि's are personified and upon certain occasions as the worship of लक्ष्मी the goddess of prosperity &c., come in for a share of religious veneration. They have also their मन्त्र's or mystical verses." The सारोद्धारिणी explains :—तौ हि अधाभागे पुरुषरूपौ गृहद्वारशाखासु मङ्गलार्थम् आलिख्यते—also having seen the शङ्ख and the पद्म ।

6. नूनम् अधुना मद्वियोगेन चामच्छायं—मम वियोगः तेन (६ तत्पु.) चामा(चै + क्त कर्त्तरि + आप्)छाया यस्य तत्(बहुव्री) तत् चीणदीप्ति adjective to भवनं—surely at present without brightness on account of my absence.

7. भवनं लक्षयेथाः—(चुरादि लक्ष् + ईयास् विधिलिङ्)—recognise the house (by aforesaid marks).

8. (तथाहि) सूर्य्यापाये (सति)—सूर्य्यस्य अपायः (अप + इ or अय् + घञ् भावे) तस्मिन् भावे ७मी विभक्तिः—on the loss (setting) of the sun.

9. कमलं स्वाम् अभिख्यां—the lotus its own beauty.

10. न पुष्यति—न धारयति (पुष्यति=दिवादि पुष् उपचये + ति लट्) ।

गत्वा सद्यः कलभतनुतां शीघ्रसम्पातहेतोः
क्रीड़ाशैले प्रथमकथिते रम्यसानौ निषण्णः।
अर्हस्यन्तर्भवनपतितां कर्त्तुमल्पाल्पभासं
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम्।१८।

11. The अलङ्कार of the stanza is दृष्टान्त तथाच सूर्य्यविरहे पद्मिनिव पतिविरहे भवनं नष्टशोभम् इति विम्बप्रतिविम्बभावेन सादृश्याक्षेपात् दृष्टान्तालंकारः "दृष्टान्तस्तु सधर्म्मस्य वस्तुनः प्रतिविम्बनम्" इति लक्षणात्।

12. Conjugations—

पुष्—पुष्यति, पुपोष, अपुषत्।

चै—चायति, चचौ, अचासीत्।

Prose order—शीघ्रसम्पातहेतोः सद्यः कलभतनुतां गत्वा प्रथमकथिते रम्यसानौ क्रीड़ाशैले निषण्णः सन् अल्पाल्पभासं खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् अन्तर्भवनपतितां कर्त्तुम् अर्हसि। १८।

Paraphrase—हे मेघ! शीघ्रप्रवेशार्थं सपदि कामरूपत्वात् तनुतनुतां प्राप्य पूर्व्वोद्दिष्टे निषदनार्हे क्रीड़ापर्व्वते समुपविष्टः सन् अल्पाल्पप्रकाशां खद्योतालीस्फुरितसमानां विद्युत्प्रकाशरूपां दृष्टिम् अन्तर्भवन प्रविष्टां कुरुष्व।१८।

Change of voice—* * निषण्णेन सता * अर्ह्यते। १८।

Sanjivani—निजगृहनिश्चयानन्तरकृत्यमाह गत्वेति। हे मेघ शीघ्रसम्पात एव हेतुः तस्य शीघ्रप्रवेशार्थमित्यर्थः (षष्ठी हेतुप्रयोगे इति षष्ठी। सम्पातः पतने वेगे प्रवेशे वेदसंविदे इति शब्दार्णवे।) सद्यः सपदि कलभस्य करिपोतस्य तनुरिव तनुर्यस्य तस्य भावः ताम् अल्पशरीरतां गत्वा प्राप्य प्रथमकथिते तस्यास्तीरे इत्यादिना पूर्व्वो-

द्दिष्टे रम्यसानौ निषदनयोग्ये इत्यर्थः क्रीड़ाशैले निषसः उपविष्टः सन् अल्पाल्पां अल्पप्रकारा भाः प्रकाशो यस्याः ताम् (प्रकारे गुणवचनस्येति द्विरुक्तिः)। खद्योतानाम् आली तस्या विलसितेन स्फुरितेन निभां समानां विद्युदुन्मेषः विद्युत्प्रकाशः स एव दृष्टिः ताम् भवनस्यान्तः अन्तर्भवनं तत्र पतितां प्रविष्टां कर्त्तुम् अर्हसि यथा कश्चित् किञ्चिदन्विष्यन् क्वचिदुन्नते स्थित्वा शनैः शनैरतितरां द्राघीयसीं दृष्टिमिष्टदेशे पातयति तद्वदित्यर्थः । १८ ।

(হে মেঘ) শীঘ্র প্রবেশের জন্য ঝটিতি করিশাবকের (অর্থাৎ ক্ষুদ্র) আকার ধারণ করিয়া প্রথমোক্ত সুরম্যসানুদেশযুক্ত ক্রীড়াপর্ব্বতে উপবিষ্ট হইয়া ঈষদ্দীপ্তিযুক্ত খদ্যোত-(জোনাকী)-শ্রেণীর আলোকেরসমান বিদ্যুৎপ্রকাশরূপ দৃষ্টি ভবনমধ্যে প্রক্ষিপ্ত করিবে।১৮।

(Oh cloud) having assumed at once the (small) size of a young elephant, in order to enter quickly, and having taken thy seat on the afore-mentioned (artificial) hill of pleasure with beautiful sides, it behoves thee to bend inside (my house) thy sight in the shape of flashing of lightening glittering faintly, and (thereby) resembling the light of a swarm of fire-flies or glow-worms.—18.

Notes.

1. शीघ्रसम्पात हेतोः—(सम् + पत + घञ् भावे) = सम्पातः, शीघ्रं यथा तथा सम्पातः (सहसुपा इति समासः) तस्य शीघ्रसम्पातस्य हेतुः तस्य (षष्ठी हेतुप्रयोगे इति षष्ठी when the word हेतु is used neither the 3rd nor the 5th विभक्ति is to be used but the 6th विभक्ति)—on account of entering quickly. भरत, रामनाथ, हरगोविन्द read तत्पार्श्वपातहेतोः तस्याः यक्षपत्न्याः रक्षाकारणात् इत्यर्थः ।

2. सद्यः कलभतनुतां गत्वा—समाने अहनि इति सद्यस् निपातनात् साधु । कलभस्य करिशावकस्य तनुरिव तनुः यस्य सः (सप्तम्युपमानेत्यादिना उपमानोत्तरपदलोपी बहुव्री)—having assumed a body as small as a young elephant.

3. प्रथमकथिते रम्यसानौ क्रीड़ाशैले निषण्णः—प्रथमं यथा तथा कथिते (कथि + क्त कर्म्मणि) said before, रम्यसानौ रम्यः सानुः यस्य सः (बहुव्री.) तस्मिन् क्रीड़ायाः शैलः (तादर्थ्ये ६ष्ठी समासः) तस्मिन् निषण्णः (नि + सद् + क्त कर्त्तरि) उपविष्टः सन्—having taken thy seat on the hill of sport having beautiful side-lands, said (by me) before.

4. अल्पाल्पभासं—अल्पा अल्पा "प्रकारे गुणवचनस्य" इति द्वित्वं विशेषण द्वयेनापि कर्म्मधारयः इष्यते इति कर्म्मधा. अल्पाल्पा भाः दीप्तिः यस्याः सा ताम adjective to विद्युदुन्मेषदृष्टिम् । having very slight light.

5. खद्योतालीविलसितनिभां—खद्योतानां ज्योतिरिङ्गणानाम् आली श्रेणी (६ तत् पु.) तस्याः विलसितं (वि + लस् + क्त भावे) स्फुरणं (६तत्पु.) तेन निभा तुल्या (३या तत् पु.) तां—like the (faint) blaze of the swarm of glow-worm.

6. विद्युदुन्मेषदृष्टिं—विद्युताम् उन्मेषः प्रकाशः (उत् + मिष् + अच् भावे) विद्युदुन्मेषः एव दृष्टिः (दृश् + क्तिन् भावे) (रूपक कर्म्मधा.) तां—glance in the form of flashes of lightening.

7. अन्तर्भवनपतितां कर्त्तुम् अर्हसि—भवनस्य अन्तः अन्तर्भवनम् अन्तर्भवने वा ("अव्ययं विभक्ति" इत्यादिना अव्ययीभावः) अन्तर्भवने पतिता (पत् + क्त) तां (७मी तत्पु.); पतितामित्यत्र अन्तर्भावितण्यर्थत्वात् पातिताम् इत्यर्थः, कर्त्तुम् इत्यत्र शक्यार्थे अर्हधातोः योगेन तुमुन्—it behoves thee to cast glances within the inside of the house.

8. The अलङ्कार is this :—अत्र रूपकोपमयोः संसृष्टिः । किञ्चान्यतःसिद्धेन वस्तुना यथा कश्चित् किञ्चिदन्विष्यन् क्वचित् उन्नते स्थाने स्थितः

तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः ।१९।

शनैः शनैः अतितरां द्राघीयसीं दृष्टिम् इष्टदेशे पातयति इत्येवं स्वतःसिद्धं वस्तु ध्वन्यते इति वस्तुना वस्तुध्वनिः ।

९. Conjugations—

अर्ह—अर्हति, आनर्ह, आर्हीत् ।

मिष—मिषति, मिमेष, अमेषीत् ।

सद—सीदति, ससाद, असदत् ।

Prose order—तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी श्रोणीभारात् अलसगमना स्तनाभ्यां स्तोकनम्रा मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः युवतिविषये धातुः आद्या सृष्टिरिव स्थिता या तत्र स्यात् तान् इत्यन्वयः । १९ ।

Paraphrase—कृशाङ्गी युवतिः शिखरिदशना परिणतबिम्बवत् अरुणाधरोष्ठी चकितमृगसदृशाभे प्रान्तरक्ते नेत्रे धारयन्ती गभीरनाभिः गुरुनितम्बतया मन्थरगतिः कुचभरनमिताङ्गी युवतीः अधिकृत्य ब्रह्मणः प्रथमशिल्पमिव स्थिता तदेवंभूता या स्त्री तत्र अन्तर्भवनं वसेत् । १९ ।

Change of voice—तन्व्या श्यामया शिखरिदशनया पक्वबिम्बाधरोष्ठ्या मध्ये क्षामया चकितहरिणीप्रेक्षणया निम्ननाभ्या श्रोणीभारात् अलसगमनया स्तनाभ्यां स्तोकनम्रया युवतिविषये धातुः आद्यया सृष्ट्या इव स्थितया यया तत्र भूयेत । १९ ।

Sanjivani—सम्प्रति दृष्टिपातं कृतवतोऽस्याभिज्ञानं श्लोकद्वयेनाह तन्वीति । तन्वी कृशाङ्गी न तु पीवरी

(स्तनुं दभ्रं कृशं तनु इत्यमरः वोतो गुणवचनादिति ङीष्।) श्यामा युवतिः (श्यामा यौवनमध्यस्था इत्युत्पलमालायाम्।) शिखराणि एषां सन्तीति शिखरिणः कोटिमन्तः (शिखरं शैलवृक्षाग्रकक्षापुलककोटिष्विति विश्वः।) शिखरिणः दशनाः दन्ताः यस्याः सा एतेनास्या भाग्यवत्त्वं पत्यायुष्करत्वञ्च सूच्यते (तदुक्तं सामुद्रिके स्निग्धाः समानरूपाः सुपंक्तयः शिखरिणः श्लिष्टाः। दन्ता भवन्ति यासां तासां पादे जगत् सर्व्वम्। ताम्बूलरसरक्तोऽपि स्फुटभासः समोदयाः। यस्याः शिखरिणो दन्ता दीर्घं जीवति तत्पतिरिति।) पक्वं परिणतं विम्बं विम्बिकाफलमिव अधरोष्ठो यस्याः सा पक्वविम्बाधरोष्ठी (शाकपार्थिवादित्वान्मध्यपदलोपी समास इति वामनः। नासिकोदरोष्ठेत्यादिना ङीष्।) मध्ये क्षामा कृशोदरीत्यर्थः चकितहरिण्याः प्रेक्षणानीव प्रेक्षणानि दृष्टयो यस्याः सा तथोक्ता एतेनास्याः पद्मिनीत्वं व्यज्यते (तदुक्तं रतिरहस्ये पद्मिनीलक्षणप्रस्तावे चकितमृगदृशाभे प्रान्तरक्ते च नेत्रे इति।) निम्ननाभिः गम्भीरनाभिः अनेन नारीणां नाभिगाम्भीर्य्यामदनातिरेक इति कामसूत्रार्थः सूच्यते श्रोणीभारात् अलसगमना मन्दगामिनी नतु जघनदोषात् स्तनाभ्यां स्तोकनम्रा ईषदवनता नतु वपुर्दोषात् युवतय एव विषयः तस्मिन् युवतिविषये युवतीरधिकृत्येत्यर्थः धातुः ब्रह्मणः आद्या सृष्टिः प्रथमशिल्पमिवास्थितेत्युत्प्रेक्षा प्रथमनिर्म्मिता युवतिरियमेवेत्यर्थः प्रायेण शिल्पिनां प्रथमनिर्म्माणे प्रयत्नाः

तिशयवशात् शिल्पनिर्म्माणसौष्ठवं दृश्यते इत्याद्यविशेषणं तथाच अस्मिन् प्रपञ्चे न कुत्राप्येवंविधरामणीयकं रमणी-रत्नमस्तीति भावः तदेवम्भूता या स्त्री तत्रान्तर्भवने स्यात् तत्र निरसेदित्यर्थः तामित्युत्तरश्लोकेन सम्बन्धः। १९।

কৃশাঙ্গী, যৌবনমধ্যস্থা সূক্ষ্মাগ্রদন্তশালিনী পক্কবিম্বফলতুল্য অধরোষ্ঠসমন্বিতা ক্ষীণমধ্যা ভয়চকিতহরিণীনেত্রসদৃশ নেত্রযুক্তা গম্ভীর নাভিশালিনী নিতম্বদেশের গুরুত্বহেতু মন্দগামিনী বক্ষোজদ্বয়হেতু ঈষদবনতা (অর্থাৎ যেন) যুবতিসৃজনবিষয়ে ব্রহ্মার আদ্যা সৃষ্টি স্বরূপা (যেহেতু শিল্পিগণের প্রথম প্রস্তুতদ্রব্য অতি যত্নের সহিত নির্ম্মিত হয়) যিনি সে স্থানে আছেন (তাঁহাকে ইত্যাদি পরশ্লোকে দ্রষ্টব্য) ।১৯।

Thin, full-bloomed in youth, having sharp pointed teeth, possessed of lips resembling ripe *Bimba* fruits, slender at the waist, having eyes resembling those of a frightened antelope, possessed of a deep navel, accustomed to walk slowly owing to the weight of the buttocks, very slightly bending under the (weight of) the breasts, a lady who is there, is, as it were, the first manufacture of the creator in the department of females (know her &c. in the next stanza).

Notes.

N. B. Now our poet's description of the wife of यक्ष which is considered one of the most excellent instances of the flight of poetic fancy in the literature of the world. Prof. Wilson observes :—"we now enter upon perhaps the most pleasing part of this elegant little poem, the description of the Yaksha's wife. I may perhaps come under the denomination of those who according to the illiberal and arrogant criticism

of such a writer as Mr. Pinkerton prove. "That the climate of India while it inflames the imagination, impairs the judgment," when standing in very little awe of such a poetical censor, I advance an opinion that we have few specimens either in classical or modern poetry of more genuine tenderness or delicate feeling."

1. तन्वी—the feminine of तनुः the masculine, there is the optional feminine तनुः also by the सूत्र वोतोगुणवचनात्—of a slender body.

2. श्यामा—यौवनमध्यस्था in उत्पलमाला। महिम cites a definition as अप्रसूता भवेच्छ्यामा तन्वी च नवयौवना। There is another definition शीतेसुखोष्णसर्व्वाङ्गी ग्रीष्मे च सुखशीतला तप्तकाञ्चनवर्णाभा सा श्यामा परिकीर्त्तिता—a youthful lady.

3. शिखरिदशना—शिखराणि सन्ति इति (शिखर + इनि) शिखरिणः तीक्ष्णाः दशनाः यस्याः सा (बहुव्री)—having pointed (pearl-like) teeth. सारोद्धारिणी reads शिखरदशना शिखरं पक्वदाड़िमबीजाकारं माणिक्यं तद्वत् उज्ज्वलतया दशनाः यस्याः सा इति अधरोष्ठरागित्वम्। Mallinath quotes from सामुद्रिक that such ladies are fit to be queens.

4. पक्वविम्बाधरोष्ठी—पक्वं विम्बं पक्वविम्बं (कर्म्मधा.) अधरः ओष्ठः अधरोष्ठः (कर्म्मधा.) पक्वविम्बम् इव अधरोष्ठः यस्याः सा पक्वविम्बाधरोष्ठी (शाकपार्थिवादित्वात् मध्यपदलोपी बहुव्रीहि समासः) ओष्ठी and not ओष्ठा by the सूत्र "नासिकोदरोष्ठेत्यादिना ङीष्"—possessed of lower lip resembling a विम्ब fruit (Brionya Grandis).

5. मध्ये क्षामा—slender at the waist or zone.

6. चकितहरिणीप्रेक्षणा—चकिता भीता हरिणी (कर्म्मधा.) तस्याः चकितहरिण्याः प्रेक्षणानि इव प्रेक्षणानि (प्र + ईक्ष् + अनट् भावे) यस्याः

सा (सप्तम्युपमानेत्यादिना उत्तरपदलोपो बहुव्रीहिः)—having eyes like those of a frightened doe. Mark the beauty of the epithet, the eyes of the antelope naturally agile are the more so owing to fear and hence the extreme height of beauty. Mallinath quotes from रतिरहस्य a passage purporting that ladies having such eyes are classed as पद्मिनी ।

7. निम्ननाभिः—निम्ना नाभिः यस्याः सा (बहुव्री)—having a deep navel, for the propriety see Mallinath.

8. श्रोणीभारात् अलसगमना—श्रोण्याः नितम्बस्य भारः (६ष्ठी तत्पु.) तस्मात् हेतौ पञ्चमी विभक्तिः on account of the weight of the hips. अलसगमना अलसं गमनं (गम् + अनट् भावे) गतिः यस्याः सा (बहुव्री) —moving slowly.

9. स्तोकनम्रा स्तनाभ्यां—स्तोकं ईषत् यथा तथा नम्रा (सुप्सुपेति समासः) स्तनाभ्याम् इत्यत्र करणे ३या—bending slightly on account of the weight of two breasts. Cf. आवर्जिता किञ्चिदिव स्तनाभ्यां । कुमार ७ । ५३ ।

10. युवतिविषये धातुः आद्या सृष्टिः इव—युवतयः एव विषयः (वि + सि + अच्) (रूपक कर्मधारयः) तस्मिन्—as regards the department of youthful ladies. धातुः (धा + तृन्) आद्या आदौ भवा (आदि + यत् + आप्) सृष्टिः इव—the first creation of the creator, because an artist bestows the greatest amount of labor on the first work.

11. या तत्र स्यात्—whoever lady there may be (her &c. in the next sloka.)

12. The अलङ्कार is उत्प्रेक्षा तथाच अस्मिन् प्रपञ्चे न कुत्रापि एवं विधं रमणीयत्वं दृश्यते इति वस्तु व्यज्यते इत्यलंकारेण वस्तुध्वनिः ।

13. Conjugations—

तां जानीथाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।
गाढ़ोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनींवान्यरूपाम् २०।

धा—दधाति धत्ते, दधौ दधे, अदधत् अधत्त ।

अस्—अस्ति, बभूव, अभूत् ।

Prose order—सहचरे मयि दूरीभूते सहचरे चक्रवाके दूरीभूते सति चक्रवाकीमिव एकां स्थितां तां परिमितकथां मे द्वितीयं जीवितं जानीथाः। गाढ़ोत्कण्ठां बालां गुरुषु एषु दिवसेषु गच्छत्सु शिशिरमथितां पद्मिनीं वा अन्यरूपां जातां मन्ये । २० ।

Paraphrase—चक्रवाके इव सहचारिणि मयि दूरस्थिते वियोगासहिष्णुं चक्रवाकवधूमिव दुर्मनायमानाम् एकाकिनीं स्थितां तां मितभाषिणीं मम जीविततुल्याम् अवगच्छेः। प्रबलविरहवेदनां बालाम् विरहमहत्सु एषु दिवसेषु गच्छत्सु हिमहतां नलिनीमिव अन्यादृशीं जातां तर्कयामि । अतस्त्वया नेयं सेति भ्रमितव्यम् । २० ।

Change of voice—* चक्रवाकीव एका स्थिता सा परिमितकथा मे द्वितीयं जीवितं ज्ञायताम् । गाढ़ोत्कण्ठा बाला शिशिरमथिता पद्मिनीव अन्यरूपा जाता मन्यते । २० ।

Sanjivani—तामिति । सहचरे सहचारिणि अनेन वियोगासहिष्णुत्वं व्यज्यते मयि दूरीभूते दूरस्थिते सति सहचरे चक्रवाके दूरीभूते सति चक्रवाकीं चक्रवाकवधूमिव (जातेरस्त्रीविषयादयोपधादिति ङीष् ।) परिमितकथां मितभाषिणीं एकाम् एकाकिनीं स्थितां ताम् अन्तर्भवनगताम् मे द्वितीयं जीवितं जानीयाः जीविततुल्यां मत्

प्रेयसीमवगच्छेरित्यर्थः तन्वीत्यादिपूर्व्वलक्षणैरिति शेषः । लक्षणानामन्यथाभावभ्रममाशङ्क्याह गाढ़ोत्कण्ठामिति गाढ़ोत्कण्ठां प्रबलविरहवेदनाम् (रागी त्वलब्धविषये वेदना महती तु या । संशोषणी तु गात्राणां तामुत्कण्ठां विदुर्बुधा इत्यभिधानात् ।) बालां गुरुषु विरहमहत्सु एषु वर्त्तमानेषु दिवसेषु गच्छत्सु सत्सु शिशिरेण शिशिरकालेन मथितां पद्मिनीं वा पद्मिनीमिव (इववद्वायथाशब्दाविति दण्डो ।) अन्यरूपां पूर्व्वविपरीताकारां जातां मन्ये हिमहतपद्मिनीव विरहेण अन्यादृशी जातेति तर्कयामीत्यर्थः एतावता नेयमन्येति भ्रमितव्यमिति भावः ।२०।

সহচরচক্রবাকবিযুক্তা চক্রবাকীর ন্যায় সহচর আমি সুদূরাবস্থিত হইলে একাকিনী স্বল্পভাষিণী (ভবনান্তঃস্থিতা) তাঁহাকে (পূর্ব্বোক্ত তন্বী ইত্যাদি লক্ষণদ্বারা) আমার দ্বিতীয় জীবন স্বরূপা বলিয়া জানিবে, হয়ত বা এই সকল বিরহক্লেশদীর্ঘ দিবসে গাঢ়বিরহোৎকণ্ঠিতা বালা শিশিরপাত মর্দ্দিতা পদ্মিনীর ন্যায় অন্যরূপা (বিপরীতাকারা) হইয়াছেন, মনে হয় । ২০ ।

(Oh cloud !), thou shouldst cognise, the lady, (in the house)—given to taciturnity, and solitary, like a *Chakrabaki* (separated from the *Chakrabak* , on account of my absence, her (constant) companion—as my second soul; I think that the youthful lady passionately anxious (for me) is changed in (her) appearance just as a lotus plant is withered up by the winter season in the course of these tedious (because full of care) days that happen to pass on.—20.

Notes.

1. सहचरे मयि दूरीभूते (सति)—चरति इति चरः (चर+अच्

पचादि) सहचरः (सुप्सुपेति समासः) तस्मिन् मयि भावे सप्तमीविभक्तिः अदूरः दूरः सम्पद्यमानः जातः दूरीभूतः (दूर+च्वि अभूततद्भावे+भू+क्त कर्मणि गतिसमासः) adjective to मयि—after I have been placed at a distance I who am her constant companion. Mallinath remarks that by the epithet सहचर the reluctancy of separation is indicated.

2. (सहचरे चक्रवाके दूरीभूते सति) चक्रवाकीमिव—lika a *Chakrabaki* when the *Chakrabaka* is separated from her. The *Chakrabaka* is the ruddy goose (Anas casarca) more commonly known in India by the appellation Brahmany goose. These birds are always observed to fly in pairs during the day but are supposed to remain separate during the night. This bird is famed to be the very type of constancy and connubial affection by the Sanskrit poets. They are doomed for ever to nocturnal separation for having offended a मुनि।

3. परिमितकथाम् एकाम्—(परि + मा + क्त कर्मणि) परिमिता कथा यस्याः सा (बहुव्री) तां not garrulous or talkative, taciturn. एकाम्—alone, solitary.

4. तां—that lady (within the house).

5. मे द्वितीयं जीवितं जानीथाः—know (her) as my second life. "These expressions are not more uncommon" observes Prof. Wilson "in Sanskrit than in western poetry." भरत सनातन, रामनाथ, हरगोविन्द, कल्याणमल्ल read जानीयाः instead of जानीथाः।

N. B. Now the यक्ष thinking his wife no longer the same in appearance warns the cloud, that perhaps my description will not be realized by thee.

नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियायाः
निश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम् ।
हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वा-
दिन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्त्ति ॥२१।

6. गाढोत्कण्ठां बालां—गाढा उत्कण्ठा यस्याः सा (बहुव्रो) तां बालां—the youthful lady possessed of ardent anxious longing (for me) for the definition of उत्कण्ठा see Mallinath.

7. गुरुषु एषु दिवसेषु गच्छत्सु—दिवसेषु भावे ७म्री "यस्य च भावेन भावलक्षणं"—these days, that are passing at present, heavy (i. e.. tedious and unbearable) on account of the separation.

8. शिशिरमथितां पद्मिनीं वा—शिशिरेण हिमकालेन मथितां (मथ् + क्त कर्म्मणि) (३या तत्पु.) पद्मिनीं वा कमलिनीमिव—like a lotus plant blighted by the winter season. Here the indeclinable वा stands for इव। The सारोद्धारिणी वल्लभ, नहिम and others reads तुहिनमथितां instead of शिशिरमथितां ।

9. अन्यरूपां जातां मन्ये—अन्यत् रूपं यस्याः सा (बहुव्रो) तां जातां (जन + क्त कर्त्तरि) मन्ये चिन्तयामि (मन + ए लट्)—it appears to my mind that she has been changed in appearance owing to my separation.

10. The अलङ्कार of the stanza is:—अत्र प्रथमार्द्धे उपमोत्प्रेक्षयोः संसृष्टिः द्वितीयार्द्धे श्रौती पूर्णोपमा ।

11. Conjugations—

ज्ञा—जानाति, जज्ञौ, अज्ञासीत् ।

मन—मन्यते, मेने, अमंस्त ।

Prose order—प्रबलरुदितोच्छूननेत्रं निश्वासानाम् अशिशिरतया

भिन्नवर्णाधरोष्ठम् हस्तन्यस्तं लम्बालकत्वात् असकलव्यक्ति तस्याः प्रियायाः मुखं त्वदनुसरणक्लिष्टकान्तेः इन्दोः दैन्यं बिभर्त्ति नूनम्। २१।

Paraphrase—विषादनिबन्धनेन निरन्तररोदनेन वाष्पाप्लुततया स्फीतं नयनद्वयं दधत् अन्तस्तापात् उष्णैः निश्वासैः विच्छायम् अधरोष्ठं बिभ्रत् चिन्तावशात् करतले निहितं संस्काराभावात् लम्बमानालकतया असम्पूर्णाभिव्यक्ति तस्याः प्रियामुखमण्डलं मेघानुसरणेन म्लानद्युतेश्चन्द्रस्य शोच्यतां धारयतीति वितर्कः अतोऽपि त्वया नैषा सेति भ्रमितव्यम्। २१।

Change of voice—* नेत्रेण * भिन्नवर्णाधरोष्ठेन हस्तन्यस्तेन * असकलव्यक्तिना * मुखेन * भ्रियते नूनम्। २१।

Sanjivani—नूनमिति। प्रबलरुदितेन उच्छूने स्फुटितपुटे नेत्रे यस्य तत् (उच्छूनेति श्वयतेः कर्त्तरि क्तः आदितश्चेति निष्ठानत्वं वचिस्वपीत्यादिना सम्प्रसारणं सम्प्रसारणाच्चेति पूर्व्वरूपत्वं हल इति दीर्घः। छ्वोः शूडनुनासिके चेति ऊडादेशे कृते रूपसिद्धिरिति वर्त्तमानसामीप्यप्रक्रिया ग्रामादिकीत्युत्प्रेक्षा तथा सति धातोरिकारस्य गत्यभावात् ऊडादेशे छ्वोरन्त्यत्वेन विशेषणाच्चेति।) एतेन विषादो व्यज्यते निश्वासानाम् अशिशिरतया अन्तस्तापोष्णत्वेन भिन्नवर्णः विच्छायः अधरोष्ठो यस्य तत् हस्ते न्यस्तं हस्तन्यस्तम् एतेन चिन्ता व्यज्यते लम्बालकत्वात् संस्काराभावाल्लम्बमानकुन्तलत्वात् असकलव्यक्ति असम्पूर्णाभिव्यक्ति तस्याः प्रियायाः मुखं त्वदनुसरणेन त्वदुपरोधेन क्लिष्टकान्तेः क्षीणकान्तेः इन्दोः दैन्यं शोच्यतां बिभर्त्ति नूनमिति वितर्कः (नूनं तर्केऽर्थनिश्चये इत्यमरः।) पूर्व्ववत् तथापि न भ्रमितव्यमिति भावः। २१।

প্রবলরোদনহেতু উচ্ছূন- (ফুলা)·নেত্র সমন্বিত, নিশ্বাসের উষ্ণতা-হেতু কান্তিশূন্য অধরোষ্ঠযুক্ত, হস্তোপরি স্থাপিত, লম্বমান অলকহেতু অসম্পূর্ণরূপে প্রকাশমান সেই প্রিয়ার মুখমণ্ডল হয়ত তোমার (মেঘের) আবরণহেতু ম্লানকান্তিযুক্ত চন্দ্রের দীনতা (সৌন্দর্য্যহীনতা) ধারণ করিয়াছে। ২১।

Perhaps the face of that beloved lady having eyes swollen up owing to profuse weeping, having lips discoloured on account of the heat of sighs, placed upon her hand, and partly visible in consequence of the dangling curls of hair, (the face) sustains the gracelessness resembling that of the Moon when (she is) overcome by thy obstruction.—21.

Notes.

1. प्रबलरुदितोच्छूननेत्रं—प्रबलं अतिशयितं रुदितम् रोदनम् (रुद्+क्त भावे) (कर्म्मधा.) तेन प्रबलरुदितेन उच्छूने स्फारिते (उत्+श्वि+क्त कर्त्तरि) (३या तत्पु.) प्रबलरुदितोच्छूने नेत्रे यस्य तत् (बहुव्री) adjective to मुखं—having the eyes swollen (inflammated) owing to excessive weeping. Mallinath here derives the word · उच्छून see his commentary.

2. निश्वासानाम् अशिशिरतया भिन्नवर्णाधरोष्ठम्—(नि+श्वस्+घञ् भावे) शिशिरस्य भावः शिशिरता भावे त्वतलौ इति तल्प्रत्ययः न सा अशिशिरता (नञ् तत्पु.) तया हेतौ ३या। भिन्नः वर्णः भिन्नवर्णः (कर्म्मधा) अधरः निम्नः ओष्ठः अधरोष्ठः (कर्म्मधा) भिन्नवर्णः अधरोष्ठः यस्य तत् (बहुव्री)—the lower lip being devoid of its natural colour on account of the warmth of the sighs.

3. हस्तन्यस्तं—हस्ते न्यस्तं (नि+अस्+क्त कर्म्मणि) (७मी तत्पु.)—rested or leaned against the hand, by this epithet her melancholy thoughts are indicated.

आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती।

4. लम्बालकत्वात् असकलव्यक्ति—लम्बते इति (लम्ब् + अच् कर्त्तरि = लम्ब:) लम्ब: अलक: (कर्म्मधा०) तस्य भाव: लम्बालकत्वं तस्मात् on account of long pending curls. असकलव्यक्ति न सकला असकला (नञ् तत्पु.) असकला (वि + अन्ज् + क्तिन् भावे) व्यक्ति: यस्य तत् (बहुव्री) —partly covered by the long hanging curls of hair.

5. तस्या: प्रियाया: मुखं—the face of that dear lady.

6. त्वदनुसरणक्लिष्टकान्ते: इन्दो:—तव अनुसरणम् (अनु + सृ + अनट् भावे) (६ तत्) त्वदनुसरणं तेन क्लिष्टा (क्लिश् + क्त कर्म्मणि) (३या तत्पु) त्वदनुसरणक्लिष्टा कान्ति: (कम् + क्तिन् भावे) यस्य स (बहुव्री) तस्य इन्दो: (उन्द् + उ कर्त्तरि) चन्द्रस्य—of the Moon whose splendour has been overpowered by thy pursuit.

7. दैन्यं बिभर्त्ति नूनम्—दीनस्य भाव: दैन्यं बिभर्त्ति इति तर्कयामि—I think has got the wretched condition.

8. The अलङ्कार is this—अत्र कथमन्य: अन्यस्य धर्म्मं बिभर्त्ति इत्यसम्बद्धप्रलापवारणाय सादृश्यं कल्पनीयं तेन इन्दो दैन्यमिव दैन्यं बिभर्त्ति इति सादृश्याक्षेपात् असम्भवद्वस्तुसम्बन्धरूपा निदर्शना तल्लक्षणम् यथा—

"सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित्।
यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शना"॥

इति दर्पणकृत्।

9. Conjugations:—

भृ—बिभर्त्ति, बिभृते। बभार, बिभराञ्चकार, बभ्रे, बिभराञ्चक्रे। अभार्षीत्, अभृत।

पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां
कच्चिद्भर्त्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति॥२२॥

Prose order – सा बलिव्याकुला वा, विरहतनु भावगम्यं मत्सादृश्यं लिखन्ती वा, मधुरवचनां पञ्जरस्थां सारिकां "हे रसिके ! भर्त्तुः स्मरसि कच्चित् त्वं हि तस्य प्रिया" इति पृच्छन्ती वा ते आलोके पुरा निपतति । २२ ।

Paraphrase—हे मेघ ! त्वं तां मत्प्रियां कदाचित् नित्यनैमित्तिक कर्म्मसु मत्प्रत्यागमनाय देवताराधनेषु च व्याप्रियमाणां, कदाचित् विरहेण क्रशं काश्यंस्य अदृष्टचरत्वात् अधुना सम्भावनया समुत्प्रेच्यं मदालेख्यं क्वचित फलकादौ विन्यस्यन्तीं कदाचित् वा मञ्जुभाषिणीं पञ्जररचितां सारिकां हे रसिके यतस्त्वं भर्त्तुः प्रेमास्पदम् अतस्त्वं तं स्मरसि कच्चित् इत्येवं पृच्छन्तीं द्रक्ष्यसि ।

Change of voice—बलिव्याकुलया वा * लिखन्त्या वा "कच्चित् भर्त्ता स्मर्य्यते त्वया तस्य प्रियया भूयते इति * * पृच्छन्त्या वा तया मत्प्रियया ते आलोके निपत्यते पुरा । २२ ।

Sanjivani—सर्व्वविरहिणीसाधारणानि लक्षणानि सम्भावनया उत्प्रेक्ष्याणीत्याह आलोके इत्यादिभिस्त्रिभिः । हे मेघ सा मत्प्रिया बलिषु नित्येषु प्रोषितागमनार्थेषु च देवताराधनेषु व्याकुला व्यापृता वा विरहेण तनु कृशं भावगम्यं तत्काश्यंस्य अदृष्टचरत्वात् सम्प्रति सम्भावनयोत्प्रेक्ष्यमित्यर्थः मत्सादृश्यं मदाकारसाम्यं मत्प्रतिकृतिमित्यर्थः (यद्यपि सादृश्यं नाम प्रसिद्धवस्त्वन्तरगतमाकारसाम्यं तथापि प्रतिकृतित्वेन विवक्षितम् इतरथा लेख्यत्वासम्भवात् अक्षय्यकोशे आलेख्ये च सादृश्यमित्यभिधानाच्च)। लिखन्ती क्वचित् फलकादौ विन्यस्यन्ती वा चित्रदर्शनस्य विरहिणीविनोदोपायत्वादिति भावः । एतच्च कामशास्त्र-

संवादेन सम्यक् विवेचितमस्माभी रघुवंशसञ्जीवन्यां सादृश्यप्रतिकृतिदर्शने: प्रियाया इत्यत्र। मधुरवचनां मञ्जुभाषिणीम् अत एव पञ्जरस्थां हिंस्रेभ्य: कृतसंरक्षणामित्यर्थ: सारिकां स्त्रीपक्षिविशेषं हे रसिके भर्त्तु: स्वामिन: स्मरसि कच्चित् स्मरसि किम् (कच्चित् कामप्रवेदने इत्यमर:।) भर्त्तारं स्मरसि किमित्यर्थ: (अधीगर्थदयेशां कर्म्मणीति कर्म्मणि षष्ठी।) स्मरणे कारणमाह हि यस्मात् कारणात् त्वं तस्य भर्त्तु: प्रीणातीति प्रिया (इगुपधज्ञाप्रीकिर इति कप्रत्यय:।) अत: प्रेमास्पदत्वात् स्मर्त्तुमर्हसीति भाव: इत्येवं पृच्छन्ती वा वाशब्दो विकल्पे (उपमायां विकल्पे वेत्यमर:।) ते तव आलोके दृष्टिपथे पुरा निपतति सद्यो निपतिष्यतीत्यर्थ:। स्यात् प्रबन्धे पुरातीते निकटागामिके पुरेत्यमर:। यावत्पुरानिपातयोर्लडिति लट्।२२।

(হে মেঘ) (হয়ত মদীয় মঙ্গল কামনায়) দেবারাধনে ব্যাপৃতা অথবা (অদৃষ্টপূর্ব্ব বলিয়া) অনুভবগম্য বিরহকৃশ আমার প্রতিকৃতি রচনে নিযুক্তা অথবা পিঞ্জরস্থিতা মধুরভাষিণী সারিকাকে "অয়ি রসিকে! ভর্ত্তাকে কি মনে আছে তুমি যে তাঁর বড়ই আদরাস্পদ" এই কথা জিজ্ঞাসা করণে নিযুক্তা তিনি (আমার প্রিয়া) সদ্যই তোমার দৃষ্টিপথে পতিতা হইবেন।২২।

She (my beloved wife) will perhaps become the object of thy sight, (who is) employed in worshipping (the Diety for my sake) or painting my likeness imagined thinner on account of separation (from wife) or asking the *Sarika* (Gracula religiosa) having

sweet notes, in the cage—"Oh witty one! do thou still recollect thy master of whom thou art the darling.—22.

Notes.

N. B. Now the यक्ष conjectures the general signs of विरहिणी females.

1. सा बलिव्याकुला वा—she (the dearly loved wife) बलिव्याकुला बलिषु नित्यदेवपूजासु व्याकुला नियुक्ता (७मी तत्पु.) वा—possibly she may remain at devotional worship of Gods.

2. विरहतनु भावगम्यं—विरहेण तनु कृशं (३या तत्पु.) भावेन अनुमानेन गम्यं (गम्+य कर्म्मणि) बोध्यं (३या तत्पु.) both adjectives to सादृश्यम्—ematiated owing to separation inferred from imagination because unperceived.

3. मत्सादृश्यं लिखन्ती वा—समानः इव दृश्यते (समान+दृश+टक् कर्म्मणि) सदृशः तस्य भावः सादृश्यम् मम सादृश्यं (६ तत्पु.) लिखन्ती (लिख+शतृ+ङीष्) रचयन्ती वा—or perhaps writing my likeness on some substance. Mallinath remarks that although सादृश्य is simple resemblance still in dictionary the meaning portrait is available.

4. मधुरवचनां पञ्जरस्थां सारिकां—मधुराणि वचनानि (वच्+अनट् कर्म्मणि)यस्याः सा (बहुव्री) तां,पञ्जरे पिञ्जराभ्यन्तरे तिष्ठति या सा(पञ्जर+स्था+क कर्त्तरि) (उपपद तत्पु.) तां सारिकां पक्षिणीं—asking the *Sarika* having sweet notes and protected in a cage. "The *Sarika* is a small bird better known by the name *Maina*. It is represented as a female while the parrot is described as a male bird." Prof. Wilson.

5. (अयि) रसिके—(रस+णिक or ठक्+आप्) in the vocative case—Oh witty female: commentators like सनातन,

उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चि-
द्भूयोभूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती॥२३॥

रामनाथ, हरगोविन्द read निभृते for रसिके and explain निःशब्दे and निर्जनदेशे।

6. भर्त्तुः स्मरसि कच्चित्—बिभर्त्ति इति (भृ + तृन्) भर्त्ता तस्य "अधीगर्थदयेशां कर्म्मणि" इति षष्ठी भर्त्तारम् इति वा। स्मरसि कच्चित् (प्रश्नवाचि अव्ययम्)—do thou remember thy lord.

7. हि त्वं तस्य प्रिया इति—because thou art his pet and darling, this is the cause of remembrance on the part of the bird.

8. (इत्येवं) पृच्छन्ती वा—(प्रछ् + शतृ + ङीप्)—or asking in this way.

9. ते आलोके—(आङ् + लोक + अल् भावे) आलोकः दर्शनं तत्र—in thy sight.

10. पुरा निपतति—निकटागामिके काले निपतिष्यति। "यावत्पुरानिपातयोः लट्" इति पुरायोगे भविष्यति काले लट्प्रयोगः—will fall at once. सारिकां प्रति भर्तृस्मरणानुयोगः यक्षपत्न्याः उन्मादावस्थां सूचयति। अतएव रसिके इत्यामन्त्रणपदं युज्यते। २२।

11. The अलङ्कार is—दीपक according to the सारोद्धारिणी।

12. Conjugations—

पत्—पतति, पपात, अपप्तत्।

लिख्—लिखति, लिलेख, अलेखीत्।

प्रछ्—पृच्छति, पप्रच्छ, अप्राक्षीत्।

स्मृ—स्मरति, सस्मार, अस्मार्षीत्।

Prose order—हे सौम्य! मलिनवसने उत्सङ्गे वीणां निक्षिप्य मद्-

गोत्राङ्कं विरचितपदं गेयम् उद्गातुकामा नयनसलिलैः आर्द्रां तन्त्रीं कथञ्चित् सारयित्वा भूयः भूयः स्वयं कृतामपि मूर्च्छनां विस्मरन्ती वा आलोके ते निपतति पुरा। २३।

Paraphrase—हे साधो मलिनवस्त्रावृते ऊरुदेशे वीणां विन्यस्य मन्नामाङ्कं विरचितपदं प्रबन्धं गान्धारग्रामेण गातुं कामयमाना तथा मत्स्मृतिजनितैः नेत्रजलैः सिक्ततया क्वणनाक्षमां कृच्छ्रेण आर्द्रत्वापहरणाय करेण प्रसृज्य स्वयं कृतत्वात् विस्मरणानर्हमपि स्वरारोहावरोहक्रमं पुनःपुनः विस्मरन्ती वा आलोके ते निपतति पुरा। २३।

Change of voice—* उद्गातुकामया * * विस्मरन्त्या वा। २३।

Sanjivani—उत्सङ्गेति इति। हे सौम्य साधो मलिनवसने (प्रोषिते मलिना कृशेति शास्त्रादित्यर्थः)। उत्सङ्गे ऊरौ वीणां निक्षिप्य मम गोत्रं नाम अङ्कः चिह्नं यस्मिन् तत् मद्गोत्राङ्कं मन्नामाङ्कं यथा तथा (गोत्रन्तु नाम्नि चेत्यमरः) विरचितानि पदानि यस्य तत् तथोक्तं गेयं गानार्हं प्रबन्धादि गीतमिति पाठे स एवार्थः उद्गातुम् उच्चैर्गातुं कामो यस्याः सा (तुम् काममनसोरिति मकारलोपः।) देवयोनित्वात् गान्धारग्रामं गातुकामेत्यर्थः (तदुक्तं षड्जमध्यमनामानौ ग्रामौ गायन्ति मानवाः। नतु गान्धारनामानं स लभ्यो देवयोनिभिरिति।) तथा नयनसलिलैः प्रियतमस्मृतिजनितैः अश्रुभिः आर्द्रां तन्त्रीं कथञ्चित् कृच्छ्रेण सारयित्वा आर्द्रत्वापहरणाय करेण प्रसृज्य अन्यथा क्वणनासम्भवादिति भावः भूयोभूयः पुनः पुनः स्वयम् आत्मना कृतामपि विस्मरणानर्हामपीत्यर्थः मूर्च्छनां स्वरारोहावरोहक्रमम् (स्वराणां स्थापनाः सप्ताः

मूर्च्छनाः सप्त सप्त हीति सङ्गीतरत्नाकरे ।) विस्मरन्ती वा आलोके ते निपततीति पूर्व्वेणान्वयः । विस्मरणं चात्र दयितगुणस्मृतिजनितमूर्च्छावशादेव (तथाच रस-रत्नाकरे वियोगायोगयोरिष्टगुणानां कीर्त्तनात् स्मृतेः । साक्षात्कारोऽथवा मूर्च्छा दशधा जायते तथा ।) मत्-सादृश्यमित्यादिना मन.सङ्गानुवृत्तिः सूचिता । २३ ।

হে সৌম্য (মেঘ) অথবা মলিনবস্ত্রাবৃত-ক্রোড়দেশে বীণা নিক্ষেপ-পূর্ব্বক আমার-(গোত্র)-নামচিহ্নাদিদ্বারা রচিত-পদ-সংগীত উচ্চৈঃস্বরে গান করিতে অভিলাষিণী চক্ষুর্জলে সিক্ত তন্ত্রী (তাঁত) কোনওরূপে মার্জন করিয়া নিজের রচিত মূর্চ্ছনা (মোহহেতু) বিস্মরণকারিণী আমার পত্নী তোমার দৃষ্টিপথে পতিত হইবেন। ২৩।

Oh handsome one ! (she will be seen by thee) who is desirous of loudly singing a lyric in which words are composed so as to put my appellation as the mark (of the song) after having placed the *Bina* (a lute) on her lap covered by a dirty dress, and who is repeatedly forgetting the cadence though composed by herself after having wiped the string with difficulty wet with her tears.—23.

Notes.

1. हे सौम्य—Oh handsome looking one.

2. मलिनवसने उत्सङ्गे—मलिनं वसनं यस्य सः (बहुव्रीः) तत्र उत्सङ्गे (उत्+सन्ज्+घञ्)—on the lap having dirty clothes.

3. वीणां निक्षिप्य—(नि+क्षिप् क्त्वा स्थाने ल्यप् सोपसर्गत्वात्)—having placed the *Vina*. The Vina is a stringed instrument of sacred origin and high celebrity amongst the Hindoos

This being much the most harmonious and scientific of all the Hindoo instruments of music. Prof. Wilson.

4. मद्गोत्राङ्कं—मम गोत्रं surname (६ तत्पु.) मद्गोत्रं मद्गोत्रं अङ्कः यस्मिन् कर्म्मणि तत् यथा तथा (बहुव्री) an adverb modifying the verb in विरचितपदं—in a manner as to have my surname for mark.

5. विरचितपदं—विरचितानि (वि+रच्+क्त कर्म्मणि) पदानि यस्य तत् (बहुव्री) adjective qualifying गेयं—having words composed.

6. गेयम् उद्गातुकामा—(गै + य कर्म्मणि) a song some editions read गानं this of course gives the meaning directly. उत् (उच्चैः) गातुं कामः यस्याः सा (बहुव्री) तुम्कामसनसोः इति तुमुनः मकारलोपः—she being bent upon singing aloud. For the propriety of उद्गातुं see Mallinath.

7. नयनसलिलैः आर्द्रां तन्त्रीं—नयनयोः सलिलानि (६ तत्पु.) तैः आर्द्रां सिक्तां—the string wet with the tears (of the wife). भरत, सनातन, रामनाथ, हरगोविन्द read तन्त्रीरार्द्राः the plural instead of the singular as here.

8. कथञ्चित् सारयित्वा—अतिक्लेशेन मार्जयित्वा (सृ + णिच् + क्त्वा) —arranging or wiping with great painstaking. सारोद्धारिणी explains—सारयित्वा स्नायुरज्जुं सज्जीकृत्य इत्यर्थः ।

9. भूयोभूयः—(बहु + ईयसुन् = भूयस् वीप्सायां द्विर्भावः) time and again.

10. स्वयमपि कृतां मूर्च्छनां—स्वयं आत्मना तृतीयान्तमव्ययं कृतां (कृ + क्त कर्म्मणि) मूर्च्छनां—the मूर्च्छना is the properly regulated rise and fall of notes in musical key-notes. मूर्च्छनास्त्वेकविंशतिः इति नारदीय शिक्षा—the मूर्च्छना or regulated cadence composed by herself.

शेषान्मासान् विरहदिवसस्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः।
मत्सङ्गं वा हृदयनिहितारम्भमास्वादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः। २४।

11. विस्मरन्ती—(वि+स्मृ+शतृ+ङीप्) forgetting, connected with foregoing stanza आलोके ते निपतति।

12. The अलङ्कार is —स्वभावोक्ति।

13. Conjugations—स्मृ see above sloka.

Prose order—अथवा विरहदिवसस्थापितस्य अवधेः शेषान् मासान् देहलीदत्तपुष्पैः गणनया भुवि विन्यस्यन्ती, हृदयनिहितारम्भं मत्सङ्गं वा आस्वादयन्ती प्रायेण अङ्गनानां रमणविरहेषु एते विनोदाः। २४।

Paraphrase—अथवा विरहदिवसात् निश्चितस्य अन्तस्य गतावशिष्टान् मासान् गणनया भूतले एकैकशः विन्यस्तैः देहलीस्थापितपुष्पैः गणयन्ती वा हृदयनिहितोपक्रमं मत्सम्भोगम् अनुभवन्ती वा आलोके ते निपतति पुरा, रमणविरहेषु अङ्गनानां प्रायेण एते कालयापनोपायाः। २४।

Change of voice—* * शेषाः मासाः * विन्यस्यन्त्या वा * आस्वादयन्त्या वा निपत्यते * एतैः विनोदैः भूयते। २४।

Sanjivani—शेषानिति। अथवा विरहस्य दिवसः तस्मात् स्थापितस्य तत आरभ्य निश्चितस्य अवधेः अन्तस्य शेषान् गतावशिष्टान् मासान् देहलीदत्तपुष्पैः देहली द्वारस्याधारदारु (गृहावग्रहणी देहलीत्यमरः।) तत्र दत्तानि राशित्वेन निहितानि यानि पुष्पाणि तैर्गणनया एको द्वावित्यादिसंख्यानेन भुवि भूतले विन्यस्यन्ती वा पुष्पविन्यासैर्मासान् गणयन्ती वा इत्यर्थः। यद्वा हृदये

निहितः मनसि सङ्कल्पितः आरम्भः उपक्रमो यस्य तम्; अथवा हृदयनिहिताः आरम्भाः चुम्बनादयो व्यापारा यस्मिन् तं मत्सङ्गं मत्सम्भोगरतिम् आस्वादयन्ती वा आलोके ते निपतति इति पूर्व्वेण सम्बन्धः। ननु कथमयं निश्चय इत्याशङ्कामर्थान्तरन्यासेन परिहरति प्रायेण बाहुल्येन अङ्गनानां रमणविरहेषु एते पूर्व्वोक्ता विनोदाः कालयापनोपायाः। एतेन सङ्कल्पावस्था उक्ता तदुक्तं सङ्कल्पो नाथविषयो मनोरथ उदाहृत इति। २४।

অথবা বিরহদিবস হইতে আরম্ভ করিয়া শেষাবধি অর্থাৎ গতাবশিষ্ট (বাকি) মাস গুলি ভূমিতলে বহির্দ্বারকাষ্ঠে (চৌকাঠে) প্রদত্ত পুষ্পের বিন্যাস দ্বারা গণনকারিণী অথবা (দূরাবস্থিত বলিয়া) আমার সহিত মনঃসঙ্কল্পিত-সম্ভোগরসাস্বাদিনী (আমার প্রিয়া তোমার দৃষ্টিপথে পতিতা হইবেন) যেহেতু পতিবিরহে এই সকল কার্য্যই অঙ্গনাদিগের চিত্তবিনোদনোপায়। ২৪।

Or perhaps, counting the remaining months of the time of separation (from the present up to the end), by throwing, on the floor, flowers given at the threshold of the outer door (for worshipping it) or enjoying the pleasure of carnal connection with me by means of mental actions (on account of my absence) because these are ordinarily the means of consolation on the part of women during the time of separation from husbands.—24.

Notes.

1. विरहदिवसस्थापितस्य अवधेः—विरहस्य दिवसः (६ तत्पु॰) तस्मात् विरहदिवसात् स्थापितः (स्था + णिच् + क्त कर्म्मणि) (५मी तत्पु॰) तस्य अवधेः अन्तस्य—end of the time beginning from the day of

separation, commentators like भरत, सनातन, रामनाथ, हरगोविन्द कल्याणमल्ल, सारोद्धारिणी, वल्लभ, महिम । Wilson and others read गमनदिवसस्थापितस्य and explain प्रस्थानदिनात् प्रभृति व्यवस्थापितस्य—भरत, वियोगदिन क्रतस्य सम्वत्सर परिमाणतया कल्पितस्य—सारोद्धारिणी ।

2. शेषान् मासान्—शेषान् अतीतेभ्यः अवशिष्टान् मासान्—मासान् विन्यस्यन्तीत्यस्य कर्म्मपदम् । the remaining months.

3. देहलीदत्तपुष्पैः—देहली द्वारस्थदारुविशेषः तत्र देहल्याम् दत्तानि पूजार्थं प्रक्षिप्तानि (७मी तत्पु.) देहलीदत्तानि पुष्पाणि तैः करणे तृतीया—by the flowers offered on the threshold (of doors)—Prof. Wilson remarks :—"The Hindoos pay a species of adoration to many inanimate objects. Amongst others the door-post receives such homage as is rendered by hanging up a flower or a garland." भरत, रामनाथ, हरगोविन्द, कल्याणमल्ल read देहलीमुक्त पुष्पैः देहल्यां मुक्तैः पुष्पैः इत्यर्थः ।

4. गणनया भुवि विन्यस्यन्ती वा—गणनया इति प्रकृत्यादित्वात् तृतीया। भुवि भूतले विन्यस्यन्ती (वि + नि + अस् + शतृ + ङीप्)—or throwing on the ground for counting.

5. हृदयनिहितारम्भं मत्सङ्गं वा—यद्वा हृदये निहितः (नि + धा or हि + क्त) (७मी तत्पु.) हृदयनिहितः आरम्भः उपक्रमः (आङ् + रभ + घञ् भावे) यस्य सः तं (बहुव्री) adjective to मत्सङ्गं मम सङ्गः (सञ्ज् + घञ् भावे) (६ तत्पु.) तं or thus हृदयनिहिताः कल्पिताः आरम्भाः (आङ् + रभ् + घञ् कर्म्माणि) सम्भोगकर्म्माणि यस्मिन् सः तं (बहुव्री)—or the sexual enjoyment with me conceived only in the mind (owing to my absence). भरत रामनाथ and others read संयोगं वा instead of मत्सङ्गं वा the meaning remaining the very same.

6. आस्वादयन्ती—(आङ् + चुरादि स्वद + शतृ + ङीप्) उपभुञ्जाना—enjoying the pleasure of, भरत रामनाथ and others read आसादयन्ती instead of आस्वादयन्ती meaning प्राप्नुवन्ती ।

सव्यापारामहनि न तथा पीडयेन्मद्वियोगः
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते ।
मत्सन्देशैः सुखयितुमलं पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनां सौधवातायनस्थः ।२५।

N. B. Now in answer to a possible question "how do you know that? the यक्ष supports these assertions by a general remark (अर्थान्तरन्यास) ।

7. प्रायेण अङ्गनानां—प्रायेण इत्यत्र प्रकृत्यादित्वात् तृतीया—generally of the ladies.

8. रमणविरहेषु—रमयति इति (रम+णिच्+अन कर्त्तरि) रमणानां प्रियाणाम् विरहाः तेषु—in the absence of lovers—भरत and हरगोविन्द read रमणविरहे ह्यङ्गनानां instead of रमणविरहेषु अङ्गनानां and their reading is preferred by our Vidyasagar.

9. विनोदाः—विनोदाः विशेषेण नुद्यते अनेन इति (वि+नुद+घञ् करणे) कालयापनोपायाः—means of passing the time in some consolation.

10. The अलङ्कार is अर्थान्तरन्यास in the sloka. अत्र कारणेन कार्य्यसमर्थनरूपः अर्थान्तरन्यासः यद्वा सामान्यतो विरहिणीनामेते विनोदाः मत्पत्न्यपि विरहिणी अतस्तस्या एवं विनोदा युक्ता एव इति सामान्येन विशेषसमर्थनरूपः अर्थान्तरन्यासः। रमणविरहे रमणीनाम् ईदृग् विनोदनं बहुशो दृष्टं मया अतः मत्पत्न्या अपि मद्विरहे एवं विनोदनम् अनुमानसिद्धमपि प्रत्यक्षवत् प्रतिभाति ।

11. Conjugations—

नुद—नुदति, नुनोद, अनौत्सीत् ।

स्वद—स्वादयति, असिष्वदत् ।

Prose order—हे सखे ! अहनि सव्यापारां ते सखीं मद्वियोगः तथा

न पीड़येत् यथा रात्रौ निर्व्विनोदां गुरुतरशुचं शङ्के। अतो निशीथे उन्निद्राम् अवनिशयनां तां साध्वीं मत्सन्देशैः अलं सुखयितुं सौधवातायनस्थः सन् पश्य।

Paraphrase—हे बन्धो दिवसे बलिचित्रलेखनादिषु व्यासक्तचित्तां प्रियां मद्विरहः न तथा खेदयेत् यथा रात्रौ निर्व्यापाराम् अतएव शोकमात्रद्वितीयां खेदयेत् इति तर्कयामि अतः अर्द्धरात्रे अचिभिरेव क्षपां क्षपयन्तीं नियमार्थं स्थण्डिलशायिनीं तां साध्वीं मद्वार्त्ताभिः पर्य्याप्तं सन्तोषयितुं सौधगवाक्षे स्थितः अवलोकय। २५।

Change of voice—* सव्यापारा ते सखी मद्वियोगेन न तथा पीड़्यते रात्रौ निर्विनोदा गुरुतरशुक् पीड़्यते शङ्क्यते * सौधवातायस्थेन त्वया दृश्यताम्। २५।

N. B. शीतलस्पर्शशय्यायां शयनं भूतलशयनमिव नात्युद्वेगकरं अतः तापव्यञ्जनाय भूशयनमिति भरतेन यत् उक्तं तन्न समीचीनं नियमार्थं भूतलशयनमिति मल्लिनाथ व्याख्या साधीयसी।

Sanjivani—सव्यापारामिति। हे सखे अहनि दिवसे सव्यापारां पूर्व्वोक्तबलिचित्रलेखनादिव्यापारवतीं ते सखीं स्वप्रियां मद्वियोगः मद्विरहः तथा तेन प्रकारेण (प्रकारवचने थाल् इति थाल्प्रत्ययः।) न पीडयेत् यथा रात्राविति शेषः किन्तु रात्रौ निर्विनोदां निर्व्यापारां ते सखीं गुरुतरा शुक् यस्याः तां गुरुतरशुचम् अतिदुर्भरदुःखां शङ्के तर्कयामि (शङ्का वितर्कभययोरिति शब्दार्णवे।) अतो निशीथे अर्द्धरात्रे उन्निद्राम् उत्सृष्टनिद्राम् अवनिरेव शयनं शय्या यस्याः तां नियमार्थं स्थण्डिलशायिनीं साध्वीं पतिव्रताम् (साध्वी पतिव्रतेत्यमरः।) अतो नान्यथा शङ्कितव्यमिति भावः तां त्वत्सखीं मत्सन्देशैः मद्वार्त्ताभिः

अलं पर्य्याप्तं सुखयितुम् आनन्दयितुं सौधवातायनस्थः सन् पश्य। (सखा धात्री च पितरौ मित्रदूतशुकादयः। सुखयन्तीष्टकथनसुखोपायैर्वियोगिनीमिति रत्नाकरे।) दूतस्त्वायं मेघ इति भावः। अनेन जागरावस्था उक्ता।२५।

(হে সখে) আমার বিরহ, চিত্রাদিকার্য্যনিরতা তোমার সখীকে (আমার পত্নীকে) দিবাভাগে তাদৃশ ক্লেশ দেয় না কিন্তু মনে হয় রাত্রিকালে চিত্তবিনোদনোপায় শূন্যা অতএব গুরুতরদুঃখাক্রান্তা তাঁহাকে যাদৃশ ক্লেশ প্রদান করে, (অতএব) সাধ্বী নিদ্রারহিতা ভূমিতলশয়ানা তাঁহাকে আমার সংবাদ দ্বারা সম্পূর্ণরূপে সুখিনী করিবার জন্য সৌধবাতায়নপথে উপবিষ্ট হইয়া দর্শন করিও। ২৫।

(Oh friend) I apprehend that my separation (from her) will not so ail thy friend (my wife) during the day-time because of her being employed (in works as painting &c.) as it will in the night time because of her being without consolating pastimes (and hence) she is highly aggrieved, thou at mid-night, being seated on the window of the palace, will look on her—the chaste lady who is devoid of sleep and lying on the bare ground, with a view to make her happy by my tidings.—25.

Notes.

1. अहनि सव्यापारां ते सखीं—अहनि (other form अह्नि) दिवसे सव्यापारां (वि+आ+पृ+घञ् भावे) व्यापारेण सह वर्त्तमाना तां (तुल्ययोगे बहुव्रीः) ते सखीं मत्पत्नीं—thy friend (my wife) engaged in business at day-time.

2. मद्वियोगः—मम वियोगः (६ तत्पु.)—my separation (from her) there is another reading विप्रयोगः for मद्वियोगः।

तथा न पीड़येत्—(तद् + थाल् प्रकारे) (पीड़ि + यात् विधि-लिङ्)—will not afflict in that manner. Other reading खेदयेत् for पीड़येत्।

4. (किन्तु) रात्रौ निर्विनोदां ते सखीं—निर् नास्ति विनोदः यस्याः सा (बहुव्री) तां—at night thy friend without any consolation in the shape of business.

5. गुरुतरशुचं शङ्के—अतिशयेन गुरुः गुरुतरा (गुरु + तर) (शुच् + क्विप = शुच्) गुरुतरा शुक् यस्याः सा (बहुव्रो) तां adjective of सखीं शङ्के तर्कयामि—I think she will suffer great affliction.

6. निशीथे—अर्द्धरात्रे—at mid-night.

7. उन्निद्रां—उद्गता निद्रा यस्याः सा (प्रादिभ्योधातुजस्य उत्तरपद-लोपश्च इति बहुव्री)—devoid of sleep.

8. अवनिशयनां—अवनिः धरातलं शयनं शय्या यस्याः सा (बहुव्री)—lying on the floor.

9. साध्वीं तां—that chaste lady. Alternative form साधुं by the rule वोतोगुणवचनात्।

10. मत्सन्देशैः—मम सन्देशाः संवादाः तैः (६ तत्पु.) करणे ३या—by my message or tidings.

11. अलं सुखयितुं—अलं सम्यक् सुखयितुं (सुख अदन्तचुरादि + तुमुन) to make happy completely.

12. सौधवातायनस्थः (सन) पश्य—सौधस्य वातायनं (६ तत्पु.) सौधवातायने तिष्ठति यः सः (सौधवातायन + स्था + क कर्त्तरि)—placing thyself on the window look at (my wife). There are various readings of this epithet, some of which are noticed here:—भरत, सुमतिविजय, रामनाथ, लक्ष्मी and सारोद्धारिणी read अर्द्धनिशयनासन्नवातायनस्थः instead of the reading of this text

आधिक्षामां विरहशयने सन्निषण्णैकपार्श्वां
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः ।
नीता रात्रिः क्षण इव मया सार्द्धमिच्छारतैर्या
तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम् ॥ २६ ॥

and explain अवनिरेव शयनं तस्य आसन्नं सन्निहितं यत् वातायनं गवाक्षः तत्र स्थितः सन् इत्यादि । हरगोविन्द, कल्याणमल्ल, Wilson and others read अवनिशयनां सन्नवातायनस्थः and explain :—सन्नवातायनस्थः निकटगवाक्षस्थः सन्—हरगोविन्द । सन्नवातायनस्थः—भग्नगवाक्षस्थितः सन् अनेन भवनस्य दुरवस्था प्रोक्ता इति भावः—कल्याणमल्ल । वल्लभ, मल्लिनाथ and others read सद्मवातायनस्थः and explain सद्मनः गृहस्य वातायने गवाक्षे तिष्ठति यः सः । C.f. कार्यान्तरितोत्कण्ठं दिनं मया नीतमनतिकृच्छ्रेण । अविनोददीर्घयामा कथं नु रात्रिर्गमयितव्या ।

N. B. In some editions the following stanza is found which is similar to the 25th in import and considered a spurious interpolation by Pandit I. C. Vidyasagar.

स्निग्धाः सख्यः क्षणमपि दिवा तां न मोक्ष्यन्तितन्वी-
मेकप्रख्या भवति हि जगत्यङ्गनानां प्रवृत्तिः ।
स त्वं रात्रौ जलद शयनासन्नवातायनस्थः
कान्तां सुप्ते सति परिजने वीतनिद्रामुपेयाः ॥

13. The अलङ्कार—अत्र दिवसे पीडनाभावं प्रति सव्यापारानित्यस्य रात्रौ पीडनं प्रति निर्विनोदामित्यस्य च हेतुत्वेन निर्देशात् पदार्थहेतुकं काव्यलिङ्गद्वयम् ।

14. Conjugations—

पीड़—पीड़यति, पीड़यामास, अपीपिड़त्, अपिपीड़त् ।

शन्क्—शङ्कते, शशङ्के, अशङ्किष्ट ।

Prose order—आधिक्षामां विरहशयने संनिषण्णैकपार्श्वाम् प्राचीमूले

कलामात्रशेषां हिमांशोः तनुमिव स्थिताम या रात्रिः मया सार्द्धं इच्छारतैः क्षण इव नीता, उष्णैः अश्रुभिः विरहमहतीं तामेव यापयन्तीम्। २६।

Paraphrase—या मनोव्यथया कृशा या च पल्लवादिरचिते खलिवशयने एकं पार्श्वं निवेश्य शयाना अतएव या उदयगिरिप्रान्ते कलामात्रावशिष्टा चन्द्रस्य मूर्त्तिरिव स्थिता या च मया सह यां रात्रिम् इच्छाकृतैः रतैः क्षणमिव यापितवती विरहगुर्व्वीं तज्जातीयामेव रात्रिं कृच्छ्रेण यापयति सा हि मे प्रियतमा। २६।

Change of voice—आधिक्षामा * सन्निषण्णैकपार्श्वा * कलामात्रशेषा * तनुरिव स्थिता * यापयन्ती दृश्यताम्। २६।

Sanjivani—पुनस्तामेव विशिनष्टि आधिक्षामामित्यादिभिस्त्रिभिः। आधिना मनोव्यथया क्षामां कृशाम् (पुंस्याधिर्मानसी व्यथेत्यमरः। क्षायतेः कर्त्तरि क्तः। क्षायो म इति निष्ठातकारस्य मकारः)। विरहे शयनं तस्मिन् विरहशयने पल्लवादिरचिते इत्यर्थः सन्निषण्णम् एकं पार्श्वं यस्याः ताम् अत एव प्राच्याः पूर्व्वस्याः दिशो मूले उदयगिरिप्रान्ते इत्यर्थः प्राचीग्रहणं क्षीणावस्थाद्योतनार्थम् मूलग्रहणं दृश्यतार्थम् कलामात्रं कला एव शेषो यस्याः तां हिमांशोः तनुं मूर्त्तिमिव स्थितां तथा या रात्रिः मया सार्द्धम् इच्छया कृतानि रतानि तैः (शाकपार्थिवादित्वान्मध्यपदलोपी समासः)। क्षण इव नीता यापिता तां तज्जातीयामेव रात्रिं विरहेण महतीं महत्त्वेन प्रतीयमानाम् उष्णैः अश्रुभिः यापयन्तीम्। (यातेर्ण्यन्ताच्छतृप्रत्ययः। अर्त्तिह्रीत्यादिना पुगागमः)। स एव कालः सुखिनामल्पः प्रतीयते दुःखिनान्तु विपरीत इति भावः। एतेन कार्श्यावस्था उक्ता। २६।

মানসক্লেশকৃশা বিরহকালীন (পল্লবাদিরচিত) শয্যায় একপার্শ্বে অর্থাৎ পার্শ্ব পরিবর্ত্তন না করিয়া শয়ানা অতএব পূর্ব্বদিগন্ত প্রদেশে কলামাত্রাবশিষ্ট চন্দ্রের মূর্ত্তির ন্যায় প্রতীয়মানা, আমার সহিত স্বেচ্ছা-রতিকর্ম্মে যে রাত্রি মুহূর্ত্তের ন্যায় অতীত বলিয়া বোধ ছিল (এক্ষণে) বিরহবশতঃ দীর্ঘ সেই (তজ্জাতীয়)রাত্রিই উত্তপ্ত অশ্রুজলে অতিবাহন-কারিণীকে দেখিও। ২৬।

(Thou wilt see her that is ematiated with mental agony, lying prostrate on one side only upon her bed denoting my separation, and hence resembling the form of the moon having one phase left on the base (*i. e.*, horizon) of the east and passing the night made livelong by the separation. with the shedding of warm tears,—that night which was spent like a moment by her with me in the enjoyment of pleasures according to wishes.—26.

Notes.

1. आधिक्षामां—आधिना मनःक्लेशेन क्षामा (क्षै + क्त कर्त्तरि) कृशा तां—ematiated on account of mental anxiety.

2. विरहशयने—विरहस्य विरहे वा शयनं (६ष्ठी ७मी वा तत्पु.) विरहक्लेशोपशमयोग्य शयने शय्यायां—bed suitable for persons suffering from the pangs of separation.

3. सन्निषण्णैकपार्श्वां—(सम् + नि + सद + क्त कर्त्तरि) सन्निषण्णम्, एकं पार्श्वम् एकपार्श्वं (कर्म्मधा) सन्निषण्णम् एकपार्श्वं यस्याः सा ताम् (बहुव्रो)—lying one one side. भरत, रामनाथ, हरगोविन्द and others read सन्निकीर्णैकपार्श्वाम् सन्निकीर्णं सम्यक् निक्षिप्तम् एकं पार्श्वं यया तां इत्यर्थः।

4. प्राचीमूले—(प्र + अनच् + क्विप् कर्त्तरि + ङीप्) प्राची तस्याः प्राच्याः मूलं तस्मिन् (६ तत्पु.)—on the base (*i. e.*, end of horizon)

of the east. This epithet indicates the thinness of the moon.

5. कलामात्रशेषां हिमांशोः तनुमिव—कला एव कलामात्रं मयूरव्यंसकादित्वात् अस्वपदविग्रह नित्य समासः कलामात्रं शेषः यस्याः सा तां (बहुव्री) adjective to तनुं। हिमांशोः हिमाः शीतलकराः अंशवः यस्य सः तस्य तनुमिव आकृतिमिव—like the form of the moon having one phase remaining only.

6. या रात्रिः मया सार्द्धं—मया सार्द्धं योगेन ३या—that nigh with me.

7. इच्छारतैः—(रम+क्त भावे) रतं रतिरित्यर्थः इच्छया कृतानि रतानि इच्छारतानि तैः (शाकपार्थिवादित्वात् मध्यपदलोपी कर्म्मधारयः)—by means of amorous enjoyments according to will.

8. क्षण इव नीता—क्षणः मुहूर्त्तः इव नीता (नी+क्त कर्म्मणि+आप्)—what was passed like a moment only; here भरत, रामनाथ, हरगोविन्द, सारोद्धारिणी, मल्लिम, सुमतिविजय and others read क्षणमिव and explain क्षणमिव क्षणमात्रं मुहूर्त्तमिव now although in the अमरकोष the word क्षण is masculine still there are instances in which it is used in the neuter as क्षणमिव गमितो वासरो वासवेन इत्यादि।

9. तां विरहमहतीं (रात्रिं), तां=तज्जातीयां of that class or similar to that in nature. विरहेण महती (३या तत्पु.) तां विरहवशात् दीर्घतया अनुभूतां—that night seeming very long on account of the separation. भरत, रामनाथ, हरगोविन्द, कल्याणमल्ल, सारोद्धारिणी मल्लिम and others read विरजनितैः for विरहमहतीं and explain as वियोगोत्पन्नैः। But वल्लभ and सुमति read विरहपतितैः and explain भर्त्तृविरहात् पतितैः।

10. उष्णैः अश्रुभिः यापयन्तीं—यापयन्तीं—(या+णिच्=यापि by

पादानिन्दोरमृतशिशिरान् जालमार्गप्रविष्टान्
पूर्व्वप्रीत्या गतमभिमुखं सन्निवृत्तं तथैव।
चक्षुः खेदात्सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम्॥२७॥

the rule भार्त्तिङ्गी &c. + शतृ + ङीप्) यापयन्ती—तां—passing (the night) with the shedding of hot tears.

N. B. This phenomenon of the human mind is a well known one, namely that time seems to pass quickly on in hour of happiness and the reverse in that of distress.

11. The अलङ्कार of the stanza is—उपमा।

12. Conjugations—

सद—सीदति, ससाद, असदत्।

या—याति, ययौ, अयासीत्।

Prose order—जालमार्गप्रविष्टान् अमृतशिशिरान् इन्दोः पादान् पूर्व्वप्रीत्या अभिमुखं गतं तथैव सन्निवृत्तं चक्षुः खेदात् सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं साभ्रे अह्नि न प्रबुद्धां न सुप्तां स्थलकमलिनीमिव स्थिताम्। २७।

Paraphrase—गवाक्षविवरगतान् अमृतमयत्वात् स्निग्धान् चन्द्रस्य रश्मीन् एते सङ्गमदशायामिव आनन्दकरा भविष्यन्तीति बुद्ध्या अभिमुखं गतं तदा तेषामतीव दुःसहत्वात् तथैव प्रतिनिवृत्तं दृष्टिं खेदात् अश्रुदभरैः पक्ष्मभिः छादयन्तीम् अतएव दुर्द्दिने दिवसे मेघावरणात् अविकसितां अदर्शितमुकुलितां स्थलपद्मिनीमिव स्थिताम्। २७।

Change of voice—* छादयन्ती *स्थलकमलिनीव न प्रबुद्धा न सुप्ता दृश्यतां। २७।

Sanjivani—पादानिति। जालमार्गप्रविष्टान् गवाक्षविवरगतान् अमृतशिशिरान् इन्दोः पादान् रश्मीन् पूर्व्व-

প্রীত্যা পূর্ব্বস্নেহেন পূর্ব্ববদানন্দকরা ভবিষ্যন্তীতি বুদ্ধ্যেতি ভাবঃ অভিমুখং যথা তথা গতং তথৈব সন্নিবৃত্তং যথা গতং তথৈব প্রতিনিবৃত্তং তদা তেষামতীব দুঃসহত্বাদিতি ভাবঃ চক্ষুঃ দৃষ্টিং খেদাৎ সলিলগুরুভিঃ অশ্রুদুর্ভরৈঃ পক্ষ্মভিঃ ছাদয়ন্তীম্ অত এব সাভ্রে দুর্দিনে অহ্নি দিবসে ন প্রবুদ্ধাং মেঘাবরণাদবিকসিতাং ন সুপ্তাম্ অহার্ত্যমুকুলিতাম্ (উভয়ত্রাপি নঞর্থস্য নশব্দস্য সুপ্সুপেতি সমাসঃ)। স্থলকমলিনীমিব স্থিতাম্। এতেন বিষয়দ্বেষাখ্যা ষষ্ঠী দশা সূচিতা। ২৭।

গবাক্ষপথ প্রবিষ্ট অমৃতশীতল চন্দ্রের কিরণ পাইয়া পূর্ব্বপ্রীতিবশতঃ (অর্থাৎ পূর্ব্বের ন্যায় প্রীতিকর হইবে ভাবিয়া) তদভিমুখে ধাবিত ও তৎক্ষণাৎ (এক্ষণে অতি ক্লেশদায়ক বলিয়া) প্রত্যাবৃত্ত অতএব মেঘাচ্ছন্নদিনে অপ্রস্ফুটিত অনিমীলিত স্থলপদ্মিনীর ন্যায় প্রতীয়মান চক্ষুঃ দুঃখহেতু সলিলভারাক্রান্ত পক্ষ্মদ্বারা আচ্ছাদনকারিনী (তাঁহাকে দেখিবে)। ২৭।

(Thou shouldst see the lady) closing with eye-lashes heavy by tears on account of agony, the eye, which owing to former attraction, goes towards the rays of the Moon, cool as ambrosia, and entering by the way of window, and at once comes back (because of sorrow on account of the separation) and hence resembling the ground lotus flower which is neither bloomed nor shut up on a day over hung with clouds.—27.

Notes.

1. জালমার্গপ্রবিষ্টান—জালস্য গবাক্ষস্য মার্গঃ পন্থাঃ (৬ষ্ঠী তৎপু)

तेन प्रविष्टाः (तृतीया तत्पु.) तान्—coming in through the opening of window.

2. अमृतशिशिरान् इन्दोः पादान्—पादान् अभिमुखयोगे द्वितीया। अमृतमिव शिशिराः तान् (उपमानानि समान्यवचनैः इतिसमासः) चन्द्रस्य किरणान्—the rays of the Moon as cool as the ambrosia or nector.

3. पूर्व्वप्रीत्या—पूर्व्वा प्रीतिः (कर्म्मधा) तया—out of previous attraction (*i. e.*, thinking that the rays of the Moon will be so pleasing now as before when accompanied by the यक्ष) ।

4. अभिमुखं गतं—अभिगतं मुखं यस्मिन् कर्म्मणि तत् यथा तथा (बहुव्री) adverb modifying गतम् (गम् + क्त कर्त्तरि) adjective to चक्षुः—turns towards the direction of.

5. तथा एव सन्निवृत्तं—तथैव तत्क्षणादेव सन्निवृत्तं (सम् + नि + वृत् + क्त कर्त्तरि) प्रत्यागतं विरहदुःखावेगवशात् इति भावः—immediately turns back on account of the affliction.'

6. चक्षुः—दर्शनेन्द्रियं—the eye, objective case of छादयन्तीं ।

7. खेदात् सलिलगुरुभिः पक्ष्मभिः—खेदात् इति हेतौ ५मी। सलिलेन गुरूणि तैः (३या तत्पु.) adjective to पक्ष्मभिः—with the eyelashes heavily filled with tears on account of sorrow.

8. छादयन्तीं—(छद (चुरादि) शतृ + ङीप्)—covering.

9. (अतएव) साभ्रे अह्नि—अभ्रैः सह वर्त्तमानं तस्मिन् (तुल्ययोगे बहुव्री) अह्नि alternative form अहनि—on a day overcast with clouds.

10. न प्रबुद्धां न सुप्तां—न प्रबुद्धा (प्र + बुध + क्त कर्त्तरि) तां (नञा सह उभयत्र सुप्सुप् समासः) न सुप्ता (स्वप + क्त कर्त्तरि) तां—neither bloomed (on account of the clouds) nor closed (on account of the day time .

निश्वासेनाधरकिशलयक्लेशिना विक्षिपन्तीं
शुद्धस्नानात् परुषमलकं नूनमागण्डलम्बम् ।
मत्सम्भोगः कथमुपनयेत् स्वप्नजोऽपीति निद्रा-
माकाङ्क्षन्तीं नयनसलिलोत्पीड़रुद्धावकाशाम् ।२८।

11. स्थलकमलिनीम् इव—स्थलस्य कमलिनी (६ तत्पु.) तां यद्वा स्थलकमलिनी इति अविग्रह नित्य समासः (being a species of flowers denoted by the name)—like a ground lotus flower.

12. The अलङ्कार is—अत्र श्रौती पूर्णोपमालङ्कारः ।

13. Conjugations—

बुध्—बोधति बुध्यते, अबुधत् अबोधीत्, अबोधिष्ट, बुबोध बुबुधे ।

स्वप—स्वपिति, सुष्वाप, अस्वपत्, अस्वपीत् ।

Prose order—शुद्धस्नानात् परुषं नूनम् आगण्डलम्बम् अलकम् अधरकिसलयक्लेशिना निश्वासेन विक्षिपन्तीम् तथा स्वप्नजोऽपि मत्सम्भोगः कथम् उपनयेत् इति नयनसलिलोत्पीड़रुद्धावकाशां निद्राम् आकाङ्क्षन्तीम् । २८ ।

Paraphrase—तैलादिरहितस्नानेन कठिनस्पर्शान् आगण्डात् लम्बमानान् चूर्णकुन्तलान् अधरपल्लवं शोषयता उष्णेन निश्वासमारुतेन चालयन्तीं तथा स्वप्नावस्थायामपि का कथा साक्षात्सम्भोगे मत्सम्भोगः आगच्छत् इत्याशयेन निद्राम् आकाङ्क्षन्तीं, हन्त सा निद्रा नयनसलिलोत्पीड़ेन रुद्धावकाशतया दुर्लभा जाता । २८ ।

Change of voice—* विक्षिपन्ती * स्वप्नजेनापि मत्सम्भोगेन कथम् उपनीयेत इति * आकाङ्क्षन्ती सा दृश्यताम् । २८ ।

N. B. प्रोषिते मलिना कृशा इत्यादिवचनबलेन यावत् प्रोषित भर्तृकात्वं तावत् यक्षपत्नी अतैलस्नानं चक्रे रागतः प्राप्तं पतिसङ्गं स्वप्नजमपि चकमे च इति मल्लिनाथस्य व्याख्याभिप्रायः । ऋतुकाले अतैलस्नानम्, चतुर्थे अहनि पतिसङ्गस्य अवश्यकर्त्तव्यतया स्वप्नजमपि तम् इयेष इति भरतादीनां व्याख्याभिप्रायः वस्तुतस्तु मल्लिनाथव्याख्या स्वभावसुखप्रेषिणी इति सुधीभिर्विभाव्यम् ।

Sanjivani—निश्वासेनेति। शुद्धस्नानात् तैलादिरहित-स्नानात् परुषं कठिनस्पर्शं नूनम् आगण्डलम्बम् (सुप्सुपेति समासः)। अलकं चूर्णकुन्तलम् (जातावेकवचनम्।) अधरकिसलयं क्लेशयति क्लिश्नातीति वा तेन तथोक्तेन उष्णेनेत्यर्थः (क्लिश्यतेर्ण्यन्तात् क्लिश्नातेरण्यन्ताद्वा ताच्छील्ये णिनिः।) निश्वासेन विक्षिपन्तीं चालयन्तीं तथा स्वप्नजोऽपि स्वप्नावस्थाजन्योऽपि साक्षात्सम्भोगासम्भवादिति भावः मत्सम्भोगः कथं केनापि प्रकारेण उपनयेत् आगच्छेत् इति आशयेनेति शेषः (इतिनैवोक्तार्थत्वादप्रयोगः प्रयोगे चापौनरुक्त्यमित्यालङ्कारिकाः। प्रार्थनायां लिङ्।) नयनसलिलोत्पीड़ेन अश्रुप्रवृत्त्या रुद्धावकाशाम् आक्रान्तस्थानां दुर्लभामित्यर्थः निद्राम् आकाङ्क्षन्तीं स्वप्नहेतुत्वादिति भावः। अनेनाश्रुविसर्जनेन लज्जात्यागो व्यज्यते।२८।

রুক্ষস্নানহেতু নিশ্চিত কর্কশস্পর্শ গণ্ডদেশে লম্বমান চূর্ণকুন্তলগুলিকে অধরপল্লবপীড়নকারী (অর্থাৎ উষ্ণ) নিশ্বাসবায়ুদ্বারা বিক্ষিপ্তকারিণী এবং নিদ্রাবস্থাজাত (অর্থাৎ স্বপ্নলব্ধ) আমার সহিত সম্ভোগ কি উপায়ে পাওয়া যাইবে (এই ইচ্ছায়) নয়নজলের আবির্ভাবহেতু অপ্রাপ্তোপগমা নিদ্রাদেবীকে আকাঙ্ক্ষাকারিণী (আমার পত্নীকে দেখিবে)। ২৮।

(Thou shouldst see the lady) shaking to and fro the locks of curls, tough on account of baths without oils or anointments &c., and really hanging down on the cheek, by means of a sigh which cause pain to the lip resembling a new leaf (on account of its heat) and yearning for a sleep the possi-

bility of which is frustrated by a flood of tears, with a view to attain the enjoyment with me even if it were only in a dream.—28.

Notes.

1. शुद्धस्नानात् परुषं—शुद्धं स्नेहहीनं स्नानं (कर्मधा) तस्मात् कर्कशं —tough or rough owing to baths without oils &c.

2. नूनम् आगण्डलम्बम्—निश्चितम् indeed or really गण्डे लम्बते यः सः (गण्ड + लम्ब + अच् कर्त्तरि उपपद तत्पु.) गण्डलम्दः आ गण्डलम्बः (सुपसुपेति समासः) तं ; यद्वा आ गण्डात् गण्डं व्याप्य आगण्डं (अव्ययी भावः) आगण्डं लम्बते इति (आगण्ड + लम्ब + अच कर्त्तरि उपपदतत्पु.) आगण्ड-लम्बः तं—hanging on the cheeks.

3. अलकं—जातौ एकवचनम्—locks of curls.

4. अधरकिशलयक्लेशिना निश्वासेन—अधरः किशलयः इव (उपमितं व्याघ्रादिभिः सामान्याप्रयोगे इति उपमित समासः) अधरकिशलयः अधर-किशलयं क्लेशयति (दिवादि णिजन्त क्लिश) क्लिश्नाति (क्रयादि क्लिश) वा यः सः इति शीलार्थ णिनिः (उपपद ततपु.) अधरकिशलयक्लेशी तेन निश्वासवायुना—by the sigh that is schorching the shoot like (red) lip on account of its heat.

5. विक्षिपन्तीं—(वि + क्षिप् + शतृ + ङीप्) swinging, throwing

6. स्वप्नजोऽपि—स्वप्ने जायते यः सः (स्वप्न + जन् + ड कर्त्तरि)—procured in sleep because can not be realized on account of separation.

7. मत्सम्भोगः—मम सम्भोगः (सम् + भुज + घञ्) (६ तत्पु.) भरत, रामनाथ, हरगोविन्द, कल्याणमल्ल, सारोद्धारिणी, वल्लभ, मल्लिन and others read मत्संयोगः and this is preferred by Pandit I. C. Vidyasagar—enjoyment or connection with me.

8. कथम् उपनयेत्—केनापि प्रकारेण आपतेत् (प्रार्थनायां विधिलिङ्) somehow comes to pass.

आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम् ।
स्पर्शक्लिष्टामयमितनखेनासकृत् सारयन्तीं
गण्डाभोगात् कठिनविषमामेकवेणीं करेण॥२९।

9. इति—आशयेन इच्छया वा—intending. Mallinath remarks that the word आशयेन is not to be added in as much as its purpose is served by the word इति ।

10. नयनसलिलोत्पीड़रुद्धावकाशाम्—नयनयोः सलिलं (६ ततपु.) नयनसलिलं तस्य उत्पीड़ः (उत् + पीड़् + घञ् भावे) प्रवृत्तिः नयनसलिलोत्पीड़ेन रुद्धः (रुध् + क्त कर्म्मणि) नयनसलिलोत्पीड़रुद्धः (३या ततपु.) नयनसलिलोत्पीड़ रुद्धः अवकाशः स्थानं यस्याः सा (बहुव्री) नयनसलिलोत्पीड़रुद्धावकाशाम् adjective to निद्रां—whose place has been occupied by the flow of tears, (*i. e.*, very rare).

11. निद्राम् आकाङ्क्षन्तीं—निद्रां प्रार्थयमानां—longing for sleep because in her sleep she may dream her husband and have his company.

12. The अलङ्कार is—रूपक ।

13. Conjugations—

क्षिप्—क्षिप्यति, क्षिपति, क्षिपते, चिक्षेप, चिक्षिपे, अक्षैप्सीत्, अक्षिप्त ।

काङ्क्ष्—काङ्क्षति, चकाङ्क्ष, अकाङ्क्षीत् ।

Prose order—आद्ये विरहदिवसे दाम हित्वा या शिखा बद्धा शापस्य अन्ते विगलितशुचा मया उद्वेष्टनीयां स्पर्शक्लिष्टां कठिनविषमाम् एकवेणीं ताम् अयमितनखेन करेण गण्डाभोगात् असकृत् सारयन्तीम् । २९ ।

Paraphrase—प्रथमे विच्छेददिने मालां त्यक्त्वा या शिखा ग्रथिता शापावसाने वीतशोकेन मया मोचनीयां स्पर्शे सति मूलकेशेषु सव्यथां कर्कश-

निम्नोन्नताम एकीभूतवेणीं ताम् अच्छिन्ननखरेण करेण कपोलविस्तारात् विषान्नचित्ततया मुहुः अपसारयन्तीं तां पश्य। २९।

Change of voice—॰ यया शिखया बद्धया (अभावि) ॰ अपसारयन्ती दृश्यताम्। २९।

Sanjivani—आद्ये इति। आद्ये विरहदिवसे दाम मालां छित्वा त्यक्त्वा या शिखा बद्धा ग्रथिता शापस्यान्ते विगलितशुचा वीतशोकेन मया उद्वेष्टनीयां मोचनीयां स्पर्शक्लिष्टां स्पर्शे सति मूलकेशेषु सव्यथामित्यर्थः कठिना च सा विषमा निम्नोन्नता च ताम् (खञ्जकुब्जादिवदन्यतरस्य प्राधान्यविवक्षया विशेषणं विशेष्येण बहुलमिति समासः।) एकवेणीम् एकीभूतवेणीम् (पूर्व्वकालैका-दिना तत्पुरुषः।) तां शिखाम् अयमिता अकर्त्तितोपान्ता नखा यस्य तेन करेण गण्डाभोगात् कपोलविस्तारात् असकृत् मुहुर्मुहुः सारयन्तीम् अपसारयन्तीं तां पश्येति पूर्व्वेण सम्बन्धः। असकृत् सारणात् चित्तविभ्रमदशा सूचिता। २९।

প্রথম বিরহদিনে মালা পরিত্যাগ পূর্ব্বক যে শিখা (বেণী) বদ্ধ হইয়া ছিল ও শাপাবসানে দুঃখরহিত-মৎকর্ত্তৃক উন্মোচনযোগ্য স্পর্শক্লেশদায়ক কঠিন বিষম (উচুনীচু) এক বেণী (বিনুনী) বিশিষ্ট সেই শিখাটীকে অকর্ত্তিতনখসমন্বিত হস্ত দ্বারা কপোলপ্রদেশ হইতে পুনঃ পুনঃ অপসারণকারিণী (আমার পত্নীকে দেখিবে)। ২৯।

(Thou shouldst see the lady) repeatedly removing from her spacious cheeks by her hand having unpared nails that stiff and rough, unpleasant to the touch braided hair consisting of one pigtail, which was fastened on the first day of separation with me after extricating the garland from it and

the garland from it and which will have been unfastened by me freed from affliction at the expiration of the period of my curse.—29.

Notes.

N. B. In some M. S. S. the following sloka is to be found similar in import to the above and considered an interpolation:—

अन्विष्टव्यामवनिशयने सन्निकीर्णैकपार्श्वां
ततपर्य्यङ्कप्रगलितलवैश्छिन्नहारैरिवास्त्रैः ।
भूयो भूयः कठिनविषमां सारयन्तीं कपोला—
दामोक्तव्यामयमितनखेनैक वेणीं करेण ॥

1. आद्ये विरह दिवसे—आदौ भवः आद्यः (आदि + यत्) तस्मिन् विरहस्य दिवसः (६ष्ठीतत् पु) तस्मिन्—on the first day of separation (with me)

2. दाम् छित्वा या शिखा बद्धा—दाम (दो + मनिन् कर्म्मणि) तत् छित्वा (छा + क्त्वाच) या शिखा बद्धा (बन्ध् + क्त कर्म्मणि + आप्)—the pigtail that was fastened leaving out a garland (from it)

3. शापस्य अन्ते—after the termination of the period of curse viz. one year.

4. विगलितशुचा मया—(वि + गल् + क्त कर्त्तरि + आप्) विगलिता (शुच् = शुच + क्विप्) शुक्, विगलिता शुक् यस्मात् स तेन (बहुव्री.) मया यक्षेण—by me who is perfectly freed from affliction.

5. उद्वेष्टनीयां—(उत् + वेष्ट + अनीय कर्म्मणि + आप्) मोचनीयां —worthy of being unfastened. हरगोविन्द reads या मयोद्वेष्टनीया instead of तां मयोद्वेष्टनीयां । Here the सारोद्धा remarks इति अस्याः महासतीत्वं प्रतिपादितं ।

सा सन्नस्ताभरणमबला पेशलं धारयन्ती
शय्योत्सङ्गे निहितमसकृद्दुःखदुःखेन गात्रम्।

6. स्पर्शक्लिष्टां—स्पर्शे क्लिष्टा (क्लिश + क्त कर्त्तरि) (७मी तत्पु.) adjective to वेणीं—when touched causing pain on the sclap at the root of hair.

7. कठिनविषमां—कठिना च विषमा च कठिनविषमा तां (विशेषण द्वयेनापि कर्म्मधारयः इष्यते इति नियमात्)—tough and shaggy or rough. Mallinath disregards the इष्टसूत्र and compounds the word by the ordinary सूत्र विशेषणं विशेष्येण बहुलं by considering each one alternately as a noun although in reality they are adjectives.

8. एकवेणीं तां—एका वेणी (पूर्व्वकालैकेत्यादिना कर्म्मधा) तां एकवेणीं तां शिखां—the tuft of hair having one pigtail.

9. अयमितनखेन करेण—(यम + णिच् + क्त कर्म्मणि) = यमिताः न यमिताः अयमिताः (नञ् तत् पु.) अयमिताः नखाः यस्य स तेन (बहुव्री) adjective to करेण—by the hand whose nails are not pared.

10. गण्डाभोगात्—गण्डयोः कपोलयोः आभोगः परिपूर्णता (६ष्ठी तत् पु.) तस्मात्—from the broad cheeks.

11. असकृत—एकवारम् इत्यर्थे सकृत् इति अव्ययं निपातितं न सकृत् (नञ् तत् पु.) असकृत्—repeatedly.

12. सारयन्तीं—(सृ + णिच् + शतृ + ङीप्) विचालयन्तीं removing, मत् प्रियां पश्य इति पूर्व्वोक्तेन सम्बन्धः (see my lady engaged in these pursuits.)

13. The अलङ्कार is—अत्र असकृत् सारणरूपक्रियया चित्तविभ्रमरूप-वस्तु व्यज्यते।

14. Conjugation :—सृ see stanza 23.

त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं
प्रायः सर्व्वो भवति करुणावृत्तिरार्द्रान्तरात्मा।३०।

Prose order—अबला संन्यस्ताभरणं असकृत् दुःखदुःखेन शय्योत्सङ्गे निहितं पेशलं गात्रं धारयन्ती सा त्वामपि नवजलमयम् अस्रम् अवश्यं मोचयिष्यति प्रायः आर्द्रान्तरात्मा सर्व्वः करुणावृत्तिर्भवति। ३०।

Paraphrase—दुर्व्वला दुर्व्वलत्वात् धारणासमर्थतया त्यक्ताभरणं शय्यायामतिकृच्छ्रेण स्थापितं शय्याया दुःखमयत्वात् वारं वारं कृतपार्श्ववर्त्तनं मृदुलं शरीरं वहन्ती सा मत्प्रिया दृष्टैव भवन्तमपि नवजलमयं वाष्पं त्याजयिष्यति नूनम् तथाहि प्रायेण मृदुहृदयः सर्व्वः करुणार्द्रवृत्तिर्भवति। ३०।

Change of voice—अबलया तया ण्यादेः प्रधाने इति नियमात् त्वामपि अस्रं मोचयिष्यते। प्रायः आर्द्रान्तरात्मना सर्व्वेण करुणावृत्तिना भूयते। ३०।

Sanjivani—सेति। अबला दुर्व्वला सन्न्यस्ताभरणं कृशत्वात् परित्यक्ताभरणम् असकृत् अनेकशः दुःखदुःखेन दुःखप्रकारेण (प्रकारे गुणवचनस्येति द्विर्भावः।) शय्योत्सङ्गे निहितं पेशलं मृदुलं गात्रं शरीरं धारयन्ती वहन्ती अनेनात्यन्ताशक्त्या मूर्च्छावस्था सूच्यते सा त्वत्सखी त्वामपि नवजलमयं नवाम्बुरूपम् अस्रं वाष्पं अवश्यं सर्व्वथा मोचयिष्यति (द्विकर्म्मसु पचादीनां चोपसंख्यानमिष्यते इति मुचेः पचादित्वात् द्विकर्म्मकत्वम्।) तथाहि प्रायः प्रायेण आर्द्रान्तरात्मा मृदुहृदयः मेघस्तु द्रवान्तःशरीरः सर्व्वः करुणा करुणामयी वृत्तिः अन्तःकरणवृत्तिर्यस्य सः करुणावृत्तिर्भवति। अस्मिन्नवसरे सर्व्वथा शीघ्रं त्वया गन्तव्यम् अनन्तरदशापरिहारायेति सन्दर्भाभिप्रायः।

ननु किमिदमादिमां चक्षुःप्रीतिमुपेक्ष्य अवस्थान्तराण्येव तत्रभवान् कविराहृतवान् उच्यते सम्भोगो विप्रलम्भश्च द्विधा शृङ्गार उच्यते। संयुक्तयोस्तु सम्भोगो विप्रलम्भो वियुक्तयोः। पूर्व्वानुरागमानाख्यप्रवासकरुणात्मना। विप्रलम्भश्चतुर्धात्र प्रवासस्तत्र च त्रिधा। कार्य्यतः सम्भ्रमाच्छापादस्मिन् काव्ये तु शापजः। प्रागसङ्गतयोर्यूनोः सति पूर्व्वानुरञ्जने। चक्षुःप्रीत्यादयोऽवस्था दश स्युस्तत्क्रमो यथा। दृङ्मनःसङ्गसङ्कल्पा जागरः कृशतारतिः। ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश। पूर्व्वसङ्गतयोरेव प्रवास इति कारणात्। न तत्रापूर्व्ववत् चक्षुःप्रीतिरुत्पत्तिमर्हति। हृत्सङ्गस्य तु सिद्धस्याप्यविच्छेदोऽत्र वर्ण्यते। अनन्यापूर्व्ववद्वाच्या इति तावद्व्यवस्थितेः। वैयर्थ्यादादिमां हित्वा वैरस्यादन्तिमां तथा। हृत्सङ्गादोरिहाचष्ट कविरष्टाविति स्थितिः। मत्सादृश्यं लिखन्तीति पद्येऽस्मिन् प्रतिपादिता। चक्षुःप्रीतिरिति प्रोक्तं निरुत्तरकृताननम्। चक्षुःप्रीतिर्भवेच्चित्रेष्वदृष्टचरदर्शनात्। यथा मालविकारूपमग्निमित्रस्य पश्यतः। प्रोषितानान्तु भर्त्तॄणां क्व दृष्टादृष्टपूर्व्वता। अथ तत्रापि सन्देहे स्वकलत्राणि पृच्छतु। किं भर्त्तृप्रत्यभिज्ञा स्यात् किं वैदेशिकाभावना। प्रवासादागते स्वामिन्नित्यलं कलहैर्वृथा। ३०।

দুর্ব্বলা (অতএব) অলঙ্কারহীন পুনঃ পুনঃ অতিদুঃখহেতু শয্যা ক্রোড়ে নিক্ষিপ্ত মৃদুলশরীরধারিণী সেই মৎপত্নী তোমাকেও অবশ্যই নববারিরূপ অশ্রু মোচন করাইবেন (অর্থাৎ তাঁহার অবস্থা দেখিয়া

তুমি না রোদন করিয়া থাকিতে পারিবে না) যেহেতু প্রায়ই আর্দ্রান্তঃকরণ বিশিষ্ট লোক (মেঘ ও অভ্যন্তরে জলসমন্বিত) সকল করুণচিত্তবৃত্তি হইয়া থাকে। ৩০।

That lady (my wife) who bears a feeble body which is bereft of ornaments and which is laid repeatedly in the midst of a bedstead with severe affliction will surely cause thee to shed tear in the shape of fresh water-drops, because all mild-hearted people are generally of merciful disposition. 30.

Notes.

N. B. The reader is requested here to take notice of the lengthy dissertation of आदिरस, in verse, by Mallinath. Our commentator raising the question as to why मनःसङ्ग or चित्तासङ्ग—which is second in order in the psychology of आदिरस (see the order classified before in the notes on the XXIX. stanza of the पूर्व्वमेघ page 132) is depicted at once by our poet, in the foregoing stanza No. XXIII. उत्तरमेघ उत्सङ्गे वा मलिनवसने &c. (which has the gloss तत्राद्यमित्यादिना मनःसङ्गानुवृत्तिः सूचिता) inspite of नयनप्रीति or चक्षुःप्रीति which stands first in order, goes on thus :—

The शृङ्गार or आदिरस is of two kinds (1) सम्भोग and (2) विप्रलम्भ; सम्भोग is of the connected pair whileविप्रलम्भof the separated, then विप्रलम्भ is subdivided into four classes viz. पूर्व्वराग, मान, प्रवास and करुण। Of these प्रवास again may occur from three different sources कार्य्य, सम्भ्रम and शाप (curse) and it is evident that the मेघदूत is based upon शापज विप्रलम्भ शृङ्गार। On the first meeting of a youthful couple previously unconnected चक्षुःप्रीति takes place first and then मनःसङ्ग and so on

in accordance with the order discussed in the note on the 29th stanza of the पूर्व्वमेघ page 132. But here the यक्ष and his wife were not unknown to each other before their separation hence our poet at once describes, मनःसङ्ग in 23rd sloka उत्तरमेघ, सङ्कल्प in 24th, जागर in 25th, कार्श्य in 26th, विषयविद्वेष in 27th, लज्जात्याग in 28th, चित्तविभ्रम or उन्माद in 29th and मूर्च्छा in the 30th sloka the present one and causes the यक्षto exhort the cloud to be quick in his flight so that the last state viz. (मृति) death be avoided.

1. अबला—नास्ति बलं यस्याः सा (बहुव्री)—the feeble lady.

2. सन्नस्ताभरणं—(सम् + नि + अस् + क्त कर्म्मणि) सन्नस्तानि आभरणानि यस्मात् तत् (बहुव्री) adjective to गात्र—devoid of jewellery.

3. असकृत् दुःखदुःखेन—(एकवारम् इत्यर्थे सकृत् इत्यव्ययं निपातसिद्धं) न तथा इति असकृत् adverb modifyingनिहितं—not once that is repeatedly or time and again दुःखदुःखेन—प्रकारे गुणवचनस्य इति द्वित्वं अति दुःखेन इति भावः—sorrowfully.

4. शय्योत्सङ्गे निहितं—शय्यायाः (शी + क्यप अधिकरणे) उत्सङ्गः (उत् + सन्ज + घञ्)क्रोड़ः (६ तत्पु.) तस्मिन् निहितं (नि + धा or हि + क्त कर्म्मणि) स्थापितम् (अन्तर्भूतण्यर्थः)—placed in the midst of bedstead.

5. पेशलं गात्रं धारयन्ती—कोमलं शरीरं धारयन्ती (धृ चुरादि+ शतृ + ङीप)—bearing a soft and tender bodily frame ; भरत and रामनाथ read पेलवं and हरगोविन्द कोमलं for पेशलं ।

6. सा त्वाम् अपि नवजलमयम् अस्रम् अवश्यम् मोचयिष्यति—सा the lady viz my wife त्वाम् अपि even thee (the cloud) नवजलमयं नवं जलम् (कर्म्मधा) नवजलमेव इति (मयूरव्यंसकादित्वात् समासः) नवजलमयं (ताद्रूप्ये मयट् प्रत्ययः)

जाने सख्यास्तव मयि मनः सम्भृतस्नेहमस्मा-
दित्थम्भूतां प्रथमविरहे तामहं तर्कयामि ।
वाचालं मां न खलु सुभगम्मन्यभावः करोति
प्रत्यक्षं ते निखिलमचिरात् भ्रातरुक्तं मया यत् ३१।

असम् अश्रुजलम् अवश्यम् मोचयिष्यति (मुच+णिच्+स्यति लट् as मुच् is included within the list पचादि and again पचादि being included in the list of द्विकर्म्मक verbs by the इष्टिसूत्र "द्विकर्म्मसु पचादीनाम् चोपसंख्यानम् इष्यते" hence मुच् is द्विकर्म्मक—she will assuredly cause thee to shed tears of new rain waters. सनातन, हरगोविन्द and कल्याणमल्ल read जललवमयं instead of नवजलमयं and this reading is preferred by our Vidyasagar in as much as the word नव in the text is useless.

7. (तथाहि। प्रायः आर्द्रान्तरात्मा सर्व्वः—प्रायस् an indeclinable—generally or ordinarily, आर्द्रः दयार्द्रः अन्तरात्मा हृदयं यस्य सः (बहुव्रीः) आर्द्रान्तरात्मा सर्व्वः लोकः, मेघपक्षे तु अन्तर्जलौघः—all with hearts moistened with clemency.

8. करुणावृत्तिः भवति—करुणा (करुणामयी here used as an adjective like सुखदुःख &c.) वृत्तिः चित्तवृत्तिः यस्य सः (बहुव्रीः)—is of a charitable disposition. This अर्थान्तरन्यास indicates that the cloud should start for अलका at once, without delay so that यक्षपत्नी may survive.

9. The अलङ्कार is अत्र सामान्येन विशेषसमर्थनरूपः अर्थान्तरन्यासः ।

10. Conjugations—

धृ—धरति धरते धारयति, दधार वध्रे, अधार्षीत् अधृत ।

Prose order—हे मेघ तव सख्याः मनः मयि सम्भृतस्नेहं जाने, अस्मात् प्रथमविरहे ताम् इत्थम्भूतां तर्कयामि, सुभगम्मन्यभावः न खलु मां

वाचालं करोति किन्तु हे भ्रातः मया उक्तं यत् तत् अखिलम् अचिरात् ते प्रत्यक्षं भविष्यति। ३१।

Paraphrase—हे सखे तव सख्याः चित्तं मयि संचितानुरागं वेद्मि अस्मात् स्नेहज्ञानात् प्रथमविरहात् ते सखीम् पूर्व्वोक्तामवस्थामापन्नां निश्चिनोमि, न खलु सुभगमानित्वं कर्त्तृ मां बहुभाषिणं विधत्त अथवा हे भ्रातः मया आधिक्षामामित्यादि यत् उक्तं तत् अचिरेण ते प्रत्यक्षंभूत्वा सन्देहं ते निरसिष्यति। ३१।

Change of voice—* ज्ञायते अस्मात् * सा इत्थम्भूता तर्क्यते, सुभगम्मन्यभावेन न खलु अहं वाचालः क्रिये। किन्तु अहं यत् उक्तवान् तेन अखिलेन् ते प्रत्यक्षेण भविष्यते (वा भाविष्यते)। ३१।

Sanjivani—ननु ईदृशीं दशामापन्नेति कथं त्वया निश्चितम् अत आह जाने इति। हे मेघ तव सख्याः मनः मयि सम्भृतस्नेहं संचितानुरागं जाने अस्मात् स्नेहज्ञानकारणात् प्रथमविरहे प्रथमग्रहणं दुःखातिशय-द्योतनार्थम् त्वत्सखीम् इत्थम्भूतां पूर्व्वोक्तावस्थामापन्नां तर्कयामि। ननु सुभगमानिनामेष स्वभावो यदात्मनि स्त्रीणामनुरागप्रकटनं तत्राह वाचालमिति सुभगम् आत्मानं मन्यते इति सुभगम्मन्यः (आत्ममाने खश् चेति खश्प्रत्ययः। अरुर्द्विषदित्यादिना मुमागमः।) तस्य भावः सुभगम्मन्यभावः सुभगमानित्वं मां वाचालं बहु-भाषिणं न करोति खलु सौन्दर्य्याभिमानान्न प्रलपामी-त्यर्थः। (स्याज्जल्पकस्तु वाचालो वाचाटो बहुगर्ह्यवागि-त्यमरः। आलजाटचौ बहुभाषिणीत्यालच्प्रत्ययः।) किन्तु हे भ्रातः मयोक्तं यदाधिक्षामामित्यादि तत्

निखिलं सर्व्वम् अचिरात् शीघ्रमेव ते तव प्रत्यक्षं भविष्यतीति शेषः । ३१ ।

হে মেঘ তোমার সখীর (মৎপ্রিয়ার) মনঃ অতিশয় অনুরক্ত জানি সেই হেতু প্রথম বিরহে (প্রথম বলিয়া অতি ক্লেশদায়ক) তোমার সখীকে এইরূপ (পূর্ব্ববর্ণিত) অবস্থাপন্না বলিয়া বিবেচনা করিতেছি (যদি বল পত্নীর প্রেমভাজন বলিয়া এইরূপ কহিতেছ) সুভগম্মন্যতা (আমি পত্নীর একমাত্র প্রিয় এইরূপ ভাব) আমাকে নিশ্চয়ই বাচাল করিতেছে না কিন্তু হে ভ্রাতঃ আধিক্ষামা প্রভৃতি মদুক্ত সকলই শীঘ্র তোমার প্রত্যক্ষীভূত হইবে। ৩১।

(Oh cloud) I know that thy friend's (my wife's) mind is full of love for me, hence I fancy thy friend (my wife) to be in such plight (as described before) in this first (therefore very painful) separation, surely the idea that I am the sole object of my wife's affection is not making me garrulous but Oh my brother! all that is told by me will ere long be observed by thee.—31.

Notes.

1. तव सख्याः मनः मयि सम्भृतस्नेहं जाने—तव मेघस्य सख्याः मत्पत्न्याः मनः the heart of thy friend, मयि विषयाधारे ७मी विभक्तिः on me, सम्भृतस्नेहं—(सम्+भृ+क्त कर्म्मणि) सम्भृतः स्नेहः (स्निह्+घञ् भावे) यस्य तत् (बहुव्रीः) adjective to मनः is filled with love, जाने (ज्ञा+ए लट्) अकर्म्मकत्वात् ज्ञाधातोः आत्मनेपदत्वम् —I know.

2. अस्मात् प्रथमविरहे—अस्मात् अस्य हेतोः for this reason. प्रथमः विरहः (कर्म्मधा) तस्मिन्—on the first (and hence unbearable) separation.

3. ताम् इत्थम्भूताम् अहं तर्कयामि—ताम् तवसखीं मत्पत्नीमित्यर्थः

रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम्।

इत्थम् ("इदमः थमु" इति इदम्+थमु=इत्थं an indeclinable) इत्थम् +भू प्राप्तार्थक+क्त कर्त्तरि सुप्सुपेति समास ईदृशीं दशां प्राप्तां। प्राप्तार्थक भूधातोः भवति भवते इत्येवम् रूपम्—I infer her to be in such state as described by me before.

4. सुभगम्मन्यभावः—सु सुष्ठु भगः यस्य सः सुभगः (बहुव्री) आत्मानं सुभगं मन्यते इति (सुभग+मन्+खश् आत्ममानार्थे कर्त्तरि "आत्ममानेखश" इति सूत्रेण) सुभगम्मन्यः तस्य भावः (६ तत्पु.) सुभगम्मन्यभावः—the idea of one's considering oneself the sole object of love of one's wife.

5. मां वाचालं न करोति खलु—मां यच्च वाचालं (वच्+क्विप्=वाच्+आलच् "आलजाटचौ बहुभाषिणि इति)—does not make me garrulous or talkative.

6. हे भ्रातः मया यत् उक्तं—Oh brother (cloud) what is told by me.

7. निखिलम् अचिरात् ते प्रत्यक्षं (भविष्यति)=प्रतिगतम् अक्षीः (प्रति+अक्षि+अच् समासान्त अव्ययं विभक्ति&c. अव्ययीभावः—every thing will at once be brought under your perception; other reading for निखिलम् is सकलम्।

8. The अलङ्कार is—अत्र प्रथमार्द्धे वाक्यार्थहेतुकं काव्यलिङ्गम् द्वितीयार्द्धेऽपि तदेव।

9. Conjugations—

तर्क—तर्कयति, तर्कयामास, अतर्कीत्।

त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्या
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ॥ ३२ ।

Prose order—अलकैः रुद्धापाङ्गप्रसरम् अञ्जनस्नेहशून्यम् अपिच मधुनः प्रत्यादेशात् विस्मृतभ्रूविलासं त्वयि आसन्ने उपरिस्पन्दि मृगाक्ष्याः नयनं मीनक्षोभात् चलकुवलयश्रीतुलाम् एष्यति इति शङ्के। ३२।

Paraphrase—विशृङ्खलैः चूर्णकुन्तलैः रुद्धप्रान्तं स्निग्धाञ्जनरहितं मदिरापरिहारात् भ्रूभङ्गवर्जितं स्वकुशलवार्त्ताशंसिनि त्वयि प्रत्यासन्ने सति इष्टप्राप्तिसूचनाय उपरि स्फुरत् हरिणनेत्रायाः दक्षिणेतरत् चक्षुः मीनचलनात् कम्पमानस्य कुवलयस्य शोभया सादृश्यं प्राप्स्यतीति तर्कयामि। ३२।

Change of voice—रुद्धापाङ्गप्रसरेण अञ्जनस्नेहशून्येन अपिच * विस्मृतभ्रूविलासेन त्वयि आसन्ने उपरिस्पन्दिना मृगाक्ष्याः नयनेन * चलकुवलयश्रीतुला एष्यते इति तर्क्यते। ३२।

Sanjivani—रुद्धेति। अलकैः रुद्धाः अपाङ्गयोः प्रसराः यस्य तत् तथोक्तम् अञ्जनेन स्नेहः स्नैग्ध्यं तेन शून्यम् अपि च किञ्च मधुनः मद्यस्य प्रत्यादेशात् निराकरणात् परित्यागादित्यर्थः (प्रत्यादेशो निराकृतिरित्यमरः।) विस्मृतः भ्रूविलासः भ्रूभङ्गो येन तत् तथोक्तं नयनस्य रुद्धापाङ्गप्रसरत्वादिकं विरहसमुत्पन्नमिति भावः त्वयि आसन्ने सति स्वकुशलवार्त्ताशंसिनीति शेषः उपरि ऊर्द्धभागे स्पन्दते स्फुरति इति उपरिस्पन्दि (तथाच निमित्तनिदाने स्पन्दान्मूर्ध्नि क्षतलाभं भाले पट्टशुभं भ्रुवि। इष्टप्राप्तिं दृशोरूर्द्धमपाङ्गे हानिमादिशेदिति।) मृगाक्ष्याः तत्सख्याः नयनं वाममिति शेषः (वामभागस्तु नारीणां

पुंसां श्रेष्ठस्तु दक्षिणः। दाने देवादिपूजायां स्पन्देऽलङ्करणेऽपि चेति स्त्रीणां वामभागप्राशस्त्यात्।) मीनक्षोभात् मीनचलनात् चलस्य कुवलयस्य श्रिया शोभया तुलां साद्दृश्यम् एष्यतीति शङ्के तर्कयामि। ३२।

অলকগুলি দ্বারা প্রান্তভাগে গতি (দৃষ্টিপাত)-শূন্য, কজ্জলজনিত মসৃণতা হীন, আরও মদ্য পরিত্যাগহেতু ভ্রূভঙ্গ বিলাসশূন্য, তোমার সান্নিধান হেতু উপরিভাগে স্পন্দমান মৃগলোচনার (বাম) নয়ন মৎস্য-সঞ্চরণহেতু কম্পিত কুবলয়ের শোভা প্রাপ্ত হইবে ইহা আমি অনুমান করিতেছি। ৩২।

Methinks, the eye of the lady having deer-like eye, whose movements towards the ends are obstructed by curls of hair, wherefrom unctuousness of collyrium has departed, which has forgotten the wanton movement of brows on account of the relinquishment of wine, and throbbing in the upper part on thy arrival, will have the resemblance of the gracefulness of a lotus flower shaking in consequence of the movement of a fish.—32.

Notes.

1. अलकैः रुद्धापाङ्गप्रसरं—चूर्णकुन्तलैः: by the hanging curls of hair, अपाङ्गयोः प्रसराः (प्र + सृ + अल् भावे) (৬ष्ठी ततपु.) रुद्धाः (रुध् + क्त कर्मणि) अपाङ्गप्रसराः यस्य तत् (बहुव्रो) adjective to नयनम्—whose movements towards the ends of the eye are obstructed by the hanging locks of hair.

2. अञ्जनस्नेहशून्यं—अञ्जनेन (अनूज् + अनट् करणे) कज्जलेन स्नेहः

(वैमध्यं) (६या तत्पु.) तेन अञ्जनस्नेहेन शून्यं (३या तत्पु.)—devoid of the oiliness of the collyrium (for eye).

3. अपिच मधुनः प्रत्यादेशात् विस्मृतभ्रूविलासं—प्रति+आ+दिश्+घञ् भावे) प्रत्यादेशः तस्मात् हेतौ ५मी विभक्तिः, भ्रुवोः विलासः विभ्रमः (६ तत्पु.) विस्मृतः (वि+स्मृ+क्त कर्त्तरि) भ्रूविलासः येन तत् (बहुव्री) – moreover which (the eye) has forgotten the amorous movements of the brows on account of the rejection of wine. C.f. मधुनयनयोर्विभ्रमादेशदक्ष' stanza XI. उत्तरमेघ।

4. त्वयि आसन्ने सति—त्वयि भावे ७मी आसन्ने (आ + सद् + क्त कर्त्तरि)—when thou art near.

5. उपरिस्पन्दि—उपरि सप्तम्यन्तमव्ययम् ऊर्ध्वभागे स्पन्दते कम्पते इति (उपरि + स्पन्द + णिनि गतिकारकोपपदाभ्याम् कृद्भिः सह समासवचनं प्रागसुबुत्पत्तेः इति उपपद तत्पु.)—throbbing in the upper part, adjective to नयनं; this is because in the निमित्तनिदान the throbbing or palpitation of the upper part of the eye is significatory of इष्टप्राप्ति (the acquisition of wished for things) here of course the cloud is the vihicle wished for.

6. मृगाक्ष्याः नयनं—मृग्याः अक्षिणी इव अक्षिणी यस्याः सा (सप्तम्युपमानेत्यादिना उपमानोत्तरपदलोपी बहुव्री) तस्याः नयनं (नी+अनट् करणे)—the eye of the lady having eyes like those of a deer. Here it is the left eye in as much as this is auspicious in females.

7. मीनक्षोभात्—मीनस्य मत्स्यस्य क्षोभः (क्षुभ्+घञ् भावे) चाञ्चल्यं (६ तत्पु.) तस्मात् हेतौ ५मी विभक्तिः)—on account of the movement of a fish (in the water.)

8. चलकुवलयश्रीतुलामेष्यति—चलति इति चलं (चल+अच् पचादि) चलं कुवलयं (कर्मधा) चलकुवलयस्य श्रीः शोभा (६ तत्पु.) तया चल-

वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयै-
र्मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या ।
सम्भोगान्ते मम समुचितो हस्तसंवाहनानां
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ॥ ३३ ।

कुवलयश्रिया तुला(३या तत्पु.) ताम् एष्यति (इ + स्यति लट्)—will resemble the beauty of a moving lotus. भरत रामनाथ हरगोविन्द read मीनक्षोभाकुल कुवलयश्रीतुलाम् for मीनक्षोभाच्चलकुवलयश्रीतुलाम् and explain मीनस्य क्षोभेण सङ्घट्टनेन आकुलं चञ्चलं यत् कुवलयं तस्य या श्रीः शोभा तस्याः तुलां सादृश्यम् and this reading is preferable in the opinion of I. C. Vidyasagar.

9. इति शङ्के—I conjecture this.

10. The अलङ्कार is:—श्रीतुलाम् एष्यति इत्यार्थी पूर्णोपमा सा च उपरिस्पन्दि इति काव्यलिङ्गं निर्व्वाहकत्वेन अपेक्षते इत्युभयोः अङ्गाङ्गिभावेन संकरः मीनक्षोभात् चलितनलिनीविभ्रमं प्राप्स्यतीति पाठे विभ्रमसिव विभ्रमम् इति सादृश्याक्षेपे काव्यलिङ्गसंकीर्णा निदर्शना ।

11. Conjugations—

शनक्—शङ्कते, शशङ्के, अशङ्किष्ट ।

Prose order—मदीयैः कररुहपदैः मुच्यमानः चिरपरिचितं मुक्ताजालं दैवगत्या त्याजितः सम्भोगान्ते मम हस्तसंवाहनानां समुचितः सरसकदलीस्तम्भगौरः अस्याः वामः ऊरुः चलत्वं यास्यति । ३३ ।

Paraphrase—नखाङ्करहितः चिराभ्यस्तं मौक्तिकसरमयं कटिभूषणं दैववशेन मोचितः उपभोगावसाने मम हस्तेन मर्द्दनानां योग्यः रसार्द्रः कदलीस्तम्भ इव पाण्डुरः तस्याः वामः ऊरुः त्वय्यासन्ने स्पन्दनं प्राप्स्यति । ३३ ।

Change of voice—मुच्यमानेन * त्याजितेन * समुचितेन सरसकदलीस्तम्भगौरेण तस्याः वामेन ऊरुणा चलत्वं यास्यते । ३३ ।

Sanjivani—मदीयैः कररुहपदैः नखपदैः (पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियामित्यमरः।) मुच्यमानः परिहीयमाणः नखाङ्करहित इत्यर्थः (ऊर्व्वोर्नखपदास्पदत्वन्तु रतिरहस्ये कण्ठकक्षकुचपार्श्वभुजोरःश्रोणिसक्थिषु नखास्पदमाहुरिति।) चिरपरिचितं चिराभ्यस्तं मुक्ताजालं मौक्तिकसरमयं कटिभूषणं दैवगत्या दैववशेन त्याजितः सम्प्रति नखपदोपाभावेन शीतोपचारस्य तस्य वैयर्थ्यादिति भावः (त्यजतेर्ण्यन्तात् कर्म्मणि क्तः। द्विकर्म्मसु पचादीनां चोपसंख्यानमिष्यते इति पचादित्वात् द्विकर्म्मकत्वम्।) सम्भोगान्ते मम हस्तसंवाहनानां हस्तेन मर्द्दनानाम् (संवाहनं मर्द्दनं स्यादित्यमरः।) समुचितः योग्यः सरसः यः परिपक्को न शुष्कश्च स एव विवक्षितः तत्रैव पाण्डिमसम्भवात् स चासौ कदलीस्तम्भश्च स इव गौरः पाण्डुरः (गौरः करीरे सिद्धार्थे शुक्ले पीतेऽरुणेऽपि चेति मालतीमालायाम्।) अस्याः प्रियायाः वामः ऊरुः चलत्वं स्पन्दनं यास्यति प्राप्स्यते। ऊरोः स्पन्दाद्रतिं विद्यादूर्व्वोः प्राप्तिं सुवाससः इति निमित्तनिदाने। ३३।

আমার নখাঙ্কুররহিত, দৈবগতি দ্বারা চিরাভ্যস্ত মুক্তাময়-কটিভূষণ পরিশূন্য সম্ভোগান্তে আমার হস্তদ্বয়ের মর্দ্দনের যোগ্য সরস কদলীস্তম্ভবৎ শুভ্র তাঁহার (আমার পত্নীর) বাম উরুদেশ স্পন্দিত হইবে। ৩৩।

The left thigh of my wife will be throbbed (on thy arrival) which is (now) devoid of the marks of my nails,

and which has been caused to abandon the long accustomed string of pearls (ornament of the hips) by the decree of fate, which is worthy of being shampooed by my hands after sexual enjoyment, and which is as white or pale as the stem of a juicy (full grown) plantain tree.—33.

Notes.

1. मदीयैः कररुहपदैः मुच्यमानः—(अस्मद् + छ = मदीयः) मत्सम्बन्धिभिः, रोहति इति रुहः (रुह् + अच् पचादि) करे रुहः (७मी तत्पु.) तस्य पदानि चिह्नानि (६ तत्पु.) कररुहपदानि तैः मुच्यमानः (मुच् + शानच् कर्म्मणि —free from the marks of my nails, for places of the body generally marked by nails see Mallinath.

2. चिरपरिचितं मुक्ताजालं दैवगत्या त्याजितः—चिरं परिचितं (परि + चि + क्त कर्म्मणि) (२या तत्पु. "अत्यन्तसंयोगे च")—known from a long time. मुक्तायाः जालं (६ तत्पु.) a girdle or ornament of the waist made of strings of pearls दैवगत्या दैवस्य गतिः (६ष्ठी तत्पु. तया अदृष्टपरिपाकेन—by the evil decree of fate. त्याजितः—(त्यज् + णिच् + क्त कर्म्मणि)—caused to forsake because no more is there the necessity of cool pearls as the part is not scratched by my nails. Here the root त्यज falling under the पचादि class is द्विकर्म्मक by the इष्टसूत्र "द्विकर्म्मसु पचादीनाम् चोपसंख्यानम्"।

3. सम्भोगान्ते मम हस्त संवाहनानां समुचितः—(सम् + भुज + घञ् भावे) सम्भोगः तस्य अन्तः (६ तत्पु.) तस्मिन्—after the sexual intercourse. मम हस्ताभ्यां संवाहनानि (सम् + वाह + अनट् भावे) (३या तत्पु.) समुचितः (सम् + उच् + क्त कर्त्तरि)—worthy of being shampooed by my hands.

4. सरसकदलीस्तम्भगौरः—रसेन सह वर्त्तमानः सरसः (तुल्ययोगे,

तस्मिन् काले जलद यदि सा लब्धनिद्रासुखा स्या-
दन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व ।
मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथञ्चित्
सद्यःकण्ठच्युतभुजलताग्रन्थि गाढ़ोपगूढ़म् ।३४।

वहुव्री) कदल्याः स्तम्भः (६ तत्पु.) कदलीस्तम्भः सरसः चासौ कदलीस्तम्भश्चेति (कर्म्मधा.) सरसकदलीस्तम्भः इव गौरः शुक्लः (उपमानानि सामान्यवचनैः इति उपमानसमासः)—adjective to ऊरुः—white as a juicy (in order to be white the plantain stem must be a full grown one but not dried up hence juicy) stem of the plantain (Musa Banana) tree. सनातन and हरगोविन्द read कनककदलीस्तम्भगौरः for सरसकदलीस्तम्भगौरः and this reading is preferred by our Vidyasagar in as much as the hill in अलका has been described by the poet as कनककदलीवेष्टन प्रेक्षणीयः ।

5. अस्याः वामः ऊरुः—the left thigh of the wife of यक्ष ।

6. चलत्वं यास्यति—चलति इति चलः (चल्+अच् पचादि) चलस्य भावः चलत्वं स्पन्दनं यास्यति—will have palpitation or throbbing sensation.

7. The अलङ्कार is:—सरसकदलीस्तम्भगौरः इत्यत्र श्रौती लुप्तोपमा ।

8. Conjugations—

वाह—वाहते, ववाहे वाहयाञ्चकार वाहयाञ्चक्रे ।

Prose order—हे जलद ! तस्मिन् काले सा यदि लब्धनिद्रासुखा स्यात् तर्हि एनाम् अन्वास्य स्तनितविमुखः याममात्रं सहस्व अस्याः प्रणयिनि मयि कथञ्चित् स्वप्नलब्धे सति गाढ़ोपगूढ़ं सद्यः कण्ठच्युतभुजलताग्रन्थि माभूत् । ३४ ।

Paraphrase—हे मेघ ! त्वदुपसर्पणकाले सा मत्प्रिया यदि निद्रा-

जनितां निर्वृतिम् अनुभवन्ती त्वया दृश्यते तर्हि निद्राणामेनाम् अन्वासीनः प्रहरमात्रं प्रतीक्षस्व मैनां स्तनितेन समुद्वेजय। स्तनितोद्वेगे क्षणेन स्वप्ने समनुभूयमानस्य तस्याः मदालिङ्गनसुखस्य व्याघातः स्यात् स च मामूत् अनुभवतु वराकी अलभ्यलभ्यां चणिका निर्वृतिम्। ३४।

Change of voice—॰ तया यदि लब्धनिद्रासुखया भूयेत यदि ॰ ॰ स्तनितविमुखेन ॰ सह्यताम् ॰ गाढ़ोपगूढ़ेन सद्यः कण्ठच्युतभुजलतायन्थिना मा भावि। ३४।

Sanjivani—तस्मिन्निति। हे जलद तस्मिन् काले त्वदुपसर्पणकाले सा मत्प्रिया लब्धं निद्रासुखं यया तादृशी स्यात् यदि स्यात् चेत् एनां निद्राणाम् अन्वास्य पश्चादासित्वत्यर्थः (उपसर्गवशात् सकर्म्मकत्वम्।) स्तनितविमुखः गर्ज्जितपराङ्मुखः निःशब्दः सन् अन्यथा निद्राभङ्गः स्यादिति भावः याममात्रं प्रहरमात्रम् (द्वौ यामप्रहरौ समावित्यमरः।) सहस्व प्रतीक्षस्व (प्रार्थनायां लोट्।) शक्तयोरेकवारसुरतस्य यामावधिकत्वात् स्वप्नेऽपि तथा भवितव्यमित्यभिप्रायः (तथा च रतिसर्व्वस्वे एकवारावधि-र्यामो रतस्य परमो मतः। चण्डशक्तिमतोर्यूनोरुद्भटक्रम-वर्त्तिनोरिति।) यामसहनस्य प्रयोजनमाह मा भूदिति अस्याः प्रियायाः प्रणयिनि प्रेयसि मयि कथञ्चित् क्षणेण स्वप्नलब्धे सति गाढ़ोपगूढ़ं गाढ़ालिङ्गनम् (नपुंसके भावे क्तः।) सद्यः तत्क्षणं कण्ठात् च्युतः स्रस्तः भुज-लतयोः ग्रन्थिःबन्धो यस्य तत् मा भूत् मास्तु कथञ्चिल्लब्धस्य आलिङ्गनस्य विघातो मा भूदित्यर्थः। नचात्र निद्रोक्ति-

স্তামুন্নিদ্রামিতি পূর্ব্বোক্তেন নিদ্রাচ্ছেদেন বিরুধ্যতে পুনঃ স্বপ্নস্যাদ্যবস্থাসু পাচিকনিদ্রাসম্ভবাৎ তথা চ রসরত্নাকরে অশক্তৌ রোদনং নিদ্রা নির্লজ্জানর্থবাগ্ শ্রমঃ। স্বপ্নমাদিষু জায়ন্তে দশাভেদেষু বাসুকে ইতি। ৩৪।

হে জলদ! সেই সময়ে (অর্থাৎ তোমার উপস্থিতি কালে) তিনি (মৎপত্নী) যদি নিদ্রাসুখলাভ করিতে থাকেন (অর্থাৎ যদি নিদ্রিতা হন) তাহা হইলে ইহাঁর পশ্চাদ্ভাগে উপবেশন পূর্ব্বক গর্জ্জনে পরাঙ্মুখ হইয়া প্রহর মাত্র সময় প্রতীক্ষা করিও, (অপেক্ষা করিবার কারণ এই যে) ইঁহার (মৎপত্নীর) প্রিয়তম আমি অতি কষ্টে স্বপ্নে উপলব্ধ হইলে পরে (তৎকর্তৃক আমাকে) গাঢ় আলিঙ্গন তৎক্ষণাৎ কণ্ঠ হইতে চ্যুতবাহুলতাবন্ধনসমন্বিত না হউক (অর্থাৎ তোমার গর্জ্জনে নিদ্রাভঙ্গ বশতঃ মৎপত্নীর স্বামিসহ স্বপ্নলব্ধ আলিঙ্গন বিচ্ছিন্ন না হউক)। ৩৪।

O bestower of water (cloud)! if at that time (that is the moment of thy arrival) she (my wife) be possessed of the happiness of sleep, then please wait for one *Jama* (a period of about three hours) by sitting behind her being disinclined to thundering noise, (for) let not the knot of her fast embrace be removed suddenly from the neck (of me) by her hands resembling creepers after she has met me her beloved husband with difficulty in dream.—34.

Notes.

1. হে জলদ—জলং দদাতি ইতি (জল + দা + অ কর্ত্তরি) oh cloud.

2. যস্মিন্ কালে—at that time when thou shouldst reach my palace for seeing my wife.

3. सा लब्धनिद्रासुखा स्यात् यदि—निद्रायाः सुखं (६ष्ठी तत् पु.) निद्रासुखं लब्धं (लभ+क्त कर्म्मणि) निद्रासुखं यया सा (बहुव्री.)—in case she be in the enjoyment of happiness of sleep.

4. एनाम् अन्वास्य—एतद् शब्दस्य एनादेशः अन्वादेशे इति एनां निद्रितां मत्प्रियाम् अन्वास्य (अनु पश्चात्+आस+क्त्वाच् स्थाने ल्यप्)—sitting behind her (my wife) now although the root आस् is intransitive अकर्म्मक yet it is transitive सकर्म्मक here by the addition of the prefix उपसर्ग अनु। भरत. राम. हर. कल्याण and others read तत्रासीनः for अन्वास्यैनाम्। another reading is अन्वासीनः।

5. स्तनित विमुखः—(स्तन+क्त भावे) स्तनितं मेघध्वनिः विगतं सुखं यस्य सः (प्रादिभ्यो धातुजस्य उत्तरपदलोपश्च इति बहुव्री.) विमुखः स्तनिते स्तनितात् वा विमुखः स्तनितविमुखः (७मी ५मी वा तत्पु.)—without making the thundering noise (for fear of awakening her.).

6. याममात्रं सहस्व—यामः एव याममात्रं (मयूरव्यंसकादित्वात् समासः) तत् याममात्रं सहस्व अपेक्षस्व।—kindly wait for a period of time called a याम or about three hours. भरत. हर. कल्याण and Wilson read सहेथाः for सहस्व) For the propriety of the epithet याम in याममात्र see Mallinath.

7. अस्याः प्रणयिनि मयि कथञ्चित् स्वप्नलब्धे सति—अस्याः मत्पत्न्याः प्रणयः अस्ति अस्य इति (प्रणय+इन्) प्रियतमे मयि यद्वे भावे ७मी विभक्तिः। कथञ्चित् स्वप्ने लब्धः (लभ्+क्त कर्म्मणि) (७मी तत्पु.)—when I the object of love am acquired (by her) in a dream.

8. गाढ़ोपगूढ़—गाढ़म् उपगूढ़ं (उप+गुह+क्त भावे "नपुंसके भावे क्त") उपगूहनम् आलिङ्गनम् इत्यर्थः—fast or close embrace. this is connected with अस्याः viz. her fast embrace.

9. सद्यः कण्ठच्युतभुजलताग्रन्थि—कण्ठात् च्युतः (५मी तत्पु.)

तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम् ।
विद्युद्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे
वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः ॥ ३५॥

भुजौ लते इव (उपमित समासः) भुजलते तयोः भुजलतयोः ग्रन्थिः (ग्रन्थ + इन् भावे) (षष्ठीतत् पु.) भुजलताग्रन्थिः, कण्ठच्युतः भुजलताग्रन्थिः यस्य तत् (बहुव्री.) adjective to उपगूढं । सद्यस् an indeclinable may be either compounded or not, if compounded it is सुप् सुपति समासः । The base of कण्ठच्युतभुजलताग्रन्थि is to be declined like धनादि in the neuter gender.

10. मा भूत्—let it not be so, the अडागम is prohibited when माङ् is added.

11. The अलङ्कार is:—याममात्रं सहस्वेति वाक्यस्य स्वप्नलब्धसुरतसुखव्याघाताभावे हेतुत्वेनोपन्यासात् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ।

12. Conjugations—स्तन—स्तनति । तस्तान । अस्तनीत्, अस्तानीत् ।

Prose order—स्वजलकणिकाशीतलेन अनिलेन ताम् उत्थाप्य अभिनवैः मालतीनां जालकैः समं प्रत्याश्वस्तां त्वत्सनाथे गवाक्षे स्तिमितनयनां मानिनीं त्वं विद्युद्गर्भः धीरः स्तनितवचनैः वक्तुं प्रक्रमेथाः । ३५ ।

Paraphrase—स्वजललवैः शीतलेन वायुना प्रसुप्तामिव तां मत्प्रियां प्रबोध्य जातामिव पुनः उज्जीविताम् अहो प्रमादः कोऽसौ इति विस्मयात् त्वत्-सहिते गवाक्षे निश्चलनेत्राम् अनौचित्यासहिष्णुम् एनां त्वम् अन्तर्लीनविद्युत्कः धैर्यान्वितश्च सन् गर्जितरूपैः वाक्यैः इत्थम् अभिधातुम् उपक्रमस्व । ३५ ।

Change of voice—* विद्युद्गर्भेण धीरेण * * प्रक्रम्यताम् । ३५ ।

Sanjivani—तामिति। तां प्रियां स्वस्य जलकणिकाभिः जलविन्दुभिः शीतलेन अनिलेन उत्थाप्य प्रबोध्य (एतेन तस्याः प्रभुत्वात् व्यजनानिलसमाधिर्व्यज्यते यथाह भोजराजः मृदुभिर्मर्द्दनैः पादे शीतलैर्व्यजनैस्तनौ। श्रुतौ च मधुरैर्गीतैर्निद्रातो बोधयेत् प्रभुमिति।) अभिनवैः नूतनैः मालतीनां जालकैः समं जातीकुड्मलैः सह (सुमना मालती जातिरिति साकं सत्रा समं सहेति चामरः जालकं क्लीबे कलिका कोरकः पुमानिति च अमरः।) प्रत्याश्वस्तां शिशिरानिलसम्पर्कात् पुनरुज्जीवितामित्यर्थः (श्वसेः कर्त्तरि क्तः। आदितश्चेति चकारादिट्‌प्रतिषेधः।) एतेनास्याः सौकुमार्य्यं गम्यते त्वत्सनाथे त्वत्सहिते (सनाथं प्रभुमित्याहुः सहिते चित्ततापिनीति शब्दार्णवे।) गवाक्षे स्तिमितनयनां कोऽसौ इति विस्मयनिश्चलनेत्रां मानिनीं मनस्विनीम् अनौचित्यासहिष्णुमित्यर्थः विद्युत् गर्भः अन्तःस्था यस्य स विद्युद्गर्भः अन्तर्लीनविद्युत्क इत्यर्थः (गर्भोऽपवरकेऽन्तःस्थे कुक्षिस्थे चार्भके मत इति शब्दार्णवे)। दृष्टिप्रतिघातेन वक्तृमुखावलोकनप्रतिबन्धकत्वात् न द्योतितव्यामिति भावः धीरः दृढ़ः सन् अन्यथा स्खलनवादित्वेनानाश्वासनप्रसङ्गादिति भावः स्तनितान्येव वचनानि तैः वक्तुं प्रक्रमेथाः उपक्रमस्व। विध्यर्थे लिङ्। प्रोपाभ्यां समर्थाभ्यामित्यात्मनेपदम्। ३५।

স্বীয় জলকণসম্পর্কে শীতল-বায়ু দ্বারা জাগরিতা তাঁহাকে (মৎপত্নীকে)

ও নূতন মালতী কুসুমের সহিত (বায়ুসংস্পর্শে) পুনরুজ্জীবিতা, তোমা কর্ত্তৃক অধিষ্ঠিত গবাক্ষে বিস্ময়নিশ্চলদৃষ্টিক্ষেপকারিণী মনস্বিনী মৎপত্নীকে (দৃষ্টিবিঘাতক বলিয়া) বিদ্যুৎকে স্বকক্ষে লীন রাখিয়া ও ধীরস্বভাব হইয়া গর্জ্জনরূপবাক্য দ্বারা (নিম্নোল্লিখিত) বাক্য বলিতে আরম্ভ করিবে। ৩৫।

(Oh cloud) thou, having concealed thy lightening within thyself and being firmminded shouldst commence accosting with words of thundering murmurs her the proud lady who is revived along with new buds of *Malati* flowers (by the cold wind) and who is looking motionlessly at the window occupied by thee, after having (previously) awakened her by means of wind made cold in contact with thy water.—35.

Notes.

1. तां स्वजलकणिकाशीतलेन अनिलेन उत्थाप्य—तां पूर्व्वोक्तां मत्प्रियां her, जलस्य कणिकाः जलकणिकाः (६ तत्पु.) स्वस्य जलकणिकाः (६ष्ठी तत्पु.) ताभिः स्वजलकणिकाभिः शीतलः (३या तत्पु.) स्वजलकणिकाशीतलः तेन—cool on account of the drops of thy water, adjective to, अनिलेन, अनिलेन (अन्यते प्राणान् धार्य्यते अनेन इति अन + इल् करणे) करणे तृतीया विभक्तिः by wind, उत्थाप्य (उत् + स्था + णिच् ल्यप्) —having roused, Mallinath here cites a passage from भोजराज that masters deserve such fanning by servants.

2. अभिनवैः मालतीनां जालकैः सह—मालती वा जाति—is a sort of jasmine,—along with (at the same time) the buds of fresh jasmines; this is the explanation of commentators but Prof. Wilson is not satisfied with this interpretation and remarks. The commentators have taken great pains to explain this allusion to the flower, their labor is however very idle, as

the comparison has always been familiar to Poetry, thus Catallus call a lady "Like the white Parthenice or yellow popy."

3. प्रत्याश्वस्तां—(प्रति + आङ् + श्वस् + क्त कर्त्तरि + टाप्)—revived, this epithet shews her tenderness.

4. त्वत्सनाथे गवाक्षे स्तिमितनयनां—नाथेन सह वर्त्तमानः सनाथः, त्वया सनाथः (३या तत्पु.) तस्मिन्—occupied by thee, गवाक्षे—in the window or lattice, स्तिमितनयनां—(स्तिम + क्त कर्त्तरि) स्तिमिते निश्चले नयने यस्याः सा तां (बहुव्री)—looking fixedly at.

5. मानिनीं—(मान + इनि + ङीप्)—proud that is who can not bear impertinence.

6. विद्युद्गर्भः—विद्युत् गर्भः शरीराभ्यन्तरस्था यस्य सः (बहुव्री)—concealing the lightening within thyself. Here भरत रामनाथ हरगोविन्द and Wilson read विद्युत्कम्पस्तिमितनयनां in the place of विद्युद्गर्भः स्तिमितनयनां, भरत explains as—विद्युतः कम्पेन चलनेन स्तिमिते नयने यस्याः सा तादृशीम्। रामनाथ taking विद्युत्कम्प a separate word explains as - विद्युता सह कम्पते इति विद्युत्कम्पो मेघः तस्य सम्बोधनं हे विद्युत्कम्पेति। हरगोविन्द explains as—विद्युत्कम्पेन तड़ित्प्रकाशेन स्तिमितनयनाम् आकस्मिक प्रकाशात् स्थिरीकृतलोचनाम्। But कल्याणमल्ल, सारोद्धारिणी, सुमतिविजय, सुभिम वल्लभ and others read विद्युद्गर्भस्तिमितनयनां। कल्याणमल्ल explains—हे विद्युद्गर्भ ! विद्युत् गर्भे यस्य सः तथा सम्बोधनद्वारेण उपदेशं ददाति भवता अन्तर्गतविद्युता तत्र भावितव्यम्। अन्यथा भीरुस्वभावत्वात् वनितानां सा भेष्यति इति भावः। The सारोद्धारिणी explains—कथम्भूतः त्वं विद्युद्गर्भः विद्युत् गर्भे मध्ये यस्य सः स्त्रीद्वितीयः, परनारी सम्भाषणम् एकाकिनः नोचितम्। अथ हे विद्युद्गर्भ ! अन्तर्गूढ़विद्युता भवता भाव्यम् अन्यथा भीरुत्वात् सा भेष्यति इति।

भर्त्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं
तत्सन्देशैर्हृदयनिहितैरागतं त्वत्समीपम् ।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ।३६।

7. धीरः सन्—being unswerving (because if thou falter then thy object will be frustrated.

8. स्तनितवचनैः वक्तुं प्रक्रमेथाः—(स्तन + क्त भावे) स्तनितानि गर्ज्जितानि एव वचनानि (रूपक कर्म्मधा) तैः करणे तृतीया वक्तुं कथयितुं प्रक्रमेथाः उपक्रमस्व (प्र+क्रम+ईयास् विधिलिङ् (in the sense of duty) (प्रोपाभ्याम् समर्थाभ्याम् इति प्रपूर्व्वस्य क्रमधातोः आत्मनेपदत्वम्) thou shouldst commence speaking by thy words of thundering murmurs. भरत reads धीरध्वनित वचनैः for धीरः स्तनितवचनैः and explains मन्दगर्ज्जितरूपवाक्यैः । रामनाथ reads धीरस्तनितवचनः and explains मन्दगर्ज्जितवाक्यः सन् ।

9. The अलङ्कार is—मालतीनामभिनवैः जालकैः समम् इत्यत्र यच्चपवाः प्रबोधनमन्यत् मालत्याः प्रबोधनञ्चान्यत् इति भेदे अभेदरूपा अतिशयोक्तिः तन्मूला सहोक्तिः अलङ्कारः स्तनितवचनैः इत्यत्र स्तनिते वचनत्वारोपात् प्रकृते कथन कार्य्ये उपयोगाच्च परिणामालङ्कारः इत्युभयोः परस्परनिरपेक्षत्वात् संसृष्टिः परिणामलक्षणम् । "विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि परिणामो भवेत् तुल्यातुल्याधिकरणो द्विधा" ।

इति दर्पणकृत् ।

10. Conjugations—
क्रम—क्राम्यति, क्रामति क्रमते । चक्राम, चक्रमे, अक्रमीत् ।

Prose order—हे अविधवे ! मां भर्त्तुः प्रियं मित्रं हृदयनिहितैः तत्सन्देशैः त्वत्समीपम् आगतम् अम्बुवाहं विद्धि । यः मन्द्रस्निग्धैः ध्वनिभिः अबलावेणिमोक्षोत्सुकानि पथि श्राम्यतां प्रोषितानां वृन्दानि त्वरयति । ३६ ।

Paraphrase—हे सभर्त्तृके ! मां त्वत्पत्युः प्रियं सुहृदं हृदयस्थापित-भर्त्तृसन्देशकथनार्थं त्वदन्तिकमागतम् मेघं जानीहि यो मेघः पथीनां वेणी-मोचने प्रसितान् क्लान्ततया पथि कियन्तमपि कालं विश्राम्यतां प्रवासिनां संघान् गम्भीरश्राव्यैः गर्ज्जितैः सत्वरं गमयति। ३६।

Change of voice—* अहम् * आयतः अम्बुवाहः विद्यं येन * त्वर्य्यते। ३६।

Sanjivani—सम्प्रति दूतस्य श्रोतृजनाभिमुखीकरण-चातुरीमुपदिशति भर्त्तुरिति। विधवा गतभर्त्तृका न भवतीति अविधवे सभर्त्तृके अनेन भर्त्तृजीवनसूचनात् अनिष्टागमशङ्कां वारयति मां भर्त्तुः तव पत्युः प्रियं मित्रं प्रियसुहृदं तत्रापि हृदयनिहितैः मनसि स्थापितैः तत्-सन्देशैः तस्य भर्त्तुः सन्देशैः त्वत्समीपम् आगतं भर्त्तृसन्देश-कथनार्थमागतमित्यर्थः अम्बुवाहं मेघं विद्धि जानीहि। न केवलमहं वार्त्ताहरः किन्तु घटकोऽपीत्याशयेनाह यः अम्बुवाहः अबलानां स्त्रीणां वेणयः तासां मोक्षे मोचने उत्सुकानि पथि श्राम्यतां श्रान्तिमापन्नानां प्रोषितानां प्रवासिनां पान्थानामित्यर्थः वृन्दानि सङ्घान् मन्द्रस्निग्धैः गम्भीरश्राव्यैः ध्वनिभिः गर्ज्जितैः करणैः त्वरयति। पान्थोपकारिणो मे किमु वक्तव्यं सुहृदुपकारित्वमिति भावः। ३६।

অয়ি অবিধবে! আমাকে তোমার পতির প্রিয় বন্ধু হৃদয়ে স্থাপিত (অর্থাৎ অবিস্মৃত) তাঁহার (তোমার পতির) সংবাদ লইয়া তোমার নিকট আগত মেঘ বলিয়া জানিও, যে মেঘ (আগমনের দ্বারা) অবলাগণের বিরহসূচক বেণী মোচনে উৎসুক, পথে শ্রান্তিযুক্ত প্রবাসী

(অর্থাৎ পান্থ) গণসমূহকে গম্ভীর সুশ্রাব্যধ্বনি দ্বারা ত্বরান্বিত করে (অর্থাৎ যে মেঘ সাধারণ পান্থদিগেরও উপকারক অতএব বন্ধুর কথা আর কি বক্তব্য)। ৩৬।

Oh unwidowed lady! know me as a cloud the dear friend of your husband, that has reached you with your husband's tidings gathered up in his heart (*i. e.*, not forgotten), a cloud that hastens the bands of way-farers, intent upon the unfastening of the braids of hair of their wives, and trudging on their (homeward) way, by means of the sonorous and sweet thundering murmurs.—36.

Notes.

1. अयि अविधवे—वि विगतः धवः पतिः यस्याः सा विधवा (प्रादिभ्यो धातुजस्य उत्तरपदलोपः इति बहुव्रीः) न विधवा अविधवा (नञ् तत्पु.) तत् सम्बोधने—Oh lady, whose husband is living.

2. मां भर्त्तुः प्रियं मित्रं—I that is a dear friend of your husband.

3. हृदयनिहितैः तत्सन्देशैः त्वत्समीपम् आगतं—हृदये मनसि निहितैः (नि+धा or हि+क्त कर्म्मणि) रक्षितैः अविस्मृतैरित्यर्थः—treasured up within my mind. तत्सन्देशैः—तस्य भर्त्तुः यच्चस्य सन्देशाः समाचाराः तैः—with his news. त्वत्समीपम् आगतम्—तव समीपं (६ तत्पु.) (सङ्गताः आपः यस्मिन् तत् द्व्यन्तरुपसर्गेभ्यः अपः ईत् इति कृतसमासान्तस्य अपः ईत् बहुव्रीः) आगतं (आङ्+गम्+क्त कर्त्तरि)—have come to you. Here भरत, सनातन, रामनाथ, हरगोविन्द read तत्सन्देशात् मनसि निहितात्—अविस्मृतात् तव संवादात् for हृदयनिहितैः &c.

4. अम्बुवाहं विद्धि—अम्बु वहति इति (अम्बु+वह+अण् कर्म्मण्यण् सूत्रेण) तं विद्धि (विद to know हि लोट्)—know me as a cloud.

5. यः—who (the cloud).

इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य सम्भाव्य चैव।
श्रोष्यत्यस्मात् परमवहिता सौम्य सीमन्तिनीनां
कान्तोदन्तः सुहृदुपगतः सङ्गमात् किञ्चिदूनः ३७।

6. अवलावेणिमोक्षोत्सुकानि—अवलानां नारीणां वेण्यः विरहवेण्यः (६ तत्पु.) अवलावेण्यः तासां मोक्षः मोचनं (६ तत्पु.) अवलावेणिमोक्षः तस्मिन् तेन वा उत्सुकानि तानि (७मी तत्पु. वा ३या तत्पु. by the rule प्रसितोत्सुकाभ्यां तृतीया च)—very eager to unfasten the pigtail (of separation) of the ladies.

7. पथिश्राम्यतां प्रोषितानां वृन्दानि—पथि भवनमार्गे श्राम्यताम् (श्रम + शतृ)—laboring in the way (to home) *i. e.*, fatigued by the journey towards home. प्रोषितानां (प्र + वस + क्त कर्त्तरि) विदेशस्थानां वृन्दानि समूहाः—crowds of sojourners.

8. मन्द्रस्निग्धैः ध्वनिभिः त्वरयति—मन्द्राश्च स्निग्धाश्च (विशेषणद्वयेनापि कर्मधारयः इष्यते इति कर्मधा) तैः ध्वनिभिः शब्दैः त्वरयति (त्वर+णिच +ति लट्)—causes to make haste by means of thundering murmurs deep and pleasing to the hearing.

9. The अलङ्कार is—अत्र पान्थोपकारिणो मे सुहृदुपकारित्वं कैमुतिकन्यायादायातमिति अर्थापत्तिः अलंकारः "दण्डापूपिकयान्यार्थागमोऽर्थापत्तिरिष्यते" इति दर्पणकृतः लक्षणात्।

10. Conjugations—

त्वर—त्वरते इत्यादि त्वर+णिच् त्वरयति अतत्वरत्।

Prose order—इति आख्याते पवनतनयं मैथिलीव सा उन्मुखी उत्कण्ठोच्छ्वसितहृदया सती त्वाम् वीक्ष्य सम्भाव्य च अस्मात् परम् अवहिता श्रोष्यति हे सौम्य! सीमन्तिनीनां सुहृदुपगतः कान्तोदन्तः सङ्गमात् किञ्चित् ऊनः। ३७।

Paraphrase—इत्येवं कथिते सति हनुमन्तं सीतेव सा मत्प्रिया उन्मुखी औत्सुक्येन विकसितचित्ता सती त्वां दृष्ट्वा सत्कृत्य च भर्तृमैत्रीज्ञापनात् परम् सर्व्वम् अप्रमत्ता सती आकर्णयिष्यति तथाहि हे साधो! वधूनां सखिमुखात् श्रुता प्रियतमवार्त्ता कान्तसंगमवत् आनन्ददायिनी । ३७ ।

Change of voice—* मैथिल्या इव तया उन्मुख्या उत्कण्ठोच्छ्वसितहृदयया च सत्या * अवहितया श्रोष्यते * सुहृदुपनतेन कान्तोदन्तेन ऊनेन भूयते । ३७ ।

Sanjivani—भर्तृसख्यादिज्ञापनस्य फलमाह इतीति । इति एवम् आख्याते सति पवनतनयं हनूमन्तं मैथिली सीतेव सा मत्प्रिया उन्मुखी उत्कण्ठया औत्सुक्येन उच्छ्वसितहृदया विकसितचित्ता सती त्वां वीक्ष्य सम्भाव्य सत्कृत्य च अस्मात् भर्तृमैत्रीज्ञापनात् परं सर्व्वं श्रोतव्यम् अवहिता अप्रमत्ता सती श्रोष्यत्येव । अत्र सीताहनूमदुपमानात् अस्याः पातिव्रत्यं मेघस्य दूतगुणसम्पत्तिश्च व्यज्यते (तद्गुणास्तु रत्नाकरे ब्रह्मचारी बली धीरो मायावी मानवर्ज्जितः । धीमानुदारो निःशङ्को वक्ता दूतः स्त्रियां भवेदिति ।) ननु वार्त्तामात्रश्रवणात् अस्याः को लाभ इत्याशङ्क्य अर्थान्तरं न्यस्यति हे सौम्य साधो सीमन्तिनीनां वधूनाम् (नारी सीमन्तिनी वधूरित्यमरः ।) सुहृदा सुहृन्मुखेन उपगतः प्राप्तः सुहृत्पदं विप्रलम्भशङ्कानिवारणार्थं कान्तस्य उदन्तः वार्त्ता कान्तोदन्तः (वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादित्यमरः ।) सङ्गमात् कान्तसम्पर्कात् किञ्चिदूनः ईषदूनः तद्वदेवानन्दकारीत्यर्थः ।३७।

(হে মেঘ তুমি) এইরূপ বলিলে পর হনুমান্‌কে সীতাদেবীর ন্যায় তিনি (মৎপত্নী) উন্মুখী ও ঔৎসুক্যহেতু প্রফুল্লচিত্তা হইয়া তোমাকে দেখিয়া ও সৎকৃতি (আদরাহ্বানাদি) করিয়া ইহার (অর্থাৎ পতির সহিত বন্ধুত্ব জ্ঞাপনের) পরে অবহিতা হইয়া শুনিবেন যেহেতু হে সৌম্য বন্ধুমুখপ্রাপ্ত পতিসংবাদ নারীদিগের পতি সহিত মিলনাপেক্ষা কিছু কম মাত্র (অর্থাৎ প্রায় সমান আনন্দজনক)। ৩৭।

(Oh cloud) this being said (by thee) she (my wife) raising her face and being filled with joyful eagerness at her heart will look at thee and receive thee respectfully as the daughter of the king of Mithila (*Sita*) received the son of Air (*Hanuman*) and after this (viz. the information that thou art the friend of her husband) she being attentive will hear thee (because) Oh noble-minded one! the messages from husbands reached through friends are considered by ladies as little short of the union with husbands.—37.

Notes.

N. B. The theory that our poet derived the nucleus or main idea of the मेघदूत from the हनुमत्सन्देश of रामायण is beyond doubt established by this metaphor (पवनतनयं मैथिलीवोन्मुखी सा) in the sloka.

1. इति आख्याते सति—इति सप्तम्यन्तमव्ययं भावे ७मी used as a noun here, आख्याते (आङ् + ख्या + क्त कर्त्तरि)—when thou hast said this.

2, पवनतनयम् मैथिली इव—पवनस्य तनयः (६ तत्पु.) हनुमान् the famous follower of राम। मैथिली or सीता the daughter of मैथिल or prince of मिथिला (सीरध्वज जनक)—as *Sita* looked on *Hanuman*. The allusion relates to the discovery of *Sita* in *Asoka* forest in *Lanka* by *Hanuman* the envoy of

Rama. *Mithila* was the ancient capital of विदेह or North-east partof Bihar bounded by the rivers *Gandaki* and *Kosi.* The modern name of Mithila is, *Tirhoot* A few centuries ago *Mithila* was the famous seat of the culture of न्याय and स्मृति । Mr. A. R. Barooah is of opinion that on the north-east of वैशाली lay the kingdom of विदेह with its capital मिथिला ।

3. सा उन्मुखी उत्कण्ठोच्छ्वसितहृदया—सा the lady (my wife) उन्मुखी (उत् = उन्नतं मुखं यस्याः सा प्रादिभ्यो धातुजस्य उत्तरपदलोपश्च इति बहुव्री)—having lifted up her face, उत्कण्ठोच्छ्वसितहृदया उत्कण्ठया उच्छ्वसितम् (उत् + श्वस + क्त कर्मणि) (३या तत्पु.) उत्कण्ठोच्छ्वसितं हृदयं यस्याः सा (बहुव्री)—having her heart raised with eagerness.

4. त्वां वीक्ष्य सम्भाव्य च—त्वां (वि + ईक्ष + ल्यप्) वीक्ष्य—looking carefully at thee, सम्भाव्य च (सम + भू + णिच् + ल्यप्)—receiving hospitably. भरत, सनातन and others read सम्भाष्य for सम्भाव्य and explain स्वागतं भवतः इत्यादिना आलप्य ।

5. अस्मात् परम् अवहिता सती श्रोष्यति एव—अस्मात् परयोगे पञ्चमी विभक्तिः; अवहिता (अव + धा + क्त कर्त्तरि + आप्) अप्रमत्ता attentive—she will surely hear attentively what you have to say after thou hast addressed her as भर्तुर्मित्रं &c. Mallinath here remarks that by the metaphor of Sita and Hanuman the purity and chastity of मेघ and the यक्षwife are indicated.

6. हे सौम्य—Oh gentle one.

7. सीमन्तिनीनां—सीमन्तः केशवीथिका अस्ति आसाम् (सीमन् + अन्त निपातनात् सीमन्त + इनि)—of the ladies.

8. सुहृदुपगतः—सु सुष्टु हृदयं यस्य सः सुहृद् (सुहृद्दुर्हृदौ मित्रामित्रयोः इति हृदादेशः) सुहृदा उपगतः (उप + गम + क्त कर्मणि) (३या तत्पु.)

तामायुष्मन् मम च वचनादात्मनश्चोपकर्त्तुं
ब्रूया एवं तव सहचरो रामगिर्य्याश्रमस्थः ।
अव्यापन्नः कुशलमबले पृच्छति त्वां वियुक्तः
पूर्व्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ॥ ३८।

—received from a friend. भरत, हरगोविन्द, कल्याणमल्ल read सुहृदुपनतः for सुहृदुपगतः and explain मित्रेण आनीतः ।

9. कान्तोदन्तः—कान्तस्य उदन्तः (६ तत्पु.)—the news of husband.

10. सङ्गमात् किञ्चिदूनः—सङ्गमात् (सम + गम् + अप भावे) ऊन शब्दयोगे ५मी विभक्तिः—falls little short of a meeting, that is almost as pleasing as an interview.

11. The अलङ्कार is अर्थान्तरन्यासः । अत्र प्रथमार्द्धे उपमा द्वितीये अर्थान्तरन्यासः स च कारणेन कार्य्यसमर्थनरूपः सामान्येन विशेष समर्थनरूपो वा ।

12. Conjugations—

श्रु—see XI. पूर्व्वमेघ ।

Prose order—हे आयुष्मन् मम च वचनात् आत्मनश्च उपकर्त्तुं भवान् ताम् एवं ब्रूयात् हे अबले ! तव सहचरः रामगिर्य्याश्रमस्थः वियुक्तः किन्तु अव्यापन्नः त्वां कुशलं पृच्छति सुलभविपदाम् प्राणिनाम् एतदेव पूर्व्वाभाष्यम्।३८।

Paraphrase—हे श्लाघ्यजीवित ! मम प्रार्थनया च परोपकारेण आत्मानं कृतार्थयितुञ्च भवान् तां मत्प्रियाम् इत्थं कथयेत् हे अबले तव भर्त्ता प्राणवियोगदुःखोऽपि अमृतः चित्रकूटं पर्व्वतमधिवसति तत्रस्थितश्च त्वां कुशलं पृच्छति अयत्नसिद्ध विपत्तीनां देहिनां कुशलमेव प्रथममवश्यम् प्रष्टव्यम् । ३८ ।

Change of voice—* सा एवम् उच्येत (भवता) तव सहचरेण रामगिर्य्याश्रमस्थेन वियुक्तेन अव्यापन्नेन त्वं कुशलं पृच्छ्यसे *एतेनैव पूर्व्वाभाष्येण भूयते । ३८ ।

Sanjivani—सम्प्रति सन्दिशति तामिति। हे आयुष्मन् (प्रशंसायां मतुप्।) परोपकारश्लाघ्यजीवित इत्यर्थः मम वचनं प्रार्थनावचनं तस्माच्च आत्मनः स्वस्य उपकर्त्तुञ्च परोपकारेण आत्मानं कृतार्थयितुमित्यर्थः (उपकारक्रियां प्रति कर्म्मत्वेऽपि तस्यानुपकरोतीत्यादिवत् सम्बन्धमात्रविवक्षायामात्मन इति षष्ठी न विरुध्यते यथाह भारविः सा लक्ष्मीरुपकुरुते यया परेषामिति तथा श्रीहर्षश्च साधूनामुपकर्त्तुं लक्ष्मीं द्रष्टुं विहायसा गन्तुम्। न कुतूहलिकस्य मनश्चरितं च महात्मनां श्रोतुमिति। तथा च क्वचित् द्वितीयादर्शनात् सर्व्वत्र तथेति नाथवचनमनाथवचनमेव।) तां प्रियाम् एवं ब्रूयाः किमिति हे अबले तव सहचरः भर्त्ता रामगिरेः चित्रकूटस्य आश्रमेषु तिष्ठतीति रामगिर्य्याश्रमस्थः सन् अव्यापन्नः न मृतः वियुक्तः वियोगं प्राप्तः दुःखी एवंविधः सन् त्वां कुशलं पृच्छति (दुह्यादित्वात् पृच्छतेर्द्विकर्म्मकत्वम्।) तथाहि सुलभविपदाम् अयत्नसिद्धविपत्तीनां प्राणिनाम् एतदेव कुशलमेव पूर्व्वाभाष्यं प्रथममवश्यं वक्तव्यम्। कृत्याश्चेत्यावश्यकार्थे ण्यत्प्रत्ययः। ३८।

হে আয়ুষ্মন্ মেঘ! আমার বাক্যানুসারে ও (পরোপকার করিয়া) স্বীয় উপকার করিবার জন্য (অর্থাৎ আপনাকে ধন্য করিবার জন্য) তাঁহাকে (মৎপত্নীকে) এইরূপ বলিবে অয়ি অবলে তোমার সহচর (স্বামী) রামগিরি পর্ব্বতের আশ্রমে অবস্থিত ও মৃত্যুমুখে পতিত না হইয়া (অর্থাৎ জীবন ধারণ পূর্ব্বক) ও (তোমা হইতে) বিযুক্ত

হইয়া তোমার কুশল জিজ্ঞাসা করিয়াছেন যে হেতু সুলভবিপদ্ প্রাণিদিগের ইহাই (কুশল প্রশ্নই) প্রথম জিজ্ঞাস্য বিষয়। ৩৮।

Oh cloud mayst thou live long ! in consequence of my request and in order to acquire thy personal merit (by doing good to others), accost her (my wife) in the following manner " Oh lady ! your companion (husband) who is aliv and is living in the hermitage of the mountain called *Ramagiri*, and also separated from you, has asked you about your welfare because this is the first topic to be asked with regard to the creatures who are doomed to be objects of diverse calamities.—38.

Notes.

1. हे आयुष्मन्—दीर्घजीविन् (आयुस + मतुप्)—Thou that mayest live long !

2. मम वचनात् च आत्मनः उपकर्त्तुं च—मम मेघस्य वचनात् वाक्यात् ल्यप् लोपे पञ्चमी च—in accordance with my words, आत्मनः स्वस्य मेघस्य उपकर्त्तुं (उप + कृ + तुमुन्) Mallinath notes that though आत्मनः is the object of उपकर्त्तुं yet it takes the 6th case ending by simple सम्बन्ध विवक्षा along with passages सा लक्ष्मीरुपकुरुते यया परेषां—भारवौ। साधूनाम् उपकर्त्तुम् इत्यादि—श्री हर्षः Nath's remark in this case is incorrect.—also in order to acquire merit by doing good to others.

3. ताम् एवं ब्रूयाः—tell her in the following manner.

4. अयि अबले—नास्तिबलं यस्याः सा बहुव्रीः तत्सम्बोधने—Oh lady !

5. तव सहचरः रामगिर्य्याश्रमस्थः—रामगिर्य्याश्रमे तिष्ठति यः सः (रामगिर्य्याश्रम + स्था + क कर्त्तरि) your companion (consort) is in the hermitage of Ramgiri or चित्रकूट for the note and allusion see the 1st stanza of पूर्व्वमेघ before.

6. अव्यापन्नः वियुक्तः सन्—(नञ् + वि + आ + पद् + क्त कर्त्तरि)= अव्यापन्नः अमृतः जीवितः इत्यर्थः—not perished वियुक्त (वि + युज् + क्त कर्त्तरि)—separated (from his wife) भरत. राम. and हर. read वियुक्तास् for वियुक्तः।

7. त्वां कुशलं पृच्छति—asks you about your welfare. प्रच्छ is द्विकर्मक and hence the two objects.

8. सुलभविपदाम् प्राणिनाम्—सुलभाः (सु + लभ + खल् कर्मणि) विपदः (वि + पद + क्विप् भावे) येषां ते तेषां (बहुव्री)—subject to constant dangers, प्राणिनाम् (प्र + अन + अल् करणे = प्राणाः ते सन्ति येषाम् ते तेषाम् ;—living beings.

9. एतदेव पूर्व्वाभाष्यम्—एतदेव कुशलप्रश्नः एव—the enquiry of welfare ; पूर्व्वम् यथातथा आभाष्यम् (आङ + भाष् + ण्यत् कर्मणि) सुपसुपेति समासः।—is to be asked first. सना. कल्याण. वल्लभ and others read पूर्व्वाशास्यं for पूर्व्वाभाष्यं and explain प्रथमम् आशंसनीयम्। तव सहचरस्ते कुशलं कामयते इत्येव वाक्ये सुलभविपदाम् एतदेव पूर्व्वाशास्यम् पूर्व्वं प्रार्थनीयम् इत्येव युज्यते, कुशलं पृच्छति इत्येव वाक्ये, सुलभविपदाम् एतदेव पूर्व्वाभाष्यं पूर्व्वं प्रष्टव्यम् इत्येव युज्यते अतः मल्लिनाथधृतः पाठः सुसंगतत्वात् समीचीनः भवतादि धृतः पाठस्तु समर्थसमर्थक वाक्ययोः भिन्नजातीयत्वात् न सुसंगतः इति सुधीभिर्विभाव्यम्।

N. B. भरत राम. हर and others read the last line thus : —भूतानां हि क्षयिषु करणेष्वाद्यमाशास्यमेतत् and explain as follows : —भूतानां प्राणिनां क्षयिषु नश्वरेषु करणेषु शरीरेषु एतत् कुशलं आद्यम् प्रथमम् आशास्यम् आशंसनीयम् अवधानीयं जीवने सति मङ्गलादिकं सर्व्वम् भविष्यति इति भावः।

10. The अलङ्कार is—सुलभविपदां देहिनां प्रथमं कुशलप्रश्नः कर्त्तव्यः इति सामान्येन यक्षपत्नी सुलभविपत् देहिनी अतस्या अपि प्राक् कुशलप्रश्न एव कार्य्यः इति सामान्येन विशेष समर्थनरूपः अर्थान्तरन्यासः।

11. Conjugation—भाष—भाषते। बभाषे। अभाषिष्ट।

अङ्गेनाङ्गं प्रतनु तनुना गाढ़तप्तेन तप्तं
साश्रेणाश्रुद्रुतमविरतोत्कण्ठमुत्कण्ठितेन ।
उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्त्ती
सङ्कल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ।३९।

Prose order—किञ्च दूरवर्त्ती वैरिणा विधिना रुद्धमार्गः सन् स ते सहचरः तनुना गाढ़तप्तेन साश्रेण उत्कण्ठितेन समधिकतरोच्छ्वासिना अङ्गेन प्रतनु तप्तं अश्रुद्रुतं अविरतोत्कण्ठम् उष्णोच्छ्वासम् अङ्गं तैः संकल्पैः विशति ३९

Paraphrase—किञ्च दूरस्थः विरोधिना दैवेन प्रतिबद्धवर्त्मा स ते भर्त्ता कृशेन अत्यन्तसन्तप्तेन साश्रुणा सञ्जातोत्कण्ठेन दीर्घनिश्वासिना क्षामं वियोगदुःखसृष्टम् अश्रुक्लिन्नम् अविच्छिन्न विरहवेदनं तीव्रनिश्वासं त्वदीयम् शरीरं स्वसंवेद्यैः मनोरथैः समीकरोति । ३९ ।

Change of voice—किञ्च दूरवर्त्तिना * रुद्धमार्गेण सता तेन ते सहचरेण * अङ्गेन * अङ्गं विश्यते । ३९ ।

N. B. विशति इत्यस्य कर्म्मपदम् अङ्गम् । अङ्गेन करणतृतीया संकल्पैः उपलक्षणे तृतीया ।

Sanjivani—अङ्गेनेति । किञ्च दूरवर्त्ती दूरस्थः न च आगन्तुं शक्यते इत्याह वैरिणा विरोधिना विधिना दैवेन रुद्धमार्गः प्रतिबद्धवर्त्मा स ते सहचरः तनुना कृशेन गाढ़तप्तेन अत्यन्तसन्तप्तेन साश्रेण साश्रुणा उत्कण्ठा वेदना अस्य जाता उत्कण्ठितं तेन उत्कण्ठितेन (तदस्य सञ्जातमित्यादिना इतच्प्रत्ययः । उत्कण्ठतेर्वा कर्त्तरि क्तः ।) समधिकतरम् अतिप्रबलम् उच्छ्वसितीति समधिकतरोच्छ्वासि तेन दीर्घनिश्वासिनेत्यर्थः (ताच्छील्ये

विनिः) अङ्गेन स्वशरीरेण प्रतनु कृशं तप्तं वियोगदुःखेन प्लुष्टम् अस्रद्रुतम् अश्रुक्लिन्नम् (अश्रु नेत्राम्बु रोदनञ्चास्रमस्रु चेत्यमरः।) अविरतोत्कण्ठम् अविच्छिन्नवेदनम् उष्णोच्छ्वासं तीव्रनिश्वासम् (तिग्मं तीक्ष्णं खरं तीव्रं चण्डमुष्णं पटु स्मृतमिति हलायुधः।) अङ्गं त्वदीयं शरीरं तैः स्वसंवेद्यैः सङ्कल्पैः मनोरथैः विशति एकीभवतीत्यर्थः। अत्र समानुरागित्वद्योतनाय नायकेन नायिकायाः स्वसमानावस्थत्वमुक्तम्। ३९।

পুনশ্চ (আরও) দূরবর্ত্তী প্রতিকূল দৈব কর্ত্তৃক রুদ্ধগতি তোমার সেই সহচর (অর্থাৎ পতি) কৃশ অতিতাপযুক্ত অশ্রুপ্লুত উৎকণ্ঠা-সমন্বিত দীর্ঘ নিশ্বাসসম্বলিত স্বশরীরদ্বারা অতিকৃশ তাপযুক্ত অশ্রুক্লিন্ন অবিরতোৎকণ্ঠাযুক্ত উষ্ণশ্বাসপূর্ণ তোমার শরীরে সেই (অর্থাৎ স্বানুভবগম্য) অভিলাষের সহিত প্রবিষ্ট হয় (অর্থাৎ মনঃসংকল্পবশে একীভাব প্রাপ্ত হয়) ৩৯।

Residing far off, with his path blocked up by unlucky destiny he (your companion) with his body ematiated, highly heated, tearful, filled with anxiety, full of long drawn sighs, joins by means of those (known to himself) thoughts, with your body which is very ematiated, heated, besmeared with tears, full of incessant anxiety filled with hot sighs.—39.

Notes.

1. किञ्च दूरवर्त्ती वैरिणा विधिना रुद्धमार्गः—किञ्च अपरञ्च—moreover दूरवर्त्ती दूरे वर्त्तते यः सः (दूर+वृत्+णिनि कर्त्तरि)—residing at a distance, वैरिणा प्रतिकूलेन विधिना दैवेन—by the inauspicious

-fate रुद्धमार्गः रुद्धः (रुध + क्त कर्म्मणि) मार्गः यस्य सः (बहुव्रौ)— having the way prohibited.

2. (स तव सहचरः)—he your companion (from the previous sloka).

3. तनुना गाढ़तप्तेन सास्रेण—तनुना कृशतापन्नेन—slender (owing to the separation). गाढ़ं यथा तथा तप्तं (तप् + क्त कर्त्तरि) तेन सुप्सुपेति समासः—highly heated, सास्रेण—अस्रेण सह वर्त्तमानं सास्रं (तुल्ययोगे बहुव्रौ) तेन—full of tears, all adjectives of अङ्गेन।

4. उत्कण्ठितेन समधिकतरोच्छ्वासिना अङ्गेन—उत्कण्ठा वेदना सञ्जाता अस्याः इति (उत्कण्ठा + इतच् "तदस्य सञ्जातम्" इति तारकादित्वात् इतच्) तेन—filled with anxious longing, समधिकतरोच्छ्वासिना समधिकतरम् यथा तथा उच्छ्वसिति इति (समधिकतर + उत + श्वस् + णिनि ताच्छील्ये उपपद ततपु.) समधिकतरोच्छ्वासि तेन—having heavy sighs, both adjectives to अङ्गेन—with my body.

5. प्रतनु तप्तम् अस्रद्रुतम्—प्रतनु अतिकृशं—very slender तप्तम् विरहाग्निसन्तप्तं—heated by the separation. अस्रेण द्रुतम् (३या ततपु.) विगलिताश्रु—overflown with tears (all adjectives of अङ्गं।

6. अविरतोत्कण्ठम् उष्णोच्छ्वासम् अङ्गं—न विरता अविरता (नञ् ततपु.) अविरता उत्कण्ठा यस्य यस्मिन् वा तत (बहुव्रौ)—having continuous or incessant anxiety. उष्णोच्छ्वासं उष्णः उत्तप्तः उच्छ्वासः निश्वासः यस्य यस्मिन् वा तत् (बहुव्रौ)—having hot sighs. भरत, रामनाथ, हरगोविन्द, कल्याणमल्ल read दीर्घोच्छ्वासं for उष्णोच्छ्वासम् and this is considered better by Pandit Vidyasagar, both adjective to अङ्गं—the body of the wife of यक्ष।

7. तैः संकल्पैः विशति—तैः आत्मना अनुभवसिद्धैः—known and felt by himself alone; although तद् and यद् are correlative

शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्
कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात् ।
सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृश्य-
स्त्वामुत्कण्ठाविरचितपदं मन्मुखेनेदमाह ॥४०॥

terms yet here तैः does not require यैः by the dictum प्रक्रान्त प्रसिद्धानुभूतार्थविषयः तच्छब्दः यदुपादानं नापेक्षते । संकल्पैः अभिलाषैः—with the desires, भरत, रामनाथ, हरगोविन्द, कल्याणमल्ल read संकल्पैस्तैः for संकल्पैस्तैः and connects ते with अङ्गं विशति । The सारोद्धारिणी सुमति. explain संकल्पैः as चुम्बनदर्शनादिव्यापारैः । विशति एकीभवति अभिन्नतया सङ्गच्छते इति भावः—unites and forms one complete whole as it were.

8. The अलङ्कार is:—अत्र स्वसमानावस्थत्ववर्णनमुखेन समानुरागित्व प्रकटनरूप वस्तुध्वनिः अनुप्रासालङ्कारश्च ।

9. Conjugation—

विश्—विशति, विवेश अविशत् ।

Prose order—हे अबले यस्ते प्रियः सखीनां पुरस्तात् आननस्पर्शलोभात् शब्दाख्येयमपि यत् तत् कर्णे कथयितुं लोलः अभूत् किल श्रवणविषयम् अतिक्रान्तः तथा लोचनाभ्याम् अदृश्यः सन् स ते प्रियः त्वाम् उत्कण्ठाविरचितपदम् इदं मन्मुखेन आह । ४० ।

Paraphrase—हे अबले ! यस्ते सहचरः सखीनामग्रे त्वदधरपानलोभात् उच्चैर्वाच्यमपि यत् अभूत् तत् वचनं कर्णे अभिधातुं लोलुपः अभूत् किल, कर्णपथम् अतिक्रान्तः नेत्राभ्यामदृश्यः सः ते प्रियः त्वाम् उत्कण्ठाविरचितपदम् इदं वक्ष्यमाणं वचः मद्द्वारा वधानेन ब्रूते । ४० ।

Change of voice—हे अबले ! येन ते प्रियेण शब्दाख्येयेनापि येन अभावि तत् कर्णे कथयितुं लोलेन अभावि * अतिक्रान्तेन * अदृश्येन तेन ते प्रियेण * इदम् उच्यते । ४० ।

Sanjivani—सम्प्रति स्वावस्थानिवेदनाय प्रस्तौति शब्दाख्येयमिति। हे अबले यः ते प्रियः सखीनां पुरस्तात् अग्रे आननस्पर्शे त्वन्मुखसम्पर्के लोभात् गार्द्ध्यात् अधरपानलोभादित्यर्थः शब्दाख्येयं शब्देन रवेण आख्येयम् उच्चैर्वाच्यम् अपि यत् तद्वचनमपीति शेषः कर्णे कथयितुं लोलः लालसः अभूत् किल (लोलुपो लोलुभो लोलो लालसो लम्पटोऽपिचेति यादवः।) श्रवणविषयं कर्णपथम् अतिक्रान्तः तथा लोचनाभ्याम् अदृश्यः अतिदूरत्वात् द्रष्टुं श्रोतुञ्च न शक्य इति भावः स ते प्रियः त्वाम् उत्कण्ठया विरचितानि पदानि सुप्तिङन्तशब्दाः वाक्यानि वा यस्य तत् तथोक्तम् (पदं शब्दे च वाक्ये चेति विश्वः।) इदं वक्ष्यमाणं श्यामास्वङ्गमित्यादिकं मन्मुखेन आह मद्‌व्यवधानेन स एव ब्रूते इत्यर्थः। ४०।

(হে অবলে) তোমার যে প্রিয় (পতি) সখীদিগের অগ্রে তোমার মুখস্পর্শ লোভ হেতু (মুখচুম্বন লালসায়) শব্দোচ্চারণের দ্বারা কথনযোগ্য কোন বাক্য কর্ণে বলিবার জন্য বাস্তবিক লোলুপ হইত সেই প্রিয় (এক্ষণে) কর্ণপথাতিক্রান্ত ও চক্ষুদ্বয়ের অগোচরে অবস্থিত হইয়া তোমাকে উৎকণ্ঠাহেতু রচিতপদসমন্বিত এই (পরশ্লোকোক্ত) বাক্য আমার (মেঘের) মুখ দিয়া বলিতেছে। ৪০।

(Oh lady !) who, (your husband) in the presence of the female friends, was really desirous of whispering in your ear words which might be uttered audibly, in order to have a touch of your face, tells you through my voice, this message composed out of anxiety, being placed out of the reach of your hearing and out of the range of your sight.—40.

Notes.

1. यः ते सखीनां पुरस्तात्—पुरस्तात् an indeclinable meaning before, in front of—who in the presence of the female companions. Pandit Vidyasagar remarks that the word ते is here useless and ought to be तद्—the correlative of यद् in यदपि। अत्र उपयोगरहितप्रयोगवारणाय अशक्तिद्योतकाध्याहार-दोषपरिहाराय च "शब्दाख्येयं यदपि किल ते" इत्यत्र "शब्दाख्येयं यदपिकिल तत्" इत्येवं पाठः प्रकल्प्यताम् तथा सति निखिलं निर्मलं स्यात्।

2. आननस्पर्शलोभात्—आननस्य स्पर्शः (६ तत्पु.) आननस्पर्शे लोभः (७मी तत्पु.) तस्मात् हेतौ ५मी विभक्तिः—through the desire of touch of the face that is a kiss.

3. शब्दाख्येयम् अपि यत्—शब्दैः आख्येयं (आ + ख्या + य कर्मणि) वाच्यं (३या तत्पु.)—what was a fit topic of being spoken out.

4. कर्णे कथयितुं लोलः अभूत्—was very willing to whisper in the ear.

5. श्रवणविषयम् अतिक्रान्तः—श्रवणयोः (श्रु + अनट् करणे) कर्णयोः विषयः (वि + सि + अच् कर्त्तरि) गोचरः (६ तत्पु.) तं अतिक्रान्तः (अति + क्रम + क्त कर्त्तरि)—who has passed out of the range of hearing.

6. लोचनाभ्याम् अदृश्यः—नयनाभ्याम् अदृश्यः (नञ् + दृश + य or आ कर्मणि) अग्राह्यः—unperceived by the eyes *i. e.*. out of the range of eye sight owing to the long distance.

7. स त्वाम्—he (your husband) you (the lady).

8. उत्कण्ठाविरचितपदम् इदं—उत्कण्ठया विरचितानि (वि + रच् + क्त कर्मणि) ग्रथितानि (३या तत्पु.) उत्कण्ठाविरचितानि पदानि यस्य यस्मिन् वा तत् तत् (बहुव्री)—the words of which are composed through the anxiety of separation, adjective to इदं—this message viz. the next stanza.

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान्।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्मिन्क्वचिदपि न ते चण्डि सादृश्यमस्ति॥४१॥

9. मन्मुखेन आह—मम मुखं (६ तत्पु.) तेन करणे तृया—through my mouth (*i. e.*, voice or speech) आह—(ब्रू + ति लट्) ब्रूवः पञ्चानाम् इति) कथयति alternative form ब्रवीति—speaks.

10. The अलङ्कार is—अत्र यः प्राक् तादृश आसीत् सः अधुना ईदृशः अभूत् इति यचस्य क्रमेण दशान्तरापातात् विशेषालंकारः—

"क्वचिदेकमनेकस्मिन् अनेकं चैकगंक्रमात्
भवति क्रियते वा चेत् विशेषालंकृतिः स्मृता" ॥

इति दर्पणलक्षणात् ।

11. Conjugations—

ब्रू—ब्रवीति आह लङ् अब्रवीत्। Except the सार्व्वधातुक वच is replaced in the place of ब्रू।

Prose order—श्यामासु अङ्गम् चकितहरिणीप्रेक्षणे दृष्टिपातं, शशिनि वक्त्रच्छायां,शिखिनां बर्हभारेषु केशान् प्रतनुषु नदीवीचिषु भ्रूविलासान् उत्पश्यामि हन्त हे चण्डि क्वचिदपि एकस्मिन् न ते सादृश्यमस्ति ।४१ ।

Paraphrase—प्रियङ्गुलतां सौकुमार्य्यादिसाम्यात् ते शरीरयष्टिरिति उत्पश्यामि चाञ्चल्यवैपुल्यादिगुणयोगात् चकितहरिणीविप्रेक्षितं ते चक्षुरिति आह्लादकत्वादिसादृश्यात् चन्द्रं ते मुखमिति बर्हकलापं तैस्तैर्गुणैस्ते केशपाशमिति प्रतनुतरङ्गान् ते भ्रूविलासान् इति उत्पश्यामि हन्त क्वचिदपि एकस्मिन् वस्तुनि ते सादृश्याभावात् न निर्वृणोमि प्रत्युत अनुपमे ते सौन्दर्य्ये सादृश्याद् यन्नानात् त्वां प्रकोपयामि । ४१ ।

Change of voice—• दृष्टिपातः * वक्त्रच्छाया • केशाः • भ्रूविलासाः उद्दृश्यन्ते • सादृश्येन न भूयते । ४१ ।

Sanjivani—सदृशप्रतिकृतिस्वप्नदर्शनतदङ्गस्पृष्टस्पर्शाख्याश्चत्वारो विरहिणां विनोदोपायाः तथाचोक्तं पताकायां वियोगे चायोगे प्रियजनसदृशानुभवनं ततश्चित्रं कर्म्म स्वपनसमये दर्शनमपि । तदङ्गस्पृष्टानामुपगतवतां स्पर्शनमपि प्रतीकारोऽनङ्गव्यथितमनसां कोऽपि गदित इति । तत्र सदृशवस्तुदर्शनमाह श्यामास्विति । श्यामासु प्रियङ्गुलतासु (श्यामा तु महिलाह्वया । लता गोवन्दनो गुन्द्रा प्रियङ्गुः फलिनी फलीत्यमरः) । अङ्गं शरीरम् उत्पश्यामि सौकुमार्य्यादिसाम्यात् अङ्गमिति तर्कयामीत्यर्थः तथा चकितहरिणीनां प्रेक्षणे दृष्टिपातं शशिनि चन्द्रे वक्त्रच्छायां मुखकान्तिं तथा शिखिनां बर्हिणां बर्हभारेषु बर्हसमूहेषु केशान् प्रतनुषु स्वल्पासु नदीनां वीचिषु (अत्र वीचीनां विशेषणोपादाने न अनुक्तगुणग्रहदोषः भ्रूसाम्यनिर्वाहाय महत्त्वदोषनिराकरणार्थत्वात् तस्य तदुक्तं रसरत्नाकरे ध्वन्युत्पादे गुणोत्कर्षे भावोक्तौ दोषवारणे । विशेषणाद्विशेष्यस्य नास्त्यनुक्तगुणग्रह इति । गुणो विशेषणम्)। भ्रूविलासान् भ्रूपताका इति पाठे भ्रुवः पताका इवेत्युपमितिं समासः उत्पश्यामीति सर्व्वत्र सम्बध्यते । तथापि नास्ति मनोनिर्वृतिरित्याशयेनाह हन्तेति हन्त विषादे (हन्त हर्षेऽनुकम्पायां वाक्यारम्भ-

विषादयोरित्यमरः)। हे चण्डि कोपने (चण्डस्त्वत्यन्तकोपन इत्यमरः। गौरादित्वात् ङीष्)। उपमानकथनमात्रेण न कोपितव्यमिति भावः क्वचिदपि एकस्मिन्नपि वस्तुनि ते तव साद्दश्यं नास्ति अतो न निर्वृणोमीत्यर्थः। अनेन अस्य सौन्दर्य्यमनुपममिति व्यज्यते। ४१।

শ্যামা লতাতে (সৌকুমার্য্য বশতঃ) তোমার অঙ্গ, ও চকিতহরিণী নয়নে তোমার দৃষ্টি, ও চন্দ্রে তোমার মুখকান্তি এবং ময়ূরগণের পুচ্ছভারে তোমার কেশপাশ, এবং মৃদু নদীতরঙ্গে তোমার ভ্রূবিলাস অনুমান করি (অর্থাৎ এই গুলি দেখিয়া তোমার ঐ সকল অবয়ব মনে পড়ে) কিন্তু কি দুঃখ! অয়ি কোপনে একত্র কোথাও তোমার সাদৃশ্য নাই। ৪১।

I perceive your body in the *Shyama* creeper (on account of its tender gracefulness), your sight in the eyes of frightened doe, your graceful appearance of the face in the moon, your locks of hair in the bunches of the plumes of pea-cocks, and the amorous movements of your eyebrows in the short ripples of rivers but alas! Oh indignant lady! all your likenesses are not present in any one object.—41.

Notes.

N. B. There are four means of consolation for the separated person viz (1) objects similar to the beloved (2) portraits of the beloved (3) dreaming of the beloved and (4) the touch of an object previously touched by the beloved, Mallinath here cites a passage from *Pataka* enumerating these four ways of consolation. Our poet in the present stanza takes up the first.

1. श्यामासु अङ्गम्—श्यामा or प्रियङ्गु is a creeping plant bearing blue flowers—(the likeness of) your limbs in the श्यामा creeper (because the creeper is noted for tender graceful form)this and all the following are connected with उत्पश्यामि—I fancy or think.

2. चकितहरिणीप्रेक्षणे दृष्टिपातं—चकिता हरिणी (कर्मधा) तस्याः चकितहरिण्याः प्रेक्षणं (प्रेक्ष्यते अनेन इति प्र+ईक्ष+अनट् करणे) (६ष्ठी तत्पु.) तस्मिन् दृष्टेः पातः (६ तत्पु.) तं—your glances in the eyes of the frightened doe. C. f. this with stanza 19th. भरत, रामनाथ, हरगोविन्द,कल्याणमल्ल read चकितहरिणीप्रेक्षिते and explain प्रेक्षितं दर्शनम् तस्मिन् ।

3. शशिनि वक्त्रच्छायां—शशः कलङ्कः पशुविशेषः वा अस्ति अस्य इति (शश+इनि) तस्मिन् चन्द्रे, उच्यते अनेन इति (वच+त्र करणे) वक्त्रं तस्य छाया कान्तिः तां—the glory of the face in the Moon. "Comparing a beautiful face to the Moon" remarks Prof. Wilson "has been supposed peculiar to oriental poets, instances however may be found in English verse. भरत and others read गण्डच्छायां for वक्त्रच्छायाम् । The सारोद्धारिणी notes कान्तिमत्त्वात् आनन्दकत्वाच्च शशिना साम्यम् ।

4. शिखिनां बर्हभारेषु केशान्—बर्हाणाम् भाराः तेषु (६ तत्पु.)—your hairs in the copious plumes of pea-cocks.

5. प्रतनुषु नदी वीचिषु भ्रूविलासान्—प्रतनुषु विरलेषु, उत्तालेषु साम्याभावात् नद्याः वीचयः तरङ्गाः (६ तत्पु.) तेषु—in the small ripples of river भ्रुवोः विलासाः (६ तत्पु.) तान्—the amorous movements of the eye brows. Mallinath remarks that the poet is not open to the charge of अशक्तगुणग्रह दोष by the addition of the

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥४२॥

adjective प्रतनु to नदीवीचि in as much as the epithet dispels the idea of vastness of the billow (वीचि) and thereby is subservient to the comparison with eye movement. Some read भ्रूपताकाः for the समास see Mallinath.

6. उत्पश्यामि—conjecture or fancy; this is connected with all the above.

7. हन्त—alas; what a pity.

8. हे चण्डि—Oh lady who is very prone to anger.

9. क्वचिदपि एकस्मिन्—no where in one substance.

10. न ते सादृश्यम् अस्ति—समानः इव दृश्यते इति (समान + दृश + टक् कर्मणि) सदृशः तस्य भावः सादृश्यम्—your likeness is not present.

11. The अलङ्कार is—अत्र आरम्भस्य निर्वृतिलाभस्य न केवलं वैफल्यं प्रत्युत तत्कोपोत्पत्तिरूपानर्थस्य सम्भवः इति विषमालंकारः "यत्रारम्भस्य वैकल्य मनर्थस्य च सम्भवः" इति लक्षणात्।

12. Conjugations—

अस्—अस्ति बभूव, अभूत्, अस्तेर्भू इति सूत्रेण।

Prose order—हे प्रिये! प्रणयकुपितां त्वां धातुरागैः शिलायाम् आलिख्य आत्मानं ते चरणपतितं कर्तुं यावत् इच्छामि तावत् मुहुः उपचितैः अस्रैः मे दृष्टिः आलुप्यते क्रूरः कृतान्तः तस्मिन्नपि नौ सङ्गमं न सहते। ४२।

Paraphrase—हे प्रिये! स्वल्पमपि विनयस्खलं समुत्प्रेक्ष्य कुपितावस्थायुक्तां त्वत्प्रतिकृतिम् धातुरूपैः रञ्जकद्रव्यैः क्वचित् शिलापट्टे निर्माय मत्प्रतिकृतिं चित्रगतायास्ते चरणपतितां कोपशान्तये •लेखितुं यावत् अभिलषामि तावत् इच्छासमकालमेव प्रवृद्धैः अश्रुभिः मे दृष्टिः आव्रियते हन्त नृशंसं दैवं चित्रेऽपि आवयोः सहवासं न सहते। ४२।

Change of voice—* इष्यते तावत् मुहुः उपचितानि अस्राणि मे दृष्टिः आलुम्पन्ति क्रूरेण कृतान्तेन * * सङ्गमः न सह्यते। ४२।

Sanjivani—सम्प्रति प्रतिकृतिदर्शनमाह त्वामिति। हे प्रिये प्रणयेन प्रेमातिशयेन कुपितां कुपितावस्थायुक्तां त्वां त्वत्प्रतिकृतिमित्यर्थः धातवः गैरिकादयः (धातुर्वातादिशब्दादिगैरिकादिष्वजादिष्विति यादवः)। त एव रागाः रञ्जकद्रव्याणि (चित्रादिरञ्जकद्रव्ये लाक्षादौ प्रणयेच्छयोः। सारङ्गादौ च रागः स्यादारव्ये रञ्जने पुमानिति शब्दार्णवे)। तैः धातुरागैः शिलायां शिलापट्टे आलिख्य निर्माय आत्मानं मां मत्प्रतिकृतिमित्यर्थः ते तव चित्रगताया इत्यर्थः चरणपतितं कर्त्तुं तथा लिखितुं यावत् इच्छामि तावत् इच्छासमकालं मुहुः उपचितैः प्रवृद्धैः अस्रैः अश्रुभिः कर्त्तृभिः (अस्रमश्रुणि शोणिते इति विश्वः।) मे दृष्टिः आलुप्यते आव्रियते इत्यर्थः ततः दृष्टिप्रतिबन्धात् लेखनं प्रतिबध्यते इति भावः क्रूरः घातुकः (नृशंसो घातुकः क्रूर इत्यमरः।) कृतान्तः दैवम् (कृतान्तो यमसिद्धान्तदैवाकुशलकर्मस्वित्यमरः।) तस्मि-

नापि चित्रेऽपि नौ आवयोः (युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नाविति नावादेशः।) सङ्गमं सहवासं न सहते। सङ्गमलेखनमप्यावयोरसहमानं दैवमावयोः साक्षात् सङ्गमं न सहते इति किमु वक्तव्यम् इति अपिशब्दार्थः। ४२।

শিলাফলকে গৈরিকাদিরঞ্জক দ্রব্য (রঙ্গ) দ্বারা প্রণয়কুপিতা তোমাকে লিখিয়া (আঁকিয়া) যখন আপনাকে (নিজের প্রতিকৃতিকে) তোমার চরণে (কোপশান্তির জন্য) পতিত অঙ্কিত করিতে ইচ্ছা করি তখনই পুনঃ পুনঃ প্রবৃদ্ধ অশ্রুজলে আমার দৃষ্টি আবৃত হয়, নিষ্ঠুর দৈব তাহাতেও (অর্থাৎ চিত্রেও) আমাদের মিলন সহ্য করে না (অর্থাৎ প্রতিকূল দৈববশতঃ প্রকৃতমিলন দূরে থাকুক চিত্রেও মিলন হয় না)। ৪২।

Having painted you full of amorous anger, on a slab of stone, by means of mineral colouring substances, no sooner I wish to paint me fallen at your feet (in order to appease you) than my vision is obscured by incessantly flowing tears, (hence) inclement Fate does not suffer our meeting even in this (picture .—42.

Notes.

N. B. In some editions occur the following sloka explained by भरत and others, which is considered a spurious interpolation—

धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्य बाले
दूरीभूतं प्रतनुमपि मां पञ्चबाणः क्षिणोति।
घर्म्मान्तेऽस्मिन् विगणय कथं वासराणि व्रजेयु
र्दिक्संसक्तप्रविततघनव्यस्तसूर्य्यातपानि॥

"धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्य बाले" इत्यादिः श्लोकः भरतादिभिः काव्यस्य अङ्गत्वेन व्याख्यातः ईदृशः अप्रासङ्गिकः श्लोकः महाकवेः कालिदासस्य काव्याङ्गमित्यश्रद्धेयम् । प्रसङ्गश्चात्र सादृश्याद्युपायचतुष्टयम् इति सुधीभिर्विभाव्यम् ।

"शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्" इत्येवम् अपपाठः मल्लिनाथेन धृतः पाठानुसारिणी च व्याख्या तेन कृता नैतन्मे विश्वासपदवीमवतरति मन्ये पाण्डुलिपिं वाचयितुमक्षमेण केनचित् एवं यथाबोधं मुद्रितम् । अधुनापि अकृतसंशोधनं तदवस्थमेव मुद्र्यते ।

1. Now our poet takes up the second viz. the consolation by viewing on portraits.

प्रणयकुपितां त्वां—प्रणयेन ननु वैरनिर्यातनेन कुपिता मानिनी इत्यर्थः (३या तत्पु.) ताम् एवम्भूतां त्वां तवाकृतिम्—you (*i. e.*, your portrait) angry with amorous feelings.

2. धातुरागैः शिलायाम् आलिख्य—धातवः सिन्दुरगैरिकादयः एव रागः रञ्जकद्रव्याणि तैः (रूपक कर्मधा)—having drawn on a stone slab with mineral substances for colouring stuff.

3. आत्मानं ते चरणपतितं कर्तुम् यावत् इच्छामि—आत्मानं स्वं चित्रगतम् इत्यर्थः—myself in portrait. ते तव सत्यवत्याः इत्यर्थः—you in the picture. चरणयोः पतितं (७मी तत्पु.)—fallen at the feet—while I wish to paint myself as fallen at your feet with a view to propitiate you.

4. तावत् मुहुः उपचितैः अस्रैः मे दृष्टिः आलुप्यते—तावत्—at that moment, instantly, मुहुः an indeclinable meaning repeatedly उपचितैः (उप + चि + क्त कर्त्तरि) समुत्थितैः adjective to अस्रैः or अश्रुजलैः ; मे मम दृष्टिः दर्शनम् आलुप्यते (आङ् + लुप् + ते लट् कर्मणि) आच्छाद्यते—my sight is obstructed and hence overpowered by

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु ।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिशलयेष्वश्रुलेशाः पतन्ति ॥४३॥

a constant flow of tears at once and hence I cannot paint me at your feet.

5. क्रूरः कृतान्तः—क्रूरः घातुकः निष्ठुरः इत्यर्थः कृतान्तः कृतम् अन्तयति यः सः इति(कृत + अन्त + अन कर्त्तरि)कृतान्तः दैवम् इत्यर्थः—cruel destiny.

6. अस्मिन् अपि—even in that (picture).

7. नौ सङ्गमं—नौ आवयोः सङ्गमः (सम् + गम + अप भावे) मिलनं तं—our (the यक्ष and his spouse) union.

8. न सहते—नानुमन्यते—does not brook or suffer.

9. The अलङ्कार is—अत्र सङ्गमलिखनमप्यावयोः असहमानं दैवम् आवयोः साक्षात् सङ्गमं न सहते एव इत्यर्थः कैमुतिक न्यायात् आपतितः इत्यर्थापत्तिरलङ्कारः लक्षणं तूक्तं प्राक् ।

10. Conjugations–

सह—सहते, सेहे असहिष्ट ।

Prose order—स्वप्नसन्दर्शनेषु मया कथमपि लब्धायास्ते निर्दयाश्लेषहेतोः आकाशप्रणिहितभुजं मां पश्यन्तीनां स्थलीदेवतानां मुक्तास्थूलाः अश्रुलेशाः तरुकिसलयेषु बहुशो न पतन्ति न । ४३ ।

Paraphrase—हे प्रियतमे ! मया स्वप्ने कथमपि दृष्टायास्ते गाढ़ालिङ्गनार्थम् निर्विषये प्रसारितबाहुं माम् वनदेवताः बहुशो दयमानाः विलोकयन्ति । मुक्तोपमान् अश्रुबिन्दूंश्च ताः मदमङ्गलपरिहाराय किसलयचेलाञ्चले धारयन्ति । ४३ ।

Change of voice—* मुक्तास्थूलैः अश्रुलेशैः * * बहुशो न पत्यते न । ४३ ।

N. B. वनदेवता मे जीवितेश्वरं प्रति ससमवेदनाः इति यक्षपत्न्याः हर्षः उत्पद्यते अश्रुलेशाः किसलये पतन्ति न भूमौ इति नाथस्य मरणशङ्का निवृत्ता इति तस्या युगपत् हर्षोदयात् शङ्काशान्तेश्च एकस्य भावस्य उदयः अपरस्य भावस्य प्रशमनं ध्वन्यते इति सुधीभिर्विभाव्यम् ।

Sanjivani—अधुना स्वप्नदर्शनमाह मामिति । सुप्तस्य विज्ञानं स्वप्नः (स्वप्नः सुप्तस्य विज्ञानमिति विश्वः।) सन्दर्शनं संवित् (दर्शनं समये शास्त्रे दृष्टौ स्वप्नेऽक्षिण संविदीति शब्दार्णवे।) स्वप्ना इति सन्दर्शनानि स्वप्नज्ञानानि चूतवृक्षादिवत् सामान्यविशेषभावेन सहप्रयोगः तेषु मया कथमपि महता प्रयत्नेन लब्धायाः गृहीतायाः दृष्टायाः इति यावत् ते तव निर्दयाश्लेषः गाढ़ालिङ्गनं स एव हेतुः तस्य निर्दयाश्लेषार्थमित्यर्थः (षष्ठी हेतुप्रयोग इति षष्ठी।) आकाशे निर्विषये प्रणिहितभुजं प्रसारितबाहुं मां पश्यन्तीनां स्थलीदेवतानां मुक्ताः मौक्तिकानि इव स्थूलाः अश्रुलेशाः वाष्पविन्दवः तरुकिशलयेषु अनेन चेलाञ्चलेन अश्रुधारणसमाधिर्ध्वन्यते वहुशो न पतन्तीति न किन्तु पतन्त्येव इत्यर्थः। (निश्चये नञ्द्वयप्रयोगः तथाचालङ्कारिकसूत्रं स्मृतिनिश्चयसिद्धार्थेषु नञ्द्वयप्रयोग इति । महात्मगुरुदेवानामश्रुपातः क्षितौ यदि । देशभ्रंशो महादुःखं मरणञ्च भवेद् ध्रुवमिति क्षितौ देवताश्रुपातनिषेधदर्शनात् यक्षस्य मरणाभावसूचनार्थं तरुकिशलयेषु पतन्तीत्युक्तम् । ४३ ।

স্বপ্নসন্দর্শনে মৎকর্ত্তৃক কোনওরূপে (অতি কষ্টে) পরিদৃষ্টা তোমার গাঢ় আলিঙ্গনের জন্য শূন্যে উত্তোলিত বাহুদ্বয়সমন্বিত আমাকে দেখিয়া তৎস্থানস্থ দেবতাগণের মুক্তার ন্যায় স্থূল (বড় বড়) অশ্রুবিন্দু সকল বৃক্ষের নব পল্লবে বহুবার পতিত হয় নাই কি না (অর্থাৎ নিশ্চয়ই পতিত হইয়াছে)। ৪৩।

Having seen me spreading out my arms in the sky (space) for closely embracing you acquired (seen) by me in a dream with considerable difficulty, drops of tears big like pearls of the goddesses of the place surely fall often on new sprouts of trees.—43.

Notes.

N B. Now comes the tbird, dreaming of the beloved or स्वप्नदर्शन।

1. स्वप्नसन्दर्शनेषु—स्वप्नः = निद्रितस्य ज्ञानं। सन्दर्शनं (सम् + दृश + अनट् भावे) ज्ञानं hence we see that there is a tautology in स्वप्नसन्दर्शन Mallinath remarks that such cases are covered by the rule गोबलीवर्द्द न्याय or सामान्य विशेष भाव। स्वप्नाः एव सन्दर्शनानि (रूपक कर्म्मधा)—in the vision of dreams.

2. मया कथमपि लब्धायाः—(लभ + क्त कर्म्मणि) acquired with difficulty by me.

3. ते निर्द्दयाश्लेषहेतोः—ते तव मत्पवरगाः निर् नास्ति दया यत्र सः (बहुव्री.) निर्द्दयः कठोरः गाढ़ः इति भावः, निर्द्दयः आश्लेषः (आङ + श्लिष + घञ् भावे) (कर्म्मधा) निर्द्दयाश्लेषः एव हेतुः तस्य (षष्ठी हेतु प्रयोगे इति हेतोः इत्यत्र षष्ठी) on account of your close embrace.

4. आकाशप्रणिहितभुजं मां—आकाशे प्रणिहितौ (प्र + नि + धा + क्त कर्म्मणि) (৩মীতন্ পু.) आकाशप्रणिहितौ भुजौ यस्य सः तं (बहुव्री.) —me throwing up my arms in the air.

भित्त्वा सद्यः किशलयपुटान् देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः।
आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः
पूर्व्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥४४।

5. पश्यन्तीनां स्थलीदेवतानां—(दृश् + शतृ + ङीप्) पश्यन्तीनां has मां for its object स्थली अकृत्रिमा भूमिः स्थलीनां देवताः तासां (६ष्ठीतत् पु.)—the goddesses of the place who are beholding me.

6. मुक्तास्थूलाः अश्रुलेशाः—मुक्ताः इव स्थूलाः (उपमान समासः) —as large as beads of pearls, अश्रूणां लेशाः विन्दवः (६ष्ठीतत् पु.) —drops of tears.

7. तरुकिशलयेषु—on the shoots of trees. बहुशः (बहु + शस् भूमार्थे) बहुवारं—repeatedly or often. न पतन्ति न—two negatives make a positive hence पतन्ति इत्यर्थः। For the explanation of the dictum of वामन in support of such double negatives see before (notes of the 63rd stanza of पूर्व्वमेघ.) Mallinath here cites a passage which asserts that the shedding of a drop of tear on the ground by a महात्मा or गुरु or देवता invariably gives rise to देशभंश महादुःख वा मरण and such other calamities. hence our poet had added तरुकिशलयेषु and not on the ground or भूमि।

8. The अलङ्कार is—मुक्तास्थूलाः मुक्ता इव स्थूलाः इति श्रौती उपमा किसलयेषु इत्यत्र किसलयानां चेलाञ्चलेन परिणमनात् प्रकृते अश्रुधारणे उपयोगात् परिणामोऽलङ्कारः। इति सर्व्वमवदातम्।

9. Conjugation—पत—see notes of stanza 5. पूर्व्वमेघ।

Prose order—देवदारुद्रुमाणां किशलयपुटान् सद्यो भित्त्वा तत्क्षीर-

स्तुतिसुरभय: ये वाता दक्षिणेन प्रवृत्ता: हे गुणवति! ते तुषाराद्रिवाता: पूर्वम् तव एभि: अङ्गं स्पृष्टं भवेत् यदि किल मया आलिङ्ग्यन्ते। ४४।

Paraphrase—देवदारुतरूणां पल्लवपुटान् सद्यो भित्त्वा तन्निर्यास-निष्यन्दै: सुगन्धय: ये तुषाराद्रिवायव:, एभि: त्वदङ्गं स्पृष्टमेव इति सम्भाव्य मया आश्लिष्यन्ते। ४४।

Change of voice—* * तत्किशलयस्तुतिसुरभिभि: यै: तुषाराद्रि-वातै: दक्षिणे प्रवृत्तम्, तान् तुषाराद्रिवातान् एतै: तवाङ्गेन स्पृष्टेन किल इति अहम् आलिङ्गानि। ४४।

Sanjivani—इदानीं तदङ्गस्पृष्टवस्तुस्पर्शनमाह भित्त्वेति। देवदारुद्रुमाणां किशलयपुटान् पल्लवपुटान् सद्य: भित्त्वा ये तत्क्षीरस्रुतिसुरभय: तेषां देवदारुद्रुमाणां क्षीरस्रुतिभि: क्षीरनिष्यन्दै: सुरभय: सुगन्धय: तुषाराद्रि वातत्वे लिङ्गमिदं ये वाता: दक्षिणेन दक्षिणमार्गेण (तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यानात् तृतीया समेन यातीतिवत् तत्रापि करणत्वस्य प्रतीयमानत्वात् कर्तृकरणयोरेव तृतीयेति भाष्यकार:।) प्रवृत्ता: चलिता: हे गुणवति सौशील्यसौकुमार्य्यादिगुणसम्पन्ने ते तुषाराद्रि वाता: पूर्व्वं प्राक् एभि: वातै: तव अङ्गं स्पृष्टं भवेत् यदि किलेति सम्भावितमेतदिति बुद्धेत्यर्थ: (वार्त्तासम्भाव्ययो: किलेत्यमर:।) मया आलिङ्ग्यन्ते आश्लिष्यन्ते। अत्र वायूनां स्पृश्यत्वेऽपि अमूर्त्तत्वेन आलिङ्गनायोगात् आलिङ्ग्यन्ते इत्यभिधानं यक्षस्य उन्मत्तत्वात् प्रलपितमित्यदोष इति वदन् निरुक्तकार: स्वयमेव उन्मत्तप्रलापीत्युपेक्षणीय:। ४४।

দেবদারুবৃক্ষের নব পল্লবপুট সকল সদ্যঃই ভেদ করিয়া সেই বৃক্ষের নির্য্যাসক্ষরণ সম্পর্কে সুগন্ধবিশিষ্ট যে হিমাচল বায়ু দক্ষিণ দিকে চলিতে প্রবৃত্ত হইয়াছে অয়ি গুণবতি! পূর্ব্বে যদি ইহার সহিত তোমার শরীর স্পৃষ্ট হইয়া থাকে এই বলিয়া সেই বায়ু মৎকর্ত্তৃক আলিঙ্গিত হয়। ৪৪।

Oh meritorious lady! The winds of the Himalayas which bursting at once through the new sprouts of the Devadaru trees, and being scented with the (incense) juice of the said trees, blow towards the south, are embraced by me (thinking) if per chance your body has come in contact with them before.—44.

Notes.

N. B. Now our poet describes the fourth viz तदङ्गस्पृष्टवस्तुस्पर्शन ।

1. देवदारुद्रुमाणां किसलयपुटान सद्य: भित्त्वा—देवदारव: (अविग्रह नित्यसमास:) देवदारव: एव द्रुमा: तेषां चूतवृक्षवत् प्रयोग: see स्वप्नसन्दर्शनं in the foregoing sloka किसलयपुटान् किसलया: किसलयानि वा तेषां पुटा: आवरणानि तान् (६ष्ठी तत्पु.)—the folds of the new leaves of the Deodar tree, सद्यस् an indeclinable meaning on the same day, भित्त्वा (भिद + क्त्वाच्)—bursting through at once &c.

2. ये तत् क्षीरस्रुतिसुरभय: तुषाराद्रिवाता:—क्षीरस्य निर्य्यासस्य स्रुतय: क्षरणानि (६ष्ठी तत्पु.) क्तदभिहितो भाव: द्रव्यवत् प्रकाशते इति न्यायात् स्रुतानि क्षीराणि इत्यर्थ:, तेषां द्रुमाणाम् क्षीरस्रुतय: तत्क्षीरस्रुतय: ताभि: सुरभय: सुगन्धयुक्ता: (३या तत्पु.)—तुषाराणाम् अद्रि: तुषाराद्रि: हिमाचल: तस्य वाता: वायव: (६तत्पु.)—those winds issuing from the *Hima-*

संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा
सर्व्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात्।
इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे
गाढ़ोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः॥४५॥

layas and rendered fragrant by the juice or sap of the *Deodar* tree there.

3. दक्षिणेन प्रवृत्ता—दक्षिणेन दक्षिणस्यां दिशि इत्यर्थः। According to वार्त्तिककार the तृतीया is owing to the rule प्रकृत्यादिभ्यश्चोपसंख्यानम् but according to भाष्यकार the तृतीया is करणे by the सूत्र कर्त्तृकरणयोः तृतीया—is blowing towards the southern direction.

4. हे गुणवति—गुण + मतुप् प्राशस्त्ये—Oh lady having parts.

5. ते—तुषाराद्रिवाताः—those winds.

6. पूर्व्वम् एभिः तव अङ्गं स्पृष्टं भवेत् यदि किल इति—considering that perhaps your body has been touched by these winds before by chance.

7. मया आलिङ्ग्यन्ते—मया यक्षेण (आङ् + लिन्ग अन्ते लट् कर्म्मणि) — are embraced or hugged by me. Here निरुक्तकार remarks that the यक्ष owing to his insanity is going to embrace the wind an object having no material form or density but but is denounced by Mallinath as nonsense. सूक्ष्मत्वालिङ्गनयोरभेदमजानन् निरुक्तकारः स्थाने एव मल्लिनाथेन तिरस्कृतः।

8. The अलङ्कार is—अत्र समासोक्तिः अलङ्कारः।

9. Conjugations—

आ + लिङ्ग—आलिङ्गति, आलिलिङ्ग।

Prose order—दीर्घयामा त्रियामा क्षण इव कथं संक्षिप्येत, अहरपि सर्व्वावस्थासु कथं मन्दमन्दातपं स्यात् हे चटुलनयने! इत्थं दुर्लभप्रार्थनं मे चेतः गाढ़ोष्माभिः त्वद्वियोगव्यथाभिः अशरणं कृतम्। ४५।

Paraphrase—विरहवेदनया युगशतायमाना रात्रिः कथं क्षण इव लघूक्रियेत दिनमपि सर्व्वकालेषु अत्यल्पसन्तापं कथं स्यात् स्वभावगतिः अनिवार्य्येति न स्यादेव हे चञ्चलाक्षि! इत्थम् अप्राप्यमनोरथं मे मनः अत्युत्कटोष्मिभिः विरहवेदनाभिः अनाथं कृतम्। ४५।

Change of voice—दीर्घयामां त्रियामां क्षणमिव कथं संक्षिप्येयं (वा संक्षिपेयम्) अह्नापि सर्व्वावस्थासु कथं मन्दमन्दातपेन भूयेत हे चटुलनयने इत्थं दुर्लभप्रार्थनं मे चेतः गाढोष्माः तद्वियोगव्यथाः अशरणं कृतवत्यः।

Sanjivani—संक्षिप्येतेति। दीर्घाः यामाः प्रहराः यस्यां सा दीर्घयामा विरहवेदनया तथा प्रतीयमानेत्यर्थः त्रियामा रात्रिः (आद्यन्तयो रर्द्धयामयोर्दिनव्यवहारात् त्रियामेति क्षीरस्वामी।) क्षण इव कथं केन प्रकारेण संक्षिप्येत लघूक्रियेत अहः अपि सर्व्वावस्थासु सर्व्वकालेषु इत्यर्थः मन्दमन्दो मन्दप्रकारः (प्रकारे गुणवचनस्येति द्विरुक्तिः। कर्म्मधारयवदुत्तरेष्विति कर्म्मधारयवद्भावात् सुपो लुक्।) मन्दमन्दातपम् अत्यल्पसन्तापं कथं स्यात् न स्यादेव हे चटुलनयने चञ्चलाक्षि इत्थम् अनेन प्रकारेण दुर्लभप्रार्थनम् अप्राप्यमनोरथं मे मम चेतः गाढ़ोष्माभिः अतितीव्राभिः त्वद्वियोगव्यथाभिः अशरणम् अनाथं कृतम्। ४५।

(বিরহবেদনাহেতু) দীর্ঘপ্রহরযুক্ত রাত্রি কিরূপে মুহূর্ত্তের ন্যায় সংক্ষিপ্ত হইবে (অর্থাৎ মুহূর্ত্তের মধ্যে অতিবাহিত হইবে) সর্ব্বকালেই

দিবাভাগও কিরূপে অত্যল্প তাপবিশিষ্ট হইবে, অয়ি চঞ্চলনয়নে! এই প্রকারে অসম্ভাব্য প্রার্থক আমার অন্তঃকরণ অতিতীব্র তোমার বিচ্ছেদ যন্ত্রণা দ্বারা অশরণ (আলম্বনশূন্য) হইয়াছে। ৪৫।

Oh lady with agile eye! "How the night having long Jamas or periods of three hours would be shortened as a moment, how, also, the day-time would give the very slightest amount of heat at all times" in this way (*i. e.*, with such thoughts) my mind, bent upon impossibilities is undone (or helpless) by the very acute agonies of separation from you.—45.

Notes.

1. दीर्घयामा त्रियामा—दीर्घाः यामाः प्रहराः यस्याः यस्यां वा सा (बहुव्रो)—whose *Jamas* or periods of three hours are felt as very long owing to the separation, adjective to त्रियामा—त्रयः यामाः यस्याः सा (बहुव्रो) night has been styled as having three *Jamas* only because the half Jamas at the dawn and evening are considered as भाक्त or semi day,—night.

2. क्षण इव कथं संक्षिप्येत—संक्षिप्येत (सम्+क्षिप्+ईत विधि-लिङ् कर्म्मणि)—how will be shortened or compressed as a moment. भरत, सनातन and others read क्षणमिव for क्षणः इव।

3. अहः अपि सर्व्वावस्थासु मन्दमन्दातपं कथं स्यात्—अहः अपि—the day time also, सर्व्वावस्थासु—सर्व्वाः अवस्थाः तासु (कर्म्मधा।)—at all the divisions of times, मन्दमन्दातपं—मन्द मन्दः मन्दप्रकारः "प्रकारे गुणवचनस्य" इति द्विर्भावः, although मन्दमन्दः is not a compound yet the सु (:) after the first मन्द is elided by the सूत्र "कर्म्मधारयवत् उत्तरेषु" and we get मन्दमन्दः and not मन्दामन्दः,

नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे
तत्कल्याणि त्वमपि सुतरां मा गमः कातरत्वम्।
कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥४६॥

मन्दमन्दः अत्यल्पः आतपः यस्य यस्मिन् वा तत् (बहुव्रो)—having very mild heat, कथं स्यात्—how will come to be.

4. अयि चटुलनयने—चटुले चञ्चले नयने यस्याः सा (बहुव्री) तत् सम्बोधने, नयनशब्दस्य बहुस्वरत्वात् चटुलनयनी इत्येवं पाक्षिकं रूपं न स्यात्। —Oh you with agile eyes.

5. इत्थं—दुर्लभप्रार्थनं मे चेतः—(इदम् + थमु)—in this way, दुर्लभं (दुर + लभ + खल कर्म्मणि) प्रार्थनं यस्य तत् (बहुव्री) adjective to मनः—thus my mind bent upon impossible yearnings.

6. गाढ़ोष्माभिः त्वद्वियोगव्यथाभिः—गाढ़ः तीव्रः उष्मा ज्वाला यासां ताः (बहुव्री) ताभिः—having great heat of afflictions, त्वद्वियोगव्यथाभिः तव वियोगः (६ष्ठी तत्पु.) तस्य व्यथाः ताभिः (६ष्ठी तत्पु.)—by the agony of your separation.

7. अशरणम् कृतम्—नास्ति शरणं रक्षिता यस्य तत् (बहुव्री) adjective to चेतः कृतम् (कृ + क्त कर्म्मणि)—is made helpless or unbearable.

8. The अलङ्कार is—अत्र पूर्व्वार्द्धगतवाक्यद्वयं परार्द्धगतं वाक्यं प्रति हेतुरिति वाक्यार्थहेतुकं काव्यलिङ्गम्।

9. Conjugations—

क्षिप्—क्षिप्यति क्षिपति क्षिपते, चिक्षेप चिक्षिपे, अक्षैप्सीत् अक्षिप्त।

Prose order—ननु बहु विगणयन् आत्मानम् आत्मनैव अवलम्बे हे

कल्याणि तत् त्वमपि नितरां कातरत्वं मा गमः कस्य अत्यन्तं सुखम् उपनतम् एकान्ततो दुःखं वा (उपनतम्) किन्तु दशा चक्रनेमिक्रमेण नीचैः उपरि च गच्छति । ४६ ।

Paraphrase—ननु भोः प्रियतमे शापान्ते सति एवमेवं करिष्यामीति मनसि आवर्त्तयन्नहं कथञ्चित् जीवामि जानास्येव यत् एवमवस्थोपि जीवामि तत्र ते सौभाग्यं हेतुः तस्मात् हे सुभगे त्वमपि नितरां भीरुत्वं मास्म गच्छ धैर्य्यमाधेहि अवधारय नेह संसारे तादृशः कश्चित् यः सततं सुखेन हृष्यति दुःखेन ग्लायति वा देहिनामवस्था चक्रनेमि परिपाट्या अधः उपरि च नियतं प्रवर्त्तते अतस्तादृक् सुखिनोरावयोः ईदृशि दुःखे कथं न बिभेमीत्याशङ्का निरवकाशा । ४६ ।

Change of voice—ननु बहु विगणयता (मया) आत्मनैवात्मा अव-लम्ब्यते * तत् त्वयापि * * मा गामि । * सुखेन दुःखेन वा उपनतेन (भूयते) * * दशया * गम्यते । ४६ ।

Sanjivani—नच मदीयदुर्दशाश्रवणेन भेतव्यमित्याह नन्विति । ननु इति आमन्त्रणे (प्रश्नावधारणानुज्ञानु-नयामन्त्रणे नन्वित्यमरः ।) ननु प्रिये बहु विगणयन् शापान्ते सति एवमेवं करिष्यामीति आवर्त्तयन् आत्मानम् आत्मनैव स्वेनैव (प्रकृत्यादिभ्य उपसंख्यानमिति श्या ।) अवलम्बे धारयामि यथाकथञ्चित् जीवामि इत्यर्थः तत् तस्मात् कारणात् हे कल्याणि सुभगे त्वत्सौभाग्येनैव जीवामीति भावः (वह्वादिभ्यश्चेति ङीष् ।) त्वमपि सुतराम् अत्यन्तं कातरत्वं भीरुत्वं मा गमः मा गच्छ (गमेर्माङि लुङ् । न माङ्योगे इत्यडागमाभावः ।) तादृक्सुखिनोरावयोः ईदृशि दुःखे कथं न बिभेमीत्या-

अनुयाह कस्येति कस्य जनस्य अत्यन्तं नियतं सुखम् उपनतं प्राप्तम् एकान्ततः नियमेन दुःखं वा उपनतं किन्तु दशा अवस्था चक्रस्य रथाङ्गस्य नेमिः अन्तः (चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात् प्रधिः पुमानित्यमरः।) तस्याः क्रमेण परीपाट्या (क्रमः शक्तौ परीपाट्यामिति विश्वः।) नीचैः अधः उपरि च गच्छति प्रवर्त्तते जन्तोः सुखदुःखे पर्य्यावर्त्तेते इत्यर्थः । ४६ ।

অয়ি (প্রিয়ে) বহু বিচিন্তা করিয়া (অর্থাৎ শাপান্তে এই এই করিব ইত্যাদিরূপ চিন্তা করিয়া) আপনার দ্বারায় আপনাকে ধারণ করিতেছি (অর্থাৎ কোনওরূপে জীবনধারণ করিতেছি) সেই হেতু তুমিও কল্যাণি! অত্যন্ত কাতর হইও না (দেখ) কাহার নিয়ত সুখ অথবা অবিরত দুঃখ উপস্থিত হইয়াছে? (কাহারও নহে) অবস্থা চক্রের ধারা ক্রমে নীচে ও উপরে গমন করে। ৪৬।

Oh (my lady) with diverse meditations (about my future career after the termination of the curse) I sustain myself with my own self or ego and for this reason, Oh lucky lady! be not very afflicted, (for my separation) (for) who is there that is attended by perpetual happiness or continuous misery? the lot or circumstance goes up and comes down in the manner of the circumference of a wheel.

Notes.

N. B. Now as after hearing the foregoing description of her husband the यक्षपत्नी may give up her ghost in despair so the यक्ष accosts her as follows.

1. ननु—Oh (my lady).

2. बहु विगणयन्—बहुप्रकारेण विगणयन् (वि+गण+शतृ) विवि-

न्तयन्—thinking in various ways viz. I will do so and so after meeting &c.

3. आत्मानम् आत्मना अवलम्बे—आत्मानम् स्वजीवनमित्यर्थः—my own self or life, आत्मना—प्रकृत्यादिभ्यश्चोपसंख्यानम् इति ३या—by my own self (for want of a friend) अवलम्बे—(अव + लम्ब + ए लट्) —sustain or support. हरगोविन्द reads आत्मना नावलम्बे for आत्म. नैवावलम्बे and explains आत्मना आत्मानं मनः नावलम्बे अपितु धैर्यं प्रापयामि ।

4. तत् हे कल्याणि त्वमपि सुतरां कातरत्वं मा गमः—सुतरां अतिशयितं—excessive, मा गमः = न अगमः (गम + अ लुङ्) the prefix अट् is elided by the सूत्र "न माङ्योगे"—Oh fortunate lady ! therefore do not be very much distressed (on my account .

5. कस्य अत्यन्तं सुखं एकान्ततः दुःखं वा उपनतं—अत्यन्तं निरवच्छिन्नं —perpetual, endless, एकान्ततः (एकान्त + तस् तृतीयायां) invariably—to whom has happiness or distress reached invariably or incessantly ? to no one indeed. कल्याणमल्ल reads उपगतं for उपनतं the meaning is the same.

6. दशा—the condition or circumstances.

7. चक्रनेमिक्रमेण—चक्रस्य नेमिः धारा (६ तत्पु.) तस्य क्रमः नियमः पारिपाट्यमित्यर्थः तेन प्रकृत्यादित्वात् ३या—in the manner of the circumference of a wheel (in motion) . Cf. चक्रवत् परिवर्त्तन्ते दुःखानि च सुखानि च । हितोपदेश ।

8. नीचैः उपरि च गच्छति—नीचैः and उपरि are indeclinables used as adverbs—goes or revolves upwards and downwards just as the ups and downs of human circumstances.

9. The अलङ्कार is—अत्र "ततकल्याणि त्वमपि नितरां मा गमः कातरत्वम् इत्यत्र प्रेयोऽलङ्कारः "प्रेयः प्रियतराख्यानात्" लक्षणात् । स च

शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
शेषान् मासान् गमय चतुरो लोचने मीलयित्वा।
पश्चादावां विरहगुणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ ४७।

"कस्यात्यन्तं सुखमुपनतं दुःख मेकान्ततो वा" इति कारणेन कार्य्यसमर्थनरूपमर्थान्तरन्यासं प्राणदत्वेन अपेक्षते, एष च "नीचै र्गच्छत्युपरि च दशा चक्रनेमिक्रमेण" इति द्वितीयं कारणेन कार्य्यसमर्थनरूपम् अर्थान्तरन्यासं निर्वाहकत्वेन अपेक्षते इत्येतेषाम् अङ्गाङ्गिभावेन संकरः इति सुधीभिर्विभाव्यम् ।

10. Conjugations—

गण—गणयति, गणयामास. अजीगणत, अजगणत ।

Prose order—शार्ङ्गपाणौ भुजगशयनात् उत्थिते सति मे शापान्तः अन्यान् चतुरो मासान् लोचने मीलयित्वा गमय। पश्चात् आवां विरहगुणितं तं तम् आत्माभिलाषं परिणतशरच्चन्द्रिकासु क्षपासु निर्वेक्ष्यावः । ४७।

Paraphrase—हरौ शेषशयनात् व्यपेतनिद्रे समुत्थिते सति मम शापावसानं भविष्यति त्वम् अवशिष्टान् चतुरो मासान् लोचने निमील्य धैर्य्येणातिवाहय। सङ्गमे एवमेवं करिष्यामीति विरहमनस्यावर्त्तितं तं तमावयोः मनोरथं पूर्णेन्दुमनोज्ञासु शरद्यामिनीषु भोक्ष्यावहे। ४७।

Change of voice—* शापान्तेन भविष्यते (वा भाविष्यते) * अन्ये चत्वारो मासाः * गम्यन्ताम् * आवाभ्यां विरहगुणितः स सः आत्माभिलाषः निर्वेक्ष्यते * *। ४७।

Sanjivani—नच निरवधिकमेतद्दुःखमित्याह शापान्त इति। शार्ङ्गं नाम धनुः पाणौ स्थितं यस्य तस्मिन् शार्ङ्गपाणौ विष्णौ (सप्तम्युपमानेत्यादिना बहुव्रीहिः। प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति वक्तव्यात् पाणिशब्द-

स्योत्तरनिपातः।) भुजगः शेष एव शयनं तस्मात् उत्थिते सति मे शापान्तः शापावसानम् भविष्यतीति शेषः शेषान् अवशिष्टान् चतुरो मासान् मेघदर्शनप्रभृति हरिबोधन-दिनान्तमित्यर्थः दशदिवसाधिक्यन्तु न विवक्षितमित्युक्तमेव लोचने मीलयित्वा निमील्य गमय धैर्य्येण अतिवाहय इत्यर्थः पश्चात् अनन्तरं त्वञ्च अहञ्च आवाम् (त्यदादीनि सर्व्वैर्नित्यमित्येकशेषः। त्यदादीनां मिथोद्वन्द्वे यत्परं तच्छिष्यते इति अस्मदः शेषः।) विरहे गणितम् एवमेव करिष्यामीति मनसि आवर्त्तितं तं तम् (वीप्सायां द्विरुक्तिः।) आत्मनोः आवयोः अभिलाषं मनोरथं परिणताः शरच्चन्द्रिकाः यासां तासु क्षपासु रात्रिषु निर्व्विश्याव: भोक्ष्यावहे। विशतेर्लृट्। निर्वेशो भृतिभोगयारित्यमरः।

अत्र केचित् नभोनभस्ययोरेव वार्षिकत्वात् कथमाषाढ़ादि चतुष्टयस्य वार्षिकत्वमुक्तमिति चोदयित्वा ऋतुत्वयपक्षाश्रयणादविरोध इति पर्य्यहारि तत्सर्व्वमसङ्गतम् अत्र गतशेषाश्चत्वारो मासा इत्युक्तं कविना नतु ते वार्षिका इति तस्मादनुक्तोपालम्भ एव। यच्च नाथेनोक्तं कथमाषाढ़ादिचतुष्टयात् परं शरत्काल इति तत्रापि आ कार्त्तिकसमाप्तेः शरत्कालानुवृत्तेः परिणतशरच्चन्द्रिकासु इत्युक्तं नतु तदैव शरत्प्रादुर्भाव उक्त इत्यविरोध एव।४७।

শার্ঙ্গপাণি (কৃষ্ণ) অনন্তভুজগশয়ন হইতে উত্থিত হইলে আমার শাপান্ত হইবে (অতএব) চক্ষু নিমীলিত করিয়া (অর্থাৎ ধৈর্য্যের

সহিত কোনওরূপে) অবশিষ্ট চারি মাস অতিবাহিত কর, পশ্চাৎ (অর্থাৎ মিলনানন্তর) আমরা উভয়ে শরৎকালীন সম্পূর্ণ জ্যোৎস্নাময় রাত্রিতে বিরহাবস্থায় গণিত সেই সকল আপনাদের অভিলাষ গুলি ভোগ করিব । ৪৭ ।

My curse will come to an end as soon as *Vishnu* (lit. the weilder of a bow made of horns) will arise from the bed of (*Ananta*) snake, (hence) while away the remaining four months by shutting up your eyes (that is pass the time some how with patience) afterwards (*i. e.*, when united) both of us will have the enjoyment of our those various desires, enumerated during the separation, in nights possessed of the full amount of Moon beams of the Autumn.—47.

Notes.

1. शार्ङ्गपाणौ भुजगशयनात् उत्थिते—शार्ङ्गपाणौ शृङ्गस्य इदम् इति (शृङ्ग + अण्) शार्ङ्गं धनुः specially of *Vishnu* शार्ङ्गं पाणौ यस्य सः तस्मिन् (सप्तम्युपमानोत्तरपदेत्यादिना व्यधिकरण बहुव्री) प्रहरणार्थेभ्यः परे निष्ठा सप्तम्यौ भवतः इति वार्त्तिक सूत्रात् सप्तम्यन्त पाणिशब्दस्य परनिपातः । भावे ७मी विभक्तिः—the wielder of the bow called शार्ङ्ग । भुजग-शयनात्—भुजं वक्रं गच्छति यः सः इति (भुज + गम + ड कर्त्तरि) भुजगः अनन्तदेवः एव शयनं (शी + अनट् अधिकरणे) शय्या (रूपक कर्मधा) तस्मात् अपादाने ५मी विभक्तिः उत्थिते सति जागरिते इति भावः—when rises from the bed of serpent. The whole phrase means that on the advent of the month of *Kartika* (कार्त्तिक) because the student well remembers the sloka—शेते विष्णुः सदाषाढ़े भाद्रे च परिवर्त्तते । कार्त्तिके परिबुध्येत शुक्लपक्षे हरेर्दिने ॥ Vide our notes on the 2nd stanza पूर्व्वमेघ ।

2. मे शापान्तः (भविष्यति)—शापस्य अन्तः परिशेषः (६ तत्पु)—the termination of my period of curse will come.

3. शेषान् चतुरः मासान् इत्यादि—pass the remaining four months by closing up your eyes that is with patience and without being despondent.

4. पश्चात् आवां विरहगणितं तं तम् आत्माभिलाषं—अपर+अञ्चात्= पश्चात्—after that. त्वञ्च अहञ्च आवां "त्यदादीनि सर्व्वैं नित्यम्" इति एकशेषः, now it may be asked why आवां and not युवाम्? the answer is त्यदादीनां मिथोद्वन्द्वे यत् परं तत् शिष्यते (*i. e.*, whichever is put afterwards in the विग्रह among the त्यदादि class (तद यद अस्मद &c.) in a compound, remains and the other elides.)— विरहगणितं—विरहे विरहावस्थायाम् गणितं मनसि आलोचितं (७मी ततपु.) —enu- merated and not enjoyed at the time of separation. तं तम्—वीप्सायां द्विर्भावः—those (well remembred) आत्माभिलाषं— आत्मनोः अभिलाषः तं (६ ततपु.)—those desires of us.

5. परिणतशरच्चन्द्रिकासु क्षपासु—शरदः शरत्कालस्य चन्द्रिका: ज्योत्स्नाः (६ ततपु.) शरच्चन्द्रिकाः परिणताः पूर्णाः शरच्चन्द्रिकाः यासां यासु वा ताः तासु (बहुव्री) adjective of क्षपासु रात्रिषु—during the nights filled with the moon lights of autumn, (*i. e.*, the nights which are very suitable for holding conversations).

6. निर्वेक्ष्यावः—(निर्+विश=to enjoy, + स्यावस् लृट्)—we both shall enjoy.

7. The अलङ्कार is—एतद्दुःखं न निरवधिकं नापि स्वल्पसुखोदर्कम् इति यक्षपत्न्या मासचतुष्टय यापने श्वश्रमौत्सुक्यमिति भावोदयः इति सुधीभिर्विभाव्यम् ।

N. B. Mallinath here states and criticises the opinion of some scholars. Who raising the question that why the four months commencing with आषाढ़ are called (वर्षाकाल) or the rainy season in opposition to the two श्रावण भाद्र

भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदती सस्वरं विप्रबुद्धा ।
सान्तर्हासं कथितमसकृत् पृच्छतश्च त्वया मे
दृष्टः स्वप्ने कितव रमयन् कामपि त्वं मयेति।४८।

answer the question thus :—as there are three seasons (ऋतु) instead of six so the rainy season includes the months of आषाढ़ श्रावण भाद्र and आश्विन and not the two months श्रावण and भाद्र only. But Mallinath says that all this is mere irrelevant quarrel as our poet simply states that there remain four months yet of the यक्ष's exile. Also the remark of Natha is futile in as much as शरतकाल comes after the expiry of the month of कार्त्तिक and not after आषाढ़ ।

Prose order—पुरा शयने मे कण्ठलग्नापि त्वं निद्रां गत्वा किमपि सस्वनं रुदती विप्रबुद्धा (आसीः) असकृत् पृच्छतो मे हे कितव ! त्वं कामपि रमयन् मया स्वप्ने दृष्टः इति त्वया सान्तर्हासं कथितश्चेति । ४८ ।

Paraphrase—हे अबले ! त्वद्भर्त्ता मन्मुखेन पुनरपि इदं ब्रवीति एकदा शयने मे बाहुपाशेन धृतकण्ठापि त्वं निद्रां प्राप्य केन वा निमित्तेन उच्चैः क्रन्दन्ती जागरिताभूः बहुशः रोदनकारणं जिज्ञासमानाय मे हे शठ त्वं कामपि विपक्षरमणीं रमयन् मया स्वप्ने दृष्टः इति त्वया सहासं प्रत्युक्तश्चेति ।

Change of voice—* कण्ठलग्नयापि त्वया निद्रां गत्वा * रुदत्या विप्रबुद्धया अभूयत । * * त्वां कामपि रमयन्तं दृष्टवती इति सान्तर्हासं कथितवत्यसि इति मन्मुखेन त्वद्भर्त्रा भूयश्चोच्यते । ४८ ।

Sanjivani—सम्प्रति तस्या मेघवञ्चकत्वशङ्कानिरासाय अतिगूढमभिज्ञानमुपदिशति भूय इति । हे अबले भूयः पुनरपि आह त्वद्भर्त्ता मन्मुखेनेति शेषः मेघवचनमेतत्

किमित्यत आह पुराशब्दश्चिरातीते (स्यात् प्रबन्धे चिरातीते निकटागामिके पुरेत्यमरः ।) पुरा पूर्व्वं शयने मे कण्ठलग्नापि त्वं गले बद्धस्य कथमपि गमनं न सम्भवेदिति भावः निद्रां गत्वा किमपि केन वा निमित्तेन इत्यर्थः सस्वरं सशब्दम् उच्चैरित्यर्थः रुदती सती विप्रबुद्धा आसीरिति शेषः । असकृत् बहुशः पृच्छतः रोदनहेतुमिति शेषः मे मम हे कितव त्वं कामपि रमयन् मया स्वप्ने दृष्ट इति त्वया सान्तर्हासं समन्दहासं यथा तथा कथितश्च इति त्वङ्कर्त्ता भूयश्चाहेति योजना । ४८ ।

(হে অবলে! তোমার পতি আমার দ্বারায়) পুনঃ বলিয়াছেন যে পূর্ব্বে তুমি শয্যায় আমার কণ্ঠলগ্না হইয়া নিদ্রিতা হইয়া কোনও কারণ বশতঃ উচ্চৈঃস্বরে ক্রন্দন করিয়া জাগরিতা হইয়াছিলে, পুনঃ পুনঃ (ক্রন্দনেরহেতু) জিজ্ঞাসা করাতে আমাকে গূঢ়হাস্যের সহিত বলিয়াছিলে ' হে শঠ, অন্যা কোনও রমণীর সহিত রমণে নিযুক্ত তোমাকে স্বপ্ন দেখিয়াছি (সেই হেতু ক্রন্দন করিয়াছি)। ৪৮ ।

And also he (your husband) has said "some time ago you with your arms round my neck, after sleeping on a bed awoke with loud crying for some reason and in reply to my repeated questions (as to the cause of crying), you told me with a suppressed smile "Oh deceiver ! in a dream I saw you in the act of sexual enjoyment with another female.—48.

Notes.

N. B. नेघो विश्वस्तवाक् इति प्रमाणयितुम् यक्षः अन्यैः अविदितम् उइदं करोति न पुनः पुनरपि पत्नीमाश्वासयति। Now the यक्ष informs

the cloud of the गूढ़ाभिज्ञान or secret sign unknown to all except his wife so that his wife will put her trust upon the messenger and will not consider him a deceiver.

1. भूयः चाह—भूयः (बहु + ईयसुन) पुनः चाह (ब्रू + ति लट्)—he says also, the following through me.

2. पुरा शयने मे कण्ठलग्ना अपि त्वम्—कण्ठे लग्ना (७मी तत्पु.)—you who having embraced me were in the bed some time ago; as you encompassed my neck with your arms it was surely impossible for me to go away from your bedstead. भरत, हरगोविन्द Wilson and others read the line भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे as follows:—भूयश्चापि त्वमसिशयने कण्ठलग्ना पुरा मे and explain अपि एवं सम्भाव्यते पुनश्च शयने शय्यायां मम कण्ठलग्ना कण्ठा-सक्ता त्वं पुरा असि भविष्यसि पुरा शब्दयोगे भविष्यति वर्त्तमानप्रयोगः । आश्वासवचनमेतत् । Pandit Vidyasagar thinks the अपि in त्वमपि as a mistake for अयि । अयि being the vocative particle addressed by the यक्ष to his wife.

3. निद्रां गत्वा किमपि &c.—किमपि केन निमित्तेन—for some reason not known to the यक्ष । सस्वरं स्वरेण सह वर्त्तमानं (तुल्य-योगे बहुव्री) यथा तथा। रुदती सती विप्रबुद्धा (वि + प्र + बुध् दिवादि आत्मनेपदी + क्त कर्त्तरि + आप्) बभूविथ इति शेषः—having slept woke up crying aloud for some reason. Instead of सस्वरं scholiasts like भरत, कल्याणमल्ल &c. read सत्वरम् ।

4. असकृत् पृच्छतः मे—न सकृत् असकृत् बहुवारम्—of me that has been asking repeatedly.

5. हे कितव त्वं &c.—Oh cheat! I have seen you enjoying sexual intercourse with another lady in my dream.

6. इति त्वया सान्तर्हासं कथितम्—अन्तर्गतः हासः अन्तर्हासः (गति

एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा
मा कौलीनादसितनयने मय्यविश्वासिनी भूः।
स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगा-
दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ ४९ ।

समासः "अन्तर् अपरिग्रहे" इति सूत्रेण) अन्तर्हासेन सह वर्त्तमानं तत् यथा तथा (तुल्ययोगे बहुव्रो) adverb to the verb कथितम्—this she told me smiling inwardly.

7. The अलङ्कार is :—

त्वमपि इत्यत्र अपिशब्दः निरुपयोगः अतः अस्थानस्थपदता दोषः कण्ठ- लग्नापि इत्यत्र चोपयोगः मल्लिनाथेन तथा व्याख्यातम् इत्यलं विस्तरेण ।

8. Conjugations—

बुध—vide the 27 stanza.

Prose order—एतस्मात् अभिज्ञानात् मां कुशलिनं विदित्वा हे असित- नयने ! कौलीनात् मयि अविश्वासिनी माभूः । किमपि स्नेहान् विरहे ध्वंसिनः आहुः, किन्तु ते अभोगात् विरहे इष्टे वस्तुनि उपचितरसाः प्रेमराशी- भवन्ति । ४९ ।

Paraphrase—एतस्मात् विश्वासजनकात् अभिज्ञानात् मां क्षेमवन्तं ज्ञात्वा हे चञ्चलाचि ! एतावता कालेन ते पतिर्गतासुः नोचेत् आगच्छति इत्येवं लोकप्रवादात् मन्मरणशङ्किनी माऽभव । नापि विप्रकर्षात् पूर्ब्बत्ते इमिवृत्तिः शङ्कनीया प्रीतौः अन्योन्यविप्रकर्षे सति विनश्वरा वदन्ति, ते किमपि जानन्ति न आप्तवाचः । ते स्नेहा विरहे अभोगात् इष्टे वस्तुनि वर्द्धिताः वियोगासहा भवन्ति इति हि तथ्यम् । ४९ ।

Change of voice—* * अविश्वासिन्या मा भावि । किमपि स्नेहाः ध्वंसिन उच्यन्ते किन्तु तैः * उपचितरसैः प्रेमराशीभूयते । ४९ ।

अयं श्लोकः इत्थमपि व्याख्यायताम् । अहं जीवामि इति पूर्व्वोक्तैः

णाभिज्ञानैः त्वया सम्यक् विदितं जीवितेनापि एतवता कालेन तेन अन्यासक्तचित्तेन त्वम् समुपेक्ष्यसे इत्येवं लोकापवादेन त्वयि मे स्नेहनिवृत्तिः न शङ्कनीया अन्यत् सुगमम् ।

Sanjivani—एतस्मादिति । एतस्मात् पूर्व्वोक्तात् अभिज्ञायतेऽनेनेति अभिज्ञानं लक्षणं तस्य दानात् प्रापणात् मां कुशलिनं क्षेमवन्तं विदित्वा ज्ञात्वा हे असित-नयने कुले जनसमूहे भवात् कौलीनात् लोकप्रवादात् एतावता कालेन परासुर्नोचेत् आगच्छतीति जनप्रवादादित्यर्थः (स्यात् कौलीनं लोकवादे युद्धे पश्वहिपक्षिणामित्यमरः ।) मयि विषये अविश्वासिनी मरणशङ्किनी मा भूः न भव (भवतेर्लुङ् न माङ्योगे इत्यडागमप्रतिषेधः ।) नच दीर्घकालविप्रकर्षात् पूर्व्वस्नेहनिवृत्तिः शङ्का इत्याह स्नेहानिति किमपि किंवा निमित्तं न विद्यते इति शेषः स्नेहान् प्रीतीः विरहे सति अन्योन्य-विप्रकर्षे सति ध्वंसिनः विनश्वरान् आहुः तत् तथा न भवतीति अभिप्रायः किन्तु ते स्नेहा अभोगात् विरहे भोगाभावात् हेतोः (प्रसज्यप्रतिषेधेऽपि नञ्समास इष्यते ।) इष्टे वस्तुनि विषये उपचितः रसः स्वादः येषु ते उपचितरसाः सन्तः प्रवृद्धतृष्णा इत्यर्थः (रसो गन्धे रसः स्वादे तिक्तादौ विषरागयोरिति विश्वः ।) प्रेमराशीभवन्ति वियोगासहिष्णुत्वमापद्यन्ते इत्यर्थः । स्नेहप्रेम्णोरवस्था-भेदाद्भेदः तदुक्तम् आलोकनाभिलाषौ रागस्नेहौ ततः प्रेमा । रतिशृङ्गारौ योगे वियोगतो विप्रलम्भश्चेति । तदेव स्फुटीकृतं रसाकरे प्रेमा दिदृक्षा रम्येषु तच्चिन्ता

त्वभिलाषकः। रागस्तत्सङ्गबुद्धिः स्यात् स्नेहस्तत्प्रवण-क्रिया। तद्वियोगासहं प्रेम रतिस्तत्सहवर्त्तनम्। शृङ्गार-स्तत्समं क्रीड़ा संयोगः सप्तधा क्रमादिति। ४९।

অয়ি কৃষ্ণনয়নে! এই (পূর্ব্বোক্ত) অভিজ্ঞান (চিহ্ন অর্থাৎ রহস্যকথন) দানহেতু আমাকে কুশলী জানিয়া লোকপ্রবাদ (অর্থাৎ এতদিনে পতি মরিয়াছেন নচেৎ আসিতেন) বশতঃ আমার বিষয়ে অবিশ্বাসিনী হইও না (অর্থাৎ আমার মৃত্যু হইয়াছে কিংবা স্নেহ লোপ হইয়াছে এরূপ বিশ্বাস করিও না (লোকে) বিরহ হইলে স্নেহ ধ্বংস প্রাপ্ত হয় (অকারণ) বলিয়া থাকে কিন্তু (বাস্তবিক) সেই স্নেহ ভোগাভাব হেতু ঈপ্সিত পদার্থে বর্দ্ধিতরস হইয়া প্রেমরাশীরূপে পরিণত হয়। ৪৯।

Oh black eyed lady! being informed of my welfare by the offering of this sign (of secret occurrence) do not be in doubt, (as regards my life or my fidelity) on account of (unfavourable rumours; people assert but groundlessly that loves vanish away in separation but in reality the loves, owing to the want of enjoyment, are gathered into a mass of affection towards the beloved object, after being increased in attraction.—49.

Notes.

1. एतस्मात् अभिज्ञानदानात्—एतस्मात् पूर्व्वश्लोकोक्तात् from this viz the foregoing, अभिज्ञायते निश्चीयते अनेन इति (अभि + ज्ञा + अनट् करणे) अभिज्ञानं तस्य दानं तस्मात्—the giving of this (secret and hence infallible) sign or token.

2. मां कुशलिनं विदित्वा—(कुशल + इनि प्राशस्त्ये) कुशली तम्—knowing me well in health.

3. हे असितनयने—न सिते असिते (नञ् तत्पु.) असिते नयने

यस्याः सा तत्सम्बोधने—Oh lady having black (hence beautiful) eyes!

4. कौलीनात्—कुले जनसङ्घाते भवं (कुल + खञ् or यीन) कौलीनं तस्मात्—from rumours or reports.

5. मयि अविश्वासिनी मा भूः—मयि मद्विषये विषयाधिकरणे ७मी। अविश्वासिनी (नञ् + वि + श्वस + णिनि शीलार्थे कर्त्तरि) मत्पतिः जीवति इति यद्वा पत्युः स्नेहविलोपः जातः नायिकान्तरयोगादिति प्रत्ययहीना मा भूः न भव "न माङ्योगे" इति अट्आगमनिषेधः—do not be distrustful as to me (my life or my fidelity to you).

6. किम् अपि—without any reason, groundlessly.

7. स्नेहान् विरहे ध्वंसिनः आहुः—ध्वंसिनः(ध्वन्स् + णिनि शीलार्थे कर्त्तरि) भङ्गुरान् adjective to स्नेहान्, आहुः (ब्रू + अन्ति लट् ब्रुवः पञ्चानाम् इति पाक्षिक उस् पक्षे ब्रुवन्ति)—(people) say that affections melt away in separation.

8. ते तु अभोगात्— तु किन्तु ते स्नेहाः the loves, अभोगात् from want of expenditure by enjoyment. Mallinath here quotes the इष्टि सूत्र प्रसज्यप्रतिषेधेऽपि नञ् समासः इष्यते which means that a नञ् तत्पु. समासः is allowed even in an enforced negative (नञ्)। In order to understand this properly the student should bear in mind that there are two kinds of नञ्, (1) प्रसज्यप्रतिषेध and (2) पर्य्युदास the former is enforcing and generally does not allow a नञ् समास and the latter is subordinate or minor and very commonly allows a नञ् समास; now to justify certain exceptions to this rule runs the सूत्र of भाष्यकार। भरत. हरगोविन्द and others read विरह व्यापदस्ते ह्यभोग्या इष्टे वस्तुन्युपचितरसाः &c. for विरहे ध्वंसिनस्ते त्वभोगादिष्टे &c and take विरह व्यापदः an adjective to स्नेहान्।

आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।
साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि
प्रातःकुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥ ५०।

9. इष्टे वस्तुनि—(इष + क्त कर्म्मणि) इष्टं तस्मिन् प्रार्थिते द्रव्ये—in the object of fond desire.

10. उपचितरसाः—(उप + चि + क्त कर्म्मणि) उपचिताः उपबृंहिताः रसाः रागाः येषु ते (बहुव्रो) adjective to ते—having the attachment highly increased.

11. प्रेमराशीभवन्ति—प्रेम्णः राशयः (६ तत्पु.) प्रेमराशयः, अप्रेमराशयः प्रेमराशयः सम्पद्यमानाः कृताः (प्रेमराशि + च्वि अभूततद्भावे + भू + अन्ति प्रेमराशीभवन्ति गतिसमासः)—be formed into a mass or heap of loves.

N. B. Mallinath here cites passages from रसाकर and shews that संयोगशृङ्गाररस is divided into seven classes प्रेमा, रागः, स्नेह, प्रेम, रति, and शृङ्गार। For the definitions vide his commentary.

12. The अलङ्कार is—अत्र प्रेयोऽलंकारः "प्रेयः प्रियतराख्यानम्" इति लक्षणात् ।

13. Conjugations—ध्वन्स्—ध्वंसते । दध्वंसे । अध्वंसिष्ट ।

Prose order—प्रथमविरहोदग्रशोकां ते सखीम् एवम् आश्वास्य त्रिनयनवृषोत्खातकूटात् शैलात् आशु निवृत्तः साभिज्ञानप्रहितकुशलैः तद्वचोभिः प्रातःकुन्दप्रसवशिथिलं मम जीवितमपि धारयेथाः । ५० ।

Paraphrase—प्रथमविरहेण तीव्रदुःखां ते सखीं (मत्पत्नीम्) एवं पूर्व्वोक्तरीत्या प्रबोध्य त्र्यम्बकवृषेण यस्य शिखराणि विदार्य्यन्ते तस्मात् कैलासात् प्रत्यावृत्तः सन् सलक्षणं प्रेषितैः तस्याः वचोभिः ममापि प्रातःकुन्दकुसुममिव दुर्ब्बलं जीवितं स्थापय । ५० ।

Change of voice—* * आशु निवृत्तेन सता * * धार्य्यताम् ।

Sanjivani—इत्थं स्वकुशलं सन्दिश्य तत्कुशलसन्देशानयनमिदानीं याचते आश्वास्येति । प्रथमविरहेण उदग्रशोकां तीव्रदुःखां ते सखीम् एवं पूर्व्वोक्तरीत्या आश्वास्य उपजीव्य त्रिनयनस्य त्र्यम्बकस्य वृषेण वृषभेण उत्खाताः अवदारिताः कूटाः शिखराणि यस्य तस्मात् (कूटोऽस्त्री शिखरं शृङ्गमित्यमरः ।) शैलात् कैलासात् आशु निवृत्तः प्रत्यावृत्तः सन् साभिज्ञानं सलक्षणं यथा तथा प्रहितं प्रेषितं कुशलं येषु तैः तस्याः त्वत्सख्याः वचोभिः ममापि प्रातःकुन्दप्रसवमिव शिथिलं दुर्व्वलं मम जीवितमपि धारयेथाः स्थापय । (प्रार्थनायां लिङ् ।) । ५० ।

প্রথম বিরহে তীব্রশোকাবিষ্টা তোমার সখীকে (মৎপত্নীকে) পূর্ব্বোক্ত প্রকারে আশ্বাসিতা করিয়া, শীঘ্র শিববৃষভোৎকীর্ণ শিখরসম্পন্ন শৈল হইতে (কৈলাস পর্ব্বত হইতে) প্রত্যাবৃত্ত হইয়া (আমাকে সংবাদ দিতে ফিরিয়া আসিয়া) তাহার (তোমার সখীর) রহস্যকথনাদি চিহ্ন সহিত প্রেরিত কুশলবার্ত্তা দ্বারা প্রাতঃকালীন কুন্দপুষ্প সদৃশ শিথিল (অর্থাৎ অতিশয় দুর্ব্বল) আমার জীবনটীকেও ধারণ করাইবেক (অর্থাৎ যাহাতে আমার অতিভঙ্গপ্রবণ জীবন দৃঢ়রূপে অবস্থিত হয় তাহা করিবে) । ৫০ ।

Having consoled thy friend (my wife) afflicted with the intense agony of first separation (from me) in this (aforesaid) way and also having quickly returned from the mountain having its peaks furrowed by the bull of the God *Siva* (lit having three eyes) thou shouldst sustain (lit. hold up) my life also, as fragile as a *Kunda* flower at dawn, by means of her (my wife's) words conveying her welfare accompanied by (secret) sign.—50.

Notes.

N. B. Persuading the cloud to convey his message to his wife the यक्ष now requests to fetch him the message of his wife also.

1. प्रथमविरहोदग्रशोकां ते सखीम् एवम् आश्वास्य—प्रथमः अभुक्तः विरहः (कर्म्मधा) प्रथमविरहेण उदग्रः अतितीव्रः प्रथमविरहोद्ग्रः (३या तत्पु.) प्रथमविरहोदग्रः शोकः यस्याः सा ताम् (बहुव्री.) adjective to सखीम्—having consoled in the above mentioned manner thy friend (my wife) who has been afflicted with excrutiating agony from my separation experienced for the first time कल्याणमल्ल reads प्रथमविरहादुग्रशोकां for प्रथमविरहोदग्रशोकां and this is preferred by our Vidyasagar. आश्वास्यैनां is the other reading for आश्वास्यैवम् । त्रिनयन वृषोत्खातकूटात् शैलात् आशुनिवृत्तः—त्रीणि नयनानि यस्य स (बहुव्री) त्रिनयनः शिवः तस्य वृषः (६ष्ठीतत्पु.) त्रिनयनवृषेण उत्खातम् (उत्+खन्+क्त कर्म्मणि) त्रिनयनवृषोत्खातं (३या तत्पु.) त्रिनयनवृषोत्खातं कूटं यस्य सः (बहुव्री.) तस्मात् adjective to शैलात्—having returned quickly from the mountain which has its peaks dug up by the bull of the three-eyed God *i. e. Siva.* Some editions read शैलादस्मात् for शैलादाशु ।

2. साभिज्ञान प्रहित कुशलैः तद्वचोभिः—अभिज्ञानेन रहस्यकथनरूप चिह्नेन सह वर्त्तमानं (तुल्ययोगे बहुव्री.) साभिज्ञानं यथा तथा प्रहितं प्रेरितं (प्र+धा+क्त कर्म्मणि) सुपसुपेति समासः साभिज्ञानप्रहितं कुशलं येषु तानि तैः (बहुव्री.) adjective to वचोभिः, तस्याः यक्षपत्न्याः वचांसि तैः (६ष्ठीतत्पु.)—by her words sent to inform her welfare added with the secret sign.

3. प्रातःकुन्दप्रसवशिथिलं मम अपि जीवितं धारयेथाः—कुन्दानां

कच्चित्सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्न खलु भवतो धीरतां तर्कयामि ।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥ ५१।

प्रसवः पुष्पं (६ष्ठी तत्पु.) प्रातः प्रातःकालीनः कुन्दप्रसवः (कर्मधा) तम् इव शिथिलं भङ्गुरं (उपमान समासः) adjective to जीवितं (जीव + क्त भावे) धारयेथाः—(धृ + णिच् + ईयास् विधिलिङ प्रार्थनायाम्) दृढतया अवस्थापय इत्यर्थः—support my life which is as prone to be broken down as the stalks of the *Kunda* flowers in the morning.

4. The अलङ्कार is—लुप्तोपमा ।

5. Conjugations—धृ धारयति धारयते इत्यादि ।

Prose order—हे सौम्य ! इदं मे बन्धुकृत्यं व्यवसितं कच्चित् प्रत्यादेशात् भवतः धीरतां न तर्कयामि याचितः सन् निःशब्दोपि चातकेभ्यः जलं प्रदिशसि तथाहि सतां प्रणयिषु ईप्सितार्थक्रियेव प्रत्युक्तम् । ५१ ।

Paraphrase—हे साधो ! बन्धो मे एतत् कार्य्यम् त्वया करिष्यामीति निश्चितं किम् कथं तूष्णीम्भावः ? अथवा नैष तुष्णींभावस्ते अनङ्गीकारद्योतकः यत एष ते स्वभावः यत् याचितः वाचा अप्रतिजानान एव चातकेभ्यः जलं ददासि ; युक्तञ्चैतत् यस्मात् सत्पुरुषाणां याचकेषु प्रार्थितार्थप्रतिपादनमेव प्रतिवचनम् । ५१ ।

Change of voice—* व्यवसितवान् कच्चित् (त्वम्) * ;धीरता न तर्क्यते याचितेन सता निःशब्देनापि * * प्रदिश्यते * ईप्सितार्थक्रियया एव प्रत्युक्तेन (भूयते) । ५१ ।

अयमत्र विशदार्थः (उक्तिरामाषणं वाक्यमादेशो वचनं वचः इति शासनेन यदि आदेशप्रत्यादेशयोः एकार्थता स्यात् तर्हि अदोषेण मल्लिनाथोक्तरक्ततः निष्प्र्यो- जनस्य पाठपरिवर्त्तनप्रयासः । प्रत्यादेशात् आदेशात् करिष्यामीति प्रत्युत्तर-

वचनात् तव धीरतां गम्भीरत्वं दुरवगाहद्भुतभावत्वमिति यावत् नाहं समर्थये तर्हि कथमङ्गीकारज्ञानमित्यत्राह त्वं याचितः सन् अप्रतिजानान एव चातकेभ्यो जलं ददासि। नहि याचितः सन् त्वं दास्यामीति चातकेभ्य प्रतिजानीषे केवलं जलदानक्रिययेव प्रत्युत्तरं ददासि युक्तश्चैतदित्यादि। "प्रत्यादेशं न खलु भवतो धीरतां तर्कयामि" इति परिवर्त्तितः पाठः। भवतः धीरतां गम्भीरत्वं तुष्णीभावमिति यावत् प्रत्यादेशं प्रत्याख्यानं न तर्कयामि न समर्थये खलु, तवायं तुष्णींभावो न प्रत्यादेशद्योतकः इति कल्पित पाठ व्याख्या अधुना आधुनिकैः समालोचकैः विचार्य्यतां कस्मिन्नंशे मल्लिनाथ व्याख्या कल्पितव्याख्यायाः भिद्यते एकार्थतैव इत्यलं शुष्ककलहजनितया शिरोवेदनया।

Sanjivani—सम्प्रति मेघस्य प्रार्थनाङ्गीकारं प्रश्नपूर्व्वकं कल्पयति कच्चिदिति। हे सौम्य साधो इदं ते बन्धुकार्य्यम् (देवदत्तस्य गुरुकुलमितिवत्प्रयोगः।) व्यवसितं कच्चित् करिष्यामीति निश्चितं किम् (कच्चित् कामप्रवेदने इत्यमरः। अभिप्रायज्ञापनं कामप्रवेदनम्।) नच ते तूष्णीम्भावादनङ्गीकारं शङ्के यतस्ते स एव उचित इत्याह प्रत्यादेशात् करिष्यामीति प्रतिवचनात् (उक्तिराभाषणं वाक्यमादेशो वचनं वच इति शब्दार्णवे।) भवतः तव धीरतां गम्भीरत्वं न तर्कयामि न समर्थये खलु। तर्हि कथमङ्गीकारज्ञानं तत्राह याचितः सन् निःशब्दोऽपि निर्गर्ज्जितोऽपि अप्रतिजानानोऽपीत्यर्थः चातकेभ्यः जलं प्रदिशसि ददासि। युक्तश्चैतदित्याह हि यस्मात् सतां सत्पुरुषाणां प्रणयिषु याचकेषु विषये ईप्सितार्थक्रियैव अपेक्षितार्थसम्पादनमेव प्रत्युक्तं प्रतिवचनं क्रिया केवलमुत्तरमित्यर्थः। गर्ज्जति शरदि न वर्षति

वर्षति वर्षासु निःस्वनो मेघः। नीचो वदति न कुरुते न वदति सुजनः करोत्येव इति भावः । ५१ ।

হে সৌম্য মেঘ! তোমার বন্ধু আমার কার্য্য করিবে স্থির করিয়াছ কি? তোমার গম্ভীরভাবের কারণ (বন্ধুকার্য্য করিব না বলিয়া) প্রত্যাদেশ ইহা আমি বিবেচনা করি না। (চাতক কর্ত্তৃক) প্রার্থিত হইয়া গর্জ্জন ব্যতিরেকে (প্রতিজ্ঞা না করিয়া) তাহাদিগকে জল দিতেছ (যেহেতু) সৎপুরুষগণের যাচকগণের বিষয়ে প্রার্থিত কার্য্য সম্পাদনই প্রত্যুত্তর দান স্বরূপ হয়। ৫১।

Oh noble-minded one! Hast thou not undertaken this piece of business of me thy intimate? I do not suppose that thy taciturnity is due to rejection (not accepting to accomplish my work) although silent, thou, when begged for givest water to the *Chatakas* because the performance of the desired business is the reply of the noble-minded to the supplicants.—51.

Notes.

N. B. "We cannot help pausing here, to remark the ingenuity of the poet in the conduct of the work. He sets out with excusing the apparent absurdity of the *Jaksha's* addressing himself to a cloud as to a rational being, by introducing a pleasing and natural sentiment. The cloud has now received his charge; and some thing is expected by way of reply, expressive either of refusal or assent. To have given the cloud anything like the faculty of speech would have been straining probably over much; and we see in the above lines with what neatness *Kalidas* has extricated himself from the dilemma."—Prof. Wilson.

1. हे सौम्य ! इदम् मे बन्धुकृत्यं—हे साधो इदं पूर्व्वोक्तसन्देशहरणरूप कर्म्म मे मम बन्धोः तव मित्रस्य कृत्यं (कृ + क्यप् कर्म्मणि) कार्य्यं—here the phrase मे बन्धुकृत्यं which ought to be मेबन्धोः कृत्यं is justified by the rule सापेक्षत्वेऽपि गमकत्वात् समासः as देवदत्तस्य गुरुकुलम् ।

2. व्यवसितं कच्चित—व्यवसितं (वि + अव + सो + क्त कर्म्मणि) स्थिरीकृतम्—resolved to undertake कच्चित्—an indeclinable meaning interrogative expression of desire.

3. प्रत्यादेशात् न खलु &c.—Mallinath explains प्रत्यादेशात् as करिष्यामि इति प्रतिवचनात् but this interpretation is not a happy one, in our opinion the explanation is as follows :—प्रत्यादेशात् न करिष्यामि इति प्रतिवचनात् प्रत्याख्यानात् इति यावत् भवतः तव धीरतां गम्भीरत्वं न तर्कयामि नाहं मन्ये। हरगोविन्द explains thus न प्रत्यादेशात् अनिराकरणात् न करिष्यामीत्यकथनात् हेतोः भवतः धीरतां अवाचालतां तर्कयामि। कल्याणमल्ल reading प्रत्याख्यातुं for प्रत्यादेशात् interprets प्रत्याख्यातुं निराकर्त्तुम् इत्यर्थः। Our Vidyasàgar points out that the आकार after श is an error of the amanuensis and the word is प्रत्यादेशम् meaning प्रत्याख्यानम् and the line stands thus प्रत्यादेशन्नखलु भवतः इत्यादि—I do not think thy taciturnity resulting from the rejection of my request.

4. याचितः सन् निःशब्दः अपि—(याच् + क्त कर्म्मणि) प्रार्थितः सन् निर् नास्ति शब्दः गर्ज्जनं यस्य सः (बहुव्री)—being silent although asked for.

5. चातकेभ्यः जलं प्रदिशसि—चातकेभ्यः दानार्थदिश योगात् 8र्थी विभक्तिः। प्रदिशसि (प्र + तौदादिक दिश + सि लट्)—distributing water to chatakas.

6. सता प्रणयिषु ईप्सितार्थक्रिया एव प्रत्युक्तम्—प्रणयिषु (प्रणय + इनि) विषयाधिकरणे ७मी, ईप्सितार्थक्रिया (आप् + सन् + क्त कर्म्मणि)—ईप्सितः अभिलषितः अर्थः (कर्म्मधा) ईप्सितार्थस्य क्रिया करणम् (६ तत्पु.) एव

एतत् कृत्वा प्रियमनुचितप्रार्थनावर्त्तिनो मे
सौहार्द्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या ।
इष्टान् देशान् जलद विचर प्रावृषा सम्भृतश्री-
र्माभूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥५२॥

इति श्रीकालिदासकृतौ मेघदूते काव्ये
उत्तरमेघः ।

प्रत्युक्तम् (प्रति+वच्+क्त भावे) प्रत्युत्तरम्—the granting of the favor being the only reply to the supplicants on the part of the noble-minded persons. See the very beautifui sloka quoted by Mallinath.

7. The अलङ्कार is—अत्र तृतीयपादगतं वाक्यं द्वितीयपादगतं वाक्यं प्रति हेतुः इति वाक्यार्थहेतुकं काव्यलिङ्गम्, तच्च चतुर्थपादगतेन अर्थान्तरन्यासेन समर्थितमित्युभयोः अङ्गाङ्गीभावेन संकरः ।

8. Conjugation—

दिश—दिशति दिशते दिदेश दिदिशे । आदिक्षत् आदिक्षत ।

Prose order—हे जलद सौहार्द्दात् वा, विधुर इति मयि अनु-क्रोशबुद्ध्या वा, अनुचित प्रार्थनावर्त्तिनः मे एतत् प्रियं कृत्वा प्रावृषा सम्भृतश्रीः सन् इष्टान् देशान् विहर एवं क्षणमपि ते विद्युता विप्रयोगः मा भूत् । ५२ ।

Paraphrase—सुहृद्भावात् वा वियुक्त इति हेतोः मयि करुणाबुद्ध्या वा प्रियां प्रति मे सन्देशं हर इत्येवम् अयोग्यप्रार्थनानिर्बन्धपरस्य मे एतत् प्रियं सम्पाद्य वर्षाभिः उपचितशोभः इष्टान् देशान् विहर ममेव क्षणमपि ते विद्युता कलत्रेण वियोगः मास्तु । ५२ ।

Change of voice—* * सम्भृतश्रिया सता (त्वया) इष्टा देशाः विह्रियन्ताम् * * विप्रयोगेन मा भावि । ५२ ।

Sanjivani—सम्प्रति स्वापराधसमाधानपूर्व्वकं स्व-

कार्य्यस्य अवश्यकरणं प्रार्थयमानो मेघं विसृजति एत-दिति। हे जलद सौहार्दात् सुहृद्भावात् वा (हृद्भग-सिन्ध्वन्ते पूर्व्वपदस्य चेत्युभयपदवृद्धिः।) विधुरः वियुक्तः इति हेतोः मयि विषये अनुक्रोशबुद्धग्रा करुणाबुद्धग्रा वा अनुचिता तव अननुरूपा या प्रार्थना प्रियां प्रति सन्देशं मे हरेत्येवंरूपा तत्र वर्त्तिनः निर्बन्धपरस्य मे मम एतत् सन्देशहरणरूपं प्रियं कृत्वा सम्पाद्य प्रावृषा वर्षाभिः (स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षाः इत्यमरः।) सम्भृतश्रीः उपचितशोभः सन् इष्टान् अभिलषितान् देशान् विचर यथेष्टदेशेषु विहर इत्यर्थः (देशकालाध्वगन्तव्याः कर्म्मसंज्ञा ह्यकर्म्मणामिति वचनात् कर्म्मत्वम्। एवं भवत् चणमपि स्वल्पकालमपि ते तव विद्युता कलत्रेण इति शेषः विप्रयोगः विरहः मा भूत् मास्तु। माङि-त्याशिषि लुङ्। अन्ते काव्यस्य नित्यत्वात् कुर्य्यादाशिष-मुत्तमाम्। सर्व्वत्र व्याप्यते विद्वान् नायकेच्छानुरूपिणी-मिति सारस्वतालङ्कारे दर्शनात् काव्यान्ते नायकेच्छानु-रूपोऽयमाशीर्व्वादः प्रयुक्त इत्यनुसन्धेयम्। ५२।

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां मेघसन्देशव्याख्यायां सञ्जीवन्यामुत्तरमेघः।

হে জলদ! সৌহার্দ্দ বশতঃ অথবা বিধুর (বিযুক্ত) বলিয়া আমার প্রতি অনুগ্রহ বুদ্ধিতে অনুচিত বাক্যকারী আমার এই (সন্দেশহরণ-রূপ) প্রিয় কার্য্য সম্পাদন করিয়া বর্ষাকালহেতু প্রবর্দ্ধিতশোভাসম্পন্ন হইয়া অভিলষিত প্রদেশে বিচরণ কর (আর আমার ন্যায়) ক্ষণ-

কালের জন্যও বিদ্যুতের (স্ত্রীর পত্নীর) সহিত তোমার বিয়োগ না হউক । ৫২ ।

(Oh cloud !) being enhanced in thy beauty by the rainy season dost thou roam in thy desired regions, after having accomplished this good (viz the conveyance of the message , to me who is solicitous in unworthy prayer, either out of friendship or out of compassion for me who is separated (from wife).—52.

Notes.

1. हे जलद ! सौहार्दात् वा—सुशोभनं हृदयं यस्य सः सुहृद् (सुहृद् दुर्हृदौ मित्रामित्रयोः इति हृदयस्य हृदादेशः सुहृदः भावः (सुहृद्+अण् or ष्य, हृद्भगसिन्ध्वन्ते इति उभयपद वृद्धिः) सौहार्दं तस्मात्—Oh cloud either out of friendship.

2. विधुर इति मयि अनुक्रोशबुद्ध्या वा—(अनु+क्रुश+घञ् भावे) अनुक्रोशस्य दयायाः बुद्धिः ज्ञानं तया (६ तत्पु.)—or out of pity because I am separated.

3. अनुचितप्रार्थनावर्त्तिनः मे—न उचिता अनुचिता (नञ् तत्पु.) अनुचिता प्रार्थना (कर्म्मधा) अनुचितप्रार्थनायाम् वर्त्तते इति (अनुचितप्रार्थना +वृत्+णिनि कर्त्तरि उपपद तत्पु.) अनुचितप्रार्थनावर्त्ती तस्य adjective to मे—of me who is bent upon an unworthy favour of sending message. भरत हरगोविन्द read प्रिय समुचितं प्रार्थनं चेतसः for प्रियमनुचितप्रार्थनावर्त्तिनः and explain प्रियसमुचितं—प्रणयियोग्यम् । सनातन and महिम read प्रियसमुचितत् प्रार्थनाचेतस: and explain प्रार्थनाचेतसः अभ्यर्थनासक्तहृदयस्य । कल्याणमल्ल,सुमति,वल्लभandसारोद्धारिणी explain अनुचितप्रार्थना वर्त्म आचारः मार्गः वा यस्य सः तथा तस्य एवम्भूतस्य ।

4. एतत् प्रियं कृत्वा—having done this good.

5. प्रावृषा सम्भृतश्रीः—(प्र+वृष्+क्विप् उपसर्गस्य क्विपि दीर्घत्वम्) प्रावृष् तया करणे हेतौ वा ३या सम्भृता वर्द्धिता श्रीः शोभा यस्य सः (वहुव्री) एवम्भूतः सन्—having thy grace enhanced by the rainy season.

6. इष्टान् देशान् विचर—wander in the chosen places.

7. एवम्—in this way that is like me.

8. चणमपि ते विद्युता विप्रयोगः—thy separation from विद्युत् (lightening) for even a moment. हरगोविन्द reads क्वचिदपि for चणमपि ।

9. मा भूत्—नहि भूयात् आशिषि लुङ् न माङ् योगे इति अडागम निषेधः—may never take place.

N. B. Mallinath here cites a *sloka* from सारस्वत a treatise on Rhetoric which enjoins that at the end of a *Kabya* a benediction similar to the wishes of the hero of the Kabya is to be made use of.

10. The अलङ्कार is—अत्र समासोक्तिरलङ्कारः ।

11. Conjugations—

क्रुश—आह्वाने रोदनेच क्रोशति । चुक्रोश । अक्रुचत् ।

In some editions the following *slokas* are found but are considered spurious and not commented upon by Mallinath

इत्याख्याते सुरपतिसखःशैलकुल्यापुरीषु स्थित्वा स्थित्वा धनपतिपुरीं वासरैःकैश्चिदाप।
मत्वागारं कनकरुचिरं लचणैःपूर्व्वमुक्तैःतस्योत्सङ्गे चितितलगतां तां च दीनां ददर्श॥
तस्मादद्रेर्निगदितपथःशीघ्रमेत्यालकायां यचागारं विगलितनिभं दृष्टचिह्नैर्विदित्वा।
यत्संदिष्टं प्रणयमधुरं गुह्यकेन प्रयत्नात् तद्गेहिन्याःसकलमवदत् कामरूपी पयोदः॥
तं संदेशं जलधरवरो दिव्यवाचा चचचे प्राणा सख्या जनहितरतो रचितुं यचवध्वाः।
प्राप्योदन्तं प्रमुदितमनाःसापि तस्थौ स्वभर्तुःकेषां न स्यादभिमतफला प्रार्थना ह्युत्तमेषु॥
श्रुत्वा वार्त्तां जलदकथितां तां धनेशोऽपि सद्यःशापस्यान्तं सदयहृदयःसंविधायास्तकोपः।
संयोज्यैतौ विगलितशुचौ दंपती हृष्टचित्तौ भोगानिष्टानविरतसुखंभोजयामास शश्वत्॥
इत्थंभूतं सुचरितपदं मेघदूताभिधानं कामक्रीडाविरहितजने विप्रयुक्ते विनोदः।
मेधव्याभिज्ञतिनिपुणता बुद्धिभावः कवीनां नत्वार्य्यायाश्चरणकमलं कालिदासश्चकार॥

I.]

त्
पि

म्

ea-
ya
ya

re

प ।
॥
।
ः॥
ाः।
ु॥
ः॥
॥